श्रुतिरत्नप्रकाश and श्रुतिमतोद्योत of भट्ट श्री त्र्यम्बकशास्त्री – Edited with short Notes by कामाक्षी शर्मा of मायूरम.

⊗ – Very slightly pinholes in the margin.

कुम्भकोणम, 1910.

(14)

(1253)

Indira Gandhi National Centre for the Arts

Bill No. 5/07-08

8290-8002

168-891

DATA ENTERED
Date 26/07/08

SANS
181.4
BHA

Indira Gandhi National Centre for the Arts

KALANIDHI
Rare Book Collection
ACC No.: R-628
IGNCA Date: 28.3.08

॥ श्रीः ॥

# ॥ श्रुतिरत्नप्रकाशः ॥

## ॥ श्रुतिमतोद्द्योतश्च ॥

भट्टश्री त्र्यंबकशास्त्रिवरप्रणीतः

मायूरस्थ

कामाक्षीविरचितया

संक्षिप्तटिप्पण्या

Indira Gandhi National
Centre for the Arts

समेतः

PUBLISHED BY

***KAMAKSHI AMMA***

AT MAYAVARAM.

**Printed at the**

**SRI VIDYA PRESS, KUMBAKONAM.**

*Copy Right]* **1910.** *[Registered.*

॥ श्रीगणेशाय नमः ॥

छायानाथकरोहिणीसहचरस्वाहापतिस्वेक्षणं
हेयाधेयविलक्षणं श्रुतिशिरोवाक्यप्रमाणेक्षणम् ।
कायप्राणहृषीकबुद्धिमनसा कामान्तकं साक्षिणं
मायादूरविधूननाय सततं मायूरनाथं भजे ॥ १ ॥

चन्द्रालंकृतये जगत्प्रकृतये जन्माद्यनुख्यातये
सान्द्रानन्दविभूतये स्फुरतये स्वाभिन्नविख्यातये ।
मायूरेरतये सुतुष्टमतये मायापराभूतये
श्रेयोदाय्यभयाम्बिकाधिपतये श्रेयः परं मङ्गळम् ॥ २ ॥

त्र्यंबकशास्त्री—

अयं किल पुनादेशमण्डलमण्डनं तन्त्रचतुष्टयपारदृश्वा श्रुतिरत्नप्रकाश श्रुतिमतोद्द्योतादिनानाप्रकरणवरप्रणेता ।

विरळप्रचारतयातिदुर्लभासु एतदीयकृतिषु महता प्रयत्नेन समासादितोऽयं ग्रन्थः यथामति कामाक्षीविरचितया टिप्पण्या समयोजि ।

कामाक्षी—

इयं किल अद्वैतदीपिकायाः श्रुतिरत्नप्रकाशादिटिप्पण्याश्च प्रणेत्री मायूरपुरे कवेरजातीरवास्तव्या दुबास्रामस्वाम्ययाख्यस्य द्विजन्मनः कुलसंभवा । यः किल वर्षशतात्पूर्वतनः मायूरपुरे कवेरजातीरे दुबासग्रहारं निर्माय ब्राह्मणेभ्यो विततार ।

इयं किल यदा एकोनविंशेवर्षे स्वभर्त्रा यनमंडू बी. ए. रामलिंगय्यनाम्ना लोकान्तरं गतेन व्ययोजि । तदाप्रभृति स्वमात्रादिसाहाय्येन गीर्वाणविद्यायां चिरतराभ्यासेन पाण्डित्यमलभत । अद्यापि स्वानुजन्मना 'राव् बहुदूर् सि एस् सुब्रह्मण्यय्याख्येन पोषितैव वर्तते ॥

## ॥ श्रुतिरत्नप्रकाशः ॥

श्रीगणेशाय नमः ॥ सत्यज्ञानानंदलक्ष्यपरिच्छेदविवर्जितम् ।
अस्पृष्टानर्थमनिशमाश्रये नृहरेः पदम् ॥

ननु कथमात्मनः परिच्छेदशून्यत्वं तस्य प्रत्यक्षादिसिद्धपारमार्थिकलौकिकवियदादिविलक्षणत्वेन वस्तुतः परिच्छिन्नत्वादिति चेन्न । विमतं मिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वात् शुक्तिरूप्यवदित्यादिजीवब्रह्माभेदपरश्रुत्यनुगृहीतबलवदनुमानबाधित विषयेण प्रत्यक्षादिना वियदादेः पारमार्थिकत्वासिद्धेः । ननु किमिदं मिथ्यात्वं अनिर्वचनीयत्वंवा असत्त्वं वा सद्विविक्तत्वं वा प्रमाणाविषयत्वं वा अप्रमाणविषयत्वं वा अविद्यातत्कार्यान्यतरत्वंवा स्वात्यंताभावसमानाधिकरणतयाप्रतीयमानत्वं वा । नाद्यः अनिर्वचनीयत्वस्य निर्वचनविरहरूपत्वेन स्वाभ्युपगतव्यवहाराविरोधात् । यदिच निर्वाच्यविरहस्तथापि सत्त्वविरहो वा असत्त्वविरहोवा नाद्यः असतोऽनिर्वचनीयतापातात् । नोत्तरः ब्रह्मणोऽनिर्वाच्यतापत्तात् । अथ सदसद्विलक्षणत्वं मिथ्यात्वं तदपि न सद्रूपत्वेपि जगतोऽसद्रूपत्वाभावेन सदसदुभयविलक्षणतया सिद्धसाधनात् । अथ प्रत्येकमुभयवैलक्ष्यण्यं विवक्षितं तथापि सति सदन्तरभेदस्यासद्भेदस्यापि सिद्धत्वेन उक्तदोषतादवस्थ्यात् । एतेन सदसत्त्वानधिकरणत्वमनिर्वचनीयत्वमिति निरस्तं । प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं नयत् । गाहते तदनिर्वाच्यमाहु. वेदान्तवादिन इति चेन्न तादृशवस्तुनोऽप्रसिद्धत्वेनाप्रसिद्धविशेषणत्वात् । असत्त्वविरहे सत्त्वस्य सत्त्वविरहेऽसत्त्वस्य नियतत्वेनोभयरहितत्वस्य व्याहतत्वात् । ननु निषेधसमुच्चयस्यातात्त्विकत्वेनाभ्युपगमान्नव्याघातः । तत्प्रतियोगिनिरूपकतामात्रप्रकटनाय तत्तद्विलक्षणत्वाभिलापइति चेन्नैवं । तथासति तस्याप्यनिर्वचनीयतापातात् । यथाखलु सत्त्वासत्त्वे तव मते दुर्निरूपत्वात्

न जगतो विद्येते तथाऽनिर्वचनीयताया अपि दुर्निरूपत्वेन तदभावो ध्रुवः स्यात्। ननु असत्त्वविरहे सत्त्वमित्यादिव्याप्त्यसिद्धेः न व्याहतिरिति चेन्न। आत्मादौ व्याप्तिसंभवात्। तत्रात्मत्वप्रयुक्तं सत्त्वमिति चेत् किमिदमात्मत्वं जातिविशेषोवा सत्त्वं वा अबाध्यत्वं वा ज्ञानाधारत्वं वा स्वप्रकाशत्वं वा आत्मपदवाच्यत्वंवा तल्लक्ष्यत्वं वा। नाद्यः आत्मनएकत्वेन तत्र जातेरयोगात्। कल्पितात्मभेदसद्भावेनैव मितिचेन्न। कल्पितात्मनां पक्षनिक्षिप्ततया तस्यापादयित्वात्। न द्वितीयः साध्याविशिष्टत्वात्। नतृतीयः असति व्यभिचारात्। तस्यापि बाध्यत्वे नासत्त्वस्यास्ति बाधकमिति स्ववचनविरोधः। नच चतुर्थः पक्षैकदेशाव्यावृत्तेः। न पंचमः आत्मन्यभावात्। तद्वतस्तस्य पक्षनिक्षेपात्। स्वप्रकाशताया उपर्यपाकरणात्। न षष्ठः आत्मन्यभावात्। नान्त्यः पक्षाव्यावृत्तेः। किंच सदसद्विलक्षणत्वे मानं विवादपदं सदसद्विलक्षणमिति प्रतिज्ञायां पक्षस्याप्रसिद्धविशेषणत्वप्रसंगात्। सच्चेन्न बाध्येत असच्चेन्न प्रतीयेतेत्यर्थापत्तिरेवानिर्वचनीयत्वे मानमिति चेन्न। सच्चेदित्यत्र विवक्षितसत्तापरजातिः अबाध्यता उत ब्रह्मता वा नाद्यः तादृशजातिमतो घटादेस्तन्मते बाध्यत्वात्। न द्वितीयः आपाद्याविशिष्टत्वात्। न तृतीयः सिद्धसाधनात्। असच्चेन्न प्रतीयेतेत्यत्र असत्त्वेन प्रतीतिर्विवक्षिता उत सत्त्वेन। आद्ये असद्व्यवहारलोपप्रसंगः। द्वितीये भ्रान्तव्यवहारलोपप्रसंगः। प्रकृतादन्यात्मना प्रतीतेरेव भ्रान्तित्वात्। तत्र चान्याकारस्यासतस्सत्त्वेन प्रतिभासांगीकारात्। तस्याप्यनिर्वचनीयत्वं ब्रूम इति चेत् तदापि किं प्रकृतेनैव रूपेण प्रतीयते अन्याकारेण वा। आद्ये भ्रान्तव्यवहारलोपप्रसंगः। द्वितीये असतःसत्त्वेन प्रतीतिरनिवार्या। यदिच तस्याप्यनिर्वचनीयत्वं तदाऽनवस्था। तथाच निर्णयदर्शनं दुश्शकं प्रपद्येत। अपसिद्धान्तात्। न तृतीयः विचारासहत्वात्। तथाहि किमिदं सद्विविक्तत्वं परजातिविरहः परब्रह्मान्यत्वं

द्या असत्त्वं वा अबाध्येतरत्वं वा । नाद्यः त्वयापि जगति आविद्य-कजातेरनिवारणात् । न द्वितीयः सिद्धसाधनात् । न तृतीयः अप-सिद्धान्तात् । न चतुर्थः ब्रह्मेतरत्वाभ्युपगमे सिद्धसाधनात् । अबाध्ये-तरत्वं बाध्यत्वमितिचेत् तत्किं अन्यथा ज्ञातस्य सम्यग्विज्ञातत्वं उत प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं । नाद्यः अस्माभिरपि क्षणिकत्वा-दिना विज्ञातस्य जगतः स्थिरत्वादिना ज्ञातत्वाभ्युपगमात् । द्वितीयेऽपि किमेतद्देशकालप्रतिपन्नस्य देशकालान्तरगतप्रतिषेधप्रतियोगित्वं उत त्रिकालाखिलदेशीयनिषेधप्रतियोगित्वं । नाद्यः अंशतस्सिद्धसाध-नात् । रीत्यन्तरेणानित्यत्वादेरेवोक्तत्वात् । न द्वितीयः नित्यसर्व-गतयोः कालदेशयो स्तादृशबाधज्ञाने व्याघातात् । काचेयं प्रतिपन्नता प्रमाणप्रतिपन्नतावा भ्रान्तिप्रतिपन्नतावा । नाद्यः प्रमाणप्रतिपन्नस्य बाध्यत्वसाधने अतिप्रसंगात् । न द्वितीयः तत्र निषेधस्याभावरूपत्वे ऽत्यन्तासत्त्वापातात् । सद्विविक्तत्वस्यान्यस्या निरूपणात् । चतुर्थेऽपि यत्किंचित्प्रमाणाविषयत्वविवक्षायां सिद्धसाधनात् । यावत्प्रमाणा-विषयत्वसाधने ब्रह्मण्यतिप्रसंगः । तस्य परैरदृश्यत्वाभ्युपगमात् । प्रमाणाविषयत्वे प्रपंचस्य पक्षीकरणायोगाच्च । प्रत्यक्षादिसिद्धत्वात्त-स्य पक्षतेति चेन्न । प्रत्यक्षादेरतत्वावेदकत्वे मानाभावात् । विषया-सत्त्वादेव तत्सिद्धिरिति चेन्न तस्यैवासिद्धेः । किंच अतत्वावेदकं प्रमाणं चेत् व्याघातः । अन्यथा शुक्तिरजतादिज्ञानस्य प्रमाणता किं न स्यात् प्रमाणं चेन्नातत्वावेदकं । न पंचमः सर्वं क्षणिकमित्या-दिभ्रमविषयत्वस्य जगतो स्माभिरभ्युपगमात् । भ्रमैकप्रतीतत्वं वि-वक्षितमिति चेन्न । तथासति अत्यन्तासत्त्वापत्तेः अपसिद्धान्तात् ना-पि षष्ठः अविद्यायाः लक्षणतः प्रमाणतश्च दुर्निरूपत्वात् । न सप्तमः अत्यन्ताभावपदेनासत्त्वविवक्षायामपसिद्धान्तापातात् । तदतिरिक्त-स्याप्रसिद्धत्वात् । भाववैलक्षण्यं तदर्थ इतिचेन्न ततएवा सत्त्वापत्त्या दत्तदोषानिस्तारात् । तस्मान्न मिथ्यात्वं सुवचमितिपूर्वपक्षग्रंथः ॥

सिद्धान्तारंभः ॥ १ अत्रोच्यते स्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वं। नच दृष्टान्ते साध्यवैकल्यं शुक्तिरजतादेरत्यन्तासत्त्ववादिभिस्तदधिकरणानभ्युपगमादिति वाच्यं। स्वानिरूपितत्व स्वसजातीयनिरूपितत्वोभयाभाववदधिकरणताया एव स्वाधिकरणेत्यनेन विवक्षितत्वात्। साजात्यं च कालसंबधित्व तदभावान्यतररूपेण। तेन मेयत्वादिना साजात्यस्यातिप्रसक्तत्वेपि न क्षतिः॥ एवं स्वाश्रयनिष्ठत्वमनवच्छिन्नं ग्राह्यं। तेनाऽव्याप्यवृत्तितामादाय नार्थान्तरं। २ प्रतियोगिता च स्वव्यापकधर्मावच्छिन्ना ग्राह्या।

---

१ स्वाधिकरणेति। स्वं शुक्तिरूप्यं स्वाधिकरणं शुक्तिः तन्निष्ठो योऽभावः रजताभावः स्वाधिकरणमित्यस्य स्वविशिष्टाधिकरणतावदित्यर्थः। अधिकरणतायां वैशिष्ट्यं स्वानिरूपितत्व स्वसजातीयनिरूपितत्वोभयाभाववत्त्वसंबंधेन स्वपदेन शुक्तिरूप्यमुपादेयं स्वविशिष्टा याऽधिकरणता शुक्तिनिष्ठाधिकरणता। कथमित्युक्तौ स्वं शुक्तिरूप्यं स्वानिरूपितत्वं शुक्तिनिष्ठाधिकरणतायाः शुक्तिरजतस्यासत्त्वात्। तथापि स्वसजातीयनिरूपितत्वं नास्ति स्वंशुक्तिरूप्यं स्वसजातीयं शशविषाणं तन्निरूपितत्वस्य शुक्तिनिष्ठाधिकरणताया असत्त्वात्। अतः उक्तोभयसंबंधेन स्वविशिष्टाधिकरणता शुक्तिनिष्ठाधिकरणता भवति। कालसंबंधित्वेन रूपेण घटसजातीयः पटः तदभावरूपेण शुक्तिरूप्यसजातीयं शशविषाणं मेयत्वादिरूपेण स्वसजातीयस्य निवेशे शुक्तेः शुक्तिरूप्यविशिष्टाधिकरणत्वं न संभवति। कुत इत्युक्तौ शुक्तिनिष्ठाधिकरणतायाः शुक्तिरूप्यानिरूपितत्वस्य शुक्तिरूप्यसजातीयशुक्तित्वनिरूपितत्वस्य च सत्त्वेनोभयाभावासत्त्वात् अतो मेयत्वेन साजात्यं न विवक्षितं। २ प्रतियोगितायां स्वव्यापकधर्मावच्छिन्नत्वानिवेशे घटादीनां मिथ्यात्वासिद्धिः घटादीनां सत्त्वेपि पटत्वेन घटाभावमादाय स्वाधिकरणवृत्त्यभावप्रतियोगित्वसंभवात्। स्वव्यापकधर्मावच्छिन्नत्वनिवेशे च पटत्वेन घटाभावप्रतियोगितायाः घटनिष्ठायाः स्वव्यापकधर्मावच्छिन्नत्वं न संभवा ति

नातो व्यधिकरणधर्मावच्छिन्नाभावस्य प्रामाणिकत्वेप्यर्थान्तरता। नच स्वसमानाधिकरणप्रातिभासिकात्यन्ताभावप्रतियोगितामादाय सा। ३ प्रातिभासिकस्य प्रतिभासकालमात्रवृत्तितया व्याप्यवृत्तितााया एवाभावात्। ४ अभावस्य ब्रह्मज्ञानेतराबाध्यत्वेन विशेषणीयत्वाद्वा शुक्तिरजतात्यन्ताभावस्यापि व्यावहारिकतया न दृष्टान्तस्य साध्यविकलता। ५ यद्वा स्वप्रकारकधीविशेष्यताव्यापकीभूताभावप्रतियोगित्वं तन्मिथ्यात्वं स्वप्रकारकधीत्वेन भ्रमप्रमासाधारण्येन धीनिवेशाच्च न पूर्वोक्तविकल्पावकाशः। अन्यत्प्राग्वदवसेयं। अथवा। ६ ज्ञाननिवर्त्यत्वं मिथ्यात्वं तच्च ज्ञानप्रयोज्यस्व स्वनिष्ठतादात्म्य-

---

स्वं घटनिष्ठप्रतियोगिता स्वव्यापकधर्मः घटत्वं तदवच्छिन्नत्वस्य प्रतियोगितायामसत्त्वादिति नघटादीनां मिथ्यात्वासिद्धिः। ३ घटवति ब्रह्मणि प्रातिभासिकघटाभावः अनवच्छिन्नवृत्तिमान्न भवति कुतः घटाभावस्य प्रतिभासकाल एव सत्त्वात्। ४ शुक्तौ शुक्तिरूप्यस्य व्यावहारिकस्यासत्त्वात् शुक्तिरूप्याभावः ब्रह्मज्ञानेनैव बाध्यते। ५ स्वप्रकारकेति। सद्विलक्षणत्वं मिथ्यात्वमित्युक्तौ असत्त्वमादायार्थान्तरापत्तिः अतः स्वप्रकारकधीविशेष्यतेत्युक्तौ असतोऽप्रकारत्वान्नातिव्याप्तिः स्वप्रकारकधीविशेष्यताव्यापकाभावप्रतियोगित्वमिति स्वं शुक्तिरजतं स्वप्रकारकधीः इदं रजतमितिधीः तद्विशेष्यता शुक्तिनिष्ठा तद्व्यापकीभूतो योभावः रजताभावः तत्प्रतियोगित्वं रजतस्य अप्रतियोगि ब्रह्म नैयायिकादिभिः गगनप्रकारकधीविशेष्यताव्यापकीभूताभावप्रतियोगित्वस्य अवृत्तौ गगनेऽनंगीकारात् नार्थान्तरता। ६ ज्ञाननिवर्त्यत्वमिति। स्वं शुक्तिरूप्यं स्वनिष्ठतादात्म्यं शुक्त्यज्ञानतादात्म्यं तत्प्रतियोगि शुक्त्यज्ञानं अन्यतराभावः शुक्तिरूप्यशुक्त्यज्ञानान्यतराभावः स च नेदं रजतमिति ज्ञानप्रयोज्यः। ज्ञाननिवर्त्यत्वमिति। अधिष्ठानसाक्षात्कारे अज्ञानं निवर्तते। जीवन्मुक्तस्य नाज्ञानमुच्छिन्नं संस्कारात्मनासत्त्वात्। अथवा प्रारब्धभोगोपयोगिदेहादिकमज्ञानशब्देनोच्यते। अत्रेदमवसेयं। यत्क्षणे यस्य

प्रतियोग्यन्यतरत्वावच्छिन्नाभावकत्वं। ७ यद्वा स्वसमनाधिकरणात्यन्ताभावीयपारमार्थिकत्वावच्छिन्नप्रतियोगित्वं तत्। पारमार्थिकत्वं च अबाध्यत्वं सर्वं प्रमेयमित्याकारकयत्किंचिद्धीविषयत्वं वा विवेचितं तदन्यत्र न चाद्यसाध्यद्वये तुरीये चात्यन्तासत्त्वमादायार्थान्तरता। स्वाधिकरणेति विशेषितत्वात्। असतोधिकरणाप्रसिद्धेः। न च तृतीयसाध्ये दृष्टान्तस्य साध्यविकलता। अन्यथाख्यात्यसत्ख्यात्यो विचारासहत्वेन इदं रजतमित्यादिभ्रमस्थले ८ अनिर्वचनीयरजतादे रुत्पत्तिस्वीकारस्यावश्यकत्वात् शुक्त्यादितत्वनिश्चयोत्तरं तन्निवृत्तिदर्शनेन तदवस्थितरजतसामान्याभावस्य तादृशनिर्णयप्रयोज्यतानिर्णयात्। तथाहि इदं रजतमित्यादिभ्रमस्थले नात्यन्तासतो भानं युक्तं। सत्यरजतत्वेन भानेऽन्यथा-

---

ज्ञानस्योच्छेद स्तत्क्षणे तत्प्रयुक्तस्यावश्यमुच्छेद इति न नियमः। जीवन्मुक्ताज्ञानस्वीकारपक्षे व्यभिचारात्। नापि यदज्ञानप्रयुक्तोच्छेदः प्रतिबन्धकशून्ये यत्क्षणे यस्याज्ञानस्योच्छेद स्तत्क्षणे तत्प्रयुक्तस्योच्छेद इति नियमः। विदेहत्वप्रयोजकब्रह्मसाक्षात्कारोत्पत्तिक्षणे ब्रह्म साक्षात्करोमीत्यनुभवेनाज्ञानासत्त्वेपि तत्प्रयुक्तमनःपरिणामरूपब्रह्मसाक्षात्कारादिसत्त्वेन व्यभिचारात्। एतादृशोत्पत्तिक्षणे हि किंचित्प्रतिबन्धकमस्ति। किंतु यत्क्षणे या प्रमा तत्क्षणेऽवश्यं तत्समानविषयकाज्ञानोच्छेदः। उक्तप्रतिबन्धकशून्ये यत्क्षणे यस्याज्ञानस्योच्छेदः तदुत्तरक्षणे तत्प्रयुक्तस्योच्छेदः ॥ ६ ॥

७ स्वं घटः स्वाधिकरणं ब्रह्म तद्वृत्तिर्योऽभावः पारमार्थिकत्वेन घटाभावः तत्प्रतियोगी घटः स्वाधिकरणेत्यनिवेशे अत्यन्तासत्त्वमादायार्थान्तरं। अतः स्वाधिकरणवृत्तीत्यभावविशेषणं देयमेव। असतोऽधिकरणाभावेनार्थान्तरायोगात्। ८ अनिर्वनीरजतादेरिति। रजतत्वं त्रिविधं। व्यावहारिकरजतमात्रवृत्ति व्यावहारिकं कटकाद्यर्थक्रियाकारितावच्छेदकं प्रातीतिकरजतमात्रवृत्ति प्रातीतिकं शुक्तिज्ञान रजतसादृश्यज्ञान कार्यतावच्छेदकं तदुभयसाधारणं

ख्यात्यापत्तेः । न च रजतत्वमपि असदेवेति वाच्यं रजतावृत्तेः रजतत्वशब्दार्थत्वायोगात् । तथाच रजतत्वेनेमं जानामि इदं रजतमित्यभिलापानुपपत्तिः । १ किंच इष्टतावच्छेदकत्वेन गृहीतधर्मप्रकारकज्ञानस्य प्रवर्तकतया इदं रजतमित्यादिज्ञानस्य प्रवर्तकत्वानुपपत्तिः रजतत्वांशे अन्यथाख्यातिस्वीकारे च किमपराद्धं रजतेन । नन्वेवं उत्पत्त्यादिमतः भ्रान्तिप्रतीतिसिद्धरजतस्य सत्यत्वमेवोचितमिति भास्करादिः । तदेव साधनीयं स्यादिति चेन्न पार्श्वस्थै रदुष्टकरणै र्व्याप्यवृत्ते रजतात्यन्ताभावस्य गृह्यमाणतया भ्रान्तिसिद्धरजतादेः सत्यत्वानुपपत्तेः । तदुक्तं सच्चेन्नबाध्येतेति । स्वसमानाधिकरणात्यन्ताभावाप्रतियोगि चेत् स्वात्यन्ताभावप्रमाविषयतया न प्रतीयेतेति तदर्थः । अन्यथाख्यात्यसत्ख्याती अन्यत्र निरस्ते । अथात्यन्ताभावप्रतियोगित्वमुक्ताभावप्रतियोगित्वमेव वा ऽत्यन्तासत्त्वमिति चेन्न । ह्रदादिनिष्ठात्यन्ताभावप्रतियोगिनोपि वह्न्यादेः पारमार्थिकत्वस्य तटस्थै रुपगमात् । द्वितीयेपि ईदृग्विधात्यन्तासत्त्वमिष्टमेव । निस्स्वरूपत्वादिलक्षणात्यन्तासत्त्वे तु बाधकमुक्तं । आत्मत्वं चार्थोपलक्षितप्रकाशरूपत्वं । नचैवं ज्ञानमेवात्मेत्युक्तं स्यादिति वाच्यं । इष्टापत्तेः । सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावोभयरूपस्य सत्त्वात्यन्ताभावविशिष्टासत्त्वात्यन्ताभावरूपस्य वा साधनेपि न क्षतिः । न च व्याहतिः । निषेधसमुच्चयस्याप्यतात्विकत्वात् जगति स्वात्यन्ताभावरूपं स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमपि न परमार्थ सदिति ज्ञापनाय तदत्यन्ताभावोपि साध्यकोटौ निवेश्यते । सिद्धसाधनवारणाय सत्त्वात्यन्ताभावनिवेशः । केवलसत्त्वात्यन्ताभावसाधने हि मिथ्यात्वं मिथ्या न वेति विकल्पःप्रसज्येत । इदानीं तु मि-

---

रजतपदशक्यतावच्छेदकं च तृतीयं व्यावहारिकमेवेति तत्र सत्त्वस्य व्यावहारिक प्रातीतिक रजतयोरनुगतत्वात् । १ इष्टतावच्छेदकधर्मः सत्यएव

थ्यात्वस्य मिथ्यात्वमवलंब्यैव साध्यनिर्देशेन नैतादृशविकल्पप्रसरः। नच मिथ्यात्वस्य मिथ्यात्वे जगतस्तात्विकत्वापत्तिः। मिथ्यात्वतदभावयोस्समसत्ताकत्वेन मिथ्यात्वस्य मिथ्यात्वेपि जगतस्सत्यत्वापत्तेरभावात्। अधिकमन्यत्र। वस्तुतस्साध्यप्रविष्टयोस्सत्त्वासत्त्वयोः परस्परविरहत्वस्य परस्परविरहव्यापकत्वस्य चाभावान्नव्याहतिः। १० स्वप्रकारकधीविशेष्यताव्यापकात्यन्ताभावप्रतियोगित्वं हि असत्त्वं। सत्त्वेन प्रतीयमानत्वंच सत्त्वं। नचानयोः परस्परविरहरूपत्वं परस्परविरहव्यापकत्वं वा उभयसंप्रतिपन्नमिथ्याभावे शुक्तिरूप्यादौ प्रत्येकं द्वयोर्व्यतिरेकस्योभयसंप्रतिपन्नस्य सत्त्वात्। न चासतः प्रतीत्यभ्युपगमेन न सत्त्वेन प्रतीयमानत्वं सत्त्वं नाप्यप्रतीयमानत्वमसत्त्वं नवा तद्विलक्षणत्वसाधनेनार्थांतरवारणमिति वाच्यं। अत्यन्तासतः सत्त्वेन प्रतीत्यसिद्धेः। एतेन सत्त्वासत्त्वे एकवस्तुनिष्ठात्यन्ताभावप्रतियोगिनी धर्मत्वाद्रूपरसवत् इत्यनुमानेन साध्यप्रसिद्धिरित्यपि न युक्तं व्याघातात् वस्तुशब्दस्य सच्छब्दपर्यायत्वात् सत्त्वं सन्निष्ठात्यन्ताभावप्रतियोगीत्यर्थपर्यवसानात्। प्रमेयत्वादावनैकान्तिकता च। अविरुद्धत्वं चोपाधिः। घटत्वाघटत्वे किंचिन्निष्ठात्यन्ताभावप्रतियोगिनी धर्मत्वाद्रूपरसवदित्याभाससाम्यं चेति निरस्तं। वस्तुशब्दस्य धर्मिमात्रपरत्वात् प्रमेयत्वादीनां घटत्वतदन्यत्वादीनां च मिथ्यात्वादेकवस्तुनिष्ठात्यन्ताभावप्रतियोगित्वमस्त्येवेति न व्यभिचारः। यद्यपि तेषां पक्षसमत्वात् संदिग्धानैकान्त्यं।

---

भवतीति भावः। १० स्वं घटः स्वप्रकारकधीः सन्घटइति धीः विशेष्यं सत् विशेष्यता सन्निष्ठा विशेष्यताव्यापकीभूतो योऽभावः घटाभावः प्रतियोगित्वं घटस्य स्वप्रकारकधीपदेन किं प्रमा विवक्षिता आहोस्विद्भ्रमः। नाद्यः व्याघातात्। स्वप्रकारकप्रमाविशेष्ये स्वाभावासंभवात्। न द्वितीयः घटप्रकारकभ्रमविशेष्ये घटस्य सत्यत्वेपि अभावसंभवात्। अतः स्वप्रकारकज्ञानसामान्यं विवक्षितं।

दुर्वारं । तथापि अनुकूलतर्काणां वक्ष्यमाणत्वान्न दोषः । केचित्तु धर्मत्वं परस्परविरहाव्यापकत्वं तेन प्रमेयत्वादौ घटत्वाघटत्वादौ च न व्यभिचारः । न चाविरुद्धत्वमुपाधिः । प्रकृतसाध्यशालिनोः गोत्वाश्वत्वयोस्तदभावेन साध्याव्यापकत्वात् । घटत्वाघटत्वयोरेकवस्तुनिष्ठात्यन्ताभावप्रतियोगित्वे व्याघातप्रसंगात् उक्तानुमानस्याभासत्वेपि प्रकृते तदभावस्योक्तत्वेन न तत्तुल्यत्वमित्याहुः । यद्यप्यविद्यातत्कार्यान्यतरत्वरूपमिथ्यात्वं साध्यतया न विवक्षितं तथापि प्रसंगात्तल्लक्षणं तत्प्रमाणं च परेण दूषितमिति दूषणानां आभासत्वप्रदर्शनाय तदुभयं निरूप्यते । तत्र तावदनादिभावत्वे सति ज्ञानविलाप्यत्वं अज्ञानस्य लक्षणं । न चाकाशादावतिव्याप्तिः । तस्यानादित्वानभ्युपगमात् । महदादिस्थानीयस्याव्याकृताकाशस्य च ब्रह्माविद्याव्यतिरिक्तत्वानभ्युपगमात् । अधिकंत्वन्यत्र । ज्ञानजन्यनाशप्रतियोगित्वाभावाच्च । यदि चाविद्याध्वंसो ज्ञानात्मक एवेत्युच्यते तदा ज्ञानात्मकध्वंसप्रतियोगित्वस्यैव प्रकृतलक्षणे निवेश्यतया नाकाशादावतिव्याप्तिः । ज्ञानप्रागभावेऽतिव्याप्तिवारणाय भावत्वनिवेशः । उत्तरोत्तरमनोवृत्तेः पूर्वपूर्वमनोवृत्तिध्वंसरूपताभ्युपगमे तादृशमनोवृत्तिषु अतिव्याप्तिवारणायानादित्वनिवेशः । प्रागभावध्वंसोपि प्रतियोगिजन्यः । एवं अविद्याध्वंसोपि ज्ञानातिरिक्तः ज्ञानजन्य इति मते व्यावृत्तिः स्फुटैव । चिदविद्यासंबंधेऽतिव्याप्तिवारणाय ज्ञानजन्येति । न चानादिभावस्य ज्ञाननिवर्त्यत्वानुपपत्तिः अभावस्येव भावस्यापि विनाशाविनाशयोः विरोधिसन्निपाततदभावप्रयुक्तत्वेन विपक्षे बाधकशून्यतयाऽनादिभावत्वस्याविनाशित्वव्याप्यत्वे मानाभावात् । १ भ्रमोपादनत्वं वा तल्लक्षणं । यत्तु भ्रमशब्देन रजतादि-

---

१ भ्रमोपादानमज्ञानमित्युक्तौ अन्तःकरणेऽतिव्याप्तिः । अतः भ्रमविषयोपादनत्वं ।

रूपोर्थो ज्ञानं वा नाद्यः पदार्थसत्त्वासत्त्वेन तदुपादानतायाः असंभवात् । न द्वितीयः अन्तःकरणेऽतिव्याप्तेरिति । तन्न भ्रमविषयस्यापारमार्थिकत्वेप्यनिर्वचनीयस्वरूपाभ्युपगमेन तदुपादानतासंभवात्। नाप्यन्तःकरणेतिव्याप्तिः । तस्य भ्रमोपादनत्वेपि भ्रमविषयं प्रत्यतथात्वात् । प्रमाणं च २ देवदत्तप्रमा देवदत्तनिष्ठप्रमाप्रागभावातिरिक्तस्यानादेर्ध्वंसिका प्रमात्वात् यज्ञदत्तप्रमावदित्यनुमानं । तदुक्तं । देवदत्तप्रमा तत्प्रमाप्रागभावातिरेकिणोऽनादेर्ध्वंसिका प्रमात्वात् अविगीतप्रमा यथेति । नच घटोऽयमेद्घटप्रागभावातिरिक्तानादेर्निवर्तकः घटत्वात् घटान्तरवदित्याभाससाम्यं अनुकूलतर्कस्य वक्ष्यमाणत्वात् । ३ एतेन विगीतो भ्रमः एतज्जनकाबाध्यातिरिक्तोपादनकः भ्रमत्वात् संप्रतिपन्नवदित्यनुमानमपि व्याख्यातं। नचदेवदत्तप्रमा देवदत्तगतस्यप्रमाप्रागभावातिरिक्तस्यानादेर्निवर्तिका नभवति प्रमात्वात् संप्रतिपन्नवदित्यनेन सत्प्रतिपक्षितमिति वाच्यं विपक्षे बाधकाभावेन सत्प्रतिपक्षाभिमतस्य स्वसाध्यनिरूपितव्याप्त्यानिश्चयात् । यद्वा ४ विमतंप्रमाणज्ञानं स्वप्रागभावातिरिक्त स्वविषयावरणस्वनिवर्त्य स्वदेशगत वस्त्वन्तरपूर्वकं अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् इत्यनुमानं । नन्वेतदनुपपन्नं जडे अज्ञा-

---

२ देवदत्तप्रमा स्वप्रागभावातिरिक्तवस्तुनाशिका स्वं प्रमा स्वप्रागभावः प्रमाप्रागभावः तद्व्यतिरिक्तं अज्ञानं तन्नाशिका ।

३ विगीतः शुक्तिरजतभ्रमः स्वजनकाबाध्योपादानको भवति स्वं रजतभ्रमः स्वजनकं रजतसादृश्यज्ञानं तदबाध्यं शुक्त्यज्ञानं तदुपादानकः ।

४ विमतमिति । स्वं प्रमाणज्ञानं स्वप्रागभावातिरिक्तमज्ञानं एवं स्वविषयावरणं भवति । स्वं प्रमाणज्ञानं स्वविषयः घटः तस्यावरणमज्ञानं । आवरणं च विषयसंबद्धं सत्प्रकाशप्रतिबंधकं । स्वनिवर्त्यत्वं च स्वजन्यध्वंसप्रतियोगित्वं स्वं प्रमाणज्ञानं स्वजन्यः अज्ञानध्वंसः तत्प्रतियोगि अज्ञानं प्रतियो-

नानभ्युपगमात् हेतुमत्तामन्तःकरणवृत्तिलक्षणजडविषयकप्रमाणज्ञानानां तथाविधवस्तुपूर्वकत्वरूपसाध्यशून्यत्वेनानेकान्तिकत्वादिति चेन्न। जडस्य प्रकाशप्रसक्त्यभावेनावरणकृत्यशून्यतया तदावरणानभ्युपगमेपि तदवच्छिन्नचितः प्रकाशप्रसक्त्या तस्यां ज्ञानविषयत्वानपायात्। प्रमामात्रस्य अधिष्ठानसद्विषयकत्वेन घटाद्यवच्छिन्नचैतन्ये अन्तःकरणवृत्तिलक्षणप्रमाणज्ञानविषयत्वानपायात्। नच स्वप्रागभावातिरिक्तेति विशेषणं व्यर्थं स्वनिवर्त्यत्वविशेषणेनैव तद्व्यावृत्तेः नहि भावः प्रागभावस्य निवर्तकः अपितु भावोत्पत्तिरेव। भावाभावयोः सहानवस्थानविरोधादिति वाच्यं। प्रागभावध्वंसस्य प्रतियोग्यात्मना तदजन्यत्वेपि प्रतियोगिध्वंसात्मनः तज्जन्यतया उक्तविशेषणेन तदव्यावृत्तेः प्रतियोगिवत् ध्वंसस्यापि प्रागभावध्वंसत्वात् अन्यथा प्रतियोगिध्वंसदशायामतीतः प्रागभाव इति व्यवहारानुपपत्तेः। अतीत्वं हि वर्तमानध्वंसप्रतियोगित्वं उक्तश्चायमर्थः प्रमाणविधिरपि प्रतियोग्येव प्रागभावनाश इतीति न क्षतिः। तन्मतेपि तन्मतन्यायेन ज्ञानमेवाज्ञाननाशइति वक्तव्यतया ९ स्वोत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपस्वनिवर्त्यत्वस्य निवेशनीयत्वात्। उक्तमतेपि न्यायस्य तेजस्तिमिरयोरपि तुल्यत्वात् दृष्टान्तस्य न साध्यविकलता। केचित् स्वात्मकध्वंसप्रतियोगित्वं स्वनिवर्त्यत्वं नच दृष्टान्तस्य साध्यविकलता। स्वनिवर्त्येत्यत्र स्वपदस्य स्व स्वीयान्यतरपरतया स्व स्वसामग्र्यन्यतरजन्यध्वंसप्रतियोगित्वस्य स्वात्मक स्वजन्यान्यतरध्वं-

गित्वमज्ञानस्य। स्वदेशगतत्वं च स्वाधिकरणवृत्तित्वं। वस्तु प्रमाणज्ञानं वस्त्वन्तरमज्ञानं स्वप्रागभावव्यतिरिक्तत्वानिवेशे ज्ञानप्रागभावमादाय सिद्धसाधनं। स्वनिवर्त्यत्वविशेषणेन ज्ञानप्रागभावस्य वारणं न संभवति। स्वं ज्ञानं स्वजन्यः ज्ञानप्रागभावध्वंसः कथमित्युक्तौ ज्ञानप्रागभावध्वंसस्य ज्ञाननाशानन्तरं ज्ञानध्वंसात्मकतया ज्ञानध्वंसं प्रति ज्ञानस्य कारणत्वात्।

९ स्वं प्रमाणज्ञानं स्वोत्पत्तिक्षणोत्पत्तिकध्वंसः अज्ञानध्वंसः स्वात्मकध्वंसः।

सप्रतियोगित्वपर्यवसितस्य विवक्षितत्वादित्याहुः। न चासत्य तथा विधवस्तुपूर्वकत्वसाधने सिद्धसाधनता। अनिर्वचनीयतथाविधवस्तुपूर्वकत्वे साध्ये साध्यविकलो दृष्टान्तः। अविशेषिततथाविधवस्तुपूर्वकत्वे साध्ये अप्रसिद्धविशेषणता प्रामाणिकाप्रामाणिकयोः साधारणधर्मस्याप्रामाणिकत्वात्। अनिर्वचनीयस्य केनाप्यप्रमितत्वात्। नहि शशविषाणगोविषाणयोः विषाणत्वसामान्यमस्तीति वाच्यं।

६ अविशेषिततथाविधवस्तुपूर्वकत्वस्य साध्यतायामदोषात्। घटनिष्ठात्यन्ताभावप्रतियोगितायाः सदसत्साधारण्येन प्रामाणिकाप्रामाणिकयोः साधारणधर्मस्यापि प्रामाणिकत्वात्। नच प्रतियोगिता न सामान्यमतो न दोष इति वाच्यं। स्वप्रागभावातिरिक्तत्व स्वनिवर्त्यत्वादेरपि प्रकृतसाध्यघटकविशेषणस्यासामान्यत्वात्। नच स्वप्राग भावव्यतिरिक्तत्वं स्वप्रागभावभेदः सच नास्त्यसतीति सिद्धांतइति वाच्यं। स्वप्रागभावात्मकत्वतद्भेदयोरन्यतरस्यासत्यावश्यकत्वात्। असत्त्वात्यन्ताभावप्रतियोगित्वादिवद्भेदस्यासद्वृत्तित्वे बाधकाभावाच्च। यत्तु ज्ञानप्रतिबंधकादृष्टदुरितस्य सिद्धतया सिद्धसाधनमिति तन्न तस्य ज्ञानानिवर्त्यत्वात्। नहि कार्योत्पत्त्यव्यवहितप्राक्क्षणे प्रतिबंधकसत्ता युज्यते। न ह्यव्यवहितप्राक्क्षणे तत्क्षणे वा सतस्तन्नाश्यत्वं तदात्मकनाशप्रतियोगित्वं वा। नच प्रागभावस्य स्वविषयावरणत्वाभावेनैव व्युदासात् तद्वारकविशेषणान्तरोपादानं व्यर्थमिति वाच्यं।

---

स्वं प्रमाणज्ञानं स्वात्मकध्वंसः अज्ञानध्वंसः ज्ञानात्मकः स्वनिवर्त्यत्वंच स्वात्मकत्व स्वजन्यत्वान्यतरवद्ध्वंसप्रतियोगित्वं। स्वं प्रमाणज्ञानं।

६ वस्त्वन्तरपूर्वकं वस्त्वन्तरं पूर्वपक्षे ज्ञानप्रतिबंधकादृष्टमिति। सिद्धान्ते अज्ञानमिति।

७ स्वसजातीयनिरूपिताधिकरणताविशिष्टाधिकरणतानिरूपकान्यत्वरूपस्य प्रागभावसाधारणत्वात्। साजात्यं च स्वान्यूनाविषयकग्रहत्व प्रभात्वान्यतररूपेण। अधिकरणतावैशिष्ट्यं च स्वावच्छेदककालावच्छिन्नस्वसामानाधिकरण्यसंबंधेन। अस्ति चैतादृशं स्वविषयावरणत्वं आद्यघटज्ञानप्रागभावे। तथाहि स्वं अयं घटइत्यादिप्रत्ययः तत्सजातीयं च तादृशप्रत्ययान्तरं तस्य याधिकरणता सा नैतज्ज्ञानप्रागभावाधिकरणतायां उक्तसंबंधेनास्ति एतत्प्रागभावस्य ज्ञानसजातीयेन केनापि ज्ञानेन यौगपद्यानुभवात्। अवच्छिन्नान्तावृत्तिव्यावृत्तिस्तु स्वयमूह्या। न चाद्यघटज्ञाने प्रागभावमादाय सिद्धसाधनता संभवति। नाप्यर्थान्तरता। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात्। इदंच घटत्वप्रकारकप्रमाणज्ञानत्वादिकं पक्षतावच्छेदकमिति पक्षे प्रकृतकथाप्रयोजिकां विप्रतिपत्तिं तद्व्यक्तित्वेनोपादाय। तस्याः पक्षतावच्छेदकत्वानुसरणे तु पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेपि न क्षतिः। परंतु तदा स्वविषयावरणत्वं न निवेश्यमिति ज्ञेयं। प्रमाणजनकादृष्टादावर्थान्तरतावारणाय स्वविषयावरणत्व-

---

७ स्वविषयावरणमित्यस्य स्वसजातीयाधिकरणावृत्तिरित्यर्थः। यथा प्रकाशाधिकरणावृत्तित्वं तमसः तथा ज्ञानाधिकरणावृत्तित्वं तमसः अज्ञानस्य अधिकरणतावैशिष्ट्यं च एकस्मिन्वस्तुनि एककाले अज्ञानाधिकरणता ज्ञानाधिकरणता नास्ति। अतः परस्परमनिरूपकत्वं। घटज्ञानप्रागभावस्य स्वावरणत्वं संभवति। आवरणत्वं च स्वसजातीयत्वं स्वं घटज्ञानं स्वस्वजातीयमन्यत् घटज्ञानं स्वसजातीयनिरूपिताधिकरणता आत्मनिष्ठा तादृशाधिकरणता विशिष्टाधिकरणता अज्ञानाधिकरणता न भवति। किन्तु प्रमेयत्वाधिकरणता तदनिरूपकत्वमज्ञानस्य। ज्ञानप्रागभावाधिकरणता ज्ञानाधिकरणता न भवति। किन्तु प्रमेयत्वाधिकरणता तदनिरूपकत्वं अज्ञानस्य ज्ञानप्रागभावाधिकरणताज्ञानाधिकरणविशिष्टा न भवति। स्वं ज्ञानं चैत्रनिष्ठ

निवेशः। जनकादृष्टस्य चरमफलनिवर्तनीयतया नोक्तविधं स्वविषयावरणत्वं। तदधिकरणतायामुक्तसंबंधेनोक्तसजातीयाधिकरणतावैशिष्ट्यं न। नच तादृशादृष्टस्य चरमफलनिवर्त्यं। स्वोत्पत्तिक्षणोत्पत्तिकध्वंसीयप्रतियोगित्वरूपं स्वनिवर्त्यत्वमिति तु पक्षे न संभवतीतिर्वाच्यं। तादृशादृष्टस्यापि चरमफलनाश्यत्वोपगमात्। अन्यथाऽदृष्टसत्त्वे तदधीनफलान्तरापत्तेर्वारणाय प्रकारान्तरानुसरणे गौरवापत्तेः। प्रमाप्रतिबन्धकादृष्टमादायार्थान्तरवारणाय स्वनिवर्त्यत्व निवेशः। विषयगताज्ञातत्वात्यन्ताभावमादायार्थान्तरवारणाय स्वदेशगतत्वं विशेषणं। नच तस्य स्वनिवर्त्यत्वाभावादेव तद्वारणं शक्यं। सामयिकात्यन्ताभाववादे विषयनिष्ठस्य तस्य ज्ञाननाश्यत्वानपायात्। तत्त्वमन्यत्र विवेचितं। वस्तुतस्तु स्वव्यधिकरणस्वाधिकरण क्षणोत्पत्तिकप्रमाप्रागभावमादायार्थान्तरवारणाय तत्। नच यथास्थिततादृशजन्यतानिवेशपक्षे स्वव्यधिकरणप्रागभावस्य स्वनिवर्त्यत्वाभावादेव वारणान्नेदं विशेषणमर्थवदिति वाच्यं। तध्वंसस्यापि कालोपाधिकतया स्वजन्यत्वानपायात्। स्वप्रतिबन्धकादृष्टस्य स्वोत्पत्तेः प्राक् ध्वस्ततया ध्वंसे स्वोत्तरोत्पत्तिकत्वनियतस्वजन्यत्वासंभवात्। नच प्रागभावातिरिक्तत्वनिवेशेनैव स्वप्रागभावमादायार्थान्तरवारण संभवात् प्रागभावे स्वीयत्वनिवेशोऽनर्थकः। तथाच नेदमप्यर्थान्तरमादाय तदावश्यकता। न चैवमपि स्वाधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगिनं स्वसमानाधिकरणस्वपूर्ववृत्तिज्ञानेच्छादिकमादायार्थान्तरं दुर्वारमिति वाच्यं। वस्त्वन्तरपदेन स्वसमानाधिकरणजन्यज्ञानानधिकरणकालवृत्तित्वस्य यौगपद्यस्य कादाचित्कस्येष्टतया स्वजनकादृष्टचरमफलभूतज्ञाने तादृशमनःपरिणामानधिकरणकालवृत्तित्व-

---

घटज्ञानस्य मैत्रनिष्ठघटज्ञानप्रागभावपूर्वकत्वात् अर्थान्तरवारणाय स्वदेशगतत्वनिवेशः।

स्य वा विवक्षणीयत्वात् । न चैवमपि सिद्धान्ते चाक्षुषस्पर्शनादिरूपविजातीयज्ञानेच्छादियौगपद्यस्य कादाचित्कस्येष्टतया स्वजनकादृष्टचरमफलभूतज्ञानेच्छादिसमानकालोत्पत्तिके आद्ये घटज्ञाने तादृशज्ञानजनकादृष्टपूर्वकत्वमादायार्थान्तरं दुर्वारमिति वाच्यं । स्वसमानकालोत्पत्तिकत्वसंबंधेन स्वसमानाधिकरणविशेषगुणविशिष्टान्यत्वस्यापि पक्षविशेषणतया विवक्षितत्वात् । संयोगद्वित्वादिकमादायार्थान्तरं च स्वदेशान्यदेशासंबंधित्वरूपस्वदेशगतत्वविवक्षयैव निरसनीयं । स्वव्याप्यतमोनिवर्तकप्रभायाः दृष्टान्तत्वसंभवाच्च न साध्यवैकल्यं । यद्यपि भूतलगतस्य तमसः प्रभासंबंधशून्यतत्क्षणविशेषविशिष्टतद्भूतलादिसंबद्धतया न कस्यापि तमसः प्रभाव्याप्यत्वं संभवति । तथापि स्वाधिकरणतादात्म्यवदन्यावृत्तित्वरूपव्याप्तिविवक्षायामदोषः । विशिष्टस्यातिरिक्ततापक्षे आद्यघटज्ञानप्राग्वर्तितत्क्षणादिविशिष्टान्तःकरणादिकमादायार्थान्तरं तु विशिष्टान्यत्वनिवेशेनैव निरसनीयं । नच विशिष्टत्वमनुगतमनतिप्रसक्तमेकं दुर्वचमिति वाच्यं । स्वाश्रयसमानाधिकरणाभावप्रतियोगित्वस्वाश्रयत्वै तदुभयसंबंधेन सादिधर्मविशिष्टत्वस्यैव प्रकृते विशिष्टशब्देन विवक्षणीयत्वात् । विस्तरस्तु प्रभायामनुसंधेयः ॥

अप्रकाशितार्थप्रकाशकत्वं च स्वसमानाधिकरण १ स्वान्यूनविषयक २ संशयान्यसविषयका ३ व्यवहितोत्तरत्वशून्यप्रमा त-

---

१ स्वान्यूनविषयकत्वं च स्वविषयताव्यापकविषयतानिरूपकत्वं विषयितासंबंधघटितव्याप्यव्यापकभावो वा ।

२ संशयान्यत्वं च विषयताविशिष्टविषयतानिरूपकत्वं । वैशिष्ट्यं च स्वनिरूपकनिरूपितत्वस्वनिरूपितविरोधविषयतानिरूपितत्वोभयसंबंधेन । संशये कोटिद्वयस्य विरोधभानस्वीकारात् एककोटिनिष्ठविषयतानिरूपितविरोधनिष्ठविषयतानिरूपितत्वं अपरकोटिनिष्ठविषयतायाः । वन्ह्यभाववद्विरुद्धवह्निप्रतियोगिकसंयोगसंबंधेन पर्वतो वह्निमान्न वा इत्याकारकः संशयो बोध्यः ।

त्प्रभान्यतरत्वं। अन्यतरत्वंच ४ एकभेदविशिष्टापरभेदात्यन्ताभावा-व्यतिरिक्ता ५ खण्डाभावरूपं। तेन तादृशप्रमात्वप्रभात्वादीनामुक्तात्यन्ताभावत्वरूपहेतुतावच्छेदकघटकत्वेपि नवैयर्थ्यं। स्वनिरूपकाभावप्रतियोग्यधिकरणतासमानाधिकरणाधिकरणता निरूपकत्वविशिष्ट स्वस्य हेतुविशेषणत्वादुक्तप्रमाभेदविशिष्टतत्प्रभाभेदवद्वृत्तेः तदर्थत्वेन वा विवक्षितत्वात्। ६ सिद्धान्ते अत्यन्ताभावमात्रस्य केवलान्वयित्वेपि न व्यभिचारः। केचित्त्वप्रकाशितार्थप्रकाशकत्वं स्वसमानाधिकरण स्वान्यूनविषयक ७ प्रमाणज्ञाननिरूपिताधिकरणताविशिष्टान्यायाऽधिकरणता स्वाव्यवहितोत्तरत्व स्वसामानाधिकरण्यै तदुभय संबंधेन तादृशाधिकरणताविशिष्टप्रमा तत्प्रभान्यतरत्वं। प्रतियोग्यधिकरणतावैशिष्ट्यं च। स्वाधिकरणक्षणावच्छिन्नस्वसामानाधिकरण्येनेत्याहुः। एतेन हेतुशरीरप्रविष्टं प्रकाशकत्वं तज्जनकत्वं वा व्यापकत्वं वा व्याप्यत्वं वा नाद्यः चक्षुरादौ व्यभिचारात् दृष्टान्तस्य साधनविकलत्वाच्च। ज्ञाने ज्ञानकारणत्वाभावेनासिद्धेश्च। न द्वितीयः असिद्धेरज्ञानादौ व्यभिचाराच्च। न तृतीयः। साधनविकलत्वात्

---

३ अव्यवहितोत्तरत्वं च स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वध्वंसाधिकरणत्वं। उत्तरभाविनां सर्वेषां क्षणानां अव्यवहितत्ववारणाय सत्यंतं। पूर्वक्षणस्यापि अव्यवहितोत्तरत्ववारणाय विशेष्यं। तत्र सत्यंतं अव्यवहितत्वरूपं। विशेष्यमुत्तरत्वरूपं।

४ एकभेदविशिष्टापरभेदेत्यत्र वैशिष्ट्यं स्वाधिकरणवृत्तित्वरूपसामानाधिकरण्यसंबंधेन। स्वाधिकरणवृत्तिता च स्वरूपसंबंधेन।

५ अखण्डाभावेत्यत्र अखण्डत्वं च इतरनिरूपणानधीननिरूपणविषयत्वं इतरपदार्थाघटितस्वशरीरकत्वं वा।

६ सिद्धान्तो नाम प्रामाणिकत्वेन पूर्वाचार्याङ्गीकृतप्रमेयं।

७ प्रमाणज्ञानं अन्तःकरणवृत्तिरूपं ज्ञानं।

दृष्टान्तस्येति निरस्तं। अज्ञानानभ्युपगमे अहमज्ञो मामन्यं च नजानामीति प्रत्ययानुपपत्तिः। न चाहमज्ञइत्यादिप्रतीतौ ज्ञानाभावादिविषयकत्वं व्याघातात्। नहि प्रतियोग्यधिकरणे प्रतियोग्यधिकरणक्षणावच्छेदेन तदत्यन्ताभावस्तवाभिमतः। धर्मिप्रतियोगिनोः साक्षिग्राह्यत्वाभ्युपगमेपि साक्षिरूपज्ञानेनैव व्याघातो दुर्वारः। किं बहुना न जानामीत्यभावग्रहणेनैव स्वकाले स्वाभावावगाहनात् व्याघातो दुर्वारः। अज्ञानस्य स्वरूपतः साक्षिगम्यत्वेपि उक्तविशेषणविशिष्टस्य प्रमाणगम्यत्वात् न तत्रानुमानोपन्यासासंगतिः। त्वदुक्तमर्थं न जानामीति प्रत्यक्षानुपपत्तेश्चेति। ननु किमत्र सर्वानुवादेन व्यवहारः। किं वा सामान्यतः। नाद्यः तादृशव्यवहारस्यैवाभावात्। भावे वा त्वदुक्तं न प्रमाणतो जानामीत्येवं परत्वोपपत्तेः। प्रतिवादिवाक्यात् अधिगतार्थानुवादपुरस्सरं प्रमाणाभावेन निरसनदर्शनात्। नच त्वदुक्तार्थे प्रमाणज्ञानमेव नास्तीत्यस्य विशिष्टं विषय इत्ययुक्तं। एतत्प्रमाणज्ञानस्य प्रमाणाभावविषयकत्वेपि तदर्थस्यातद्विषयत्वात्। अन्यथा भ्रमो मम नास्तीत्यादिप्रमाणज्ञानस्यापि विशिष्टार्थभ्रमविषयतया भ्रमविषयस्यापि प्रामाणिकत्वापातात्। न द्वितीयः। सामान्यानुवादेन विशेषव्यवहारोपपत्तेः विशेषस्याधिगमानधिगमयोः नैवं व्यवहारइति चेन्न। अस्ति कश्चिद्विशेष इति सामान्यतो ज्ञातत्वात्। किंच भावरूपाज्ञानाविद्याभ्युपगमेपि किं पूर्वमर्थोज्ञातो नवेति सर्वथापि प्रश्नायोगः। नन्वस्माकं मते सर्वं वस्तु ज्ञाततया अज्ञाततया वा साक्षिचैतन्यविषय एवेति प्रमाणज्ञानोदयात् प्रागज्ञातत्वविशेषितोर्थः साक्षिसिद्धः अनुवादगोचरो भवति प्रश्नार्ह इति चेन्न। साक्षितः सिद्धतयापि सिद्धिर्व्यवहारायोगाच्च। साक्षिणा ज्ञातेपि प्रमाणभुगित्यादिव्यवहार इति चेन्न। साक्षिसिद्धत्वे प्रमाणभू इत्यादेर्निष्फलत्वात्। तथाच त्वयापि सामान्यतो न जानामीति साक्षिसिद्धोर्थो विशेषज्ञानायानूद्य निरूपणविषय इति चेन्मैवं। तदुक्तार्थे

त्वेनानुवादेपि व्याघातस्यानिस्तारात् । त्वदुक्तार्थं हि न जानामी त्यत्र त्वदुक्तार्थविषयकज्ञानसामान्याभावः प्रत्येतव्यः । प्रतियोग्यंशे सामान्यधर्मस्यैव पक्षविशेषणत्वात् । प्रतियोगिविशेषणतानापन्नस्यापि धर्मस्याभावप्रतीतौ प्रतियोगितावच्छेदकत्वेन संसर्गघटकतया भानोपगमे घटवत्यपि भूतले घटो नास्तीति प्रतीतिप्रसंगात् । अत एव तादृशप्रतीतेः प्रमाणाभावविषयकत्वं नाभ्युपगन्तुं युक्तं । किंच त्वदुक्तार्थविषयकप्रमाणज्ञानं नास्तीति ज्ञानस्यापि प्रमाणज्ञानतया त्वदुक्तार्थविषयकप्रमाणज्ञानसामान्याभावविषयकत्वेपि व्याघातो दुर्वारः । यत्तु एतत्प्रमाणज्ञानस्य प्रमाणाभावविषयकत्वेपि तद्विषयस्यैव तद्विषयता नास्तीति । तन्न । ८ प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यनवगाहिनः अभावप्रत्यक्षस्याप्रामाणिकत्वात् । नच त्वदुक्तार्थत्वावान्तरधर्मप्रकारकज्ञानाभावो विषयः नात उक्तदोष इति वाच्यं । त्वदुक्तार्थत्वव्याप्यवानिति सामान्यतो विशेषधर्मज्ञानवतामपि तादृशव्यवहारदर्शनात् । नच त्वदुक्तार्थत्वव्याप्यधर्मानिष्ठनिरवच्छिन्नप्रकारताशालिज्ञानाभावः तत्र विषय इति युक्तं । तथासति परोपन्यस्तमर्थं कंबुग्रीवादिमत्त्वाद्युपाधिपरत्वाकारेण जानतामपि तादृश व्यवहारापत्तेः न त्वदुक्तार्थत्वव्याप्यतावच्छिन्नत्वदुक्तार्थनिष्ठविषयताशालिज्ञानाभावस्तत्र विषय इति युक्तं । ९ त्वदुक्तार्थत्वमुभयावृत्ति धर्मत्वादित्यादिप्रत्ययवतामपि तादृशव्यवहारदर्शनात् । मन्मते तु ज्ञानविशेष एव ज्ञानविरोधीति न दोषः । किंचेत्यादिकमपि न युक्तं । अज्ञातत्वेन साक्षिसिद्धेपि वस्तुन्यज्ञाननिवर्तकज्ञान संपत्तये प्रमाणबुभुत्सायाः सफलत्वात् । अधिकं त्वखण्डार्थविचारे द्रष्टव्यं । तदेवं स्वतः प्रमाणतश्चाविद्यायाः सुवचत्वेपि न तत्प्रयो

---

८ अभावबुद्धिः विशिष्टवैशिष्ट्यमर्यादां नातिशेते इति न्यायादिति भावः ।

९ उभयावृत्तित्वं च भेदविशिष्टान्यत्वं । वैशिष्ट्यं च स्वप्रतियोगिवृत्तित्व स्वानुयोगिवृत्तित्वोभयसंबन्धेन ।

ज्यान्यतरत्वं साध्यं। तादृशान्यतरत्वस्य परैरपारमार्थिकज्ञाने तत्प्रयोज्यभ्रमेपि स्वीकारेण सिद्धसाधनादिप्रसंगात्। इति मिथ्यात्वनिरुक्तिः। १ ननु हेतूक्तं दृश्यत्वं किं दृग्विषयत्वं अस्वप्रकाशत्वं वा आद्येपि दृग्वृत्तिरूपा वा चिद्रूपा वा नाद्यः। आत्मन्यनैकान्तिकत्वात्। तस्यापि वेदान्तजन्यवृत्तिविषयत्वात्। वृत्तिजनितफलासंबन्धात् नानैकान्तिकमिति चेन्न। फलं किं ज्ञातता व्यवहारो वा। आद्ये घटादावपि तदभावादसिद्धिस्स्यात्। अतीतानागतनित्यानुमेयेषु ज्ञाततायाः अभावेन भागासिद्धिश्च। ज्ञातताभावश्च अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वमिति तल्लक्षणमभिदधता चित्सुखेन अपरोक्षव्यवहारयोग्यताविशेषणकृत्याभिधानप्रस्तावेऽभिहितः। नचावेद्यत्वमेतावदेव लक्षणमस्त्विति वाच्यं। २ तथासत्यती-

---

१ दृश्यत्वविचारः ॥ दृश्यत्वं दृश्यपदप्रवृत्तिनिमित्तं मिथ्यात्वसाधकत्वेनोपन्यस्तं। वृत्तिव्याप्यत्वं। मनःपरिणामरूपायाः धीमात्रनिर्देशेपि विशेष्यविशेषणाकारवृत्तिद्वयावच्छिन्न चित्यपि धीव्यवहारात्। फलव्याप्यत्वं स्वाकारवृत्तिप्रतिबिम्बितचितो भग्नावरणकचितश्च तादात्म्यं ॥ कथंचिच्चिद्विषयत्वं किंचित्कालावच्छिन्नमावृतानावृतसाधारणं। नच धर्मिज्ञानेन भग्नावरणकस्य शुक्त्याद्यवच्छिन्नचैतन्यस्य शुक्तिरूप्यादिकमपि विषय इति वाच्यं। स्वावच्छिन्नस्याज्ञानविषयत्वस्य भग्नविशिष्टचिद्विषयत्वमेव हि फलव्याप्यत्वशब्दार्थः। अन्यथा गुरुत्वादावपि तदापत्तेः ॥ फलपदस्य प्रमाफलार्थकत्वात् ईश्वरीयमायावृत्तेश्च प्रमात्वाभावेन तत्प्रतिबिम्बितचितः फलपदार्थत्वाभावात्। येन हि पुरुषेण यदज्ञातं तद्विषयकवृत्तिः तत्पुरुषीयप्रमा। नच ईश्वरेण किञ्चिदज्ञातमास्ति येन तदीयमायावृत्तिः प्रमा स्यात् यदिच फलशब्दार्थमपहाय ईश्वरीयवृत्तिसाधारणहेतुरुच्यते तदा नासिद्ध्यादिदोषः ॥ ज्ञातं वृत्युपहितचिद्विषयः ॥

२ अतीतत्वं च विद्यमानध्वंसप्रतियोगित्वं। अनागतत्वं च वर्तमानप्रागभावप्रतियोगित्वं ॥

तानागतनित्यानुमेयेषु अतिव्याप्तिः । फलव्याप्यतालक्षणवेद्यत्वस्य तत्राभावादिति । द्वितीये पुनरनेकान्त्यमेव । आत्मनोपि वृत्तिजन्यव्यवहारविषयत्वात् । चिद्रूपवृत्त्यविषयत्वं तु घटादावस्मदादिभिर्नाङ्गीक्रियत इति भागासिद्धिः । द्वितीये स्वप्रकाशत्वमवेद्यत्वं तदभावो दृश्यत्वमिति चेत् वेद्यत्वं दृश्यत्वमित्युक्तं स्यात् । तथाच प्रागुक्तदोषापातः । ३ स्वव्यवहारे स्वातिरिक्तसंविदनपेक्षत्वं स्वप्रकाशत्वं तदभावो दृश्यत्व मिति चेत् तर्ह्यात्मनोऽद्वितीयत्वादिव्यवहारे संविदन्तरापेक्षासत्त्वात् व्यभिचारः । निर्विकल्पके स्वव्यवहारे संविदन्तरानपेक्षाऽस्तीति चेत् तर्हि घटेपि तथैवेत्यसिद्धिः । घटनिर्विकल्पकव्यवहार एव नास्तीति चेदात्मन्यपि स नास्तीत्येवेति चेन्न । तस्य निर्विकल्पत्वे विवादात् । अवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वं स्वप्रकाशत्वमिति चेन्न । व्याहतत्वेनासंभावितत्वात् कथंचिदव्याहतत्वेपि विशेषणाभावेन तद्विशेष्याभावेन उतोभयाभावेन दृश्यत्वं वक्तव्यं । तत्रावेद्यत्वाभावो वेद्यत्वमेव हेतुरस्तु किं विशेष्येण तस्यचोक्तं दूषणं । द्वितीये स्वरूपासिद्धिः । तृतीये व्यर्थविशेष्यत्वं विशेषणासिद्धिश्च । किंच दृश्यत्वं प्रामणतो भ्रान्त्या वा नोभयमपि अन्यतरासिद्धेः । ननु सामान्यतः प्रयुक्तहेतोर्विशेषविकल्पेन निराकरणे सर्वानुमानभङ्गः । तथाहि । धूमात् धूमध्वजसाधने किमेतद्देकालसंलग्नो धूमो हेतुः किंवा अनेतद्देशकालसंलग्न इति विकल्प्य आद्ये साध्यशून्यं निदर्शनं । द्वितीयेऽसिद्धिरिति दूषणसंभवादिति । मैवं । तत्र धूममात्रस्य पर्वतीयाग्नेः साधनत्वेनादूषणत्वाभ्युपगमात् धूमवत्त्वस्य साधनत्वेन न विकल्पावकाशः । तर्हि किं वक्रो धूमो हेतुरिति विकल्पेन दूषणप्रसंग इति चेन्न । तस्य सामा-

---

१ स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिर्नाम व्यक्तिविशिष्टत्वं । वैशिष्ट्यंच तादात्म्य-स्वव्यापकत्वोभयसंबंधेन । व्याप्यताघटकसंबंधः स्वविषयकव्यवहारत्वं । व्यापकताघटकसंबन्धः स्वभिन्नसंविदधीनत्वं ॥

न्येनैव हेतुत्वात् । नचास्तु तथाप्रकृतेपीति वाच्यं । प्रमाणभ्रान्तिदृश्ययोर्दृश्यत्वसामान्याभावात् । नहि जलजगगननलिनयोर्नलिनत्वमस्ति । तर्हि कथं भ्रान्तिदृश्यत्वमिति चेन्न । यथा नभोनलिन मित्युच्यते तथैवेत्यवेहि । दृश्यत्वस्य सन्मात्रवृत्तित्वाद्विरुद्धत्वाच्च । ननु रजतं दृश्यत इति चेन्न । तत्र शुक्तिकाया एव दृश्यत्वात् । ननु रजतसंविदः कथं शुक्तिका विषयः विरोधादिति चेन्न । रजत संविदिति कोर्थः । किं रजतविषया इति रजतत्वोल्लेखसंविदिति वा नाद्यः । अनभ्युपगमात् । द्वितीये को विरोधः । स्वविषयशुक्तिकामेवान्याकारेण गृह्णातीत्यस्याविरुद्धत्वात् । ननु तर्हि रजते असति कथं दृश्यतेति चेन्न । तस्य दृश्यत्वाभासत्वात् तादृशस्य पक्षेऽनन्वयात् । किंच रजतस्य फलव्याप्यतया वृत्तिव्याप्यतया वा दृश्यत्वं । नोभयथापि असतएव तत्सिद्ध्यभ्युपगमात् । असति सन्निकर्षाभावात् । आत्मनोपि दृश्यत्वादनैकान्तिकता च । न चात्मा दृश्य इति चेत् न । व्याहतेः । नह्यज्ञाते धर्मिणि धर्मविधानं निषेधो वा युज्यते । आत्मा दृश्यो वस्तुत्वात् घटवत् । अयं घटः एतद्द्रष्टान्यान्यः प्रमेयत्वात् घटवदिति च दृश्यत्वसिद्धेः । किंच दृश्यत्वाभावे तदविद्यानिवृत्तेरभावेन मोक्षाभावप्रसंगः । नच त्वत्पक्षे ब्रह्मज्ञानं नाम यत्किंचित्स्यात् । षष्ठ्यर्थस्य विषयितानतिरेकात् । यदि श्रुतमयेन ज्ञानेन तत्वमभिधाय चिन्तामयीमवस्थामवलंब्य मनस्यन्तःकरणपरिणामवृत्तिरूपं ज्ञानमुपजायते । तेन भवेदविद्यानिवृत्तिरिति चेन्न। तथाभ्युपगमे परमात्मनोपि दृश्यतया व्यभिचरानिस्तारात्। आत्मनो वृत्तिव्याप्यत्वेपि फलव्याप्यताया अभावान्न दृश्यत्वमिति चेन्न । दत्तोत्तरत्वात् । विषयत्वाभावे प्यात्माकारज्ञानमात्मज्ञानं । तेन भवेदविद्यानिवृत्तिरिति चेन्न । विचारागोचरत्वात् । तथा हि । आत्माकारमित्यस्य कोर्थः । आत्माकार एवाकारो यस्येति वा आत्माकार इवाकारो यस्येति वा आत्मैवाकारो यस्येति वा

नाद्यः ज्ञानज्ञेययोरेकाकारायोगात् । सत्तया एकाकारोस्तीति चेन्न । अनुगतसत्ताया अनंगीकारात् । सत्तयाएकाकारत्वे च वेदान्ताज्जायमानं ज्ञानमात्माकारमेव कुतः । घटाकारमपि किं नस्यात् । नापि परेण सत्तानामात्मन्याकारोङ्गीक्रियते । निराकारताङ्गीकारात् । न द्वितीयः । अत्यन्तसादृश्यानुपलम्भात् । किंचित्सादृश्यस्य प्रागिवातिप्रसंजकत्वात् । तृतीयपक्षेपि आत्मा ज्ञानस्याकारो न संभवति । आधाराधेयभावस्यासंभवात् । अतः परिशेषाद्विषयतया व्यावर्तकत्वेनात्मा ज्ञानस्याकार इति वक्तव्यं । तदपि विषयत्वमिति यत्किञ्चिदेतत् । भवेदिदं यदि दृग्विषयत्वं दृश्यत्वं । मैवं । किन्तु स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिः । कथमेतादृशी दृश्यता कथितदूषणग्रस्ता स्यात् । मैवं । अतिरिक्तपदेन पारमार्थिकभेदवत्त्वं वा व्यावहारिकभेदवत्त्वं वा विवक्षितं । नाद्यस्तवासिद्धेः । न द्वितीयः । ममासिद्धेः । सामान्यतः प्रयोग इति तु प्रागेव निरस्तं । संविदपेक्षानियतित्वमात्रस्य हेतुत्वोपपत्तेः व्यर्थविशेषणत्वं च । न चासति रजतेपि ज्ञानापेक्षा व्यवहाराय तस्याध्यस्ततयैव सिद्ध्युपगमादित्यवादिषं । अत्यन्तासत्यनेकान्त्यं च । नच तदपि मिथ्येति वाच्यं । तथासति रजतादेरसद्विलक्षणत्वप्रतिपादनप्रयासवैयर्थ्यापातात् । न चाबाध्यत्वमसतो युज्यते । प्रतीत्यंगीकारात् । नापि तस्यानिर्वचनीयत्वं प्रमाणाभावादिति चेदत्र ब्रूमः सप्रकारकवृत्तिविषयत्वं दृश्यत्वं । किंचित्प्रकारकज्ञाने तद्विशिष्टस्य विषयत्वेपि शुद्धस्याविषयत्वात् शुद्धे ब्रह्मणि न व्यभिचारः । ४ अविद्यानिवर्तकनिर्विकल्पकवृत्तिविषयत्वाच्च न विचारवैयर्थ्यं । यद्वा चिद्विषयत्वं दृश्यत्वं । नच घटादावसिद्धिः । दृश्यमात्रस्य ईशादिज्ञानविषयत्वाभ्युपगमात् । नचैवं शुद्धब्रह्मणि

४ निर्विकल्पकवृत्तिविषयत्वमित्यत्र विकल्पः प्रकारः । तेन विषयत्वेक्तिर्न व्याहता ॥

व्यभिचारः। तस्यापि ईशज्ञेयत्वाभ्युपगमादिति वाच्यं। सत्त्वप्रकारकचिद्विषयत्वाभ्युपगमात्। अस्य विवक्षितत्वात्। मन्मते निर्विशेषब्रह्मणः सत्त्वानभ्युपगमेन ताद्रूप्येण भानासंभवात्। सत्ताप्रकारकास्मदादिबुद्धौ चोपहितस्यैव भानाभ्युपगमात्। सत्ता च कालसंबन्धः। शुद्धस्यापि सप्रकारकधीविषयत्वमिति मते तु स्वव्यवहारे स्वातिरिक्तसंविदनपेक्षत्वरूपस्य स्वप्रकाशत्वस्याभावो दृश्यत्वं। स्वव्यवहारे स्वातिरिक्तसंविदनपेक्षत्वं च व्यवहारपदस्य व्यवहृतिसाधनीभूतासंदिग्धतापरत्वात् संविदन्तराप्रयोज्यसंशयविषयत्वाभावरूपं पर्यवस्यति। तच्च चित्यव्याहतं। चिदस्ति नवेति संशयस्य कदाप्यभावेन तन्निष्ठविषयत्वाभावाधिकरणतायाः संविदन्तराप्रयोज्यत्वात्। तथाच नात्मनि व्यभिचारः। इदमेव चावेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं। अवेद्यत्वमित्यनेन हि संविदन्तराविषयत्वमुच्यते। अपरोक्षव्यवहारयोग्यता चासंदिग्धत्वमिति। नच संदेहविषयत्वसामान्याभावोपि चित्यसिद्धः। अपरिच्छिन्नाभावमानायां चिति सत्तासंशयस्य संभवादिति वाच्यं। चित्त्वातिरिक्तचिद्वृत्तिधर्मावच्छिन्नासत्त्वप्रकारकसंशयविषयत्वसामान्याभावस्य विवक्षितत्वात्। तथाच चित्त्वातिरिक्तचिद्वृत्तिधर्मानवच्छिन्नासत्त्वकोटिकसंशयविषयत्वं दृश्यत्वमिति पर्यवसितोर्थः। यद्वा स्वविशेष्यविषयकज्ञानाबाध्यदृग्विशेष्यत्वरूपं तद्विवक्षितमतो न कोपि दोषः। प्रमाभ्रमसाधारणधीत्वेनैव दृशो निवेशान्नान्यतरासिद्धिः। यत्तु न सदसत्साधारणं दृश्यत्वं संभवति। अनेकशशविषाणगोविषाणसाधारणविषाणत्वाभावादिति। तन्न। एतदनुमानात्प्रागनिर्वचनीयासिद्धेः। तत्सिद्धौ वा सदनिर्वाच्यसाधारणं सामान्यमभ्युपेयमिति प्रागुपपादितत्वात्। यत्तु भ्रमे मिथ्यारजतस्य विषयता नास्तीत्युक्त्वा विरोधोपपादनं तद्धेयं। असत्ख्यातिभङ्गप्रसङ्गात्। अन्याकारमसन्तं गृह्णतो ज्ञानस्य तदविषयत्वायोगात्। रज-

तन्निष्ठदृश्यत्वमाभास इति चेन्न । केयमाभासता । यद्यलीकता तर्हि दृश्यता नास्तीति पर्यवसितं । तत्र दर्शितो दण्डः । यदि चामुख्यता तदानीं करणसन्निकर्षरूपाया इव विषयताया मुख्यतेत्युच्यते । तथाप्याकारतारूपगौणविषयताया एव हेतुत्वानुसरणान्नदोषः । वस्तुतस्तु उक्तसन्निकर्षस्य न विषयतारूपत्वमित्यप्यन्यत्र प्रपंचितं । शुक्तिरजतादौ चाविद्यावृत्तिविषयत्वस्य नव्यमते चाक्षुषादिवृत्तिविषताया अनावृतसाक्षिरूपचिद्रूपवेद्यतायाश्चोपगमान्न साधनविकलो दृष्टान्तः । शुक्तिरूप्यादेरनिर्वाच्यस्योत्पत्तिक्षणोत्पन्नाविद्यावृत्त्योपहितानावृतचिद्भास्यताया अद्वैतविद्याविद्योते सम्यगुपपादितत्वाच्च नापसिद्धान्तः । द्वितीयादिक्षणे च तत्रेन्द्रियसन्निकर्षस्यापि संभवात् । तृतीयादिक्षणे तस्य चाक्षुषादिवृत्तिवेद्यतापि सुलभा । न चात्यन्तासिद्धिः तत्र सद्विलक्षणत्वादिसाध्यास्याप्रत्यूहत्वाच्च । कालसंबन्धित्वस्यापि हेतौ निवेशनीयत्वाद्वा । यस्त्वत्यन्तासतः प्रतीतिर्नोपेयत इति तन्नथैवेत्यन्यत्रोपपादितमिति संक्षेपः । एवं जडत्वमपि हेतुस्संभवति । ननु किमिदं जडत्वं ज्ञानानाधारत्वमनात्मत्वं वा । अज्ञानरूपत्वमस्वप्रकाशत्वं वा । नाद्यः । विशिष्टात्मनि पक्षनिक्षिप्ते असिद्धत्वात् । अलीके अनेकान्त्याच्च । न द्वितीयः । अनात्मेत्यात्मातिरिक्तत्वं विवक्षितं आत्मत्वानाधारत्वं वा । नाद्यः । तत्रासिद्धेः । नहि त्वत्पक्षे परमात्मनो जगदतिरिक्तमस्ति । परमार्थतः तदभावेप्यनाद्यविद्याविहितो भेदोस्तीति चेन्न । तर्ह्यस्माकमसिद्धो हेतुः । असति व्यभिचारश्च । न द्वितीयः । आत्मत्वस्य प्रागुक्तरीत्या निर्वचनासंभवात् । मन्मते हि आत्मत्वजातिमत्वं ज्ञानाश्रयत्वं वा तदिति शक्यमभ्युपगन्तुं । न तृतीयः । वृत्तिज्ञानेऽसिद्धेः । आत्मनो ज्ञानस्वरूपत्वे विषयोऽनिर्वाच्यः । निर्विषयस्यासंभवात् । एतेनाचेतनत्वमिति निरस्तं उक्तपक्षाबहिर्भावादिति चेन्मैवं । ध्वंसप्रतियोगित्वे सति ज्ञानाधारत्वमात्मत्वं । तद्भिन्नत्वं च जडत्वं । सत्यन्तनिवेशाच्च

SANS 181.4 BHA

न विशिष्टात्मन्यसिद्धिः। शुद्धस्यापि ज्ञातृत्वाभ्युपगमाच्च न तत्र व्यभिचारः। व्यभिचारस्तु प्रागुक्तरीत्या निरसनीयः। यथासन्निवेशे न वैयर्थ्यं। शुक्तिरजतादेर्नाशो नास्तीति पक्षे वा विशेष्यांशोऽर्थवानिति बोध्यं। पञ्चमप्रकारे वा स्वरूपासिद्धिवारणाय सः। मोक्षदशाया मात्मनो निर्विषयत्वेन न ज्ञानत्वहानिः। यदा यज्ज्ञानं तदा तद्विषय इति नियमस्यातीतपक्षसाध्यकानुमितौ व्यभिचारात्। न च तादृशानुमितिदशायां तद्विषयस्य वह्न्यादेः असत्त्वेपि वह्नित्वादेः तथाविधस्य सत्त्वान्न व्यभिचार इति वाच्यं। त्वन्मते वह्नित्वादेरपि वह्न्यादिसमानयोगक्षेमत्वात्। नच यदा यदपरोक्षज्ञानं तदा तद्विषय इति नियमः प्रामाणिकः। विनश्यदवस्थापन्नघटाद्यपरोक्षे व्यभिचारात्। विषयताया उपलक्षणतामात्रेण तदाश्रयस्य ज्ञानत्वसंभवेन नसा स्वाश्रयव्यापिका एवंच ज्ञानान्यत्वं जडत्वमित्यपि वक्तुं शक्यं। नच वृत्तिज्ञानेऽसिद्धिः। ज्ञानत्वजातेरात्मवृत्त्युभयसाधारणत्वादिति वाच्यं। प्रागभावाप्रतियोगित्वे ध्वंसाप्रतियोगित्वे वा सति तादृशनित्यत्वाश्रयज्ञानत्वावच्छिन्नभेदरूपस्यैव तस्य विवक्षितत्वात्। नच पारमार्थिकभेदस्य हेतुत्वे इतरासिद्धिः। आविद्यकस्य तथात्वे ममासिद्धिरिति वाच्यं। पारमार्थिकत्वाद्यविशेषितस्यैव भेदस्य हेतुत्वोपगमान्नान्यतरासिद्धिः। अन्यत् प्रागेवोक्तं। अस्वप्रकाशत्वं वा तत्। विवेचितं चैतत्। एवं परिच्छिन्नत्वं देशतः कालतः वस्तुतो वा स्यात्। नाद्यः कालाकाशादिषु भागासिद्धेः। अतएव न द्वितीयः। ब्रह्मव्यतिरिक्तं सकलमपि देशकालाभ्यां परिच्छिन्नमिति चेन्न। व्याघातात्। तथाहि। देशतः परिच्छिन्नत्वं नाम किंचिद्देशनिष्ठाभावप्रतियोगित्वं। त्वया सर्वाभावं प्रतिजानता किञ्चिदधिष्ठानमभ्युपेयं। अभावस्याधिष्ठानभेदाधीनबोधत्वात्। ननु कथं व्याघातः। सकलमपि ब्रह्मण्यध्यस्तमतः तत्र नास्तीति निषेधात् नाधिष्ठानाभ्युपगत्या व्याघात


IGNCA RAR
ACC No R-628

इति चेन्न । तर्हि परिच्छिन्नत्वं नाम बाध्यतेत्यर्थस्स्यात् । तथाच साध्याविशिष्टतयैव दुष्टतापत्तिः । कालपरिच्छेदे चानित्यता स्यादिति त्रिकालासत्यतानाभिमेता भवेत् । तथाच कालस्यैव तादृशपरिच्छेदायोगे न गतो व्याघातः । कुतश्चाकाशादेः कालपरिच्छेदाध्यवसायः । जडत्वहेतुनेति चेन्न । तस्याव्याकृतत्वात् । घटादौ कार्यताप्रयुक्तत्वाच्च परिच्छिन्नत्वस्य । यज्ज्ञेयं तत्कार्यमिति चेन्न । अविद्यायां व्यभिचारात् अनादित्वपरिभाषा लुप्येत । तत्कारणस्याभावाच्च । पञ्चमप्रकारं मोक्षमाचक्षाणस्य जडत्वहेतोर्नित्यतयाऽभ्युपगते मोक्षे व्यभिचारः । तस्य कालपरिच्छिन्नत्वनियमे संसारपुनरावृत्तिप्रसंगः । नहि सहस्राक्षोपि क्षयं क्षेप्तुं क्षम इत्युन्मत्तवादश्च । न तृतीयः । नेति नेतीत्यादिना ब्रह्मण्यपि जगदन्योन्याभावस्य श्रुतत्वात् सोपि भेदोऽविद्याविलसित इति चेत् किमिदानीं पदार्थभेदेन भिन्नत्वं हेतुः तथासति पक्षे तदसिद्धिस्स्यात् । विरुद्धता च स्यात् इति चेन्मैवं । किंचिद्देशनिष्ठात्यन्ताभावप्रतियोगित्वमेव तत् । नच कालादिषु भागासिद्धिः । कालादीनामपि नित्यत्वानभ्युपगमात् । प्रवाहनित्यता च न यत्किञ्चिद्देशनिष्ठात्यन्ताभावप्रतियोगित्वविरोधिनी । दिङ्निरूपितविशेषणताया अतिरिक्ताया अभ्युपगमे प्रतियोगिता तत्संबन्धावच्छिन्नापि विवक्षणीया । ब्रह्मणस्तु सर्वेष्वेव देशेषु तादृशसंबन्धेन सत्त्वाभ्युपगमान्न व्यभिचारः । ननु भूताकाशस्य क्षणलवादेः कालस्य प्राच्यादेर्दिग्विभागस्य देशान्तरनिष्ठाभावप्रतियोगित्वेपि अव्याकृताकाशस्य महाकालस्य त्वदभिमताविद्यायाश्च ब्रह्मवत्सकलदेशकालवृत्तितया तत्रासिद्धिरिति चेन्न । ब्रह्मातिरिक्तस्याव्याकृताकशस्यानभ्युपगमात् । महान्तौ दिक्कालौ च न शुद्धब्रह्मातिरिक्तौ मानाभावात् । अविद्याया अपि देशनिष्ठात्यन्ताभावप्रतियोगित्वान्नासिद्धिः । १ एवं कालतः परिच्छि-

१. यदि कालतः परिच्छिन्नत्वं प्रागभावप्रतियोगित्व ध्वंसप्रतियोगित्वोभयरूपं तदा पञ्चमप्रकारापन्नाविद्यानिवृत्तौ उक्तपरिच्छिन्नत्वांगीकारे पुनरावृत्तिः प्रसज्येत । नैवं किंतु, कालिकसंबन्धावच्छिन्नात्यन्ताभावप्रतियोगित्वं तच्च ध्वंसाभावेपि प्रागभावकाले स्वात्यन्ताभावमात्रेण उपपद्यते ।

न्नत्वमपि हेतुस्सम्भवति । तस्याप्यैन्त्यन्ताभावीयकालिकसंबन्धावच्छिन्नप्रतियोगितारूपत्वात् । पञ्चमप्रकारस्य मोक्षस्य परिच्छिन्नत्वाभ्युपगमेऽपि न संसारस्य पुनरावृत्तिप्रसंगः । स्वप्रागभावकालनिष्ठात्यन्ताभावप्रतियोगित्वस्य तत्रोपगमेऽपि ध्वंसानभ्युपगमेन पुनरावृत्त्युपपादनायोगात् । वस्तुतःपरिच्छिन्नत्वं वा तत् । २ तच्च यत्किंचिद्वस्तुनिष्ठात्यंताभावीयतादात्म्यसंबन्धावच्छिन्ना प्रतियोगिता । न चाविद्यायामसिद्धिः । मूलाज्ञानातिरिक्तपल्लवाज्ञानाभ्युपगन्तृमते तयोस्तादात्म्याभावात् । तदनभ्युपगमेऽपि पञ्चमप्रकाराविद्यानिवृत्तौ तदभावान्नासिद्धिरिति संक्षेपः । ननूक्तानुमानं प्रत्यक्षेण ३ बाधितविषयत्वात्कालात्ययापदिष्टं । ननु सत्ताया दुर्निरूपत्वान्न बाधितं । तथाहि । किं सत्ताजातिः विधिगम्यत्वमर्थक्रियाकारित्वं वा प्रातिभासिकेतरत्वं वा असद्व्यातिरिक्तत्वं वा अबाध्यत्वंवा नाद्यः । पञ्चकाभ्युपगमेऽस्माकं न प्रत्यक्षविरोधः । तस्यास्माभिरनिराकरणात् । न षष्ठः । प्रत्यक्षस्योत्तरकालीनाबाधाविषयत्वायोगात् । तस्मात् गन्धर्वनगरमितिवत् प्रत्यक्षत्वग्रहस्तु प्रवाद इति चेन्न । अबाध्यतायाःप्रत्यक्षग्राह्यत्वात् । नच तस्योत्तरकालीनबाधाभावाग्राहकत्वमिति । तदानीमबाध्यताग्रहेणैव सिद्धेः । तत्रातीताबाध्यतागन्धर्वनगरवदापि गृह्यत इति चेत्सत्यं । तथाप्यस्ति विशेषः । प्रामाण्यं हि ज्ञानस्योत्सर्गतः अपवादे अप्रामाण्यमिति विद्वत्सम्मतिः । तथा च तत्र बाधकादप्रामाण्यमुपस्थाप्यते । प्रकृते तु तादृशबाधकादर्शनात् त्रिकाला बाध्यतैव निरपवादा सिद्ध्यतीति चेन्न । अबाध्यतायाः स्वप्रकारकधीविशेष्य-

---

२. यत्किंचिदिति यद्यपि अन्योन्याभावप्रतियोगितैव तादात्म्यसम्बन्धावच्छिन्ना तथापि एतन्न्यायमते सिद्धान्ते अन्योन्याभावप्रतियोगितायाःतादात्म्य संबन्धावच्छिन्नत्वं नास्ति अत्यन्ताभेदे तादात्म्यानंगीकारात् तदुक्तं भेदासहिष्णु च तादात्म्यं नास्त्येवेति ॥

३. प्रत्यक्षबाधो नाम प्रत्यक्षजन्याप्रामाण्यज्ञानविषयज्ञानविषयत्वं ।

ताव्यापकाभावाप्रतियोगित्वरूपत्वं ज्ञानाद्यतीन्द्रियघटितधर्मावच्छिन्न-प्रतियोगिताकत्वेन योग्यानुपलब्धिविरहेण प्रत्यक्षासम्भवात्। स्वाधिकरणनिष्ठात्यन्ताभावाप्रतियोगित्वरूपाबाध्यत्वस्यापि न योग्यानुपलब्धिरस्ति। अतीन्द्रियसाधारणधर्मविशिष्टस्योपलब्धिव्याप्यत्वाभावात्। न चात्यन्ताभावस्य प्रत्यक्षयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वं तंत्रं नतु भेदप्रत्यक्षे तथास्ति। स्तंभादौ पिशाचभेदादेरप्रत्यक्षत्वप्रसंगात्। एवं चोक्तमिथ्यात्वबच्छेदग्राहिणा प्रत्यक्षेणोक्तानुमानस्य कालात्ययापदिष्टता दुर्वारेति वाच्यं। पिशाचभेदादेः प्रत्यक्षतावादिभिरप्यन्योन्याभावप्रत्यक्षे योग्यधर्मावच्छिन्नप्रतियोगिताकत्व जात्यवच्छिन्नप्रतियोगिकत्वान्यतरस्यैव तंत्रत्वोपगमेन तदुभयशून्यभेदस्य प्रत्यक्षानभ्युपगमात्। ४ अन्यथा पिशाचसंयोगित्वाद्यवच्छिन्नभेदस्यापि प्रत्यक्षतापत्तेः। ज्ञाननिवर्त्यत्वादिकं तु न सर्वथा प्रत्यक्षग्राह्यमिति शंकितुमशक्यं। भाविनिवृत्तिप्रतियोगित्वस्य सत्त्वेपीदानीं तदुपलम्भापादनासंभवात्। स्वाधिकरणनिष्ठाभावीययोग्यधर्मावच्छिन्नप्रतियोगित्वाभावस्य योग्यत्वेपि तस्य विशेषाभाग्रहरूपतया न सामान्यवत्ताज्ञानप्रतिबन्धकता। यो यद्धर्मावाच्छिन्नाभावशून्य इति व्याप्तिस्त्वसिद्धा। विपक्षे बाधकाभावात्। अस्तुवा अनुमानग्राह्यविरोधिसत्त्वग्राहकं प्रत्यक्षं। तथापि चन्द्रप्रादेशिकत्वादिप्रत्यक्षवच्छंकिताप्रामाण्यकत्वेन नोक्तानुमानबाधक्षमं। नच तत्राप्तवाक्यादिना विरुद्धत्वादप्रामाण्यस्याशंक्यत्वेपि घटस्सन्नित्यादिप्रत्यक्षस्य न तथात्वं। बलवन्मानविरोधाभावादिति वाच्यं। तत्राप्युपक्रमादिलिंगावधृततात्पर्यकबलवच्छ्रुतिविरोधेनाप्रामाण्यशंकासंभवात्। नच वि

४. यदि स्तंभः पिशाचः स्यात् तर्हि पिशाचवदप्रत्यक्ष आपद्येत पिशाचो वा स्तम्भवत् प्रत्यक्षः स्यात् इत्यापादनसम्भवेन स्तंभे पिशाचभेदः प्रत्यक्षः। स्तंभो यदि पिशाचसंयोगी स्यात् तर्हि पिशाचसंयोगः प्रत्यक्षः स्यात् इत्यापादनायोगात् न पिशाचसंयोगः प्रत्यक्षः ॥

श्वं सत्यमित्याद्यागमविरोधः। तस्यान्यपरस्य देवताधिकरणन्यायेन बलवन्मानान्तरविरुद्धविश्वसत्यतायां असाधकत्वात्। विश्वस्मिन्सत्यतादात्म्यस्य बोधनेपि विश्वस्य पारमार्थिकत्वासिद्धेश्च। उपगम्यते चास्माभिरप्युपादानोपादेययोस्तादात्म्यं सन्घट इत्यादिप्रत्यक्षसिद्धं। नच श्रुत्या विश्वस्मिन्सत्तादात्म्यप्रतिपादनं व्यर्थं। प्रपञ्चे सत्तादात्म्यानभ्युपगन्तृवादिन एवाभावादिति वाच्यं। शून्यवादिना प्रपञ्चे सत्तादात्म्यानभ्युपगमेन वादिप्रसिद्धसत्तादात्म्यशून्यतानिषेधेन सत्तादात्म्यप्रतिपादनार्थत्वात्। अप्राप्ते शास्त्रमर्थवदिति न्यायात्। यथा वादिप्रसिद्धमिथ्यात्व निषेधेन पारमार्थिकसत्त्वप्रतिपादनपरमिदं वाक्यमिति त्वयोच्यते तद्वत्। इयांस्तु विशेषः। बलवदशेषागमविरोधेनान्यपरात् अस्मात् विश्वपरमार्थतायाः सिद्ध्यसंभवेपि सिद्धं सत्तादात्म्यं परं व्यवहारकालाबाध्यत्वरूपमिति। विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वां। उततमावामस्येन्द्राब्रह्मणस्पती हविर्नोन्नं युजेव वाजिना जिगातमिति ऋक्संहिताद्वितीयाष्टकवाक्यस्यायमर्थः। हे ब्रह्मणस्पती मघवाना मघवानौ। मघमिति धननाम धनवन्तौ। विश्वं सर्वं सत्यं कर्म सद्भूतत्वात्फलस्यावश्यंभावित्वाद्वा तादृशं कर्म युवयोरित्। इदमवधारणे। वां युवामेव सर्वाणि कर्माण्यनुष्ठेयानीत्यर्थः। आपो व्यापनशीला देवताः। च नेत्येतत् पदद्वयसमुदायमेकपदमध्यापकसंप्रदायसिद्धं। वां युवयोर्व्रतं संकल्पं कर्म वा नप्रमिनन्ति न हिंसंति। डुमिञ्हिंसायां क्र्यादिकं। किंतु अनुमोदन्तीति यावत्। नोस्माकं हविर्दध्यादिकमन्नं च पुरोडाशादिकं चास्माभिर्लक्ष्य वाजिना वेगवन्तावश्वाविव युजा युक्तौ सन्तौ जिगातं देवयजनमागच्छतं। जिघातिगतिकर्मजं होरात्यादिकः। अन्नं घासं प्रत्यश्वाविवेति वा। यद्वा चनेत्यप्यर्थकमेकमेव पदमस्तु। देवाःप्रमिनंति प्रमावन्तो भवन्तीत्यर्थः। नच तस्य देवप्रमाविषयत्वेन पारमार्थिकत्वापत्तिः। सद्व्यवहार-

कालाबाध्यविषयकत्वघटितप्रामाण्यस्य विषयपारमार्थिकत्वं विनाप्युपपत्तेः। नन्वेवमपि विनिगमकाभावात् विश्वं सत्यमित्यादिवचनेन सत्यत्वविधानाय नेहनानेत्यादिवाक्यानि वादिप्रसिद्धमिथ्यात्वमनुवदन्ति। एवं असदेवेदमग्रमासीदित्यादिवाक्यनिषेध्यसमर्पकतया सत्यज्ञानादिवाक्यस्य तादृशसद्वाक्यानुरोधेनानुवादित्वकल्पनायायुक्तत्वात्। उपक्रमोपसंहारादिभिरात्मना स्वस्वभावतायाएव तात्पर्यागमाच्च। तथाहि श्रुतिः सत्यं ज्ञानमित्युपक्रम्यात्मनोऽसत्त्वनिन्दापूर्वकं तत्सत्तां स्तुवन्ती प्रसरति। असन्नेव सभवति असद्ब्रह्मेति वेदचेत् अस्ति ब्रह्मेति चेद्वेद संन्तमेनं ततो विदुरिति। तथैतदाहुः असदेवेदमग्रआसीदित्यसत्पक्षं परमतत्वेनानूद्य श्रुत्या दूषितत्वाच्च। असद्वा इदमग्रआसीदित्यादिवाक्यस्य गतिराचार्येणोक्तेति चेत् तथापि श्रुतेरद्वैतब्रह्मपरत्वे उपक्रमाद्यनेकलिंगसाक्षित्वेपि तत्रानाश्वासे तादृशवाक्यनिषेध्यसमर्पकतया सत्यज्ञानादिवाक्यं ब्रह्मणस्सत्यतामनुवदतीति कल्पनमनालम्बनमेवेति द्रष्टव्यं। वस्तुतस्तु श्रुतिसहायरहितानन्ततर्काणामप्रयोजकतया न ब्रह्मसत्त्व जगन्मिथ्यात्व बाधकतापि। ननु विश्वं सत्यमित्यादेर्विश्वसत्यत्वानुवाद इति वदता विश्वस्य प्रामाणिकताभ्युपेयते न वा। नाद्यः। तत्प्रमाणविरोधात्। निषेध्यस्य स्वेन प्रमाणविषयतानभ्युपगमात्। न द्वितीयः। असिद्धस्यानुवादायोगात्। लोकसिद्धानुवाद इति चेन्न। लोके प्रमाणेन सिद्धमनूद्यते भ्रान्त्या वा। नाद्यः। दत्तोत्तरत्वात्। नोत्तरः। तथैव लोकस्य भ्रान्ति सिद्धब्रह्मसद्भावो निषेध्यत इति चेन्न। उपक्रमादि लिङ्गावधृतस्वप्रकाशब्रह्मपरताकवाक्यजातस्यानुवादकत्वं अतादृशकतिपयवाक्यानां तत्सत्तानिषेधपरत्वमिति कल्पनस्यायुक्तत्वात्। न चासत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरमिति निरवकाशश्रुतिविरोधः। न चासत्यशब्दोऽत्यन्तासत्परः। अत्यन्तासत्त्वाभ्युपगन्तृवादिन एवासत्त्वादिति वाच्यं। न सत्त्वं यस्मिन्निति व्युत्पत्त्याऽस-

त्वशब्दस्य सत्त्वराहित्याद्यर्थकतया शून्यवादिप्रापितस्य सत्तादा-
त्म्यशून्यस्यैवात्रोक्तेः। अथैवमपि विमतं विश्वं सत्यं प्रमाणदृष्टत्वा-
दात्मवदित्यनुमानविरोध इति चेन्न। असन्नृशृंगमिति प्रमाणदृष्टे नृ-
शृङ्गादौ व्यभिचारात्। अधिकमन्यत्र। किंच प्रमाणदृष्टत्वमित्यत्र
तात्त्विकप्रमाणदृष्टत्वं विवक्षितं अतात्त्विकप्रमाणदृष्टत्वं वा। नाद्यः।
अस्माकमसिद्धेः। प्रत्यक्षादिप्रमाणानां तत्वावेदकत्वानभ्युपगमात्।
नोत्तरः। तत्रासिद्धेः दृष्टान्तस्य साधनविकलत्वाच्च नच तत्वावेद-
कत्वातत्वावेदकत्वविशेषानवधूय प्रमाणदृष्टत्वमात्रं हेतुः कुतो न
स्यादिति वाच्यं। भ्रातिदृष्टत्वप्रमाणदृष्टत्वसाधारणदृश्यतात्वं नो-
क्तमिति त्वदुदाहृतायाः कृत्यायाः त्वां प्रत्यप्रतिबन्धप्रसरत्वापत्तेः।
ननु प्रत्यक्षादीनामतत्वावेदकत्वे प्रमाणाभावादुत्सर्गतश्च बलवत्त्वा-
दद्वैतागमविरोधायोग्यत्वात्। अत एव प्रत्यक्षादिकं तत्वावेदकं प्र-
माणत्वात्। सत्यज्ञानादिवाक्यवत्। अन्यथा प्रमाणमेव न स्यात्।
प्रपञ्चस्तत्वावेदकप्रमाणदृष्टः संप्रतिपन्नभ्रान्तेतरपदार्थत्वात् ब्रह्म
वत्। आत्मत्वमुपाधिरिति चेन्न। अबाध्यत्वादेरात्मत्वस्य पक्षे सं-
भवात्। अन्यथात्मत्वस्यापि ब्रह्मण्यभावस्स्यादित्यनुमानविरोध इति
चेन्मैवं। आद्ये त्रिकालाबाध्यविषयकत्वघटितप्रमाणत्वस्य हेतुत्वे
शुद्धस्यापि सप्रकारकवृत्तिवेद्यत्वमिति मते प्रत्यक्षादीनां सदाधिष्ठान
ब्रह्मविषयकत्वेन सिद्धसाधनात्। बाध्याविषयकत्वरूपप्रमाणत्वस्य
तथात्वे मां प्रत्यसिद्धिः। ब्रह्मप्रमान्याबाध्याविषयकत्वघटितेन हेतुना
बाध्याविषयकत्वघटितसाध्यसाधने त्वप्रयोजकता। ब्रह्मज्ञानेतराबाध्य
विषयकत्वविशिष्टज्ञानजनकत्वमात्रेण हेतूपपत्त्या त्वदुक्तसाध्याप्रस-
रात्। नापि द्वितीयः। उक्तमते सिद्धसाधनात्। मतान्तरे त्वप्रयोज-
कत्वादात्मत्वस्योपाधित्वाच्च। यत्त्वत्र परेण ब्रह्मणि प्रमाणदृष्टत्वाभा-
वात् दृष्टान्तस्य साधनविकलतेत्युक्तं तन्न। तस्य प्रमाणाविषयत्वे
सत्यं न स्यात्। स्वतस्सिद्धत्वान्नेति चेन्न। स्वत इति स्वेनेति वा.

प्रमाणेन विनेति वा। नाद्यः। अनभ्युपगमात्। नहि स्वस्मिन्स्वस्य कारणताभ्युपगम्यते। अन्यथा शशविषाणस्याप्येवं सिद्धिस्स्यात्। न द्वितीयः। प्रमाणाभावे सत्यं न स्यादित्यस्य प्रमाणेन विना सिद्ध्यतीत्यस्यानुत्तरत्वात्। सिद्ध्युपायान्तरस्यानुपन्यस्तत्वात्। सर्वत्र प्रमाणविषयतयैव स्वतस्सिद्धिरिति न शक्यमभ्युपगन्तुं। तथाहि। घटादीनां सत्ता तावत् चक्षुरादिना तज्जन्यज्ञानेन च सिद्ध्यतीति वक्तव्यं। तथाच तदपिन्न सदेव साधकमसद्वा। नाद्यः। तत्र प्रमाणप्रसराभावे सत्त्वासिद्धेः प्रमाणप्रसरे च तत्राप्युक्तरीत्या प्रमाणान्तरे प्रसरो वक्तव्यः। तथाच तत्राप्येवं तत्राप्येवं इत्येकैकस्मिन्विषयेऽविश्रान्तप्रमाणधारास्वीकारप्रसंगः। तद्वारणाय क्वचित्प्रमाणधाराविरामोपगमे यत्रैव विरामःतस्याप्रामाणिकत्वेनासत्त्वापत्तौ तत्पूर्वतनस्याप्येवं तत्पूर्वतनस्याप्येवमिति घटादीनामप्यसत्त्वापत्तेःन द्वितीयः। असता प्रमाणेन तत्सिद्धौ सर्वेष्वपि तत्सिद्धिप्रसंगात्। ननु नायं दोषः। अस्मन्मते साक्षिणः स्वग्राहकत्वोपगमादिति चेन्न। एवं साक्षिगतस्वग्राहकतायाः प्रामाणिकत्वात्। यतस्तद्विशिष्टस्वग्राहकतैव वाच्या एवं तस्यास्तस्या अपि प्रामाणिकत्वाय साक्षिणः तत्तद्विशिष्टस्वग्राहकताया एव वाच्यत्वात् विषयानवस्थायादुर्हरत्वात्। मैवं। परस्परसत्तावगाहिसाक्षिद्वयोपगमादिति चेन्न। विषयविनिर्मोकेण प्रत्यक्षे ज्ञानाभावस्य आनुभाविकतया विषयविशेषितस्वविषयकत्वाविशिष्टसाक्ष्यन्तरग्राहिताया एव स्वस्मिन् वाच्यतया तादृशसाक्षीतरग्राहितायाः प्रामाणिकत्वाय तज्ज्ञानाय साक्षिणोप्येतादृशसाक्ष्यन्तरग्राहकत्वविशिष्टैतद्ग्राहकत्वस्यैव वाच्यत्वेन तस्यापि च प्रामाणिकत्वाय तत्तद्ग्राहकताविशिष्टसाक्ष्यन्तरग्राहकत्वमेव तस्य वाच्यमित्यननुभवपराहतविषयानवस्थाप्रसंगात्। साक्ष्यन्तरकल्पनाप्रयुक्तगौरवमात्रस्यैवास्मिन्पक्षे परिशेषाच्च। अन्यथा अन्यया अनुपपत्त्या ज्ञानधाराविरामो नोपेयः विषयानवस्था वा स्वीकर्तव्येति चेन्न। कतिपय

विषयसंस्पर्शविज्ञानानन्तरं तदवधूय विषयान्तरे प्रमाणतायाः सार्व-जनीनत्वात् विषयानवस्थाया अप्यनुभवेन प्रत्याख्यानात्। ननुतस्या निश्चयमात्रतस्सिद्धं! एवं च साक्षिणस्स्वरूपतः स्वविषयकत्वमात्रेण स्वसिद्धिरूपता निष्प्रत्यूहैवेति चेन्न। स्वविषयकत्वस्याप्रामाणिकत्वेऽसत्त्वापत्त्या स्वविषयकसिद्धेरन्यतः सिद्धेः तत्प्रामाणिकत्वाया स्वविषयकत्वस्वग्राहकत्वं साक्षिण इत्युक्तौ च पूर्वोक्तानवस्थैव जागर्ति। तद्विषयकत्वेनासिद्धाया अपि सिद्धेः तत्साधकत्वे ज्ञानं गुण इति सिद्ध्या पत्त्याऽपेक्षितसर्वसिद्धिप्रसंगः। अथोच्येत सिद्धिर्नतद्विषयकनिर्णय एव। किं तर्हि तन्निष्ठसंदिग्धताविरोधिज्ञानं। एवं च साक्षिणः स्वविषयकत्वकल्पनाप्रयासो हि तत्तद्विषयसंबन्धिनः तस्य स्वविषयतद्विषयकत्वविशिष्टस्वधर्मिकत्वसंशयविरोधिज्ञानरूपताभ्युपगममात्रेण प्रमाणविषयत्वेपि तत्सत्यत्वसिद्धेरप्रत्यूहत्वात्। शशशृङ्गसत्त्वासिद्धिप्रतिबंधित्वनिश्चयोपि तव दुष्परिहरः। उक्तरीत्याश्रयेण परिहारश्च ममापि तुल्यः तस्य स्वधर्मिकासति सिद्धरूपस्य ब्रह्मणः शास्त्रयोनित्वं। ननु ततश्च भवतीति कारणवाक्यानां यादृशार्थस्य प्रमाणान्तरेण सिद्धिः तादृशार्थानुवादकत्वमेव वाच्यं। नचाद्वितीयस्य वस्तुनः नापि प्रमाणेन जगत्कारणत्वावगमः। अवगमे वा विचारारम्भवैयर्थ्यमिति पुनरसंभवो लक्षणविचारयोरतिव्याप्तिश्चोक्तेश्वर इति शंका तत्तुसमन्वयादित्यत्र निरस्ता। इच्छानुमानसिद्धिप्रधानाद्यनुमानकत्वमेव कारणवाक्यानां नोक्तलक्षणब्रह्मपरत्वोपक्रमादितात्पर्यलिङ्गानामन्यथासिद्धत्वात्। एवंचोक्तलक्षणस्य च सा दुर्वारैवेति शङ्का निरस्यते। एवं सदेवेत्यादिवाक्यानां ब्रह्मणः समन्वयप्रतिपादकत्वादध्यायपादसंगतिः। अन्तराधिकरणेनेत्युक्तरीत्याक्षेपकइति। यद्वा सर्वजगत्कारणे समन्वयप्रदर्शनेन चेतनं तदिति व्याप्तिश्च। स्पष्टब्रह्मलिङ्गमित्युपक्षिप्तं तदाक्षिप्य समर्थ्यते इति सैव सङ्गतिः। तत्रच वादिविप्रतिपत्तिविषयानुपलम्भे सति संशयः।

पूर्वपक्षस्तु नोक्तलक्षणस्य ब्रह्मणः जगत्कारणत्वं संभवति मानाभावात्। नच सदेवसौम्येदमग्रआसीदित्यादिश्रुतिर्मानं तस्यानुमानसिद्धप्रधानानुवादकत्वात्। नच तदैक्षत इति ईक्षणश्रुतिविरोधः। त्वन्मतेऽपि चिद्रूपस्य ब्रह्मणो निर्विशेषस्य ज्ञानसंकल्पाश्रयत्वायोगेन तद्विरोधस्य दुर्वारत्वात्। किंच कार्यानुकूलाश्शक्तयोपि न निर्विशेषस्योपपद्यन्ते तत्रा शक्तं तत्कारणं चेति व्याहतं। नच ब्रह्मण्यपि अनिर्वचनीयाः शक्तयस्सन्तीति सांप्रतं। अनिर्वाच्यत्वासिद्धेः साहि सत्त्वेन प्रतीयमानस्य जगति श्रुतिप्रतिपादिताद्वितीयप्रत्यक्चैतन्यस्याद्वितीयत्वात्। अन्यथारूपोपपत्त्या स्वीकार्या। न चाद्यापि तादृशचैतन्यं प्रमाणपदवीमनुप्राप्तं येनार्थमभ्युपगच्छामः। तेन कर्तृत्वासंभवेपि ब्रह्मणः उपादानत्वमेव श्रुत्या प्रतिपाद्यतामिति निरस्तं। अपरिणामित्वात्। प्रधानस्य च ज्ञानानुकूलसत्त्वगुणयोरिव तादृशव्यक्तिकार्यात्मकशक्तिमत्तया परिणामित्वाच्च युक्तं जगकर्तृत्वमुपादानत्वं च। किंच शरीरादिजन्यत्वनियमदर्शनात् कथमशरीरस्यात्मनः जन्यज्ञानसंभवः। नित्यज्ञानं तु स्वरूपमेवेत्युक्तमिति। सिद्धान्तस्तु सांख्यपरिकल्पितं प्रधानं न जगत्कारणतया वेदप्रतिपाद्यं वैदिकशब्दाप्रतिपाद्यत्वात्। तथाचातिव्याप्तेर्नावकाशः। एवं चातिव्याप्तिवारणाय जगत्कारणतया वेदप्रतिपाद्यत्वसामान्याभावे साधनीये लक्षणस्य व्यधिकरणतया हेतुत्वं न संभवति। अशब्दमिति पदमेव हेतुसमर्पकतया भाष्ये व्याख्यातं। नच पक्षस्य साध्यैकदेशस्य चाध्याहारावश्यकत्वे जगत्कारणतया वेदप्रतिपाद्यः पक्षः प्रधानभेद एव साध्यमस्तु। एवं चाशब्दं नेति साध्यं ईक्षतेरिति न साध्यहेत्वोर्वैयधिकरण्यं नापि साध्यैकदेशाध्याहार इति वाच्यं। एवमपि जगत्कारणतया वेदप्रतिपाद्यत्वा नवच्छेदेन साध्यसिद्धिं विना तिव्याप्तिपरिहाराभावात् तदवच्छेदेन साध्यसिद्धेरुद्देश्यता वाच्या। एवंच्अजामेकां मायांतु प्रकृतिं विद्यादित्यादिवाक्यानां जग-

त्कारणतया प्रतिपाद्ये इदं लक्षणस्योभयवाद्यसिद्धतया भागासिद्धि प्रसंगेण तस्य हेतुत्वासंभवात्। अस्मत्कृते च व्याख्याने स्वरूपासिद्धिशङ्का तु तुरीयपादे सप्रपञ्चं निरसिष्यते। नन्वेवं अत्रैव तस्य संगततया पादान्तरे तद्विन्यासो नैव युक्त इति चेन्मैवं। सिद्ध्यतो बाधस्य साध्यधीविरोधितयान्तरंगत्वेन प्रथमतः तच्छङ्काया एव निरसनार्हतया उक्तसाध्यमबाधितं तद्विद्यादिभिः प्रधानादेरेव जगत्कारणतया बोधनादिति साध्ये शङ्किते तासां प्रधानपरताव्युदासेन ब्रह्मपरत्वसमर्थनस्यैव न्याय्यत्वात्। असम्भवदुस्स्थे लक्षणेऽतिव्याप्तिनिरासकहेत्वसिद्धिराहित्योपपादनस्याप्राप्तकालत्वाच्च। उपादाननिमित्तसाधारणनिखिलजगत्कारणतारूपलक्षणस्य एकतरमात्रकारणतासिद्धावपि संभवेन महतःपरमव्यक्तं अजामेकामित्यादौ उदाहृतायाः प्रधाने शंक्यत्वेपि बाधानवकाशेन तद्विचारस्यात्र सत्त्वात्। अन्यत्र पूर्वपक्षे च उपादानत्वमित्येवोभयप्रतिक्षेपादुभयसाधारणकोट्यवलम्बनेन सिद्धान्ते प्यसम्भवनिरासो भवतीत्याभिप्रायेण कर्तृत्वसाधकवीक्षणमेव द्वितीयसाध्ये हेतूकृतं। परमार्थतस्तु उपादानत्वमपि तस्यैवेति सुदृढाभिप्रायेण भगवता ज्ञानादित्यनभिधाय ईक्षतेरित्युक्तं। एवं चेल्लक्षणस्य तदैक्षत बहुःस्यामिति स्वगतबहुभवनज्ञानसंकल्परूपत्वात्। सत्यसन्धस्य सत्यसंकल्पस्य चान्यथाकरणायोगादात्मन एव बहुधाकरणमित्युपादानत्वं सिद्ध्यति। स्पष्टं च एतदेव वक्ष्यत्याचार्यः क्षीरवद्ध्युपदेशादिति। एवं न सद्विद्यादीनां प्रधानपरत्वमेवेति वदता सांख्येन तत्त्वमस्यादिवाक्यार्थस्यान्यथावर्णनीयत्वेन सिद्धान्त्याभिमतलक्ष्यस्वरूपासिद्धिरभिप्रेतेति बाधाश्रयासिद्ध्यादिपरिहाराय औपाधिकसद्विद्याविचार एवात्र प्रचरितो भगवता सूत्रकारेण। भाष्ये तु तुल्यन्यायतामाश्रित्य अन्येषामपि विषयत्वमुक्तं। एवंच यत्किञ्चित्कारणवाक्यं परिहृत्य ह्यविचारस्यापि लक्ष्यसिद्धिदृढीकरणायेति भवत्येव समन्वयसंगतिः। यत्त्वजामे-

कामिति वाक्ये सृज्यमानानामिति कर्तृत्वस्यापि बोधनसंभवः शं-
क्यते च। तस्मादधिकरणस्यात्र संगतिर्दुर्वारैवेति तदसत्। तथापि
तत्राज्ञादिपदानामव्यादिपरत्वेप्यसंभवस्य दुरुद्धरत्वात् एतदस्य जग-
त्कर्तृत्वासिद्धिमन्तरा अव्याकृतप्रधानवादयोर्भेद सिद्धेश्च। एवंचात्रासं-
भवातिव्याप्त्योस्तत्परिहाराय प्रधानस्याशब्दत्वहेतुना जगत्कारणतया
वेदप्रतिपाद्यत्वाभावे साधिते बाधाशङ्कामुखेनासंभवातिव्याप्त्योः पुन-
राशङ्कायां वाक्यविशेषगतिनिरूपणेन तयोः परिहारो गतिसामान्यो-
क्त्या च क्रियते। एवं च पादत्रयेण ब्रह्मणि समन्वयप्रतिपादनमु-
खेन प्रतिज्ञां प्रतिपाद्य साध्यविशिष्टपक्षसिद्धौ पूर्वहेतोरसिद्धिशङ्कायां
तत्परिहाराय चतुर्थपाद आरभ्यत इति न किञ्चिदनुपपन्नं। अधिक-
मग्रे वक्ष्यामः। यद्यपि सामान्यतो शब्दत्वेनोक्तबाधनमकृत्वापि ब्रह्म-
णि समन्वयप्रतिपादने प्यसंभवादतिव्याप्तेरभावः सुग्रहः। तथापि
शिष्यबुद्धिसौकर्यायेक्षणाभिधानोत्तरं सामान्यतोऽतिव्याप्त्यादिप-
रिहारः। कथंचिद्विशेषमाश्रित्य प्रकारान्तरेण तथा शङ्कायां च तत्प-
रिहारश्च परबोधनप्रयोजनकेषु ग्रन्थेषु बहुधा दृश्यते। अन्यथा हिं
शास्त्रयोनित्वात् तत्तुसमन्वयादित्यनुक्तावपि विष्णावेव समन्वयोप-
पादनमात्रेण निखिलशब्दवाच्यगुणपूर्तिमत्त्वसिद्ध्या परपक्षेपि तादृ-
शसूत्रद्वयवैयर्थ्यापातात् ब्रह्मशब्दोपात्तगुणान्तरपूर्तिवत् पदवाच्यता-
रूपगुणपूर्तेरपि मुमुक्षुज्ञेयत्वात् जिज्ञासाकारणीभूतगुणपूर्तिसिद्ध्यर्थ-
मेव सर्वशब्दवाच्यताया अप्यत्र समर्थयितुं शक्यत्वात्। अथ प्रति-
पिपादयिषितार्थस्य सामान्यरूपेण बोधनं शिष्यबुद्धिवैशद्यायेति चेत्
तर्हि तन्ममापि तुल्यमित्यलमतिप्रसंगेण। ननु सदेवेत्यादौ ब्रह्मणः
प्रतिपादनासंभवात् प्रधानमेवोक्तरीत्या तत्प्रतिपाद्यं वाक्यमिति नो-
क्तलक्षणे ब्रह्मणि वेदान्तानां समन्वयः। अत आह ईक्षतेरिति।
एवंच जगत्कारणतया वेदप्रतिपाद्यमशब्दं शब्दैकानधिगम्यमानुमा-
निकं प्रधानमिति यावत्। तन्न। ईक्षतेरीक्षत इति न धातुनिर्देश इ-

त्यादिभाष्यमेव वक्तव्यं। यद्वा सर्वधात्वर्थाश्रयत्वसंबन्धेन धातुरेव हेततया निर्दिष्टः। एवंचाशब्दपदस्याऽऽवृत्त्याऽर्थद्वयपरत्वं बोध्यं। नच ब्रह्मणः ईक्षणाश्रयत्वानुपपत्तिरवश्यैव। ईश्वरस्यापि तदाकारवृत्तिप्रतिबिम्बितत्वलक्षणस्य ईक्षितृत्वस्य सुलभत्वात्। परमियान्विशेषः। जीवस्यान्तःकरणवृत्तावविद्यावृत्तौ च प्रतिबिम्बभावः शंक्यः। तमन्तरेण विषयसंबन्धायोगात्। परमेश्वरस्य तु सर्वात्मकस्यानाहत्तज्ञानरूपस्य सर्वरूपज्ञस्यैव आविद्यकाधाराधेयभावापन्नसर्वज्ञतासंभवेप्यतीतानागतवस्तुमानानुरोधेन ईक्षतिश्रुतिः अनीतत्वानुरोधेन चाद्यमायावृत्तावपि प्रतिबिम्बेनेक्षितृत्वाभ्युपगमः। एवंचैक्षतेत्यादौ चैत्रात्मा पश्यतीत्यादाविव प्रतिबिम्बितत्वादिरूपं कर्तृत्वमेवाख्यातार्थः। कथमन्यथा सांख्येनापि योगिनां सर्वज्ञत्वादिकमुपपादनीयं। सर्वज्ञबुद्ध्यगृहीतासंसर्गकत्वमात्रेणैव सर्वज्ञत्वव्यवहारः। न वस्तुतः सर्वज्ञत्वं जीवस्येति चेत् मुक्तिदशायामप्यसंसर्गाग्रहात्सर्वज्ञतापत्तिरिति अविशेषएव मुक्तिसंसारयोरापद्येत। एतस्य मुक्तिदशायामपि बुद्ध्यन्तरसम्भवात् विद्यमानतदीयबुद्धीत्यादिविवक्षायामपि तदीयत्वादेः दुर्निरूपतया दोषतादवस्थ्यं तदीयता हि तन्निष्ठप्रतियोगिताकसम्बन्धवत्त्वं प्रतियोगिता च यद्यात्मनोऽतिरिच्यते तस्यांगीकृतत्वे आत्मनः कूटस्थत्वाभ्युपगमविरोधः। नित्यत्वे च सिद्धान्तविरोधः। नैरात्मनो निर्धर्मकत्वाभ्युपगमात्। अतीतादिवच्च आत्मनश्चैतन्यामिति वाक्याद्विकल्पाभ्यां वृत्तिर्जायत इति वदन्ति लक्षयन्ति च शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति स्वरूपानतिरिक्तत्वे आत्मनो बुद्ध्या संसर्गस्य स्वाभाविकतया निर्मोक्षत्वप्रसंगः निरस्तश्च स्यात्तिपक्ष इति प्रथमसूत्र इति। यदि च पूर्वोक्तनव्यमतरीत्या बुद्धिपरिणामवृत्त्यादिकं प्रत्याश्रयत्वमेव कर्तृत्वमुच्यते तदा तुल्यन्यायतया मायावृत्त्याश्रयत्वमपि चेतनस्यैवेति न सर्वज्ञताभङ्गः। विस्तरस्तु रत्नावलीप्रकाशेऽनुसंधेयः। विशिष्टस्यैव जगदुपादानत्वं

कर्तृत्वं च न शुद्धस्येति मते प्रथमसूत्रे शुद्धब्रह्मैव जिज्ञास्यत्वेन प्रतिज्ञातं। जिज्ञासा च तन्निश्चयानुकूलं वेदान्तानां तत्परत्वावधारणं तच्चेतरव्यावृत्ताजिज्ञास्यस्वरूपावगत्यधीनमिति तदर्थं लक्षणे वक्तव्ये तत्र स्वरूपलक्षणातिरिक्तस्य जगत्कारणत्वादेरसत्त्वेपि तस्योपलक्षणतया व्यावर्तकत्वमस्तीति तदेव ब्रह्मोपलक्षणं द्वितीयसूत्रे प्रतिपादितं। यद्यप्यानन्दादिकमस्ति स्वरूपलक्षणमिति तस्यैवाभिधानं युक्तं। तटस्थलक्षणात् स्वरूपलक्षणस्यैवान्तरङ्गतयाभ्यर्हितत्वात्। वेदब्रह्मशब्देनैवासंकुचितवृत्तिकेन अनन्ताख्यस्वरूपलक्षणस्य लाभात्। तदुपलक्षितस्याविद्यानिवर्तकत्वावधारणाभावेन विचार्यता संभवतीति विचारानारंभपूर्वपक्षस्य समाहितत्वात् जिज्ञासाकारणीभूतानन्त्यनिर्वाहकं तटस्थलक्षणमेवोपात्तं। एवंच सति कार्यकारणानन्यत्वन्यायेन वियदादेः विशिष्टानन्यत्वनिश्चये विशिष्टस्य च केवलानन्यत्वात् केवलस्यानन्त्यं सिद्ध्यतीति। ततश्च वेदान्तानां तार्किकानुमितकारणमात्रानुवादकतया नानंत्यवत् ब्रह्मात्मककारणबोधकत्वं क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वादित्यनुमानैश्च लाघवे इतरबाधादिसहकृतैश्च सविशेषतरवेदादिविशिष्टकारणमात्रसिद्धे वस्तुपरिच्छेदादिशून्यात्मकतया मानाप्रवृत्तेश्चेति न जगत्कारणतया शुद्धोपलक्षणत्वसंभवः। तदसंभवे च जगत्कारणस्यैव ब्रह्मातिरिक्तस्य सत्त्वात् न जिज्ञास्यतासिद्धिरिति शङ्कायां तन्निरासात् अद्वितीयचेतनात्मकस्यैव कारणस्य शास्त्रयोनित्वमुक्तं। एवंचाद्वितीयस्यानंतस्य वस्तुनः शास्त्रप्रतिपाद्यत्वमन्तरेण तदीयविशिष्टरूपस्य जगत्कारणता न सिद्ध्यति। शास्त्रस्य च तद्बोधकत्वं तु प्रमाणान्तरवेद्यत्वनिष्फलत्वाभ्यां न संभवति। देवताधिकरणन्यायश्च न प्रमाणान्तरविरुद्धे प्रवर्तत इति शङ्का चतुर्था निराकृता। इदानीं सदेवेत्यादिवाक्यानां सांख्याभिमतप्रधानानुवादकत्वमाशंक्य निराक्रियते। एवंच ईक्षणादीनां शुद्धावृत्तित्वेपि विशिष्टवृत्तित्वान्न क्षतिः। एवमेवहि ईश्वर-

लिङ्गैः जगत्कारणत्वादिभिःशुद्धलिंगैरसंकुचितानानंत्यमोक्षफलकज्ञानविषयत्वादिभिश्च प्रधानादिव्युदासेन वाक्यसमन्वये स्थिते यत्रोपासनादिकार्यश्रवणं तत्र श्रूयमाणगुणविवर्तासंभवात्। अगुणानां विशेषणता यत्रच पूर्वापरपरामर्शेन शुद्धब्रह्मपरतावसीयते तत्र गुणानां प्रधानाविरोधेन विशेषणत्वासंभवादुपलक्षणत्वमेवेति व्यवस्था चोपपद्यते। शुद्धचिदीश्वरयोश्चात्यान्तिकभेदाविरहात् संसारित्वादवद्यगन्धरहितत्वाद्भाष्यादौ परमेश्वरत्वेन व्यवहार इति ब्रह्मणः ईक्षितृत्वं तदैक्षतेत्यादिश्रुत्या प्रतिपाद्यते। नच तज्जडमात्रस्य संभवति। नच ज्ञानशक्तिमत्त्वं वा प्रधनस्य ज्ञातृत्वव्यपदेश इति युक्तं केवलस्य जडस्य ज्ञातृत्वायोगेन केवलसद्विवर्ते ज्ञानत्वासंभवात् साक्षिता यांच तस्याभासकचित्प्रतिबिम्बरूपमुख्यज्ञानावच्छेदकतया परं ज्ञानत्वमुपचर्यते। प्रतिबिम्बश्चोक्तसंबन्धेन प्रत्यासन्न एव ज्ञातृताव्यवहारनिमित्तमित्यादिकं सप्रपंचं प्रतिकर्मव्यवस्थायामुपपादितमाद्यसूत्रे। एवं ब्रह्मव्यतिरिस्य सर्वस्य यथाऽनिर्वाच्यता यथा सद्वितीयप्रत्यगभिन्नब्रह्मपरत्वं सद्विद्याया स्तथा चतुर्थे च प्रसंगादुपपादितं। परिणामित्वासंभवेपि यथोपादानत्वं संभवति तथा प्रकृत्यधिकरणे सूत्रकारो वक्ष्यति। शरीरादिकं विनापि महत्तत्वादिवदव्याकृताया आद्यकार्यमायावृत्तेरपि निर्वाहः संभवति। नहि प्रमाणान्तराविरोधिन्यनुपपत्तिर्नामास्ति। अन्या कार्यमात्रस्य किञ्चित्कार्याव्यवहितोत्तरत्वानियमदर्शनादाद्यकार्यासिद्धिप्रसंगादिति। ननु तत्तदैक्षत आपऐक्षन्त इत्यादिगौणेक्षणप्रायपाठानुरोधात् तदैक्षतेति ईक्षतिरपि प्रत्यासन्नाकार्यतागुणयोगात् गौणस्स्यात्। यथाहि पतनोन्मुखे कूले कूलं पिपतिषति इति प्रयोग इति ईश्वरं निराचष्टे गौणश्चेन्नात्मशब्दात् तेज ऐक्षतेत्यत्र ईक्षतिः गौणीति चेन्न। अनेन जीवेनात्मनानुप्रविश्येत्यादौ जीवसामानाधिकरण्येन श्रूयमाणात्मशब्दतात्पर्यगोचरत्वात्। नहि जडस्य प्रधानस्य जीवगततादात्म्यप्रतियोगित्वं।

यद्यपि शरीरादि प्रतियोगिकतादात्म्यप्रतियोगित्वं जीवादावस्ति। एवमविद्यादितादात्म्यमपि साक्ष्यादौ वर्तत इति सिद्धान्ते व्यावहारिकमनिर्वाच्यं अचेतनात्मनोः तादात्म्यं सुलभमेव। तथापि परेण नेदं वक्तुं शक्यं तेनानिर्वचनीयवस्त्वनभ्युपगमात्। सिद्धान्ते तु अव्याकृतस्य कथंचित् जीवतादात्म्यसंभवेपि तत्सत्यं स आत्मा तत्त्वमसीत्यादौ आत्मपदस्याव्याकृतपरत्वे कथंचिदपि प्रामाण्यानिर्वाहात् तत्वबोधनपरोक्तप्रामाण्याय अवश्यमात्मपदं चेतनपरं वाच्यं तच्च सर्वात्मकप्रकृतकारणपरमिति उक्तकारणस्य चेतनत्वमावश्यकमित्युक्तमेव। प्रायपाठानुसारेण ईक्षतेर्गौणत्वकल्पनामिति। ननु जीवेनात्मनेत्यादौ आत्मशब्दः ममात्मा भद्रसेनइत्यादाविव गौण एवेत्याशङ्कां निराचष्टे। तन्निष्ठस्य मोक्षोपदेशात् तस्मिन् जगत्कारणे निष्ठा सैव धीर्यस्य तादृशस्य आचार्यवान् पुरुषो वेद तस्यतावदेवचिरं यावन्नविमोक्ष्ये ईप्सुरित्यनेन मोक्षोपदेशादित्यादिसूत्रमुक्तावल्यां विस्तरः। अत्र वदन्ति अत्राधिकरणे किं विशिष्टस्य जगत्कारणत्वं तद्वाक्यबोध्यमिति सिद्धांत्यभिमतं किंवा कर्तृत्वं बोध्यमिति यद्वा शुद्धस्य भ्रमाधिष्ठानत्वं बोध्यमिति। नाद्यद्वितीयौ। विशिष्टे सदेवेत्यादिवाक्योक्तसत्त्वाद्ययोगात्। पूर्वसूत्रेऽखण्डसमन्वयस्यैव प्रतिज्ञातत्वेनाखण्डस्यैव वक्तव्यत्वात्। द्वितीये वैयधिकरण्यं च। नहि प्रधानं परिणामीति प्राप्ते ब्रह्मकर्त्रिति सिद्धान्तो युक्तः। अत एव न तृतीयः। प्रधानं परिणामीति प्राप्ते ब्रह्माधिष्ठानमित्यस्य व्यधिकरणत्वात्। कथंचिद्वैयधिकरण्येपि तदैक्षत सेयं देवतैक्षत तन्नामरूपे व्याकरोदित्यादिकमयुक्तं स्यात्। तस्य लक्षणया चिन्मात्रपरत्वे च सर्वमपि लक्षणया प्रधानपरं स्यात्। सूत्रे ईक्षतेरित्यादिहेतूक्तिश्च नस्यात्। नच तात्पर्यविषये क्षणेन प्रधाननिरासः। अपि चात्र सदेवेत्यादिवाक्यसमन्वयोक्तिश्चेति आनन्दमयोऽभ्यासादितिवत् सदीक्षतेरिति स्यात् प्रधानस्याशब्दत्वमात्रनिरास श्चेत् इदमधि-

करणं तन्निरासके चतुर्थपादे स्यात्। अस्मन्मते आनन्दमयः तद्ब्रह्मेत्यादिरूपेण विधेयतयाऽनुषंजनीयस्य तत्पदस्येहाशब्दं नेक्षतेरिति उद्देश्यसमर्पकतयान्वयः हेतुसाध्ययोः सामानाधिकरण्यं च स्यात् अशब्दं प्रधानं कारणं न कारणस्य ईक्षितृत्वादिति वदतो हेतुविभक्त्यभावेन साध्यत्वयोग्यश्रुताशब्दत्वरूपसाध्यत्यागेन साध्यकल्पनार्थं अध्याहृतस्य कारणपरशब्दस्य विभक्तिपरिणामेन अवृत्तिर्वैयधिकरण्यं च कारणमशब्दं प्रधानं नेति कारणस्योद्देश्यत्वे च अशब्दं हि तदिति हेतूक्तस्याशब्दत्वस्य कारणेऽसिद्धिः। किंचाशब्दत्वमवाच्यत्वं वा शब्दवृत्त्या शास्त्राविषयत्वं वा वेदासिद्धत्वं वा कारणत्वेन वेदासिद्धत्वं वा। त्वन्मते शास्त्रप्रतिपाद्यस्य शुद्धस्यावाच्यत्वात् अवाच्ये च वृत्त्यन्तरायोगात् नतु प्रधानस्य सांख्यमतस्यावाच्यत्वात् कारणत्वेनैवाजादिश्रुतिसिद्धत्वाच्च त्वयापि त्रिगुणस्योपादानतया मायां तु प्रकृतिं विद्यादिति श्रुतिसिद्धत्वांगीकाराच्च त्रिगुणस्य पारमार्थिकत्वादेव तदविवादः। नन्वानुमानिकमप्येकेषामित्यत्र आनुमानिकशब्देन सांख्यानुमानकल्पितं यत् त्वया विवक्ष्यते तदेवात्र मया अशब्दपदेन लक्ष्यत इति चेन्न। सांख्योत्प्रेक्षितानुमानगम्यत्वस्य प्रधानं सदेवेत्यादिवाक्यार्थो नेत्यत्र अहेतुत्वात् अन्यथा तार्किकोक्तानुमानगम्यत्वमीश्वरस्य सदेवेत्यादिवाक्यार्थता न स्यात्। त्वया च तत्राशब्दं हि तदिति तस्य तत्र हेतुत्वोक्तेः। किंच त्वयोक्ताशब्दत्वासिद्ध्यर्थं चतुर्थपादेन अव्यक्तादिपदानां सूक्ष्मशरीरादिपरतामुक्त्वा प्रधानपरतां निषेध्य तात्पर्यस्य वेदासिद्धत्वं त्वयैवाशब्दत्वं वाच्यं तच्चाशक्यमित्युक्तं। एतेन स्वप्रधानतया वेदाप्रतिपाद्यत्वमशब्दत्वमिति निरस्तं। तदेतदभिप्रेत्योक्तं भाष्ये नचाशब्दत्वामितरासिद्धमिति। अनुव्याख्याने च न ह्यशब्दत्वं प्रधानेङ्गीकरोत्यसाविति। किंच आत्मनःईक्षारूपस्य सर्वरूपेणेक्षितृत्वमव्यक्तादिति चेत्। जडविशिष्टस्य तु तत्संभवेना व्यक्तस्यापि आत्मावि-

केनात्मविशिष्टस्य तत्स्यात्। तन्निष्ठस्येत्याद्युत्तरविरोधश्च। आत्मशब्दादित्यत्राप्यात्मशब्दवाच्यता हेतुश्चेत्त्वसिद्धिः तल्लक्ष्यत्वे तत्प्रतिपाद्यत्वमात्रे तु प्रधानस्यापि। किञ्च किमात्मशब्दस्य चेतनार्थत्वादचेतने प्रधाने तदनुपपत्तिर्विवक्षिता किंवा स्वरूपार्थत्वात् अनेन जीवेनात्मना चेतनतया प्रसिद्धजीवस्वरूपतया अचेतनेऽनुपपत्तिः। नाद्यः। चेतनस्य ज्ञातृतारूपत्वे ब्रह्मण्यपि शुद्धे तदभावात्। विशिष्टचेत्प्रधाने उक्तरीत्या तत्सम्भवात्। ज्ञानरूपत्वे तदर्थश्च आत्मशब्दस्येक्षितृत्वं गौणमित्यत्रैव हेतुत्वेन गौणत्वाभावे हेतुत्वायोगात्। नान्त्यः। सर्वज्ञस्यासर्वज्ञत्वादिविरुद्धांशत्यागेन चिद्रूपेण जीवैक्यवत्कर्तृत्वादिविरुद्धांशत्यागेन प्रधाने ऐक्यस्यापि सम्भवात्। तन्निष्ठेति सूत्रेऽपि तच्छब्दार्थः शुद्ध आत्मा विशिष्टो वा। नाद्यः तस्याद्यसूत्रोक्तेक्षितृत्वायोगात्। नान्त्यः विशिष्टस्य साक्षान्मोक्षान्वयायोगात् परंपरया तदन्वयस्तु प्रधाननिष्ठस्यापीति। इदमत्रावधेयं सर्वकारकशून्यतया ब्रह्मणि ज्ञानासम्भवं सूचयित्वापि प्रागुत्पत्तेरित्यादिभाष्येणैकात्मकत्वात् परिणामासम्भवौ सूचयतापि प्रधानस्येत्यादिभाष्येण ब्रह्मणः जगदुपादानत्वं जगत्कर्तृत्वं च न संभवतीति पूर्वपक्षोत्थापनात् ब्रह्मणः कर्तृत्वावलम्बनेन सिद्धान्तो न युक्तः शुद्धस्याप्युपाध्यवच्छेदेनेक्षणादिकं संभवतीति उपपादितत्वात्। विशिष्टस्य कर्तृत्वमादाय सिद्धान्तपर्यवसानेऽपि न क्षतिः। शुद्धस्याप्यविचार्यत्वेऽपि विशिगतजगज्जन्मादिकारणतायाः तदुपलणत्वस्योक्ततया तस्याश्च विशिष्टवृत्तित्वे केवलं प्रत्युपलक्षणत्वायोगेन तदर्थं विशिष्टजगत्कारणताया अपि व्यवस्थापनीयतया असंगत्यभावात् नचैवं सदेवेत्यादिवाक्योक्तसत्त्वानुपपत्तिःविशिष्टस्यापारमार्थिकत्वाभ्युपगमादिति वाच्यं। शुद्धस्योपक्रमेऽपि रक्तो घट आसीत्स इदानीं नीलोऽभूदित्यत्रेव तच्छब्देनपरामृष्टस्य शुद्धस्येक्षणकर्तृत्वविशिष्टात्मशालितया तदैक्षतेति प्रयोगोपपत्तेः वैयाकरणमते आख्यातस्य कर्तृवाचकत्वात्। किञ्चोपादानत्वं

कर्तृत्वं साधारणकारणत्वमात्रं चेतनस्येति। सिद्धान्तेपि ईक्षणे सहेतुर्न सिद्ध्यतीति नोक्तविकल्पावकाशः। नच तात्पर्यविषयेण ईक्षणेन साध्यसाधनायोगः परमतात्पर्यविषयस्याप्यवान्तरतात्पर्यविषयतासंभवात्। नन्वेवं सति ईक्षतेरिति गौण एव विन्यासः स्यादिति तदसत्। तत्र सदित्यस्य सदेवेत्यादिवाक्यप्रतिपाद्यमित्यर्थमंगीकृत्य तस्य साध्यनिर्देशत्वाभ्युपगमेन ईक्षणमात्रस्य हेतूकरणे जीवे व्यभिचारापत्तिः। तस्य पक्षनिर्देशत्वमभ्युपेत्य प्रधाने साध्याहारे च साध्यमेवाध्याहार्यं न पक्ष इत्यत्र विनिगमनाभावः। नच तत्तु समन्वयादित्यतः तदित्यनुवर्तते। तथाच पक्षसाध्यमेति नाध्याहारोऽनुसरणीय इति वाच्यं। तथासति हेतोरनेकान्त्यस्य युक्तत्वात्। आनन्दमयोऽभ्यासादित्यत्र च आनन्दमयोपलक्षितवाक्यविशेषेपि ब्रह्मपरत्वं साध्यं बाधकाभावविशेषितोऽभ्यासस्तद्वाचकपदघटितत्वरूपाभ्यासशब्दार्थो हेतुर्वाच्य इति नानेकान्त्यं अन्यथा। त्वन्मतेपि व्यधिकरणस्याभ्यासस्य हेतुत्वानुपपत्तेः। व्यधिकरणस्यापि हेतुत्वं तावकमनोरथमात्रं तत्र तत्र निरस्तं निरसिष्यते च प्रसंगानुसारेण। एवंच हेतुपरिष्कारोपि तत्रावश्यकः। यथाविन्यासे तु तत्तुसमन्वयादिति सूत्रेऽनुवृत्तमध्याहृतं वा यत् शास्त्रयोनिपदं तदेवेह पक्षः आविधेयत्वे अशब्दमिति च अब्भक्षो वायुभक्ष इत्यत्राब्भक्षादिवत् अशब्दमित्यनेकशब्दानधिगम्यानुमानिकं प्रतीयते तद्भेदश्च साध्यं नञ्समभिव्याहृतेन नञा निदर्शित इति न हेतोरनेकान्त्यादिवार्ता। एवंचासम्भववारणेपि नातिव्याप्तिपरिहारः संभवतीति शङ्कायां तन्निरासाय योजनान्तरमाश्रित्य अशब्दमानुमानिकं च शास्त्रयोनि न अशब्दत्वादित्यभिप्रायतया सूत्रं व्याख्यातं योजनाभेदेनार्थभेदलाभश्च सूत्रस्य भूषणं नतु दूषणं। यच्चोक्तमिदमधिकरणं एवं सति चतुर्थपादे संगतमिति तन्न। अत्राशब्दत्वादौ समन्वयहेतोरसमर्थनेन तत्पादानन्तर्भावात् कथमशब्दमित्यादिभाष्यस्य चायमर्थः। ईक्षितृत्वश्रवणा-

त्कारणस्य कथमशब्दत्वं आनुमानिकप्रधानरूपत्वामिति यावत्। एवं च कारणत्वेन शास्त्रयोनि नाशब्दमीक्षतेरिति योजना दर्शिता भवति। तथाच यदि कारणवाक्यमात्रस्य यद्यचेतनप्रधानपरता तदैवोक्तलक्षणासंभवस्स्यात्। नचैतदस्ति। सद्विधायामेव चेतनकारणत्वावगतेरिति भावः। तथाचायं निर्गळितार्थः पूर्वपक्षिणा शंकितायाः अतिव्याप्तेर्निरासाय योजना तच्छंकितस्यासंभवस्योक्तानुमाने बाधस्य च परिपाराय द्वितीया योजना। एवंच न योजनाद्वयवैयर्थ्यं योजनायाश्चस्मन्मते क्केशोवेति सर्वं समञ्जसामिति। अशब्दत्वं च वैदिकतात्पर्यगोचरत्वाभावः। तच्च चतुर्थपादे प्रपञ्चयिष्यते। एतेन नायं हेतुः परं प्रति सिद्ध इति समाहितं। प्रसाध्यस्यापि हेतुतयोपन्यासस्य सांप्रदायिकत्वात्। अन्यथा एवं परं प्रति असिद्धानामुपक्रमादीनां शास्त्रस्य विष्ण्वेकनिष्ठत्वे हेतुतया पूर्वसूत्रे त्वदुक्तिरप्युन्मत्तप्रलापः स्यात्। एवं सति द्युभ्वाद्यायतनं स्वशब्दादित्यत्र आत्मशब्दस्य शिववाचकत्वेन पराभ्युपगतस्य तद्भेदे साध्ये हेततया युक्तिरपीति बहुशः तत्तदवसरे निरूपयिष्यामः। आत्मन ईक्षारूपस्यापि ईक्षितृत्वमुपपादितं प्राक्। भेदस्य तु प्रधानस्य न कथंचिदीक्षितृत्वं। तन्निष्ठेत्यस्य तदीयकेवलरूपानिष्ठस्य मोक्षोपदेशादित्यर्थकतया विशिष्टस्यैव जगत्कारणतामतेपि न तद्विरोधः शंकनीयः। यद्यप्यात्मशब्दादिति द्वितीयसूत्रस्थहेतोर्विकल्प्य दूषणं तदपि तत्सूत्रव्याख्यानावसरे निरस्यमेव। समाप्तम् ॥

॥ श्रीरामचन्द्रो विजयते ॥

सत्यज्ञानानन्दलक्ष्यं परिच्छेदविवर्जितम् ।
अस्पृष्टानर्थमनिशमाश्रये नृहरेः पदम् ॥

विमतं मिथ्या दृश्यत्वात् यदित्थं तत्तथा यथा संप्रतिपन्नं न च जगतोऽभावादाश्रयासिद्धः पक्षः । तस्य पारमार्थिकत्वाभावेपि तत्र विमतत्वरूपपक्षतावच्छेदकस्योभयमतसिद्धतया आश्रयासिद्धेरसंभवात्। परमार्थसद्भेदविशिष्टपक्षादेराश्रयासिद्धत्वे शशे प्रतीतं शृङ्गं न पारमार्थिकं प्रमाणाविषयत्वादित्यादेरपि त्वन्मते आश्रयासिद्धत्वप्रसंगात् जगतो भानादाश्रयानिर्वाहत्वपक्षेपि आश्रयत्वप्रयोजकसत्त्वाभावेनाऽऽश्रयासिद्धिर्दुर्वारेति चेन्न। सत्त्वस्याप्याश्रयत्वप्रयोजकत्वे असतः सत्त्वादिरूपधर्माश्रयत्वप्रसंगात्। आश्रयत्वशब्देनानुमित्युद्देश्यत्वोक्तावप्युक्तं दूषणं। एतेन जगतोऽसत्यत्वे प्रतिज्ञातेऽपसिद्धान्तः तदुक्तं जगतो भावादायासिद्धः पक्ष इति । पक्षःप्रतिज्ञातार्थः प्रपञ्चस्यासत्यत्वलक्षणः स चाश्रयासिद्धः आश्रयास्सिद्धान्तः तदाश्रयेण कथाप्रवृत्तेः। तस्मिन्नासिद्धः तद्विरुद्ध इति यावत्। कुतः जगतो भावात् भावत्वेनासद्विलक्षणत्वेन परेणांगीकृतत्वादिति परास्तं। जगतोऽत्यन्तासत्त्वस्याप्रतिज्ञासितत्वात्। तस्यानिर्वचनीयत्वासिद्धेरप्रसिद्धविशेषणता दुर्वारेति चेन्न। शुक्तिरूप्यादावुभयवादिसिद्धस्य सद्विलक्षणत्वमात्रस्य त्वां प्रति साध्यत्वात्। यत्त्वसद्वैलक्षण्यमात्रस्योभयवादिसिद्धत्वात् सद्वैलक्षण्यमात्रस्य साध्यत्वे अत्यन्तासत्त्वमादायार्थान्तरतापत्तेःसदसद्वैलक्षण्यस्य मिथ्यात्वे सिद्धसाधनता। सति सदन्तरभेदस्यासद्भेदस्य चोभयवादिसिद्धत्वादिति। तदसत्। शुक्तिरूप्यादेरनिर्वचनीयत्वाभ्युपगन्तृभास्करैकदेशिनं प्रत्यर्थान्तरवारकं पक्षविशेषणमनुपादाय सदसद्वैलक्षण्यसाधनेपि सद्भेदविशिष्टासद्भेदरूपस्य सद्भेदासद्भेदोभयत्वावच्छिन्नरूपस्य वा प्रकृतसाध्यस्य पक्षे तन्म-

तासिद्धतया सिद्धसाधनानवकाशात्। नहि विशेष्यवत्तयाऽवगते वि-शिष्टसाधने सिद्धसाधनत्वं तांत्रिकानुमतं। क्षित्यंकुरादिकं कर्तृजन्यं कार्यत्वादित्यत्रापि सिद्धसाधनतापत्तिः। एकदेशसिद्धावप्युभय-यत्वावच्छिन्नसाधने सिद्धसाधनत्वे गुणादिकं गुण्यादिना भिन्ना-भिन्नं १ समानाधिकृतत्वादित्यादावपि तदापत्तेश्च। सद्विलक्षणत्वं च सत्त्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं नातः सति सदन्तरभेदमादा-य सिद्धसाधनता। सन्निष्ठासन्निष्ठभेदप्रतियोगित्वं च न सत्त्वावच्छि-न्नं। तथासति परमते असन्नित्यादिप्रतीतेः प्रमात्वापत्तेः। प्रकृतसा-ध्यशरीरप्रविष्टा सत्ता च अबाध्यं सर्वं प्रमेयमित्याद्याकारक यत्कि-ञ्चिज्ज्ञानविशेष्यत्वं। एतादृशवाक्याजन्यबोधव्यक्तेः तद्व्यक्तित्वेन निवे-शाच्च नान्योन्याश्रयत्वादिः। अबाध्यशब्दार्थश्च तत्तन्मतेऽसद्व्यावृत्तो धर्मः कश्चिदवश्यं वाच्यएवेति न तादृशज्ञानादौ लिङ्गमिति प्रसंगो वा स्वप्रकारकधीविशेष्यताव्यापकाभावप्रतियोगित्वाभावो वा। सा गुरोरपि धर्मस्यावच्छेदकत्वोपगमात् न तदवच्छिन्नभेदाप्रसिद्धिः वस्तुतस्तु स्वप्रकारकधीविशेष्यताव्यापकाभावप्रतियोगित्वमेव सद्वि-लक्षणत्वं तच्च नासतः उभया[illegible]दिसिद्धमिति नोक्तदोषावकाशः। ए-तेन केयं सत्यता अर्थक्रियासामर्थ्याद्विलक्षणत्वं तदनाश्रयत्वसाधनेऽप-सिद्धान्तः। तथाचेत् सिद्धसाधनतैव सत्त्वमबाध्यत्वं बाध्यत्वं मि-थ्यात्वमिति तद्विवेक इति चेत् तर्हि बाधो वक्तव्यः। अन्यथा विज्ञात-स्य सम्यग्विज्ञानं चेत् सिद्धसाधनतैव। क्षणिकत्वादिना विज्ञातस्या-क्षणिकत्वादिना अबाधज्ञानविषयत्वस्यास्माभिरंगीक्रियमाणत्वा-त्। २ प्रातिपन्नोपाधौ त्रैकालिकसत्तानिषेध इति चेन्न। सत्यताया

१ समानाधिकृतत्वं च समानविभक्तिकपदोपस्थाप्यत्वं। तदापत्तेः सिद्ध-साधनतापत्तेः।

२ स्वप्रकारकज्ञानविशेष्यनिष्ठाभावप्रतियोगित्वं। शुक्तिं दृष्ट्वा इदं रजत-मिति ज्ञाने रजतं प्रकारः शुक्तिर्विशेष्या स्वपदेन रजतोपादाने स्वप्रकारक-

एवाद्याप्यनिरूपणात् । किञ्चैवमसत्वान्तासत्त्वमेव प्राप्तं मिथ्याश्रया-सिद्ध्यादिप्रत्यापत्तिः सत्त्वनिषेध एव क्रियते नैवासत्त्वविधिरिति चेन्न । सत्त्वनिषेधातिरिक्तस्यासत्त्वस्याभावात् भावेपि वा सत्त्व-निषेधेनैव वा आश्रयासिद्धिस्स्यात् । असत्त्वमनाश्रयत्वे प्रयोजकं न सत्त्वाभाव इति चेन्न नियामकाभावात् समंशतिवादिनोपि चेदस्तु तावत् । आश्रयासिद्ध्यादिसंदेहेप्यनुमानसाधकं व्यावहारिकसत्ता-स्वीकारादाश्रयोपपत्तिति चेत् केयं व्यावहारिकसत्ता । यदासन्नि-त्यादिव्यवहारहेतुः तदासिद्धं नस्समीहितं व्यर्थं च व्यावहारिक-त्वविशेषणं । सत्तामङ्गीकृत्य पुनस्तन्निषेधे परस्यापसिद्धान्तः । पारमा-र्थिकत्वमेव निषिध्यते नतु व्यावहारिकसत्तेति चेत् किमिदं पारमा-र्थिकत्वं व्यावहारिकत्वं चेत् निषिध्यतां न नो हानिः । अनिर्वाच्यत्व-मिति चेत् बाध्यत्वनिषेधोऽबाध्यत्वमेव । तच्च सत्तानिषेध इति कुतो व्यावहारिकसत्तापीतीतरेतराश्रयत्वदोषो वा स्यात् । भ्रान्तिसिद्धस त्ताव्यावहारिकसत्तेति चेत् नास्ति सत्त्वेत्यनाश्रित इव ननु प्रतीतिगो-चरतामात्रेणाश्रयत्वोपपत्तौ किं सत्तया । सुरभितासाधने तु गगनार-विन्दस्य नाश्रयता न सत्ताविरहात् । अपितु निरूपाख्यत्वादिति चेन्न । तथासति शब्दाद्गगनारविन्दसत्ताप्रतीतौ तत्र सुरभितासाध-नेन आश्रयासिद्धिरुद्भाव्येत अस्त्वेवं रूपान्तरवैकल्यं भविष्यतीति चेत्

---

ज्ञानं रजतज्ञानं तद्विशेष्यं शुक्तिः तन्निष्ठो योभावः रजताभावःतत्प्रतियोगि त्वं रजतस्य । असतोऽप्रकारत्वात् । येन संबन्धेन येन रूपेण यद्यत्र प्रतीयते तत्तेन संबन्धेन तेन रूपेण तत्र नास्तीति अर्थो लभ्यते । तथासति रजते प्रकारता प्रतियोगिता च एकसम्बद्धावच्छिन्ना एकधर्मावच्छिन्ना च भवति । प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमित्यस्यायमनुगमः । प्रकारताविशिष्टप्रतियोगित्वं मिथ्यात्वं । प्रतियोगितायां प्रकारतावैशिष्ट्यं च स्वावच्छेदकसंबन्धावच्छिन्नत्व स्वावच्छेदकधर्मावच्छिन्नत्व स्वनिरूपितविशेष्यता-व्यापकाभावनिरूपितत्व एतत्त्रितयसंबन्धेन ॥

काल्पनिकागमवैकल्यस्य सर्वत्र सौलभ्यात् । तथाच साधनतदाभासनियमः स्यात् । किञ्चैवं सति प्रकृतानुमानस्यापि तत्वावेदकत्वं न स्यात् । गगनारविन्दस्यापरोक्षप्रतीतिर्नास्तीति चेत् । तथा सत्यतीन्द्रियप्रपञ्चभागस्यानाश्रयत्वं स्यादिति । यत्तु निषेधं प्रत्यसतोऽप्याश्रयत्वं सम्भवति । यथा वन्ध्यासुतो न वक्तेति अन्यथा स्ववचनव्याघातादिदोषप्रसंगः । एवं चात्यन्तासत एवाश्रयत्वध्रौव्ये किमु वाच्यं व्यवहारतः प्रपञ्चस्येति तदनुपपन्नं । तथासति प्रपञ्चस्य व्यावहारिकसत्त्वास्वीकारवैयर्थ्यप्रसंगात् । निषेधं प्रत्याश्रयत्वे विधिं प्रति तत्कस्मान्न स्यात् । नहि विधिनिषेधयोर्वस्तुतः कश्चिद्विशेषः । एतेन सत्त्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वं मिथ्यात्वमिति निरस्तमित्यपास्तं । अस्मन्मते तावदत्यन्ताभावमात्रस्य केवलान्वयितया प्रतिबन्धकाभावो न कार्यमात्रहेतुः अतिप्रसंगादिति कारणीभूताभावप्रतियोगित्वं न प्रतिबन्धकत्वमिति तद्घटितं हेत्वाभासलक्षणमयुक्तं । अतः प्रकृतानुमितितज्जनकज्ञानविषयकपरोक्षज्ञानजनकाज्ञाननाशकता यद्रूपावच्छिन्नविषयकत्वेन तद्रूपावच्छिन्नत्वं दोषत्वमिति वाच्यं । एवंच पक्षतावच्छेदकप्रकारकग्रहजनकाज्ञाननाशकता यद्रूपावच्छिन्नविषयकत्वेन तद्रूपावच्छिन्नत्वमाश्रयासिद्धत्वमित्यादिविशेषलक्षणानि निर्वाच्यानि । एवंच गगनारविन्दं सुरभ्यरविन्दत्वादित्यादौ गगनीयत्वविशिष्टज्ञानजनकाज्ञानस्य गगनीयत्वाभावविशिष्टारविन्दविषयकनिश्चयनाश्यत्वादुक्ताभावविशिष्टारविन्दत्वादेःआश्रयासिद्धत्वोपपत्तिः । अत एव वह्निरनुष्णः कृतकत्वात् इत्यादौ बाधः । वह्निरुष्णस्तेजस्त्वादित्यादौ तदभावश्चोपपद्यते । वह्निरनुष्ण इत्यादौ भ्रमजनकाज्ञानस्य वह्निरुष्ण इत्यादिधीनाश्यत्वात् । वह्निरुष्ण इत्यादिभ्रमजनकस्य मूलाज्ञानस्य च वह्निरुष्ण इत्यादिबुद्ध्यनिवर्त्यत्वाच्च । शुद्धब्रह्मज्ञानं न किंचिद्रूपावच्छिन्नविषयकत्वेनाज्ञाननिवर्तकं अतो न कोपि दोषः ।

विस्तरस्तु प्रमाणतत्वविवेके द्रष्टव्यः। त्वन्मतं तु प्रकृतानुमित्यनुकूलशक्तिविघटकता यद्रूपावच्छिन्नविषयकत्वेनेत्यादिरीत्या अन्यथा वा दोषसामान्यलक्षणं निर्वाच्यं। एवं चास्मन्मतेपि विमतत्वप्रकारकज्ञानजनकाज्ञानस्य यद्रूपावच्छिन्नविषयकधीनाश्यत्वं तादृशरूपमेवाप्रसिद्धमिति नाश्रयासिद्ध्याद्यवकाशः। यदिच अवच्छिन्नानवच्छिन्नचिद्विषयकमेव मूलाज्ञानमिति मतं। तथापि यद्रूपविशिष्टावच्छिन्नचिद्विषयताकमज्ञानं प्रकृतानुमितिसमानविषयकं। यत्त्वसतो ऽख्यायमानत्वे आश्रयत्वे चापसिद्धान्तः प्रपञ्चस्य व्यावहारिकसत्तास्वीकारवैयर्थ्यप्रसंगश्चेति तन्न। असदपरोक्षस्यैव सिद्धान्तविरुद्धत्वात्। असद्विषयकाविकल्पाख्यवृत्तेः चन्द्रिकादौ कण्ठोक्तत्वात् ब्रह्मप्रमान्याबाध्यत्वे सति बाधयोग्यत्वरूपव्यावहारिकसत्त्वस्य प्रमाणसिद्धस्य प्रत्याख्यातुमशक्यत्वाच्च। ब्रह्मप्रमान्याबाध्यत्वमावयोरनुमतं। बाध्यत्वं च श्रुत्यनुमानसिद्धमिति वक्तृभेदादेरवभास्य सद्वैलक्षण्यतद्रूपत्वं तदितिरीत्याऽनिर्वचनीयत्वं निर्वाच्यं। अधिकं तु प्रमाणतत्वविवेकादौ द्रष्टव्यं। भ्रमविषयतादेः बाधस्य चासति प्रामाणिकव्यवहारसिद्धत्वात् तत्र विधिनिषेधाश्रयत्वं दुरपह्नवं। असत्पदस्य सद्भिन्नार्थकस्य भेदानाश्रये प्रवृत्त्ययोगाच्च। स्वात्यन्ताभावसमनाधिकरणतया प्रतीयमानत्वं च स्वप्रकारकधीविशेष्यताव्यापकाभावप्रतियोगित्वपर्यवसितं। न परोक्तरीत्या स्वाधिकरणप्रतीयमाननिष्ठात्यन्ताभावप्रतियोगित्वं। अन्यथाख्यातिमादायार्थान्तरापत्तेः अवृत्तित्वमादायार्थान्तरं च वृत्तिमत्त्वेन पक्षस्य विशेषणीयत्वात् न संभवति। प्रकारान्तरानुसरणे गौरवं। यत्त्वत्यन्तासत्त्वमादाय अर्थान्तरप्रसञ्जनं तदप्येतेन प्रत्युक्तं। किञ्च यद्यत्यन्तासत्त्वमुक्ताभावप्रतियोगित्वं तदानार्थान्तरावकाशः। नहि प्रातिवाद्यसिद्धं वादिना सिषाधयिषितं प्रकृतोपयोगि च तदादायैव नार्थान्तरतातिप्रसंगात्। किञ्चोक्तप्रतियोगित्वस्य नात्यन्तासत्त्वरूपता नैयायिका

दिभिः अवृत्तौ परमार्थसत्त्वेपि तदभ्युपगमात् त्वन्मते कूर्मरोमादौ अनारोपितेऽसत्त्वाव्यापकत्वाच्च। वृत्तिमत्त्वसहितं तदत्यन्तासति न संभवतीत्यन्यत्र विस्तरः। यत्तु दृश्यत्वाभावादसिद्धो हेतुरिति तदप्यसत्। दृग्विषयतारूपदृश्यत्वस्य पक्षे वादिद्वयसिद्धत्वात्। अन्यथा धूमहेतुकरणेप्ययं धूमो हेतुः धूमान्तरं वा नाद्यः। दृष्टान्तस्य साधनविकलत्वापत्तेः न द्वितीयः स्वरूपासिद्धिदूषणापत्तेश्च। यत्तु न धूमादेर्हेतुतायामयं दोषः। तत्र सकलधूमसाधारणस्य धूमत्वसामान्यस्योभयवादिसिद्धत्वात्। नच सत्यानिर्वाच्यसाधारणसामान्यमुभयवादिसिद्धं। अनिर्वचनीयस्य स्वरूपत एवास्माकमसिद्धेः न चासदाश्रयं सामान्यं सिद्धं भवतीति तदसत्। एवं सति विमतो भिन्नः मुक्तत्वादिति त्वदुक्तावपि भेदत्वस्य सदसत्साधारणस्यैकस्याभावेनानिर्वाच्यगतस्य तस्य साध्यतावच्छेदकत्वे तवापसिद्धान्तात्। परमार्थगतस्य तस्य तत्त्वे मां प्रत्यप्रसिद्धविशेषणत्वापत्तेर्दुर्वारत्वात्। अनिर्वाच्यतासिद्ध्या तन्मूलकाविकल्पायोगात् उक्तदूषणोद्धारे च तुल्यं प्रकृतेपि। किञ्च कथयामध्यस्थादीनां पक्षे हेतुमत्ताप्रतिपादनाय वादिना हेतुः प्रयुज्यते। तेषां च यथामतं भवत्येव हेतुमत्ताप्रतिपत्तिः स्वरूपासिद्ध्याद्युद्भावनं प्रागुक्तरीत्या नावकाशं लभत इत्युद्भावयितुः कृतकृत्यतया सदनिर्वाच्यसाधारणसामान्यानभ्युपगमो न दोषाय। अन्यथा धूमत्वादेरपि प्रत्येकवृत्तिमात्रमिच्छतः तव मते धूमद्वयसाधारणसामान्याभावेन पक्षीयधूमगतस्य हेतुतावच्छेदकत्वे दृष्टान्तस्य साधनविकलता महानसीयधूमगत धूमत्वस्य तथात्वे च स्वरूपासिद्धिरिति दोषः कथं वारणीयः। अथोच्यते धूमस्य धूमत्वाश्रयशक्तिरावयोरनुमता। तथाच धूमादित्युक्तं अनुगतधर्मवादिनोऽन्यस्य स्वसामग्रीबलात् पक्षदृष्टान्तसाधारणधूमप्रतीतिर्नानुपपन्नेति नोक्तदोषावकाश इति चेत् तुल्यं प्रकृतेपि। अन्यथा विमतं सत्यं दृश्यत्वादित्यनुमानेपीयं तदवस्था स्यात्। यद्यपि वृत्तिव्याप्यत्वस्य साधार-

णस्य दृश्यत्वस्यात्मनि पक्षे सत्त्वेनानैकान्तिकत्वापातात् दृग्जन्यफलाश्रयत्वं दृश्यत्वं त्वया वाच्यं। तदा ज्ञाततालक्षणफलस्यान्यत्र निराकृतत्वेनास्मन्मते दृश्यत्वाभावादसिद्धो हेतुः। ज्ञातताङ्गीकारेऽप्यतीतादावतीन्द्रियेषु च दृश्यत्वाभावात् भागासिद्धिरिति तदयुक्तं शुद्धे ब्रह्मणि वृत्तिव्याप्यत्वस्यानभ्युपगमे यथाश्रुतस्य मतान्तरे स्वानतिरिक्तविषयकज्ञानबाध्यदृग्विषयत्वरूपस्य सत्यादिपदतात्पर्याविषयकदृग्विषयत्वरूपस्य वा दृश्यत्वस्य हेतोर्व्युक्तव्यतया अनेकान्तिकतासिद्ध्योश्चानवकाशात्। यत्त्वनिर्वचनीयाभावात् विरुद्ध इति तदप्यसत्। त्वां प्रति सद्विविक्तत्वमात्रस्य साध्यतयोक्ततया शुक्तिरजतादेरेव सपक्षस्य सुलभत्वात्। एतेन शुक्तिरजतादेस्सर्वस्य विपक्षतया तत्र वर्तमानत्वात्साध्यविपरीतव्याप्त्या विरुद्धो हेतुरिति परास्तं। रजतादेरुक्तरीत्या विपक्षत्वाभावात्। जगतोऽनिर्वाच्यत्वेनानुमानस्याप्यनिर्वाच्यत्वेपि तत्र अनध्यवसितत्वप्रयोजकस्यात्यन्तासत्त्वस्यानभ्युपगमेन तर्कबाध्यत्वाभावात् नानध्यवसायः। कारणतायाः परमार्थसत्त्वाघटिततया तदव्याप्यत्वाच्च। तदुक्तं खण्डनकृद्भिः "पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ। हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथेति। स्वाप्निकभोजनरोदनादेरनिर्वाच्यस्याप्यर्थलाभहेतुतायाः भुक्त्वा रुदित्वा ध्रुवमर्थलाभ इति स्मृतिसिद्धत्वात् स्वाप्निकार्थपरमार्थतायाः अद्याप्यसिद्धेश्च। यत्त्वनन्यथासिद्ध नियतपूर्ववृत्तित्वं कारणत्वं नियतपूर्ववृत्तिता च कार्याधिकरणावच्छेदेन कार्याव्यवहितप्राक्क्षणनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदककारणतावच्छेदकत्वाभिमतधर्मवत्त्व रूपं। तथाच निखिलात्यन्ताभावानां केवलान्वयित्ववादिनः तव मते तदयोगान्नानिर्वाच्यस्य कारणत्वोपपत्तिः। प्रतियोगिव्यधिकरणत्वेनाभावविशेषणत्वेपि त्वन्मते सर्वस्याप्यभावस्य प्रतियोगिसमानाधिकणतया तादृशाभावाप्रसिद्धिरिति। तदप्यसत्। कारणतायाःशक्तिविशेषरूपत्वात्। अस्तुवा नियतपूर्ववृत्तित्वमेव कारणत्वं तथापि का-

र्याधिकरणावच्छेदेन कार्याव्यवहितप्राक्क्षणसंबन्धस्तद्विशिष्टसामान्यकं यद्यत् स्वं तदन्यताद्दशधर्मवत्त्वस्यैव नियतपूर्ववृत्तितासंभवात् । न चासतोपि साधकत्वे शुक्तिरूप्यादेरपि कटकाद्यर्थक्रियाकारित्वापत्तिरिति वाच्यं । परमार्थसत्त्वेन त्वदभ्युपगतस्वाप्निकरजतादेरपि तदापत्तिसाम्यादित्यन्यत्र विस्तरः । यत्त्वसतः साधकत्वे धूमाभावादेरपि साधकत्वप्रसंङ्गः । अथ धूमाभावस्यासाधकता नासत्त्वात् किन्तु व्याप्यत्वाभावात् बहुळोर्ध्वतादिवत् आभासविविक्तस्यापि व्याप्त्युपयोगादिति मन्येत तदा वक्तव्यं किमेवं लोकानामनुभवात्कल्प्यते उतासतोपि साधकत्वाभिमानात् । न प्रथमः । तदभावात् तार्किकाहि महाह्रदोऽग्निमान् धूमवत्त्वादित्युक्ते असिद्धिमुद्भावयन्ति न द्वितीयः निर्मूलत्वादिति । तदसत् । धूमाभावस्यापि साधकत्वप्रसंग इत्यत्र साधकत्वं न सिद्धिजनकत्वं लिङ्गकारणतावादे इष्टापत्तेः । मतान्तरेतु आपादकाभावः । त्वन्मते पारमार्थिकस्यापि धूमादेः न सिद्धिजनकत्वमिष्यते । किंचित् सिद्धिजनकज्ञानविषयतारूपं च तवापीष्टं । अतस्सिद्धिजनकप्रमाविषयत्वरूपं साधकत्वं । प्रमाच तद्वति तत्प्रकारकज्ञानं तथाच मन्मते सन्मात्रस्य ताद्दशप्रमाविषयत्वं नास्तीति । अस्मन्मते तु तदापत्तिरिति चेन्न । मन्मते तत्राव्याप्त्यभावेन तदप्रसंगात् । तदव्याप्तिरपि आरोपिता सुलभेति वाच्यं । अतीन्द्रियवस्तुघटितायाः तस्या अतीन्द्रियतया परोक्षेऽन्यथाख्यात्यभ्युपगमेनोक्तस्थूलीयपरामर्शस्य प्रमात्वासंप्रतिपत्तेः । नचैवमपि वह्निसाधकत्वेनोपन्यस्तो धूमोपि आभासस्स्यादिति वाच्यं । आभासविविक्तधूमस्याभासत्वकारणाभावेन अताद्दशस्य तथात्वे इष्टापत्तेः बहुळोर्ध्वतादेरिव आभासविवेकस्य व्याप्त्युपयोगो न युक्तः । लौकिकानां वा व्याप्तिग्रहे तदुपयोगदर्शनादिति चेन्न । एवं सति बहुळोर्ध्वतादिविशिष्टस्यापि धूमस्य वह्निं विना क्वचित्स्वप्ने अनुभूयमानतया स्वाप्निकपदार्थसत्यतावादिनस्तव मतेपि वह्निसाधकत्वेनोपन्यस्तस्य

बहुळोर्ध्वतादिविशिष्टस्य धूमस्याभासतापत्तेर्दुर्वारत्वात् । वासनामयान्यत्वविशेषणस्य च आभासविवेकसमानयोगक्षेमत्वात् । तस्मादपरीक्षकव्यवहारानुसारेण परीक्षकव्यवहारोपि न व्यवस्थापनीयः किंतु परीक्षकव्यवहारानुसारेणैवेति सर्वमनवद्यं । यद्यप्याभासविवेकस्य व्याप्त्युपयोगित्वेपि आरोपिताभासविविक्तधूमवति ह्रदे व्यभिचारो दुर्वारः आभासविविक्त एवाभासविवेको प्यत्रोक्त उपयोगीति चेत् आभासविवेकवतोप्याभासविविक्तस्य तस्यारोपितस्य तत्र वक्तुं शक्यत्वात् व्यभिचारापरिहारात् । आभासविवेकविशेषणीभूताभासविवेकेनापि आभासविविक्तेन भाव्यमिति चेत् । एवं तस्याभासविवेकविशेषणपरंपरायाः अपर्यवसितत्वेन जन्मशतेन हेतुरनिरूपणीयः स्यात् । किंच ह्रदेन धूममात्रं नान्यदस्ति तद्गतबाष्पस्य तदाप्रतीतिरेव नच भ्रान्त्यनुसारेणार्थाङ्गीकारो युक्तः । भ्रान्तेः प्रमाणत्वापातात् । न चास्माभिः धूमवत्तया प्रतीयमानत्वं हेतूकृतं । किन्तु धूमवत्त्वं ततो नाभासविवेको ज्ञात्युपयोगी । किंचारोपितदृश्यत्वस्य ब्रह्मण्यसंभवात् दृश्यत्वेपि व्याप्त्युपयोगितयैव आभासविवेकोऽङ्गीकार्य इति तदप्यसत् । आभासविविक्तत्वस्य ब्रह्मविषयकज्ञानाबाध्यत्वरूपतया चक्षुराद्ययोग्यज्ञानादिघटितधर्मावच्छिन्नप्रतियोगिताकत्वेन तदयोग्यत्वात् । अपरोक्षारोपासंभवेन परोक्षरूपे अन्यथाख्यातेरेव स्वीकारेणाभासे तद्विवेकस्याप्यारोपितस्याभावात् । यदि च लाघवात् व्यावहारिकत्वं अखण्डोपाधिरूपं वा । तथापि तस्य प्रात्यक्षिकारोपो संप्रतिपन्न एव । नचैवं इदं रजतमित्यादावन्यथाख्यातिरेवास्त्विति वाच्यं । इदं रजतत्वेन साक्षात्करोमीति प्रत्ययानुरोधेन रजतसाक्षात्काराभ्युपगमस्यावश्यकतया विषयोत्पत्त्यभ्युपगमात् ह्रदे न धूममात्रमसदिति असत्ख्यातिनिरसनतया अन्यथाख्यात्यनभ्युपगमेन चायुक्तं । एवं ब्रह्मणि दृश्यत्वारोपे हि अन्यथाख्यातिरेव नानिर्वचनीयख्यातिः परोक्षभ्रमत्वादिति संप्रदायः ।

परोक्षेऽन्यथाख्यात्यस्वीकारेपि न क्षतिः। आभासविवेकस्य ब्रह्मज्ञानेतरबाध्यत्वावच्छिन्नप्रतियोगिताकभेदरूपस्य वा व्यावहारिकत्वात्मकाखण्डोपाधिरूपावच्छिन्नप्रतियोगिताकस्य वा प्रातिभासिकव्यक्तेः स्वरूपत एव वह्निव्याप्यतावच्छेदकघटकतया व्यभिचारानवकाशात्। नच तस्याप्यारोपितस्याभासे असति संभव इति व्यभिचारतादवस्थ्यमिति वाच्यं। अन्यत्र सत एव तस्यान्यत्रारोपे अन्यथा ख्यात्यापत्तेः। व्यावहारिकस्य तस्य पल्लवाविद्यापारिणामित्वानुपपत्तेश्च। अधिष्ठानज्ञानेन तन्निवृत्तौ व्यावहारिकेपि तदभावापत्तेश्च। किन्तु तादृशमर्थान्तरमेव तत्रावभासत इति वाच्यं। तथाच यस्य व्याप्यतावच्छेदकानुप्रवेशः तस्याभाससाधारण्याभावात् न व्यभिचारः। वियदत्यन्ताभावादेरपि स्वरूपतो भानं तार्किकादिभिस्तत्रतत्रोक्तं। तद्व्यक्तित्वादीनामुक्ताभावस्य व्याप्यतावच्छेदकघटकत्वेनोक्ताखण्डोपाधौ प्रमाणाभावः उक्तव्यवस्थाया एवान्ततः प्रमाणत्वात्। न चानिर्वाच्यख्यातिमेव परित्यज्योक्तव्यवस्थानिर्वाह इति वाच्यं। अनिर्वाच्यख्यातिसाधकलाघवानुरोधेनैकस्याखण्डोपाधेः कल्पयितुमुचितत्वात्। परोक्षेऽन्यथाख्यात्यनभ्युपगमे लाघवादसत्त्वे च अन्यथाख्यातेरेवाभ्युपेयतया संप्रदायोक्तरीतेरेवाश्रयणीयत्वाच्च। ब्रह्मण्यारोपितं दृश्यत्वमादाय तत्र व्यभिचारस्त्वाभासविवेकोपादानादेव वारणीयः। न चाभासविवेको ब्रह्मज्ञानबाध्यत्वमिति पक्षे ब्रह्मणि आरोपितदृश्यत्वे तदप्रत्यूहमिति व्यभिचारस्तदवस्थ इति वाच्यं। ब्रह्माविषयकज्ञानबाध्यभेदज्ञानस्योक्तरूपतया तस्य स्वरूपतः तद्व्यक्तित्वेन वा निवेशेन व्यभिचारस्य निरसनीयत्वात्। यद्वा शुद्धब्रह्मातिरिक्तं सर्वं प्रमेयमित्याकारक यत्किंचिद्धीव्यक्ति विशिष्योपादाय तद्धीविशेष्यत्वमेव हेतूकर्तव्यं ब्रह्मण्यारोपितं तद्धीविषयत्वं प्रातिभासिकं नैतद्धीनिरूपितं एतद्बुद्ध्यनिरूपितायां विषयतायामारोप्यमाणधर्मव्यक्तेः प्रातिभासिकत्वेनैतद्धीनिरूपितत्व-

संभवात् । अनुगतधर्मानभ्युपगमेन प्रत्यवस्थानं तु तत्साधनेनैव निरसनीयं । तत्साधनप्रकारश्चान्यत्र निरसनीय इत्याहुः । न च घटस्सन्नित्याद्यक्षबाधः उक्तमिथ्यात्वविरोधिनस्सत्यत्वस्य तादृशप्रतियोगित्वाभावः । तद्भेदादिरूपस्य योग्यानुपलब्धिविरहेण प्रत्यक्षायोग्यत्वात् । प्रतियोगिस्मरणसहकृतधर्मिप्रत्यक्षमात्रेणाभावसाक्षात्काराभ्युपगमे स्तंभः पिशाचसंयोगी नेत्यपि प्रत्यक्षापत्तेः । कालसंबन्धित्वादिरूपस्य च तस्य मिथ्यात्वाविरोधित्वात् । केनचिद्रूपेणाभावग्रहेपि रूपान्तरावच्छिन्नोक्तप्रतियोगितासाधारणरूपावच्छिन्नवत्ता बुद्धाव विरोधित्वाच्च । विश्वं सत्यमित्यादिश्रुतेरन्यपरतया विश्वसत्यताया अतात्पर्यात् । देवताधिकरणन्यायस्य च प्रमाणान्तराविरोधे सत्येव प्रवृत्तेः । विस्तरस्तु श्रुतिमतोद्योतटीकायामनुसन्धेयः । विश्वं सत्यं दृश्यत्वादात्मवदित्यपि प्रयोज्यत्वात् प्रकरणसम इत्यपि न सत् । शुक्तिरूप्यादावनेकान्त्यात् । रजतं दृष्टमित्यस्य भ्रममात्रत्वेपि तस्य ज्ञेयत्वानपायाच्च । असत्ख्यात्यनभ्युपगमेऽपसिद्धान्तश्च । यत्तु तज्ज्ञानजनककरणसान्निकर्षाश्रयत्वं जन्यतदज्ञानविषयत्वमत्राभिहितं । तच्च नास्ति दोषवशात् तस्य भाने तद्गतेन्द्रियसन्निकर्षानपेक्षणादुल्लेख्यतारूपविषयतायास्तत्राप्रत्यूहत्वाच्च नापसिद्धान्त इति । तन्न । अनुमित्यादौसादेरविषयत्वापातात् । नीलो घट इत्यादौ शाब्दबोधे गगनसन्निकृष्टशब्दादिजन्ये गगनादेरपि विषयतावारणाय यत्सान्निकर्षसहकृतेन करणेन यज्ज्ञानं जन्यत इत्यादिरीत्यापि विवक्षाया आवश्यकत्वात् लिङ्गिलिङ्गसन्निकर्षस्यातद्धेतुत्वात् । यदि च सहकारित्वं तज्जन्यकार्यप्रयोजकतारूपं कारणतावच्छेदकरूपसाधारणं निवेश्यते तदा व्याप्त्यादेरप्यनुमितिविषयत्वापत्तिः । उल्लेख्यतारूपविषयताया एव सर्वत्राभ्युपगमसंभवेन तज्जन्यज्ञाने विषयतान्तरकल्पने प्रयोजनाभावाच्च । विषयतानिरूपकसन्निकर्षस्यासत्यपि सम्भवेन जगदसद्विलक्षणमित्याद्यनुमितौ असतो विषयताया दुर्वारत्वाच्च । साध्यतावच्छेद-

कादिव्यावृत्तविषयताया एव तथात्वस्य विवक्षणे अनुमित्यादौ वह्नित्वादेरविषयत्वापत्तेश्च। नृशृङ्गं गगनादिविलक्षणं प्रमाणाविषयत्वादित्याद्यनुमिविषयताया अव्यावर्तनाच्च। वाद्यभिमतहेत्वतिरिक्तस्य हेत्वादेः प्रकरणसमत्वाभिधानविरोधः। हेत्वैक्य एव त्वया तस्य परिभाषितत्वात्। अन्यथा प्रतिसाधने पौनरुक्त्यापत्तेः। विमतं सत्यं प्रमाणदृष्टत्वात् आत्मवदिति प्रतिसाधनं इत्यप्यशुद्धं। असन्नृशृङ्गमिति प्रमाणदृष्टे असति व्यभिचारि। सदसदुभयाविषयकप्रमाणदृष्टत्वं च शशीयं शृगामिति प्रतीतिविषये व्यभिचारि। प्रमाणेन प्रकारत्वमिति चेन्न। सर्वं वियदादिज्ञानं अधिष्ठानाविषयकमिति वदन्तं तं मायावादिनं प्रतियोगे युक्तं। उक्तविधानप्रसिद्ध्या हेत्वप्रसिद्धे दुर्वारत्वात्। असदविषयकप्रमाणदृष्टत्वं तु असत्त्वोक्तसाध्यरूपत्वे जगति संदिग्धासिद्धं। सत्तादात्म्यशून्यत्वरूपत्वे मां प्रति योगे शुक्तिरूप्यादौ व्यभिचारि। उक्तरीत्या शुक्तिरूप्यादौ साध्यसाधनोभयसंप्रतिपत्तेर्नदृष्टान्तः साधनविकलश्चेति। नच प्रमाणविरुद्धत्वमुपाधिः। तस्य पक्षेसंदिग्धतया हेतौ व्यभिचारस्य पक्षे साध्यव्यावर्तकधर्मवत्त्वस्य चानिश्चयादुपाधिसंशयात् व्यभिचारसंशयः सम्भाव्यमानोऽपि दृग्दृश्यसंबन्धानुपपत्त्यादिरूपाणां तर्काणां जागरूकत्वात् न प्रकृतानुमितिविरोधि। ननु कथं दृग्दृश्यसंबन्धानुपपत्तिः। नच दृश्ये ईदृशस्संयोगस्तावत् न भवति। तस्य द्रव्यमात्रवृत्तित्वात्। द्रव्यस्यापि दृश्यसत्त्वात्। नापि समवायः। अनभ्युपगमात्। अभावादौ दृश्ये तदतिरिक्तस्यैव विषयतारूपसंबन्धस्याभ्युपगमसंभवात्। नच प्रकाशस्य प्रकाश्यनिष्ठः प्रकाशत्वातिरिक्तसंबन्धः। एवं प्रकाशस्य तादृशसंबन्धप्रकाशकल्पने प्रमाणाभावात्। अन्यथा आलोकादेः स्वासंबद्धार्थप्रकाशकत्वापत्तेरिति वाच्यं। आलोकादिस्थले तद्दर्शनेपि ज्ञानप्रकाशस्य तादृशसंबन्धप्रकाशकल्पने प्रमाणाभावात्। किञ्च दृश्यत्वाद्वियामकसंबन्धान्तरं वाच्यमिति त्वयोच्यते। यच्चोक्तं

नच दृक्संबन्धमात्रेण दृश्यत्वमिति युज्यते। अतिप्रसंगादिति। तदप्ययुक्तं। तथाहि। तस्यापि नियामकं कल्प्यं एवं तस्यापीति अनवस्थानात्। नच तत्परिहारार्थं कश्चित् स्वनिर्वाहकस्वभाव एव नियामकः प्रवृत्त्युन्नेय इति वाच्यं। तथाचादावेव तथास्तु लाघवात्। नचैवं स्वभाववादः। बहुधान्वेषणेपि नियामकान्तरालाभे स्वभावस्वीकरणात्। प्रकृते च वास्तवसंबन्धस्यैव भवतैव निराकरणात् तदभावस्त्ववसिद्धः। आध्यासिकसंबन्धोपि स्वस्य दृश्यतानिर्वाहार्थमाध्यासिकसंबन्धान्तरमपेक्षते। एवं तदपि संबन्धान्तरमपेक्षत इत्यनवस्थानियामकः। किञ्चाध्यासिकसंबन्ध इति कोर्थः। कश्चित्संबन्ध एवाध्यस्त इति किंवा दृश्यस्य दृगध्यस्तत्वं नाम कश्चित्संबन्ध इति। आद्ये सम्बंधमात्रस्यैव मिथ्यात्वं लब्धं न दृश्यवर्गस्येति तवाभिमतासिद्धिः। न द्वितीयः दृष्टे दृश्यत्वनिर्वाहार्थं कल्पने दृष्टावनेकपदार्थहानिप्रसंगेन तस्याकल्पनीयत्वात्। न ह्यल्पस्य हेतोः बहुत्यागो युक्त इति। अथवास्तु कश्चित् दृग्दृश्ययोः संबन्धः स च न संबन्धिभ्यां भिद्यते। येन संबन्धिभिन्नसंबन्धस्य संबन्धिना संबन्धान्तरमगीकार्यं तस्य तस्यापीत्यनवस्था स्यात्। नचैवं सम्बन्धाभावप्रसंगः। ज्ञानाभेदमात्रेणानन्दाभावप्रसङ्गेण मोक्षस्याप्यपुरुषार्थत्वप्रसंगात्। अस्मन्मते अभेदे हि विशेषबलात् एकांशपरिशेषाभावोऽन्यत्रोपपादित इति चेन्मैवं। दृग्विषयताया विप्रकृष्टसंबन्धिद्वयनिरूप्यत्वेन पारमार्थिकत्वानुपपत्तिरेव दृग्दृश्यसंबन्धानुपपत्तिः। सा च प्रकृतेऽप्रत्यूहेति दृश्यत्वनिर्वाहकसंबन्धान्तरस्यानभ्युपगमेपि क्षत्यभावात्। आध्यासिकसंबन्ध इत्यस्यान्यानिर्वाच्यसंबध इत्यर्थः। नचैवं दृश्यमानानिर्वाच्यासिद्धिः। वेदाद्यनिर्वाच्यत्वेन विना संबन्धानिर्वाच्यत्वस्यैवानिर्वाहात् अनिर्वाच्यस्य हि कदाचिदुच्छेदहानिर्वाच्यत्वं वाच्यं। नित्यानुवृत्तौ तस्य पारमार्थिकत्वापत्तेः यौक्तिकबाधः तदा अनिर्वाच्यताख्यापकोपि न तदुच्छेदकः। सत्य-

पि तस्मिन् तदुच्छेदादर्शनात् । नच पूर्वपूर्वानिर्वाच्यबाधकज्ञानोत्तरं तदुच्छेदेपि विद्यमानकारणान्तरेण संबन्धान्तरोत्पत्तिरास्तामिति वाच्यं । अज्ञानं विना कारणान्तरस्य दुर्वचत्वात् । तस्यानित्यप्रमाविषयत्वे तस्यापि विषयत्वस्यानिर्वाच्यतैव वाच्या । प्राङ्निषेधस्याज्ञानस्य सत्त्वायोगात् । विषयतायाः प्रमायाः प्रागसत्त्वेन निराश्रयता स्यात् । परमानित्येपि विषये द्रष्टव्यं । न चातीतादिनिष्ठज्ञानाविषयतावदस्य अज्ञानविषयत्वमपि भाविन्युपपद्यत इति वाच्यं । तादृशविषयत्वादीनामनिर्वाच्यत्वं विनानुपपत्तेः । नच तादृशसंबन्धाभावविशिष्टप्रमावच्छिन्नातीतविषयकमेवाज्ञानं तादृग्विषयतावच्छिन्नचिदाश्रितं वेति नानुपपत्तिरिति वाच्यं । एतादृशसंबन्धाभावविशिष्टप्रमावच्छिन्नात्मविषयकपरोक्षज्ञानेपि तदनिर्वृत्तेः । न चापरोक्षज्ञानमेव तन्निवर्तकं तादृशप्रमाव्यक्तिनाशोत्तरं तद्विशिष्टात्मसाक्षात्कारायोगात् । परोक्षज्ञानेनापि तन्निवृत्तिरज्ञाननिवृत्तिद्वारैव वाच्या । तथाच जन्यतत्तत्प्रमाभेदाभिन्नाज्ञानजन्यतत्तद्विषयभिन्नाज्ञानतादृशसंबन्धादिकल्पने गौरवात् । लाघवात् यदाध्यासेनैव तदानिर्वाच्यत्वोपपादनं युक्तमिति दृग्दृश्यसंबन्धानिर्वाच्यत्वस्य निखिलदृश्यानिर्वाच्यत्वोपपाद्यत्वमप्रत्यूहं । नच शुद्धब्रह्मज्ञानमेव विषयतानिवर्तकं । तच्च सर्वमुक्तिपक्षे चरमतत्वज्ञानानाश्यमिति स्वीकारे न गौरवावकाश इति वाच्यं । सर्वमुक्त्यनन्तरं विषयानुवृत्तौ प्रमाणाभावे विषयोच्छेदकस्यापि औचित्यावर्जिततया दृश्यानिर्वाच्यत्वस्यासिद्धत्वात् । अनिर्वाच्यत्वोपहितस्यापि अनिर्वाच्यतया दृग्विषयत्वोपहितस्य वियदादेरनिर्वाच्यतायाः आवश्यकत्वेन तदनुपहितवियदादिस्वरूपस्यापि कल्पने गौरवाच्च । दृशि तु तादृशं रूपं श्रुतियुक्त्यादिसिद्धं । अन्यथा वियदाद्यनिर्वाच्यत्वानिर्वाह इति विवेचितं अधिकमन्यत्र । दृष्टदृश्यत्व त्यादि युक्तमित्यन्तमपि न युक्तं । तदुपादानस्य प्रकारान्तरेणासंभवे त्यागस्यावर्जनीयत्वात् । तदधिकसंख्याकानिर्वा-

च्यवस्तुकल्पनाय हि एतत्कल्पना। तदनिर्वाच्यत्वकल्पनाया एव न्याय्यत्वात्। अन्यथा भ्रममात्रस्योच्छेदप्रसंगात्। विशेषस्य स्वरूपद्वयनिरूप्यत्वेऽतिरिक्तविषयतापर्यवसानं स्वरूपैक्ये ज्ञानस्वरूपमेव विषयतेति पक्षान्तर्भाव इति पक्षद्वयेपि विप्रकृष्टद्वयसंबन्धद्वयनिरूप्यत्वादनिर्वाच्यत्वमप्रत्यूहं। द्वितीये च इमे रंगरजते इति प्रमाया अपि भ्रमत्वापात्तिरप्याधिकेति संक्षेपः। ननु कोसौ संबन्धो विप्रकर्षः। उच्यते एकसंबन्धिनिष्ठकालिकसंबन्धावच्छिन्नसंबन्ध्यन्तरावच्छेदकाधिकरणतावच्छेदकत्वसंबन्ध्यन्तरावच्छेद्यकालिक संबन्धावच्छिन्नाधिकरणत्वप्रतियोगित्व अन्यतरत्वावच्छिन्नाभावः। अस्ति चेदं संयोगसमवायादिस्थले वृत्त्यनियामकः संयोगःपक्षकुक्षिनिक्षिप्तः। वस्तुतः तत्रापि प्राचीत्वादिरूपेण संबन्ध्यन्तरं संबन्ध्यन्तरीयबाह्यशाधिकरणतायामवच्छेदकमिति न कोपि दोषः। एतेन संयोग एव ज्ञानविषययोः संबन्धद्वयस्य संयोग इति परिभाषायाः प्रमाणेन वस्तुसिद्धावनादरणीयत्वादिति। किञ्च गुणगुणिनोः संबन्धानुपपत्तौ संयोग इव दृश्ययोस्संबन्धः संबन्धद्वयानुपपत्तौ अन्य एव वास्तवसंबन्धः किं न कल्पनीयः। किञ्च मिथ्यात्वेपि कथं दृश्यत्वं गगने इव गन्धर्वनगरस्य दृशि प्रपञ्चस्यारोपितत्वादिति चेत्। सर्वं सर्वेण दृश्येन वा केनापि किञ्चिदिन्द्रियसन्निकर्षादिति तन्नियामकमिति चेत् तर्हि किमनारोपितत्वेन कारणसंबन्धादिनिबन्धनो विषयाभावस्तु दृग्दृश्ययोः संबन्ध इति परास्तं। संबन्धिविप्रकर्षे तस्यापि अनिर्वाच्यतानपायात्! यत्तु प्रमायां गुणत्वेपि विषयेण संयोगो युज्यत एव। तथाहि गुणे तावत् क्रियाङ्गीकार्या। घटेगच्छतितद्रूपेपि गतिदर्शनात्। घटगता सा रूपेपि प्रतीयत इति चेत् विपरीतं किं न स्यात् पटावयवतन्तुगता गतिः पटेपि प्रतीयत इति वक्तुं शक्यत्वात् अतिप्रसङ्गाच्च। गच्छत्पटनिष्ठे महारञ्जनादिद्रव्ये गतिरस्ति न वा। नचेन्महारञ्जनस्य देशान्तरेण सं

योगो न स्यात्। असमवायिकारणाभावात्। नच पटनिष्ठक्रियादि समवायिकारणं। कार्यैकार्थप्रत्यासत्तेः कारणैकप्रत्यासत्तेश्च अभावेन तस्य समवायिकारणप्रत्यासत्त्यभावात्। नापि पटस्य देशान्तरसंयोगः देशान्तरेणाप्यस्य संयोगानन्तरं महारञ्जनेन देशान्तरेण सह संयोगस्य प्रतीतिप्रसङ्गात् तन्तोर्देशान्तरसंयोगादेव पटदेशान्तरसंयोगसिद्धौ पटे क्रियाभावप्रसंगाच्च। किंच क्रियावता पटेन हि रञ्जनस्य संयोगः। तदसमवायिकारणक्रियाहीनमहारञ्जनस्य द्रव्यस्य क्रियावता पटेन सह संयोगानुपपत्तेः। क्रियावत्त्वं संयोगस्य संयोगप्रतियोगिनीं क्रियामुत्पाद्य तन्निष्ठक्रियाद्वारैव तस्य देशान्तरसंयोगोत्पादकतानियमेन महारञ्जने गतिस्वीकारावश्यकत्वाच्च। तस्मात् च पटनिष्ठमहारञ्जने गतिरस्तीति पक्ष एवाश्रयणीयः। एवं तद्रीत्या रूपान्तरादावपि क्रियासिद्धिः। अनुभवस्याविशेषात्। एवं गुणे गुणोप्यंगीकार्यः। चतुर्विंशतिगुणा इति गुणेपि संख्यादिप्रतीतेः। यद्यपि गुणे च संयुक्तादिव्यवहारः। द्रव्ययोरेव संयोग इति दर्शनाभ्यासवान्न जनोङ्गीकरोति। तथापि घटपटयोस्संयुक्तयोः तद्गते पि रूपे संयुक्त इति लोकः करोत्येव व्यवहारं। किञ्च रूपेण युक्तः घट इति सर्वे व्यवहरन्ति। तथापि संयुक्तइति न व्यवहरन्ति चेत् ध्वंसशब्दयोरिवार्थयोरर्थभेदास्फुरणात्। द्रव्याणां कर्मसंयोग इत्यादौ जैमिन्यादिभिः परीक्षकैः अद्रव्यसंबन्धेपि संयोगव्यवहाराच्च। तथाच ज्ञानस्य गुणत्वे विषयेण गुणात्मकसंबन्धः। नच ज्ञाने संयोगासमवायिकारणक्रियाभावात् संयोगानुपपत्तिः। रूपादौ क्रियासाधनप्रकारेण ज्ञानेपि तत्साधनात्। नन्वतीतेन विषयेण कथं संयोग इति चेत् किमतीतादौ संबन्धमात्रं न स्वीक्रियते उत संयोग एव। नाद्यः। संबन्धाभावस्यापि अतीतसंबन्धाभावप्रसंगात्। प्रध्वंसादेरतीतसंबन्धित्वाभावप्रसंगाच्च। न द्वितीयः तद्वत्संयोगस्याप्युपपत्तेः। न चास्माभिः संयोगो द्विनिष्ठ इति स्वी-

क्रियते। एकविषयलक्षणाश्रयाभावे कथं तदाश्रयतत्संयोगोपि द्विनिष्ठ इति बोध्येत। किं नाम सादृश्यादिवत् एकाश्रितोऽन्यनिरूप्य इति संयोग इत्यबाधितव्यवहारास्पदत्वं संयोगलक्षणं। न चैवमन्योन्याश्रयः पूर्वपूर्ववृद्धव्यवहारविषयत्वेनोत्तरोत्तरव्यवहारोपपत्तेः। मन्त्रइत्याद्यभियुक्तप्रसिद्धत्वं मन्त्रलक्षणमिति मीमांसकैः स्वीकाराच्च। किञ्चेदमंशावच्छिन्नचैतन्ये रजतमध्यस्तमविद्यावृत्तिप्रातिबिम्बितसाक्षिचैतन्येन तु दृश्यते। एवंच यत्राध्यस्तं न तेन दृश्यं। दृश्यं येन च दृश्यं न तत्राध्यस्तं। अपिच नित्यानुमेयविषयत्वस्यं वृत्तिज्ञानेऽध्यासः त्वयापि नाङ्गीक्रियते। तथापि नित्यानुमेयं दृश्यमित्यङ्गीकार्यं। अन्यथा हेतोर्भागासिद्धिप्रसङ्गादिति न दृगध्यस्तत्वं दृश्यत्वप्रयोजकं। किञ्च यदि दृश्यं दृगध्यस्तं स्यात् तदादृग्घटइति तदनुविद्धतया प्रतीयेत नच दृशि दृक्त्वादन्यः सामान्याकारोस्ति। तदसत् प्रवेशादिव्यवहारवत् संयोगादिव्यवहारस्यासाधारण्येपि परामृश्यत्वाद्यभिन्नकारणतावच्छेदकशरीरे संशयान्यित्वादीनां न मुख्यप्रवेशः। एवं रूपादीनां स्वाश्रयघटादौ न मुख्यः संयोगःकारणबाधात्। तत्रैकतराक्रियां विनापि घटादौ रूपादिसंबन्धोऽभ्युपगम्यते। नाप्ययं संयोगजसंयोग इति सांप्रतं। कपालनीलादितो घटादिनीलस्य विलक्षणतयानुभूयमानत्वात्। घटत्वादिस्थले गत्यभावाच्च संयोगो न युक्तः। घट इत्यादिव्यवहारानुरोधेन संयोगस्यापि संयोग एव संबन्ध इत्युक्तानवस्थापत्तेः। संयोगस्य सर्वस्य स्वयमेव संबन्ध इति चेत् संबन्धः किं धर्मिणा संबध्नाति उत न। नाद्यः अतिप्रसङ्गात्। न द्वितीयः। तर्हि संबन्धो वाच्यः ननु स्वनिष्ठप्रतियोगित्वं घटादिनिष्ठानुयोगित्वं चोपेयत इति चेत् तर्ह्यनुयोगितायुक्तो घट इत्यादिप्रतीतेः कावा गतिः। तत्रापि संयोगान्तरस्वीकारेऽनवस्थापत्तेः। अनुयोगितापि सर्वस्य स्वयमेव संबन्ध इति चेत् तद्युक्त इति व्यवहारस्य का गतिः। तत्रापि संयोस्तीति चेत् तर्हि

संबन्धमात्रं संयोग इत्यापातितं। तथाच घटसंयुक्तं भूतलं घटीयो ऽभाव इत्यादिप्रत्यये त्वयावश्यं सिद्धं वैलक्षण्यं भज्येत। नच तत्र वैलक्षण्यस्य च प्रामाणिकत्वेपि रूपवद्भूतलं घटवद्भूतलमित्यादौ संबन्धांशे वैलक्षण्यमप्रामाणिकमिति वाच्यं। एवं सति त्वन्मते गुणगुणिनोरभेदः घटभूतलयोस्संयोग इत्याद्यभ्युपगमानुपपत्तेः। एवंच गुणगुण्यंशे संबन्धस्य संयोगाद्वैलक्षण्यं दुरपह्नवं। अपिच रूपादावप्येकत्वं तत्राप्येकत्वमिति परंपरायाः रूपादिगतैकत्वादिगतैकत्वादौ संयुक्त इति व्यवहारात् निश्चलघटरूपादिगतैकत्वादिगतैकत्वादौ कथं संयोगः हेत्वभावात्। संबन्धान्तरवत् सोपि भवतीति चेन्न। व्यापकविरोधोपलब्धेः लोकेपि संयोगः कारणद्वयान्योप्यदृष्टः। संयुक्तव्यवहारस्तु प्रवेशादेः व्यवहारवत् गौणोपि संभवतीत्युक्तं। रूपादिकं चलतीति प्रत्ययस्तु न केनाप्यभ्युपगतः त्वत्प्रलापमात्रेण दूरीकर्तुं युक्तः। क्रियां प्रति द्रव्यत्वेनोपादानत्वं स्वीकृत्यानेककोटिगुणादिष्वननुभवविरुद्धक्रियाद्युत्पत्तिवारणसंभवे ऽनुभवविरुद्धगौरवाभ्युपगमो न युक्तः। महारञ्जनन्तु द्रव्यं अतीतादेरज्ञानादेश्च संयोगः सुतरामयुक्तः। मुख्यसंयोगे विप्रकृष्टसंबन्धिनिरूप्यत्वदर्शनात्। किञ्च सेनया युक्तः राजा गच्छतीत्यादौ सेनासंबन्धस्य संयोगादिरूपत्वे सेनान्तर्गतचण्डालस्पर्शापत्त्या तद्गतस्यप्रायश्चित्तं स्यात्। सरटसंयुक्ते त्वक्संयोगस्यावश्यकत्वात् त्वक्स्पर्शनाभावहेतोर्दुर्निरूपत्वाच्च। किञ्चेत्यादिकमपि न युक्तं। आध्यासिकसंबन्धस्यानिर्वाच्यसंबन्ध इत्युक्तत्वात्। दृग्घट इति प्रतीयेतेति नैव युक्तः; इष्टापत्तेः। दृगात्मकस्य सतः सन्घटइत्यादौ भानात्। न भानान्तरं। सन्घट इत्यभिलापवत् दृग्घट इत्यभिलापापत्तेः तादृशप्रत्यये दृक्त्वेन सतोऽभानात्। नच पृथक् सत्त्वादिकं न देशातिरिक्तमिति तद्भाने तद्भानात्कथं प्रोक्तदोष इति वाच्यं। विषयानुभावत्वादिति रूपदृक्त्वस्य अबाध्यत्वोपलक्षिते स्वरूपात्मकसत्तातो भेदस्याविद्यात्वस्या-

भ्युपगमात्। उक्तं च पञ्चपादिकायां आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः। अपृथक्त्वेपि चैतन्यात् पृथगिवावभास्यत इत्येषादिक्। एवंच गुणादावतीतादौ च संयोगसंभवात् साक्षात्संबन्धस्य प्रकृष्टसंबन्धकत्वनैयत्याच्च संबन्धतोपि तस्यानिर्वाच्यत्वमादर्शकं परं परासंबन्धनिरासश्च अन्यत्र प्रपञ्चितमिति सर्वं चतुरश्रम्। इति भट्टत्र्यम्बकस्य कृतिषु श्रुतिमतानुमानोपपत्तिः ॥

॥ सम्पूर्णम् ॥

Indira Gandhi National
Centre for the Arts

श्रीगणेशाय नमः ॥

पूर्णानन्दाय निर्भेदपरमानन्दरूपिणे ।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥
पूर्णानन्दाय सत्यानामपि सत्याय शम्भवे ।
निर्दोषज्ञानरूपाय नमोऽनन्ताय विष्णवे ॥

तत्वज्ञानस्य निखिलपुरुषार्थसाधनत्वात् तत्वं निरूप्यते । अबाध्यार्थः तत्त्वं अबाध्यत्वं च स्वसंगिनिष्ठव्याप्यवृत्त्यत्यन्ताभावप्रतियोगित्वं । न चात्यन्तासतोपि तत्वरूपतापत्तिः । कालसंबन्धित्वेनापि विशेषणीयत्वात् । नच मुक्तिदशायां कालसंबन्धाभावादात्मनः तत्वरूपता न स्यादिति वाच्यं । कालसंबन्धोपलक्षितनिष्ठाबाध्यताया एव तत्वपदप्रवृत्तिनिमित्तत्वात् । यत्तु अनारोपितस्वरूपं तत्वं । नच कूर्मरोमादौ अन्यत्रानारोपिते तुच्छेऽतिव्याप्तिः । प्रतीतौ सत्यामित्यस्यापि वाच्यत्वात् । इदमेव च स्वतन्त्रं परतन्त्रं च प्रमेयं द्विविधं मतमित्यत्र प्रमेयपदेन सूचितं तत्वलक्षणं । प्रतीतौ सत्यामनारोपितमित्यनेन आरोपान्यप्रतीतिविषयत्वलाभात् नचेश्वरज्ञानविषयतामादायातिव्याप्तिः । तस्य सर्वविषयकत्वानुरोधेनासद्विषयकभ्रमविषयकत्वस्यावश्यकत्वादिति वाच्यं । सत्त्वप्रकारकयथार्थज्ञानविषयतायाः विवक्षितत्वादिति । तदसत् । सत्यत्वस्य तत्वमात्रसाधारणस्यानतिप्रसक्तस्यावश्यं निवेशनीयतया तस्यैव लक्षणत्वसंभवे इतरांशवैयर्थ्यात् । धर्मिभेदेप्यनतिप्रयोजनकत्वस्य दुर्वारत्वाच्च । तत्वमेकमेव "सदेव सौम्येदमग्रआसीत् एकमेवाद्वितीयं" इत्यादिश्रुतिभ्यः । तच्चापरोक्षपूर्णानन्दरूपं परिच्छेदत्रयशून्यं च । "यत्साक्षादपरोक्षाद्ब्रह्म यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् । सत्यं ज्ञानमनन्तं ब्रह्म नेहनानास्ति किञ्चन नात्र का-

चनभिदास्ति। अविनाशीवा अरे अयमात्मा आत्मैवाधस्तात् आत्मैव पुरस्तात्" इत्यादिश्रुतिभ्यः। तदन्यच्च अतत्त्वं तद्विविधं अनिर्वाच्यं अत्यन्तासच्च। स्वप्रकारकधीविशेष्यताव्यापकाभावप्रतियोगित्वं स्वसमानाधिकरणाभावप्रतियोगित्वं वाऽनिर्वाच्यत्वं। तुच्छत्वं च सत्तादात्म्यशून्यत्वं तत्र द्वितीयं तुच्छालीकादिशब्दजन्यविकल्पविषयः। आद्यमपि द्विविधं व्यावहारिकं प्रातिभासिकं च। व्यावहारिकत्वं च शुद्धब्रह्मान्यविषयकज्ञानाबाध्यत्वे सति बाध्यत्वं अखण्डोपाधिर्वा ब्रह्मण्यारोपितं क्षणिकत्वादिकमपि क्षणिकत्वाभाववद्ब्रह्मज्ञानबाध्यमेव। तदबाध्यं ब्रह्मैकज्ञानबाध्यं प्रातिभासिकमसिद्धमेव अतो न तत्रातिव्याप्तिः। प्रातिभासिकत्वं च ब्रह्मान्यविषयकज्ञानबाध्यत्वं तत्र व्यवहारिकं प्रकृतिविकृत्युदासीनभेदात् त्रिविधं। तत्र शुद्धा प्रकृतिर्मूलाज्ञानं प्रधानं मायाऽविद्या इत्यादिशब्दवाच्या जगतः प्रागवस्था विकृतिः चरमविकारमात्रं। यद्वा विकृतित्वं भूतविभाजकोपाधिः बुद्ध्यहङ्कारत्वान्यतररूपेण स्वविजातीयकार्यं प्रत्यप्रकृतित्वे सति विकृतित्वं। तथाच घटादय एव तथा नतु महत्तत्वाहंकाराकाशवायुतेजोजलपृथिव्यः। न चाविरोधिनी भाष्यविरोधः। तत्रेतरेषां चानुपलब्धेरिति सूत्रे महदहंकारादेर्निराकृतत्वादिति वाच्यं। साङ्ख्याभिमतविलक्षणतत्त्वयोर्निरासेपि भगवदीक्षणसंकल्पयोर्मूलकारणीयसर्गाद्यद्वितीयविकारयोरेव पराशरपुराणे महदादिरूपेण प्रतिपादनात्। अत एव महत्तत्वादिबोधकपुराणाद्यविरोधः। पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि पञ्च प्राणाः अनेति षोडशानां यथामतं प्रकृतिविकृतिषु केवलविकृतिषु वान्तर्भावः। तेषामपि स्वस्य वृत्त्यात्मना परिणामित्वात्। विजातीयकार्यात्मना परिणामाच्च। उदासीनश्च गुणकर्मसामान्यसंख्याविशिष्टोपाहितशक्तिविषयित्वप्रतियोगित्वानुयोगित्वाधारत्वाधेयत्वस्वत्वस्वामित्व भेदतादात्म्यात्यन्तान्योन्याभावभेदात् बहुविधाः। तत्र गुणाः रूपरसगन्धस्पर्शशब्दप-

रिणामपरिमाणसंयोगविभागद्रवत्वस्नेहशककर्मचोत्क्षेपणादि भेदनाने-
कविधं। सामान्यं च स्वरूपतो भासमानो धर्मः घटत्वविषयतात्वा-
दिः। संख्या एकत्वादिः। इयं च नातिरिक्ता। विषयतायामेवान्त-
र्भाव संभवादित्यपि वदन्ति। शक्तिर्दाहादिजनकतावच्छेदको व-
ह्न्यादिगतो धर्मः। इयं च न सामांतःपातीति अव्याप्यवृत्तित्वात्।
इदमत्रावधेयं। अविद्योपहितस्य मनोवच्छिन्नस्यानादित्वादपरिणा-
मित्वाच्च न प्रकृत्यादिरूपता। एवं प्रतिबिंबादेः बिंबानतिरेके तु
विकृत्यादिकमेव। तमश्छायादिकमपि द्रव्यत्वात् जन्यत्वाच्च। वि
कृतिः प्रकृतिविकृतिर्वा। प्रकृत्यादयो भेदाः द्रव्यस्यैव। रूपादीनामपि
विकृत्यादिव्यपदेशविषयत्वेऽद्रव्यस्यापि विकृतित्वमुपपाद्यं। द्रव्य-
त्वं च गुणाश्रयत्वं। उत्पन्नविनष्टो घटादिरप्रामाणिक एव। विशि
ष्टोपहितचितामन्यत्वे च विकृतित्वमेव अनन्यत्वे चिद्रूपत्वादात्मतत्व-
रूपतैवेति। उपहितादिरूपाणामचितां तु विकृतित्वमेव तत्रापि द्रव्य-
संबन्धविशिष्टोपहितानां द्रव्यमिव गुणादिसंबन्धिनां तेषां गुणादिकं
प्रकृतिस्स्यादिति तु न। उपहितसामग्र्याश्च उपहितोत्पादकत्वात्।
नव्यास्तु श्रुतिप्रतिपन्नजीवब्रह्मैक्यप्रत्यक्षयोरनुरोधेन अविद्यादिरूपो-
पाधेराश्रयभेदकत्वोपगमेपि नोपाध्यन्तरेण स्वाश्रयभेदः मानाभावा-
त्। एवं विशिष्टोपि नातिरिच्येत मानाभावात्। अन्योन्याभाववि-
लक्षणो न द्रव्यत्वघटत्वाद्युपहितयोरङ्गीक्रियते। किंतु पारमेश्वररू
पाणामानन्दानुभवादेवेति प्राहुः। ननु तत्वमेकमित्ययुक्तं प्रत्याक्षादि-
विरोधात्। न चेयं प्रतीतिः भ्रान्तिरिति वाच्यं। एतद्वाक्यजन्य-
प्रतीतेरपि भ्रान्तित्वे तस्य विषयबाधनान्तरकित्वेन प्रत्यक्षादेर्भ्रम-
त्वासिद्धेः। प्रमात्वे तस्य विषयबाधाभावनान्तरीयकत्वेन द्वितीय-
तत्वाभ्युपगमस्य दुर्वारत्वात्। उभयविलक्षणत्वे ज्ञानत्वं न स्यादि-
ति चेन्न। प्रत्यक्षादिना ग्राह्यमिथ्यात्वविरोधिसत्यत्वानिरुक्तेः।
प्रत्यक्षग्राह्यसत्ताजातिकालसंबन्धाश्रयस्य अनेकत्वे इष्टापत्तिः। भ्रा-

न्तित्वं हि ज्ञानोच्छेद्यविषयकत्वं स्वप्रकारकधीविशेष्यताव्यापकाभावप्रतियोगिविषयकत्वं तदत्यन्ताभाववति तदवगाहित्वं तद्वतोऽन्यत्र तदवगाहित्वं वा । नाद्यः । प्रत्यक्षादिकं भ्रान्तिरिति प्रतीतिनिष्ठाभ्रान्तित्वस्य स्वविषये ज्ञानोच्छेद्यतानान्तरीयकत्वेपि स्वविषयज्ञानविषये ज्ञानोच्छेद्यत्वाभावासाधकत्वात् । नहि यत्र ज्ञानोच्छेद्यभ्रांतित्ववत्त्वं तत्र ज्ञानोच्छेद्याविषयकत्वमिति नियमे मानमस्ति । त्वन्मते ज्ञानोच्छेद्यभ्रमत्वस्यैवासिद्धेः । मन्मते घटादिप्रत्यक्षे व्यभिचारादनुकूलतर्करहितत्वात् । अत एव न द्वितीयः । प्रमायामारोपितभ्रमत्वे प्रमावृत्तित्वाच्च । न तृतीयः । स्वनिष्ठात्यन्ताभावप्रतियोगित्वस्य भ्रमत्वात्यन्ताभावाधिकरणस्य वा तादृशप्रतियोगिताशून्यविषयकत्वसहचरितत्वेपि तस्य तद्व्याप्यत्वासिद्धेः । प्रतियोग्यत्यन्ताभावयोरविरोधाभ्युपगमेनाप्रोजकत्वात् । न चतुर्थः । अनभ्युपगमात् । नच प्रतियोग्यभावयोरविरोध एव प्रत्यक्षविरुद्ध इति वाच्यं । घटत्वाद्यवच्छिन्नतदभावादिरूपप्रतियोग्यभावयोर्विरोधस्य प्रत्यक्षादिसिद्धत्वेपि अतीन्द्रियघटितरूपावच्छिन्नप्रतियोगिताकाभावादिना प्रतियोगिविरोधे तदभावात् । तावतापि घटादेरनिर्वाच्यत्वानपायात् । स्वसमानाधिकरणाभावप्रतियोगितायाः मिथ्यात्वरूपत्वे तु सुतरां न तद्विरोधः । स्वसंसृष्टब्रह्मनिष्ठात्यन्ताभावप्रतियोगितामात्रेण तदुपपत्तेः अनुमानादिकं तु अप्रयोजकं । विश्वं सत्यमित्यादिश्रुतिरिन्द्रबृहस्पतिस्तुतिपरा न तच्छेषभूतविश्वपरमार्थतापरा । वाक्यभेदप्रसंगात् । किन्तु प्रामाण्यान्तराविरुद्धप्रत्यक्षव्यवहारकालाबाध्यत्वरूपामुख्यसत्यत्वानुवादिकैवेति न काचिदनुपपत्तिः । अधिकमन्यत्रानुसन्धेयम् ॥

॥ तत्त्वसंख्यानं समाप्तम् ॥

---

॥ श्रीराम जय ॥

पूर्णानन्दाय निर्भेदपरमानन्दमूर्तये ।
व्यासशंकररूपाय श्रीपरब्रह्मणे नमः ॥

ननु वेदान्तशास्त्रमनारम्भणीयं आश्रयानुपपत्त्या अज्ञानासंभवेनाज्ञातस्य विषयस्य अज्ञानिनोऽधिकारिणश्चासंभवात् । मैवं । शुद्धचित एवाज्ञानाश्रयत्वविषयत्वसंभवात् । तदुक्तं । "आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला" इति । नचाज्ञत्वसर्वज्ञत्वयोरेकाश्रयत्वानुपपत्तिः । तदीयज्ञानविरोधिनः तत्काले तदाश्रयत्वायोगेऽपि अन्यदीयज्ञानविरोधिनः तदाश्रितत्वे बाधकाभावात् । नचैवमज्ञं ब्रह्म ब्रह्मण्यज्ञानमिति व्यवहारापत्तिः । अयमज्ञ इत्यादौ व्युत्पत्तिवैचित्र्येणाज्ञपदार्थैकदेशेऽज्ञानविशेषस्य विशेषणत्वेन तेनान्वयोपगमात् । ब्रह्मरूपंच ज्ञानं परस्येव ममापि स्वरूपभूतमेव साज्ञानविरोधि । यं प्रत्यापादकज्ञानं तस्य तदाश्रितत्वेनैव विरोधात् । एवमज्ञानान्वितसप्तम्यर्थविशेषणीभूततत्प्रकृत्यर्थस्य तस्मिन्नज्ञानमित्यादौ अज्ञानपदार्थैकदेशेऽज्ञाने धर्मिपारतन्त्र्येणान्वयोपगमात् न ब्रह्मण्यज्ञानमिति व्यवहारापत्तिः । नन्विदमयुक्तं । जीवब्रह्मणोरभेदादिति चेन्न । स्वरूपैक्येऽपि औपाधिकभेदाभ्युपगमात् । जीवोपाधिस्तु सुषुप्तिप्रळयाद्यनुवृत्तसंस्कारसाधारणं मनस्त्वाश्रयमात्रं । मनस्त्वविशिष्टतत्संस्कारान्यतरपर्यवसितं । अविद्याप्रतिबिंबो जीव इति पक्षेऽपि शुद्धचिदाश्रिताज्ञानप्रयुक्त एव जीवेश्वरभेदः मुखमात्रसंबन्धिदर्पणाद्युपाधिभूतमुखप्रतिमुखादिभेदवदिति तादृश तादृश प्रतिबिंबभूतजीवनिरूप्यत्वमेवाज्ञानस्य जीववदीशोऽप्यविद्याप्रतिबिंब इति पक्षेऽप्युपाधिगतनैर्मल्यतदभावाभ्यां वशीकृतोपाधित्वतदभावाभ्यां च ईशजीवयोर्विशेषः । सर्वज्ञताचेशनिष्ठा न शुद्धनिष्ठा । एवं च शुद्धचितोऽज्ञानाश्रयत्वेऽपि न क्षतिः । तयाः सर्वविषयकदृग्रूपत्वेऽपि

तदाधारत्वानभ्युपगमादिति वदन्ति । आचार्यवाचस्पतयस्तु जीवाश्रितामेवाविद्यां मन्यन्ते । तन्मते जीवोपाधिरविद्यातिरिक्तः नित्यश्चेदद्वैतहानिः । असत्यश्चेदविद्याधीनो वाच्यः । साचोपाध्यन्तरनिर्वाच्या । स चाविद्यान्तराधीन इत्यनवस्था । यदि चैकमेवाज्ञानमुपाधिश्च एकमेवेत्युच्यते तदाऽन्योन्याश्रयः चक्रं वा । उपाधिनिर्वाह्य भेदोपपाद्याधिकरणमज्ञानं तन्निर्वाह्यश्चोपाधिरिति । एकस्या अविद्याया एव सोपाधित्वे आत्माश्रय इतिचेन्मैवं । अविद्यातदुपहितभेदानामविद्योपहितचिद्रूपायाः तद्भियोऽप्यनादित्वेनोत्पत्तौ ज्ञप्तौ च आत्माश्रयाद्यनवकाशात् । न चाविद्यातिरिक्तानादिदृश्यस्याविद्याजन्यत्वाभावेन सत्यत्वापत्त्या अद्वैतहानिरिति वाच्यं । तस्य तदजन्यत्वेपि तत्प्रयुक्तत्वेन सत्यत्वानापत्तेः । तथाऽविद्याकृतोपकाराभावेन तत्प्रयुक्तत्वमप्ययुक्तमिति चेन्न । अविद्यानाशाधीननाशप्रतियोगित्वेन तदधीनास्थितिकस्याविद्यातिरिक्तानादिदृश्यस्य प्रतिबन्धकाधीनकार्यप्रागभावस्येव तत्कृतोपकारशून्यत्वासिद्धेः सत्योपाधिकृतसत्यभेदवादेपि न दोषः । उक्तरीत्योपाध्युपहिततद्भेदानामनादित्वात् भेदस्योक्तरीत्योपाध्यधीनस्थितिकत्वेन तत्प्रयुक्तत्वस्यौपाधिकत्वव्यपदेशः । यत्तूपाधिर्विद्यमानस्य भेदस्य ज्ञापक एव दृष्टपूर्वः नतु कारकः । महारजनाद्युपाधौ विद्यमानावयव्यवयवभेदव्यञ्जकताया एव दर्शनात् । न चायं पटस्यैव भेदकः द्वौपटावित्यप्रतीतेः । न च दण्डकुण्डलोपाधिभ्यां देवदत्तो भिद्यत इति वाच्यं । देवदत्तभेदस्य प्रतीतेर्दण्डकुण्डलसंबन्धाद्विशिष्टत्वस्यैवोत्पत्तेः । न चैवमेवास्तु प्रकृत इति वाच्यं । उपाध्यपगमे जीवस्य विनाशेन न ब्रह्मैक्यमित्यापत्तेः । जीवे नष्टे स्वरूपमात्रावशेषः तदोच्यत इति चेत् तर्हि ब्रह्मण्येव बन्धमोक्षावप्यंगीकृतौ स्यातामित्युक्तदोषापत्तिरिति । तदसत् । कर्माधीनभोगाश्रयत्वादिबन्धलक्षणस्य ब्रह्मण्यात्यान्तिकलयरूपमोक्षस्य च विशिगतत्वेन शुद्धे तत्प्रसंगाभावाज्जीवस्योपाधिकृतरूपेण मुक्त्यन-

न्वयेप्यनौपाधिकशुद्धरूपेण तदन्वयस्य निष्प्रत्यूहत्वात् । महारजनादेः स्वोपहितपटभेदकत्वाभावे अत्र पटो रक्तो त्र न मूले वृक्षः कपिसंयोग्यग्रे नेति प्रतीतेरनिर्वाहात् । नच तत्र पटावयवविशेषस्य मूलादेश्च रक्तत्वाद्यधिकरणता प्रतीयते नतु पटस्यैवेति वाच्यं । अत्र पटो रक्त इत्याद्यनुभवविरोधात् । न चावयवविशेषावच्छेदेन पटे रक्तता प्रतीयत इति त्वया शक्यमभ्युपगन्तुं । तर्ह्यन्यायेन भागान्तरावच्छेदेन रक्तत्वाभावस्यापि पटे स्वीकारप्रसंगेन प्रतियोग्यभावयोर्विरोधावच्छेदापत्तेः । नच तदवच्छेदकभेदेन तदविरोधिनैयायिकवत्त्वयाभ्युपगम्यते कार्यकारणलक्षणोपपादनपरतत्वटीकायां किञ्चाकाशस्य तावदंशा इत्यंगीकार्यं । अन्यथाकाशविहगशरीराभावाद्यावौ न स्यातां । संयोगस्यात्यन्ताभावसमानाश्रय इति चेन्न । विरोधात् । अन्यथा सर्वत्र भावाभावविरोधाभावप्रसंगात् । न चोपाधिकृतांशसद्भावादविरोधः । उपाधेरपि विहगशरीरसमानयोगक्षेमत्वात् । न चाकाशस्योपादानकारणमस्ति । तस्मात्कार्यकारणातिरिक्तांशांशिनौ स्वीकार्यावित्यभिधानविरोधात् । तस्मात्पटत्वाश्रयो महापटांशोपि स्वीकर्तव्यः अनुभवविरोधात् । किञ्च स्वाभाविकभेदवतां गगनत्वाश्रयाणामंशानामभ्युपगमे अंशस्थानीयगगनाभ्युपगमो व्यर्थः । अधिकं तु तत्वरत्नपरीक्षायामनुसन्धेयं । एवं चोक्तयुक्त्या तव पटभेदाभ्युपगम आवश्यकः । द्वौ पटाविति प्रतीतिपरिहारावावयोस्तुल्यौ । किञ्च दण्डकुण्डलसंबन्धात् विशिष्टद्वयोत्पत्तिपक्षे प्ययं दण्डेन अयं कुण्डलेन दण्डकुण्डलिनौ द्वाविति प्रतीत्यापत्तिः कथं वारणीया नहि लोकानां तादृशप्रत्ययोस्तीति । अपरीक्षकाणां तु तुल्यं प्रकृतेपि तदस्मदनुभवैकपक्षपातेपि शिष्टांशाधिकमतिरिक्तं नोपधेयं । युक्त्यनुभवयोरनुसरणे तु स्वांशता पटस्यापि दुर्वारणा । एवमनादिब्रह्मांशो जीवः । अंशांशिनोः भेद औपाधिकः । उपाध्यपगमे भेदात्यन्तसमुच्छेदादंशिनाऽविनाभावादत्यन्ताभिन्नाविव अंशोवति·

ष्टत इति। एतावानंशो भास्करानुमितो निरपवाद एव। भेदोपाध्योः पारमार्थिकत्वमनिर्वाच्यत्वमेति। अन्यदेतत्। नाद्वैतमतद्वयेपि परकीयकुचोद्यावकाश इति समानः। अनित्योपाधिकृतभेदस्त्वनित्य एव। यत्त्वनित्योपाधिस्थलेपि भेदस्य व्यंग्यत्वमेव नतु जन्यत्वं। अन्यथा गगनादौ घटाद्युपाधिसंबन्धस्य सर्वगतत्वे कृत्स्नस्याकाशस्यैकोपाधि नैव ग्रस्तत्वात् तेनाकाशभेदो न स्यात्। यदिचोपाधिसंबन्धः गगनाद्येकदेशवृत्तिः तदा तस्योपाध्यन्तरजन्यत्वे प्रागुक्तविकल्पो ग्राह्य इति तत्संबन्धस्यैकदेशवृत्तित्वं वाच्यं। एकदेशोपाध्यन्तराधीन एव वक्तव्य इति अनवस्थापत्तिरिति त्वन्मतं। त्वन्मतेपि एतद्दोषानपायात्। तथाहि। एकदेशः घटादिसंबद्धो न वा नान्त्यः। अनुभवविरोधात्। आद्ये किं कार्त्स्न्येन घटादिसंबन्धः एकदेशेन वा। नाद्यःकृत्स्नस्यापि घटाकाशत्वापत्त्या अनतिप्रसक्तस्योपाधिसंबन्धस्य वृत्तिजनकत्वानुपपत्तेः। न द्वितीयः। एकदेशस्य घटसंयुक्तत्वेप्येकदेशेन संयोगस्य सर्वात्मना सत्त्वाभावानुपपादनात्। एकदेशो घटादि नैव संबध्नातीत्यस्य चानुभवविरुद्धत्वात्। नन्वेकदेशिनो घटादिसंयोगः कारणेनैव। नचैवं आकाशादावुपरिभागेपि घटादिसंयुक्तत्वस्य व्यवहारापत्तिः। उपरिभागस्य घटादिसंयोगानवच्छेदकत्वाभ्युपगमादिति चेन्न। यत एकदेशोपि एकदेशिना सर्वात्मना संबध्यते। उतैकदेशेन। नाद्यः। एकदेशद्वयस्य सर्वात्मना संबन्धविशेषे कस्यचिद्भेदस्य घटादिसंयोगावच्छेदकत्वं नान्यस्येत्यत्रापि नियामकदौर्लभ्यात्। अवच्छेद्यसंबन्धस्यैवावच्छेदकत्वमित्युक्तावपि न सः। आश्रयस्यावशिष्टवृत्त्योरेकसंयोगेऽपरसंयोगस्यापादनीयत्वादिति। अथानुभवबलात् आधाराधेयभावे व्यवस्थिते तदनुसारेण तन्निर्वाहकः कार्यकारणभावः कल्प्यते। अतो नातिप्रसंगोपीति चेत् तर्हि कथं भास्करमतेप्यनुपपत्तिः। यावता समग्रस्य परस्परानवच्छिन्नवृत्तिनं तत्तदुपहितं तदिदं जनयतीत्यभ्युपगमसंभवात्। तदनुसारेण स-

मग्रव्याप्तेरपि कल्पनासंभवाच्च। इदमत्र चिन्तनीयं। भेदस्योपाधिजन्यत्वे तुल्यपरिमाणसमानदेशभिन्नकालिकानन्तघटाद्यवच्छिन्नाकाशादीनामनन्तानां कल्पने गौरवं। उपाधिव्यंग्यत्वे तु तत्रैकस्यैव एकदेशस्याभ्युपगमाल्लाघवमित्यत्रावधेयं। घटसंयोगादिरूपागन्तुकविशेषेण विशिष्टस्याकाशस्य शुद्धाकाशादावन्यस्याभ्युपगमो विशिष्टातिरिक्ततावादिनामावश्यकः। एवंच ततोतिरिक्तघटाकाशाद्यभ्युपगमस्य नोक्तगौरवावकाश इति। यत्त्वौपाधिकभेदवत्त्वेपि स्वरूपैक्ये मैत्रस्य चैत्रसुखाद्यनुसन्धानप्रसंगः। एवमीशस्यापि बोध्यमिति तन्न। विशिष्टविभिन्नोपाध्यवच्छिन्नयोः चैत्रमैत्रयोर्धर्मिणोरसांकर्यात्। तदीयकेवलरूपयोरभेदेपि अनुभवविरोधाभावात्। विशिष्टधर्माणां केवले प्यावश्यकत्वं तु न शक्यं शङ्कितुं। विशिष्टकेवलभेदवादेऽनुवृत्तत्वव्यावृत्तत्वादिविरुद्धधर्माणां धर्मिषु परम्परासंबन्धाद्विरोधिप्रमाणानवतारे धर्मसांकर्यमावश्यकमिति चेन्न। तत्रापि निरवद्योनिरनिष्टः अनश्नन्नन्योऽभिचाकशीतीति विरोधिप्रमाणसद्भावात् परमार्थतः तदभावस्य जीवसाधारण्यात्। भास्करमते तथावाक्तुमशक्यत्वाच्च। अतएवांशस्य भोक्तृत्वे अंशिनोऽभोक्तृत्वानुपपत्तिः परास्ता। अंशीन्द्रादिगतसुखाद्यनुसन्धानस्यांशिन्यप्यभावोपपत्तिश्च। सुखं भुञ्जानोऽहमस्मीत्यादिप्रतीतिबलादपि सद्रूपे ब्रह्मणि न सुखादिभोगप्रसङ्गः। तत्र भोगवदहंकारतादात्म्यभानमात्रेण तस्यास्तदाकारोपपत्तेः। धर्माध्यासे धर्मितादात्म्याध्यास तत्तत्प्रतिबिम्बाध्यासयोरन्यतरस्यावश्यकतायाः आकारेषूक्तत्वेपि धर्मितादात्म्याध्यासे धर्माध्यासानियमानुक्तेर्न तद्विरोधः। असति प्रमाणान्तरविरोधे विनिगमनाभावात्। परमिदं रजतमित्यादौ अहं सुखीत्यादौ च उभयाध्यासनियमः औत्सर्गिक इति न किंचिदनुपपन्नं। भास्करमतेऽध्यासानुपगमाच्च। न त्वौपाधिकभेदस्यानुसन्धानाभावप्रयोजकत्वे शरीराद्यवच्छिन्नस्य सुखाद्यनुसन्धातृत्वानुपपत्तिः। योगिनां सौभर्यादीनाम-

नेकशरीरावच्छिन्नसुखानुसन्धानानुपपत्तिश्चेति वाच्यं । सुखादेर-न्तःकरणधर्मस्य तदुपहिते शरीरावच्छिन्नेपि सत्त्वेन तदनुसन्धानस्य तस्मिन्नवर्जनीयत्वात् । योगिनोप्यन्तःकरणं युगपदनेकशरीरवर्तीति तत्तदवच्छिन्नात्मनः शरीरान्तरावच्छिन्नानेकसुखानुसन्धानमावश्य-कमिति न कोपि दोषः । न चेदमीशेपि तुल्यं । अन्तःकरणधर्मा-णां तदुपहिताश्रयत्वमात्रेणानुभवव्यवस्थितिः । ईशे तदाश्रितत्वक-ल्पकप्रतीत्यभावादेवासांकर्यात् । जीवान्तरे सुतरां । यदपि लाघवा-त् स्वरूपैक्यमात्रमनुसन्धानप्रयोजकमिति तच्चिन्त्यं । किमिदमनुसन्धा-नप्रयोजकत्वं । न तावत्कारणत्वं । इष्टापत्तेः । तद्विशिष्टासिद्ध्या ऽर्थान्तरं च । अत एव न व्यापकत्वमपि । नापि व्याप्यत्वं । स्वरूपै-क्यशालिनोर्विशिष्टयोर्विरुद्धधर्माश्रयत्ववत् उक्तानुसन्धानतदभावयो-रूपपत्त्याऽनुकूलतर्काभावेन तदसिद्धेः लघोरिव गुरोरपि व्याप्य-तायामविवादेन लाघवमात्रेण स्वरूपैक्ये सत्युपाधिसंश्लेषस्यापि प्र-योजकताया निरसितुमशक्यत्वाच्च । एतेन प्रातिनियतकर्मव्यवस्थापि प्रतिकर्म व्याख्याता । वृत्तिसूक्ष्मावस्थारूपसंस्कारस्य वृत्तिवद्व्यव-स्थोपपत्तेः । पुण्यादेरतिरिक्तत्वेपि योगादिसामानाधिकरण्यानुरोधे-न जीवनिष्ठमेव तत्कल्प्यते । तस्य पारमेश्वरप्रीत्यादिरूपत्वेपि तद-वच्छेदकत्वं मनसः तदुपहितस्यापीत्यन्यत्र विस्तरः । यदपि प्रत्यक्ष-प्रमाणविरोधेन न जीवेशयोर्जीवानां वा स्वाभाविकैक्यमिति । त-दसत् । विभिन्नोपाध्यवच्छिन्नानां परस्परभेदस्यापि प्रतिपन्नत्वा-त् । शुद्धोपहितयोः भेदाभ्युपगमाच्च । नच भास्करमते प्रत्यक्षावि-रोधाद्यनवकाशेपि वेदान्तिनां मते स दुर्वारः भेदमिथ्यात्वाभ्युपग-मादिति वाच्यं । प्रत्यक्षग्राह्यमिथ्यात्वविरोधिसत्त्वानिरुक्तेः । स्व-रूपमात्रस्य मिथ्यात्वाविरोधित्वात् । एतेन कालसंबन्धादयोपि व्या-ख्याताः । वेदान्त्यभिमतमिथ्यात्वाभावस्तु योग्यानुपलब्धिशून्य-त्वान्न प्रत्यक्षः । भेदप्रत्यक्षादेस्तु व्यावहारिकमेव प्रामाण्यं । न ता

त्विकं। निर्णीततात्पर्यकश्रुतिविरोधादिति अन्यत्र प्रपंचितं। केचित्तु ईश्वरादिभेदः न प्रत्यक्षः। योग्यानुपलब्ध्यभावात्। न चाधिकरणप्रत्यक्षमेव स्मरणसहकृतं भेदप्रत्यक्षहेतुः। नच प्रतियोगियोग्यतादि तंत्रमिति वाच्यं। एवं सति घटः पिशाचसंयोगी नेत्यपि प्रत्यक्षापत्तेः। नच यद्यहं सर्वज्ञस्स्यां तर्हि प्रत्यक्षीकृतस्स्यामित्यापादनसंभवात् अस्ति योग्यानुपलब्धिरिति वाच्यं। तन्मते मुक्तिकालाभिव्यंग्यपरमानन्दस्येव मन्मते सार्वज्ञादेरप्यावृतत्वादप्रत्यक्षसंभवेन योग्यानुपलब्धेरनवकाशात्। अन्यथा परमानदवच्छेदस्यात्मनि प्रत्यक्षताया दुर्वारत्वात्। विरोधिश्रुत्या स्वाभाविकपरमानन्दासिद्ध्यनापत्तेरिति दिगित्याहुः। नन्वेवमपि निर्विशेषब्रह्माप्रामाणिकं। "यस्सर्वज्ञस्सर्ववित् परास्य शक्तिर्विविधैव श्रूयते य आत्मापहतपाप्मा सर्वस्य कर्ता" इत्यादिश्रुतिभिः अनन्तविशेषे "सत्यः सोस्य महिमा" इत्यादिश्रुतिभिस्तावद्विरुद्धा सिद्धान्तेपि परमात्मन्यनिर्वाच्यानन्तकल्याणगुणाभ्युपगमाच्च। महिमशब्दोक्तस्य महत्त्वस्य परिच्छेदाभावरूपतयाऽधिकरणात्मनः तस्य सत्यतायामविवादश्च। सत्यशब्दस्यामोहार्थतासंभवाच्च। उपासकापेक्षितफलावश्यंभावद्योतनाय तदभिधानस्यावश्यकत्वात्। उपक्रमादितात्पर्यलिंगसाकल्ययुक्तिप्रबलाद्वैतश्रुतिशतविरोधिनायुक्तवाक्यानां तदनुगुणार्थपरताया वक्तव्यत्वाच्च। नच श्रुतिद्वयविरोधपरिहारेण तयोः प्रामाण्योपपादनसंभवे एकस्य अप्रामाण्यपर्यवसितानिर्वाच्यार्थपरत्वकल्पनं न युक्तमिति वाच्यं। वाक्यानामुपक्रमादिलिंगविशेषपरतायामवगम्यमानस्वारस्यहेत्वभावेन तदन्तर्गतानां गुणशब्दानां प्रधानानुगुणेनैव नेयतया परतात्पर्यविषयार्थे प्रामाण्यस्याप्यव्यापकत्वेन द्वारभूतप्रतीत्यंशे व्यावहारिकप्रामाण्योपगमे चाप्रामाण्यानभ्युपगमात्। सक्रतुं कुर्वीतेत्युपासाविधिशेषभूतानां गुणानां व्यावहारिकत्वेप्युपासनावाक्यस्वारस्यभंगाभावेन ज्योतिष्टोमादिवाक्यवत् प्रमा-

णान्तराद्यविरोध्यर्थपरत्वकल्पनाया एव युक्तत्वात्। न चैतावता प्रामाण्यं। अतद्रूपस्य तद्रूपताप्रत्यायकं हि वाक्यमप्रामाणमुच्यते। न चैवं वेदः। जोतिष्टोमादिपरमार्थतायाः तेनाप्रतिपादनात्। तत्प्रतिपादकत्वं च तत्परत्वं। नतु तत्प्रतीतिजनकत्वमात्रं। "आदित्यो यूप" इत्यादिश्रुत्यप्रामाण्यप्रसंगात्। ननु यदि प्रामाण्यं तद्वति तत्प्रकारकत्वं तदा ब्रह्मनिर्विकल्पकेऽव्याप्तिरतिव्याप्तिश्च शुक्ताविदं रजतमिति ज्ञाने। नापि विशेष्यावृत्त्यप्रकत्वादि। स्वतस्त्वानुपपत्तेः। नापि त्रिकालाबाध्यविषयकत्वं। बाध्यत्वस्य नाश्यत्वरूपत्वे स्वतस्त्वानुपपत्तेः। अतस्त्वप्रकारकधीविशेष्यताव्यापकाभावप्रतियोगितद्विषयकत्वमेव तद्वाच्यं। तथाच कथं ज्योतिष्टोमवाक्यस्याप्रामाण्यमिति चेन्मैवं। एवमपि प्रामाण्यस्य स्वतस्त्वासंभवात्। नच साक्षिणा प्रामाण्यग्रहे योग्यानुपलब्धित्वं तंत्रं। चक्षुरादिग्राह्यसत्ताघटितस्यैव प्रामाण्यस्य साक्षिग्राह्यत्वानुभवात्। न चेदं चक्षुरादिग्राह्यमित्युक्तं। नचैवं सिद्धान्ते स्वतोग्राह्यं प्रामाण्यं दुर्वचं। तद्वति तदवगाहित्वस्यैव तत्त्वात्। नच भ्रमसाधारण्यापत्तिः। इष्टत्वात्। नच भ्रमत्वग्रहानन्तरमपि प्रवृत्त्याद्यापत्तिः। व्यावहारिकरजतार्थिनः प्रातीतिकत्वेन ज्ञाते तत्रापि प्रवृत्त्ययोगात्। व्यावहारिकं वा रजतं कटकादिरूपार्थक्रियाकारितयेष्यते। अत्रच तदभावनिश्चयान्न प्रवृत्तिः। नच शुक्तितात्पर्यकमिदं रजतमिति वाक्यमपि प्रमाणं स्यादिति वाच्यं। उक्तप्रमाकरणं स्यादित्यत्र इष्टापत्तेः। न चेदं वाक्यं अस्मिन्नर्थे प्रमाणमिति व्यवहारापत्तिः। प्रपदस्य तद्वति तत्प्रकारकत्वरूपप्रकर्षद्योतकत्वे तद्घटितप्रमापदयोगार्थमादाय तादृशव्यवहारस्येष्टत्वात्। परेषां स्मृतिकरणे तादृशव्यवहारवत् अग्निर्हिमस्य भेषजमित्यादिवाक्यस्य तादृशव्यवहारवच्च अनधिगतब्रह्मज्ञानेतराबाध्यविषयकत्वरूपप्रकर्षविवक्षायां तु न तादृशव्यवहारस्संभवति। सर्वज्ञानयाथार्थस्य भास्करयामुनादिभिरुक्तत्वात्। तन्मत एवोक्तोपाधिनिमित्तैक्यस्य

तादृशव्यवहारस्य भ्रमत्वेनोपात्तज्ञानकारणे मन्मतेऽपीष्टत्वात् । भ्रमत्वव्यवहारश्च बाध्यत्वाधीनः । एवं चापौरुषेयत्वेन वक्तृदोषशून्यानामागमानां तदधीनस्य व्यवहारकालाबाध्यार्थविषयकत्वलक्षणाप्रामाण्यस्यानवकाशः । नन्वेवं "सत्यं ज्ञानमनन्तं" इत्यादिश्रुतिसिद्धस्य ब्रह्मणोपि पारमार्थिकत्वं न स्यादिति चेन्न । तस्यापारमार्थ्ये जगदनिर्वाच्यताधारत्वनिर्वाहाद्बाध्याधिकसत्ताकविषयकबुद्धेरेवेतरबाधकत्वात् । नचैवं प्रत्यक्षप्राप्तसत्यत्वानुवादिका "विश्वं सत्यं" इत्यादिश्रुतिः न स्यादिति वाच्यं । तादृश(ह्युक्ते)श्रुतेर्विश्वसत्यत्वादावपि तात्पर्यकल्पने वाक्यभेदापत्त्या अनुवादकताया एवोक्तत्वात् । परमानन्दावाप्तिलक्षणफलस्य तत्संबन्धस्य च श्रौतसिद्धान्ते निष्प्रत्यूहतया न काचिदनुपपत्तिः । नन्वज्ञानं भावोऽभावो वा । नाद्यः । तथात्वे अनादेर्भावस्य निवृत्त्यसंभवात् । न द्वितीयः । जगदुपादानत्वानुपपत्तेः । अत्राहुः । अज्ञाने भावाभावत्वयोर्घटनानुपपत्तिः । सप्तम्यामेव । नहि मायायाः दुर्घटत्वं दूषणं भवति । क्वापि लौकिकमायायां दृश्यत इति भावाभावविलक्षणैवा विद्येति । यत्तु दुर्घटत्वं भूषणं चेत्स्यादविद्यारवमात्मनः । अन्धं तमो प्यलंकारो नित्यदुःखं शिरोमणिः" इति । तनुधातोर्नह्यनुपपत्तिमात्रं भूषणमिति ब्रूमः । येनोक्तदूषणं स्यात् । प्रामाणिकार्थे तत्प्रतिक्षेपाक्षमाभावत्वं वोऽवश्यमुपपादनीयमित्यास्ति कुलधर्मः । भेदादेरभावत्वानुपपत्तौ अभावत्वं घटादेरभावत्वानुपपत्तौ तद्विलक्षणताया अपि स्वीकारे बाधकाभावात् । आत्मनोऽविद्यात्वे च सर्वदाऽज्ञातत्वप्रसंगः । अविद्यानिवृत्तावात्मनिवृत्तिश्च स्यादिति दूषणं स्यात् । आत्मनः स्वप्रकाशत्वादज्ञानानिवृत्तिलक्षणत्वं विनाशित्वादिग्राहकबलवत्प्रमाणविरोधित्वं न दूषणत्वं । ननु ब्रह्मणि सर्वज्ञताग्राहकबलवत्प्रमाणविरोधज्ञानाश्रयत्वाद्यनुपपत्तिः । आत्माश्रयादिना जीवस्यातथात्वानुपपत्तिश्च न दूषणमिति चेन्न । सर्वज्ञताग्राहकप्रमाणस्याज्ञानाश्रयत्वविरो-

धित्वाभावात् । तदाश्रयत्वे सर्वज्ञताया उपपादित्वादात्माश्रयत्वोदर्निरस्तत्वाच्च । सर्वज्ञेस्थितस्याज्ञत्वस्याज्ञानगतारोपितत्वस्योपपादिततया दूषणतायाः अस्पृष्टत्वाच्च । नन्वज्ञानमज्ञानप्रयुक्तं नवा । नाद्यः अज्ञानेप्रयुक्तत्वे ज्ञानान्निवृत्तेरयोगात् । नाद्यः । आत्माश्रयादिति चेन्न । अनादावपि स्वस्मिन्स्वप्रयुक्तत्वोपगमे बाधकाभावात् । यथा ह्यभावाधिकरणकाभावस्याभावस्वरूपत्ववादिनैयायिकमते घटाद्यभावस्य स्वात्मकघटाभावप्रतियोगित्वं तत्र रूपभेदोस्तीति चेत् । उत्तरोत्तरक्षणसंबन्धरूपतद्भेदः प्रकृतेप्यव्याहतः । वस्तुतस्तु ज्ञाननाश्यत्वेऽज्ञानत्वमेव प्रयोजकं । अज्ञाननाश्यत्वे च तत्प्रयुक्तत्वमिति न कोपि दोषः । नन्वज्ञानस्य तत्प्रयुक्तत्वेऽनिर्वाच्यतैव न स्यादिति चेन्न । किमनिर्वाच्यत्वं तत्प्रयुक्तताप्याप्यत्वं । येन तन्निवृत्तौ तन्निवृत्तिरापद्यते । किन्तु तदसत्त्वादिग्राहकप्रमाणभावस्य । तच्चाज्ञानेपि तुल्यं । वस्तुतस्तु भावत्वमेवाज्ञानस्य । अर्थक्रियाकारिताया एव भवतारूपत्वात् ततोन्यभावत्वस्य दुर्निरूप्यत्वमविद्यालक्षणविचारे प्रपंचितमस्माभिः । नचैवं शुद्धस्य जगदुपादानत्वं तत्कर्तृत्वं च नास्तीति मते तस्य भावत्वानुपपत्तिरिति वाच्यं । सर्वाश्रयत्वस्वाश्रय निरूपितानवच्छिन्नतादात्म्यप्रति योगित्वान्यतरसंबन्धेनार्थक्रियाकारित्ववत्ताया भावस्वरूपत्वोपगमात् । वस्तुतः तस्यापि जगत्कारणतापक्ष एव साधीयानित्यन्यत्र प्रपंचितं । "परोमात्रया" इत्यादिश्रुतिः परमात्मपरा नास्मत्प्रतिकूला । "जुष्टं यदापश्यत्यन्यमीशं" इत्यादिश्रुतावन्यपदं देहाद्यन्वपरं । "समाने वृक्षे पुरुषो निमग्न इति पूर्व मंत्रे देहादिविविक्ततयानुपलभ्यस्वरूपं अश्रुतायाः उक्तत्वेन तदानुगुण्यानुरोधात् परमसाम्यंचाभेद एव । निरञ्जनः परमं साम्यमुपैतीत्यनेन सामंजस्ये परमपदवैयर्थ्यात् । ब्रह्मभावबोधकश्रुत्यन्तराविरोधाच्चेति । ॥ इति श्रुतिरत्नप्रकाशिका ॥

॥ श्रियै नमः ॥

वन्दे वन्दारुमन्दारमिन्दिरानन्दमन्दिरम् ।
बृन्दावनपरं भक्तबृन्दावनपरं नुमः ॥

इह खलु परमपुरुषार्थसाधनमात्मतत्वज्ञानमामनन्ति न्याय वेदान्तनिष्णाताः । तच्चात्मतत्वं कर्तृत्वभोक्तृत्वादिनिखिलानर्थविरहितसच्चिदानन्दघनप्रत्यगभिन्नब्रह्मात्मकमिति तन्निरूपणीयं । निरूपणं च साधकप्रदर्शनबाधकनिराकरणाभ्यां तत्र साधकाः "असंगोह्ययं पुरुषः सत्यं ज्ञानमनन्तं ब्रह्म सदेव सौम्येदमग्रआसीत् नेहनानास्ति किञ्चन नात्रकाचनभिदास्ति तत्त्वमसि" इत्यादयो निश्चिततात्पर्यकोपनिषद एव । तत्रच निश्चितप्रामाण्यकप्रमाणान्तरविरोधे तात्पर्यानिश्चयात्तदविरोधः तावदुपपादनीयः । सच यावत्प्रत्यक्षादिग्राह्यद्वैतस्य पारमार्थिकत्वं ननिराक्रियते तावद्दुरुपपाद इति तस्य मिथ्यात्वमुपपादनीयं अतस्तदेवादौ स्वपक्षाद्युपन्यासेन प्रपंच्यते । तथाहि तत्र विप्रतिपत्तिः १ ब्रह्मप्रमातिरिक्ताबाध्यं सत्त्वेन प्रती-

---

१ ब्रह्मप्रमेत्यादि ॥ तत्र रजतत्वविशिष्टं तादात्म्यसंबन्धेन रजतत्वविशिष्टसंबन्धितया ज्ञायमानसर्वनिष्टत्रैकालिकसंसर्गाभावीयतादात्म्यावच्छिन्नरजतत्वावच्छिन्नप्रतियोगिताविशिष्टं दृश्यत्वादिति विशेषानुमानं । ब्रह्मप्रमातिरिक्ताबाध्यत्वविशिष्टसत्त्वप्रकारकप्रतीतिविषयताविशिष्टचिद्भिन्नत्वसामानाधिकरण्यरूपं तादृशाचिद्भिन्नत्वं वा तत्संबन्धेन स्वविशिष्टवत्त्वेन ज्ञायमानसकलनिष्टत्रैकालिकसंसर्गाभावीयतत्संबन्धावच्छिन्नस्वावच्छिन्न प्रतियोगितासमानाधिकरणं दृश्यवृत्तित्वादिति । तत्र विशेषानुमाने शुक्तिरूप्यं न दृष्टान्तः । किंतु घटादिः । रजतं त्रिविधं । व्यावहारिकं प्रातिभासिकं उभयसाधारणं । रजतपदशक्यतावच्छेदकं च तृतीयं व्यावहारिकमेवेति । तत्र स्वत्वस्य व्यावहारिकप्रातीतिकमात्रवृत्तिरजतत्वयोरनुगतत्वात् । प्रातीतिकरजतत्वे उपादीयमाने व्यावहारिकरजतस्यावर्जनीयतया रजतावयवस्यापि यावदन्तर्गततया तत्र चानुगतधर्मावच्छिन्नाभावस्यानुमानात्प्रागसिद्धत्वे दृष्टान्ते साध्याप्रसिद्धितादवस्थ्यं । नच सत्त्वानुगतधर्मोपलक्षितप्रातीतिकरजतत्वावच्छिन्नाभावस्य व्यावहारिकरजतावयवेपि सत्त्वान्नायं दोषः ॥

**त्यहं चिद्भिन्नं मिथ्या नवा विमतं मिथ्या नवेत्यादिः। अत्रच पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे सामानाधिकरण्येन साध्यसिद्धावपि सिद्धसाधनमिति मते शुक्तिरूप्यादौ तद्वारणायाबाध्यान्तं पक्षविशेषणं। तुच्छे ब्रह्मणि च बाधवारणायार्हन्ति भिन्नान्ते। उक्तं हि दीधितिटीकायां अत एवातिप्राचीनाः अवच्छेदकावच्छेदेनानुमितावंशतः सिद्धसाधनस्य दोषत्वमंगीकुर्वन्तो ध्वनिव्यावर्तनाय शब्दानित्यत्वानुमाने वर्णात्मकत्वं पक्षे निवेशयन्तीति। यदिच पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे सामानाधिकरण्येन साध्यसिद्ध्या न सिद्धसाधनमिति नव्यमतमाद्रियते तथोद्देश्यताया-**

---

नच सत्त्वविशिष्टावच्छिन्नाभावनिवेशे प्रयोजनाभावादिति वाच्यं। पूर्वक्षणवृत्तित्वविशिष्टरजतत्वावच्छिन्नाभावस्य त्रैकालिकत्वाभावेपि तत्तदवयववृत्तित्वविशिष्टरजतत्वावच्छिन्नाभावस्य तादृशायावद्वृत्तित्वेपि रजतत्वघटत्वाभ्यां रजतसामान्याभावं निरुक्तमादाय सिद्धसाधनवारणाय स्वत्वविशिष्टावच्छिन्नाभावस्य निवेश्यत्वात्। नच तदर्थं स्वत्वपर्याप्त्यधिकरणधर्मपर्याप्तप्रतियोगितावच्छेदकताभाव एव निवेश्य इति वाच्यं। तावतापि स्वत्वपर्याप्त्यधिकरणीभूतप्रातीतिकरजतत्वेन व्यावहारिकरजताभावमादायोक्तदोषावारणेन तदर्थं उक्ताभावस्यैवोपादेयत्वादिति चेन्न। स्वावच्छिन्नवत्त्वेन प्रतीयमानयावन्निष्ठाभावीयत्व स्वावच्छिन्नत्वोभयसंबन्धेन स्वविशिष्टप्रतियोगितासमानाधिकनणत्वस्य साध्यत्वेनानुपपत्त्यभावात्। स्वत्वस्याननुगतत्वेपि तदाश्रयैकव्यक्तेरेव संबन्धद्वयप्रतियोगिविधया निवेशात्। संबन्धेन स्वत्वं परिचायकं। यथाहि स्वप्रतियोगिवृत्तित्व स्वसामानाधिकरण्योभयसंबन्धेन भेदविशिष्टान्यत्वं उभयवृत्तित्वमिति श्रीमद्गदाधरभट्टैस्सिद्धान्तलक्षणे व्युत्पत्तिवादे चाभिहितं। प्रथमसाध्ये रजतत्वेन घटाभावप्रतियोगितासिद्ध्याऽर्थान्तरवारणाय स्वव्यधिकरण स्वावच्छिन्नप्रतियोगितावदवृत्तित्वं पक्षीभूतनिरुक्तरूपे विशेषणं देयं। द्वितीयसाध्ये तु घटत्वादिरूपे पक्षे पारमार्थिकत्वेन शुक्तिरूप्याभावप्रतियोगितायाऽर्थान्तरवारणाय साध्यघटकप्रतियोगितायां स्वसामानाधिकरण्यं देयम्॥

मबाध्यान्तं नोपादेयमेव। इतरविशेषणद्वयं तु तुच्छे ब्रह्मणि च बाधवारणायोपादेयं। तत्सामानाधिकरण्येन तथात्वे तु उक्ताबाध्यान्तमात्रं पक्षविशेषणं। यद्यपीदं सिद्धसाधनमुद्भावनीयं न माध्वेन। नापि वैशेषिकादिना शुक्तिरजतादौ माध्वैरलीकत्वस्य तार्किकैः पारमार्थिकत्वस्यैवाभ्युपगमात्। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमात्रस्य साध्यतायां तस्य शुक्तिरजतादौ माध्वैरभ्युपगमेपि ब्रह्मप्रमातिरिक्ताबाध्यत्वस्यापि तत्र तैरभ्युपगमेन सिद्धसाधनानुद्धारात्। सतादात्म्यपर्यवसितस्य सत्त्वेन प्रतीत्यर्हत्वस्यापि तत्रावृत्तत्वाच्च तथापि शुक्तिरजतादेरनिर्वचनीयत्ववादिना तांत्रिकैकदेशिना विवाद एवाबाध्यान्तस्य पक्षविशेषणत्वाभासंगतिः। नचैवमपि ब्रह्मण्यारोपितक्षणिकत्वादौ सिद्धसाधनं दुर्वारं। तस्य क्षणित्वाभावप्रकारकब्रह्मज्ञानबाध्यतया ब्रह्मप्रमातिरिक्ताबाध्यत्वादिति वाच्यं। तस्य ब्रह्मान्यविषयकज्ञानाबाध्यत्वरूपपर्यवसितपक्षविशेषणस्यावश्यकत्वेन दोषानवकाशात्। नच तथापि मूलाविद्यानिवर्तकब्रह्मज्ञानाव्यवहितपूर्ववृत्तिप्रातिभासिकविशेषे सिद्धसाधनमशक्यवारणमिति वाच्यं। अबाध्यान्तेन ध्वंसो ज्ञानं चेत्येतदन्यतरजन्यध्वंसप्रतियोग्यज्ञानप्रयुक्तान्यत्वस्य विवक्षितत्वात्। ब्रह्मान्यविषयकज्ञानामित्यत्र परैश्च भ्रमजनकाज्ञानस्यानिर्वाच्यत्वानभ्युपगमात् उक्तविशेषणस्य तत्साधारण्येपि न क्षतिः। ज्ञाननिवर्त्यत्वरूपमिथ्यात्वस्य साध्यतायां उक्तान्यतरजन्यध्वंसप्रतियोग्यज्ञानभिन्नत्वे सति तत्प्रयुक्तान्यत्वं पक्षविशेषणं तेन शुक्तिरजताद्यारोपकारणीभूताज्ञानादौ न सिद्धसाधनं। उक्तप्रातिभासिकविशेषप्रयोजकाज्ञानं न ब्रह्मज्ञाननाश्यं तदसमानविषयकत्वात्। किंतु जीवेशभेदाद्यनाद्यन्तरवन्मूलाज्ञाननाश्यमेव। नचैवमज्ञानस्य स्वसमानविषयकज्ञाननाश्यतानियमो न स्यात्। उक्तज्ञान एव व्यभिचारादिति वाच्यं। तादृशप्रातिभासिकमन्यत्र विवेचितं। संप्रदायविदस्तु क्षणिकत्वादेरतीन्द्रियघटितपदार्थत्वे-

नातीन्द्रियतया परोक्षेऽन्यथाख्यातेरनभ्युपगमेन च क्षणिकत्वादिन प्रातिभासिकमित्याहुः। देहात्म्यैक्यादिकं च न तांत्रिकानुयायिमतेऽनिर्वाच्यं। तेनाहं मनुष्य इत्यादिज्ञानस्याप्रामाण्यानभ्युपगमादिति न तत्रासिद्धसाधनं शक्यं। यत्तु शुद्धब्रह्म वृत्तिविषयो नेति मते वियदादेरपि ब्रह्मप्रमान्यबाध्यत्वात् पक्षालाभ इति। तन्न युक्तं। तन्मते उपहितब्रह्मविषयकज्ञानस्यैव ब्रह्मप्रमातिरिक्तेत्यनेन विवक्षिततया तदबाध्यत्वस्य वियदादिसाधारणत्वात्। सप्रकारकज्ञानाबाध्यत्वं तु न विवक्षणीयं। तत्त्वेदंत्वोपलक्षितनिर्विकल्पकधीबाध्येनायं स इत्यादिभ्रमासिद्धभेदेपि सत्त्वात्। वस्तुतस्तु जीवत्वब्रह्मत्वाद्युपलक्षितब्रह्मविषयकज्ञानाबाध्यत्वमेवाबाध्यान्तेन विवक्षणीयं। तच्च जीवत्व ब्रह्मत्वाद्युपलक्षितब्रह्मविषयिताशून्यधीः ध्वंसश्चेत्यन्यतरजन्यनाशप्रतियोग्यज्ञानप्रयुक्तान्यत्वं। तेन ब्रह्मत्वज्ञानत्वोपलक्षितलक्षितयोर्भेदस्यापि तदुपलक्षितब्रह्ममात्रविषयकनिर्विकल्पकधीबाध्यत्वात् पूर्वमतेपि तत्र सिद्धसाधनता दुर्वारेति शङ्कानवकाशः। एतादृशं च ज्ञानं जीवब्रह्मादिवादिनः यद्यपि तांत्रिकस्याननुमतं। तथाप्युक्तनिरूपितत्वद्वयशून्यविषयताशालिज्ञानं तस्यापि सम्मतमेव। विस्तरस्तु शास्त्रारम्भणे द्रष्टव्यः। यदि चाज्ञानमपि स्वप्रागभावध्वंसः घटादिध्वंसोऽभाव एवेति मन्यते तदा ध्वंसपदेन ज्ञानान्यध्वंसो विवक्षणीयः। यद्वा ब्रह्मविषयताधीजन्यत्वध्वंसत्वावच्छिन्नजनकतानिरूपितजन्यत्वान्यतरनाशप्रतियोग्यज्ञानप्रयुक्तान्यत्वमबाध्यान्तेन विवक्षणीयमिति दिक्। यत्तु ब्रह्मप्रमेत्यत्र प्रमापदस्य सप्रकारकयथार्थज्ञानपरत्वे वियदादीनां तदन्यब्रह्मनिर्विकल्पकबाध्यत्वात्पक्षालाभः। सप्रकारकज्ञानमात्रस्य प्रमात्वासंभवश्च। नच प्रत्यक्षादीनां व्यावहारिकप्रमाणत्वेन तज्जन्यज्ञानानामपि व्यावहारिकप्रमात्वमस्त्येवेति वाच्यं। तथात्वे इयं शुक्तिरित्यादिज्ञानानामपि ब्रह्मप्रमात्वेन तद्बाध्य शुक्तिरजतादेः पक्षतापत्तावंशतः सिद्धसाधनस्य दुष्परिहारत्वापत्तेः।

निष्प्रकारकज्ञानपरत्वे तत्ववादिना निष्प्रकारकज्ञानानंगीकारात् तं प्रत्याश्रयासिद्धेः। नैयायिकैरपि ब्रह्मविषयकनिष्प्रकारकज्ञानानंगीकारेण तन्मते ष्याश्रयासिद्ध्यापत्तेः। अतो ब्रह्मविषयकप्रमाभिन्नज्ञानमेव ब्रह्मप्रमेत्यनेन विवक्षितमिति केनचिदुक्तं तन्न। नैयायिकं तत्ववादिनं च प्रति विवादे उक्तविशेणस्यानुपादेयत्वात्। अख्यातिवादे आश्रयासिद्ध्यनवकाशाच्च। तत्ववादिशब्देन तांत्रिकानुयायिविवक्षायां नैयायिकेत्यादेरसंगतिरेव। अस्तुवा यथाकथंचित् तथापि प्रमापदस्य भ्रमभिन्नार्थकत्वे ब्रह्मपदवैयर्थ्यं दुर्वारमेव। सिद्धान्ते तु प्रमापदस्यान्याविषयकार्थतया ब्रह्मपदसार्थकता बोध्या। विमतत्वं च यां कांचिद्विमतिमादाय ब्रह्मणि शुक्तिरूप्यादौ चातिप्रसक्तं। उक्तरूपावच्छिन्नविमतिविवक्षणे चोक्तरूपस्यैव पक्षतावच्छेदकत्वसंभवादितरांशोपादानमनतिप्रयोजनं। तथापि शुक्तिरूप्याविषयिणीं यां कांचिद्धियं वियदादिसर्वविषयिणीं तद्व्यक्तित्वेनोपादाय तद्धीविषयत्वयोपलक्षणविधया पक्षतावच्छेदकत्वानुसरणान्न दोषः। तस्यां विशेषणविधया पक्षतावच्छेदकत्वे विशिष्टविशेष्यकबुद्धौ विशेषणे तत्संबन्धेन विशेष्यतावच्छेदकावच्छेद्यत्वं प्रतीयते। व्याप्यवृत्तेश्च नावच्छेदकत्वमंगीक्रियते इति मिथ्यात्वस्य तत्प्रतियोगिस्वरूपसम्बधस्य व्याप्यवृत्तेरुक्तपक्षतावच्छेदकत्वमंगी क्रियते। तद्बुद्ध्या समानकालीनघटांशे विद्यमानस्य वक्ष्यमाणप्रतियोगित्वादिरूपमिथ्यात्वस्य पक्षतावच्छेदकीभूततद्बुद्धिविषयत्वसमानकालीनत्वं विषयतायाः ज्ञानैकसमानकालीनतामते बाधितमित्यनुमितेः भ्रमत्वापत्तेस्तदुपेक्षणमिति केचित्। यत्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरूपानुमित्यनुरोधेनानुमितिकाले सत एव धर्मस्य पक्षतावच्छेदकत्वमुचितं। ब्रह्मप्रमेत्याद्यनुगतधर्माश्रयविमतिः विमतिविषयत्वं वा पृथिवीत्वजलत्वाद्यननुगतधर्माश्रयविमतिविषयत्वं वा पक्षतावच्छेदकं नानुमानकालेस्ति। विमतेः समयबन्धसभ्यानुवि-

येयसंवरणादिना व्यवहितत्वात् । विषयतायाश्च विषयिसमानकालीनत्वनियमादित्यनुशयेन विमतेस्तद्विषयत्वस्य वोपलक्षणविधया पक्षतावच्छेदकत्वानुसरणं । ननु पक्षतावच्छेकाभावे पक्षतावच्छेदकविशिष्टहेतुज्ञानरूपपक्षधर्मताज्ञानं न स्यादिति चेन्न । स्वरूपसत्पक्षतावद्धर्मिवृत्तित्वज्ञानस्यैव पक्षधर्मताज्ञानत्वात् । न चावच्छेदकासत्त्वे पक्षतापि कथं वर्ततामिति वाच्यं । विषयजन्यज्ञानं प्रत्यक्षमिति लक्षणे विषयत्वेनाभिमते घटादौ स्वज्ञानपूर्वं विषयत्वस्याभावेपि विषयत्वेनावच्छेद्याया स्वज्ञानं प्रति जनकतायाः सत्त्वमिवोपपत्तेः । वस्तुतस्तु उत्सर्गतो विशेषणावगाहित्वरूपप्रमाणत्वस्य भावबाधोत्र दुर्वारः । अत एव गन्धप्रागभावावच्छिन्नो घटो गन्धवानित्यत्र बाध उक्तः । उपलक्षणत्वे तु तदसंभवः । अतो विमतिविषयत्वज्ञाने तद्विषयत्वं वा पक्षतावच्छेदकं । न्यायवाक्यजन्यपरामर्शपूर्वक्षणे विमतिज्ञानं तदुत्तरक्षणे च परामर्शः तदुत्तरक्षणेऽनुमितिरिति पक्षतावच्छेदकानुमित्योः समानकालत्वोपपत्तिरिति तदसत् । यतस्तद्धर्मविशिष्टविशेष्यकानुमितौ तद्धर्मसाध्ययोः समानकालत्वभानानुरोधेन तयोस्समानकालत्वापेक्षायामपि तद्धर्मानुमित्योः समानकालत्वापेक्षया न किंचिद्बीजमस्ति । तथासति भाविगन्धविशिष्टे रूपवत्तानुमितेरिदानींतनाया अप्यनुपपत्तेः। एतेन परामर्शकाले पक्षतावच्छेदकाभावे तद्विशिष्टहेतुमत्ताज्ञानरूपपरामर्शानुपपत्तिरूपशङ्का निरस्ता । स्वरूपसत्पक्षतावद्धर्मिवृत्तिताज्ञानस्यानुमितिहेतुत्वे द्रव्यं धूमवदिति परामर्शात् पर्वतो वह्निमानित्यनुमित्यापत्तिः उपलक्षणविधया पक्षतावच्छेदकावच्छिन्नविशेष्यताकपरामर्शस्य हेतुत्वं च परामर्शकाले पक्षतावच्छेदकाभावादनुपपन्नं । किंच नात्र पक्षतावच्छेदकविशिष्टे पक्षेहेतुमत्ताज्ञानासंभवोपि पक्षतावच्छेदकहेत्वोः समानकालत्वस्य निर्बाधत्वात् । अत एव न प्रमाणस्वभावबाधोपि । अपिच अनुमितिर्द्विविधा पक्षतावच्छेदकोपलक्षिते साध्यावगाहिनी तद्विशिष्टे पक्षे साध्यावगाहि-

नी च। तत्राद्याया उद्देश्यत्वे असंकीर्णबाधासंभवेपि द्वितीयाया उद्दे- श्यत्वे तत्संभवेन अत एवेत्युपष्टम्भसंगतिः। नच यद्वीविषयत्वमित्या- दिना त्वदुक्तरीत्या पक्षतावच्छेदकीभवाद्विमत्यसमानकालीनघटादाव- नुमितेः भ्रमत्वापत्तिवारणायैव विमतिविषयत्वज्ञानस्य पक्षतावच्छेद- कानुसरणमावश्यकमिति वाच्यं। एवमपि विमतिज्ञानासमानकालीन- घटाद्यंशेनुमितेः भ्रमत्वापत्त्या विमतिज्ञानविषयत्वस्यापि विषयविशे- षणविधया पक्षतावच्छेदकत्वासंभवात्। तथाचोक्तं विमतिज्ञानस्य न्यायवाक्यप्रयोज्यपरामर्शपूर्वक्षणे कल्पनं तस्य तद्विषयत्वस्य वा प- क्षतावच्छेदकत्वानुसरणं च निरर्थकमेव। किंच त्वदुक्तविमतिज्ञान- स्य तद्विषयत्वस्य वा विशेषणविधया पक्षतावच्छेदकत्वे पूर्वोक्तरी- त्यो नुमितेः भ्रमत्वापत्तिः। मिथ्यात्वस्य व्याप्यवृत्तितामाश्रित्या- र्थान्तरापत्तिश्च। मन्मते त्वनवच्छिन्नविशेषणतायाः साध्यतावच्छे- दकसंबन्धत्वोपगमाददोषः। अव्याप्यवृत्तितानिर्वाहकवैलक्षणावच्छे दकत्वानिरूपकत्वानवच्छिन्नत्वं। तद्विशिष्टविशेषणता च साध्यताव- च्छेदकसंबन्धः। विशेषणीभवद्धर्मगतं चावच्छेदकत्वव्याप्यवृत्त्यादि- निरूपितावच्छेदकतासाधारणमिति विमतिज्ञानस्य तद्विषयताया वा विशेषणविधया पक्षतावच्छेदकत्वेपि नार्थान्तरमिति यदि विभाव्यते तदा विमतेः तद्विषयत्वस्य त्यागो निर्बीज एव। प्रागुक्तं बीजान्तरं तु विमतिज्ञानादित्यागेपि भवत्येव हेतुरिति दिक्। प्रत्येकं वा विप्रति पत्तिः वियन्मिथ्या न वा पृथिवी मिथ्या वा न वेत्यादिः। एवं विय दादेः पक्षत्वेपि नघटादौ संदिग्धानेकान्तिकता पक्षसमत्वाद्धटादेः। तथाहि। पक्षे साध्यसन्देहस्यानुगुणत्वात्पक्षभिन्न एव तस्य दूषण- त्वं वाच्यं। अत एवोक्तं साध्याभावनिश्चयवति हेतुसन्देह एव सं- दिग्धानैकान्त्यमिति। पक्षत्वं साध्यसन्देहवत्त्वं। तच्च घटादिसाधा- रणं। अतस्तत्र सन्दिग्धानैकान्तिकत्वं न दोषः। पक्षसमत्वोक्तिस्तु प्रतिज्ञाऽविषयत्वमात्रेण। नच तर्हि प्रतिज्ञाविषयत्वमेव पक्षत्वमिति

वाच्यं। स्वर्गानुमाने तदसंभवात्। एवंविधविप्रतिपत्तौ सत्यां एवं प्रमाणाभिधानावसरे प्रत्येकं वियदादिधर्मिनिर्देशेन प्राप्तकालत्वं। यत्तु प्रकृतानुमित्युद्देश्यतावच्छेदकधर्मवत्त्वं पक्षत्वमिति। तन्न। साध्याभाववत्तया गृह्यमाणधर्मिप्रतीताज्ञानस्यानुमितिविरोधित्वे तादृशधर्मिणः प्रकृतानुमित्युद्देश्यत्वतदभावयोरकिंचित्करत्वात्। नच पक्षे साध्यसन्देहदशायामनुमित्युपपत्त्या पक्षातिरिक्ते धर्मिणि साध्याभावावगाहित्वमेव व्यभिचारज्ञाननिष्ठप्रकृतानुमितिप्रतिबन्धकताया अवच्छेदकतोपेयत इति पक्षातिरिक्ते साध्याभावसंशयात्मकस्य व्यभिचारज्ञानस्यानुमितिविरोधित्वं निष्प्रत्यूहमिति उक्तस्थले संदिग्धानैकान्तिकता दुर्वारैवेति वाच्यं। यतो व्यभिचारज्ञानस्य न साक्षादनुमितिविरोधित्वं मानाभावात्। उक्तं हि करणे पूर्णे किं न सिद्ध्येदिति। किंतु तज्जनकव्याप्तिग्रहविरोधितयैव। तत्र साध्याभावविषयतानिरूपितधर्मिविषयतायाः पक्षविषयताव्यावृत्तायाः विरोधितावच्छेदककोटिनिवेशेसर्वेषामपि धर्मिणां कदाचिदनुमित्युद्देश्यतासंभवेन विरोधितावच्छेदकस्यैव दुर्वचत्वापत्तेः। विशिष्य यत्किंचिद्धर्मिविषयताव्यावृत्ताया एव धर्मिविषयतायाः विरोधितावच्छेदककोटिनिवेशस्तु विनिगमनाविरहादयुक्तः। तद्धर्मिपक्षकानुमितौ तद्धर्मिकसाध्यसंशयस्य दूषकत्वापादकश्च। तस्मात्साध्यप्रकारतानिरूपितसाध्याभावप्रकारतानिरूपितधर्मिविषयताया एव विरोधितावच्छेदककोटौ निवेशनीयत्वात् नासन्दिग्धानैकान्तिकत्वं। वस्तुतस्तु अनुकूलतर्कास्फूर्तौ पक्षीयव्यभिचारसंशयोपि व्याप्तिग्रहप्रतिबन्धको भवत्येव। यदाहुः "अनुकूलतर्कास्फूर्तौ सन्दिग्धानैकान्तिकत्वस्येष्टत्वात्। अत एव पक्षस्साध्यारिक्तपक्षधर्मतातिरिक्तधर्मवान् मेयत्वादित्यनुकूलतर्कविरहिणोर्बाधप्रतिरोधयोरनवतारेपि पक्ष एव सन्दिग्धानैकान्तिकताया अप्रयोजकतांगीक्रियत" इत्यादि। तथाच अनुकूलतर्काणां वक्ष्यमाणत्वात नासंदिग्धानैकान्तिकत्वमिति विभाव-

नीयं। प्रमाणं चात्र विमतं मिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वात् शुक्तिरूप्यवदित्याद्यनुमानमेव। नावयवेष्वाग्रहः। ननु किमिदं मिथ्यात्वं न तावदत्यन्तासत्त्वमपसिद्धान्तात्। नाप्यनिर्वाच्यत्वं तस्यानिरुक्तेः। सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावोभयवत्वं तथोक्तैतरावि-शिष्टापरं वातत्। सत्त्वासत्त्वयोरेकतरनिषेधेऽपरसत्त्वावश्यकतया व्याघातात्। निर्धर्मकब्रह्मवत्सत्त्वराहित्येपि सद्रूपत्वेनामिथ्यात्वोपपत्त्यार्थान्तरात्। शुक्तिरूप्ये बाध्यत्वरूपासत्त्वव्यतिरेकासिद्ध्या साध्यवैकल्याच्च। नच प्रकृतसाध्यघटकसत्त्वात्यन्ताभावस्य सत्त्वप्रकारकधीविशेष्यताव्यापकाभावप्रतियोगित्वरूपतया असत्त्वात्यन्ताभावस्य च सत्त्वेन प्रतीयमानत्वपर्यवसितत्वेन उभयोश्च शुक्तिरूप्यादावेव सत्त्वेन न व्याघातः नवा साध्यवैकल्यमिति वाच्यं। अत्यन्तासतः प्रतीत्यंगीकारे शब्दादितः सत्त्वेनापि प्रतीतिसंभवेन शून्यवादापत्तिवारणायोपात्तस्य निरुक्तांशस्य निरर्थकत्वापत्तेः। तुच्छं सदिति प्रतीतेस्संभवेपि विषयत्वादिना तुच्छावगाहिन्या विषयस्सन् शशशृंगं सदित्यादिप्रतीतेः दुरपह्नवतया सत्त्वेन प्रतीतेर्निरपवाद इत्यादीति चेन्नैवं। असद्विलक्षणत्वं हि सत्तादात्म्यं। नचैवं शुक्तिरूप्यादौ साध्यवैकल्यं। शुक्तिरूप्यादेरनिर्वाच्यत्वादिना तांत्रिकैकदेशिना त्रिवाद एव उक्तोभयसाध्यवत्त्वोपगमात्। माध्वं प्रति प्रयोगे च स्वप्रकारकधीविशेष्यताव्यापकात्यन्ताभावप्रतियोगित्वमात्रस्य साध्यत्वान्नोक्तदोषावकाशः। अत्यन्तासत्त्वमादायार्थान्तरं तु सत्तादात्म्यरूपासद्विलक्षणत्वस्य पक्षतावच्छेदककोटौ निवेशो न संभवति। घटाद्यवच्छिन्नचित्येव गुरुत्वाद्यारोपस्वीकारेण ब्रह्मणो जगदुपादानत्वेन परोक्षभ्रमविषयेनांशतो बाधः। नाव्यापकबहिर्भावः। सत्तादात्म्यस्य स्वस्मिन्नपि संबन्धाभ्युपगमान्नोक्तदोषः। सत्तादात्म्यसत्त्वान्यतरत्वं वा तत्। नच इदं रजतं सदित्यध्यासबलेन शुक्तिरजतादेरिव शशशृंगं सदित्यादिप्रतीतिबलात् शशशृङ्गेपि सत्तादात्म्यमंगी-

कार्यं। एकत्रान्यथाख्यातिः अपरत्रानिर्वचनीयख्यातिरित्यत्र विनिगमकाभावादिति वाच्यं। शशशृङ्गं सदिति प्रतीतेरलीकविषयत्वासिद्धेः। तथाहि किमलीकं शशशब्दार्थः शृङ्गपदार्थः समासार्थो वा। नाद्य* द्वितीये पदान्तरवैयर्थ्यापातात् वाच्यतावच्छेदकानिरूपणाच्च। शशीयत्वसमानाधिकरणशृङ्गत्वादिकमलीकत्वान्न तथा। प्रवृत्तिविषयवृत्तेरेव तथात्वात्। नाप्यखण्डधर्मान्तरं। शब्दादन्यतः तत्प्रतीत्यभावेन शब्दादेव तत्प्रतीतेर्वक्तव्यतया समयग्रहार्थं शब्दान्तरापेक्षापरंपरायाः अनवस्थाप्रसंगात्। विशेषदर्शिनामेतादृशवाक्यजन्यप्रतीत्युत्तरं शृङ्गं शशीयं नेति बाधापत्तेश्च। न ह्यसति विशेषदर्शने गोशृङ्गं सदिति प्रत्ययवत्तादृशप्रत्ययस्य स्वविरोधिज्ञानप्रतिबन्धरूपकार्यनिर्वाहकतायामस्ति मनागपि कश्चिद्विशेषः। अन्यथा अनुभवविरुद्धकल्पनापत्तेः। अथोच्यते शशीयत्वशृङ्गत्वाभ्यामलीकं प्रतीयत इति। तन्न। असत्ख्यातिविलोपापत्तेः। अत एवन तृतीयः। शृङ्गं शशीयमित्यादौ गत्यभावाच्च। उद्देश्यतावच्छेदकावच्छेदेन विधेयावगाहिनि विषयस्सन्नित्यादिप्रत्ययेपि न विषयत्वेन सद्भानं। किंतु विषयवत्वव्यापकतायाः सति तत्तादात्म्यभानमुपेयते। सा च व्यापकता मतभेदेन प्रातिभासिकी व्यावहारिकी वेत्यन्यदेतत्। भ्रमत्वमपि तादृशज्ञानस्य सर्वसंमतमेव। नन्वेवमत्यन्तासतः सत्त्वेन प्रतीतिरप्राप्तैवेति यथाश्रुतमेव रमणीयमिति चेत्सत्यं। एतत्कल्पे विषयस्सन्नित्याकारकप्रतीत्या सत्यपि सत्त्वेन प्रतीतिं कश्चिद्ब्रूयात् तं प्रत्येवोक्तरीत्यनुसरणं। तत्रापि तद्धीविषयत्वेन भासमाने तुच्छान्यस्मिन्नेव सत्त्वं भासत इत्युच्यते तदा यथाश्रुतमेव रमणीयं। केचित्तु सत्त्वेन प्रतीत्यर्हत्वसदसदुभयादिवाचकपरादिपदाभिन्नपदवाच्यतावच्छेदकरूपावच्छिन्नत्वेन प्रतीयमानत्वं। नचैवं सति कालसंबन्धि सदिति प्रतीतिमादायोक्तदोषतादवस्थ्यं। नह्यस्ति नियमः सत्तादात्म्यशून्यत्वमेवासत्पदवाच्यतावच्छेदकं न कालसंब-

न्धित्वादिकमिति वाच्यं। सर्वत्र प्रतीयमानत्वमित्यत्र सत्त्वशब्देना-सद्व्यावर्तकत्वेनाभिमतसत्तादात्म्यव्यक्तीनामकालसंबन्धिनामेवोपा-देयतयोक्तदोषानवकाशात्। शशशृङ्गं सदित्यादिप्रतीतिमादायोक्त-दोषस्तु प्राग्वन्निरसनीय इत्याहुः। यद्वा सत्तादात्म्यप्रकारकापरोक्ष-विषयत्वं तद्गुरुत्वाद्यप्युक्तरूपेण ईश्वराद्यपरोक्षविषय एव। न चेश्वरा-द्यपरोक्षभ्रमबाध्यत्वेन दृश्यमवगाहते। येन विपर्ययस्स्यात्। यत्तु सद्रूपप्रतियोगिकत्वविशिष्टतादात्म्यस्य सद्रूपे अभावेन तस्यासत्त्वाप-त्तिः। इष्टापत्तौ तत्सत्त्वबोधकानां सत्यमित्यादिश्रुतीनामप्रामाण्याप-त्तिरिति तदसत्। सत्प्रतियोगिकतादात्म्यशून्यत्वस्यैवासत्त्वरूपत्वे-न सत्प्रतियोगिकत्वविशिष्टतादात्म्यभानाभ्युपगमे प्यसत्त्वापादना-योगात्। प्रकृते तादृशशरीरे उक्तासत्त्वाभावस्य निवेशेपि श्रौतस-त्यादिशब्दानामबाध्यार्थकतयानुपरोधाच्च नच विशिष्टस्य त्वन्मतेऽति-रिक्ततया घटादितादात्म्यापन्नस्य सतः घटादितादात्म्यापन्नात् त-स्मादतिरिक्ततया एकेन सता सर्वानुभूतेन सर्वप्रतीत्युपपादनं तवा-पि दुर्घटं। शुद्धस्य च चाक्षुषविषयत्वे मिथ्यात्वापत्तेः न तेनाप्युक्त-प्रतीत्युपपादनासंभव इति वाच्यं। अविद्योपहितसद्रूपस्यैव सर्वदृ-श्यानुगतस्य घटस्सन्नित्यादिसर्वप्रतीतिविषयत्वोपगमेन अनुगतव्य-वहारानुपपत्तेरभावादनेकसद्व्यक्तिकल्पने गौरवाच्च वियदादिभेदभि-न्नब्रह्मस्वरूपानन्त्यस्य तव मम च बाधेपि तदन्यवियदादिसमसं-ख्याकसद्व्यक्तिकल्पनागौरवं तव मते दुर्वारं। एवं सति विशेषाभेदेपि व्यक्तितद्विशेषद्वयस्यावश्यकत्वात्। प्रपंचितं चैतदन्यत्र। सदसद्विशे-ष्यकप्रतीतावुपहितविषयत्वेपि तद्विशेषणप्रतीतौ शुद्धस्यैव विशेषणत्व-संभवाच्च। दृश्यत्वं च प्रकारतानिरूपितविषयत्वं। यद्वा प्राचीनतार्कि-कमतवत्प्रकारतायाः न विषयतात्वं। अतो ब्रह्मणः न दृश्यत्वापत्तिः। यत्त्वेवं सति पारमार्थिकरजतं विनापि शुक्तौ रजतप्रतीतिव्यवहारा-दिदर्शनात्परमार्थसत्पदार्थं विनापि सत्प्रतीत्यादेरुपपत्तावति लाघव-

मिति ब्रह्मापि सद्रूपं न स्यादिति । तन्न । दृश्यमात्रबाधकज्ञानविषयस्य ब्रह्मणो बाधकान्तराभावेन अबाध्यत्वप्रसक्तेरप्रत्यूहत्वात् । नच शून्यज्ञानमेव तद्बाधकं । तस्य परतस्सिद्धौ सांवृतत्वापत्तेः । स्वतस्सिद्धौ शून्यतायाः परिभाषामात्रत्वात् । व्यक्तीभविष्यति चेदमुपरिष्टात् । सन्ति ब्रह्मणो बाध्यत्वाभावबोधिकाः " सत्यं ज्ञानमनन्तं ब्रह्म अविनाशीवा अरे अयमात्मानुच्छित्तिधर्मा असन्नेव सभवति असद्ब्रह्मेति वेदचेत् अस्तीत्येवोपलब्धव्य इत्यादिश्रुतयः । सन्घट इत्यादिप्रत्यक्षं चनातीन्द्रियवस्तुघटितबाध्यत्वाभावविषयकमित्यादिवक्ष्यते । किंच अबाध्यवस्तु नांगीकार्यमित्यापादयता सन्घट इत्यादिप्रतीतिरंगीक्रियते नवा । नचेदनुभवविरोधः । अङ्गीकारे तु साऽनुगतैकनिर्वाच्यविषयिणीत्युच्यते नवा । नोचेदनुगतप्रतीत्यनुपपत्तिः कल्पतागौरवमागतानिर्वाच्यतद्विषयकत्वेन तद्बाधकधीविषयस्स्यात् । सच्चेत्युभयमंगीकार्यं न वेति गौरवमेवेति यत्किञ्चिदेतत् । यत्त्वेवं सति सत्त्वाभावानुमानस्य लाघवेन प्रातिभासिकसत्ताभावे पर्यवसानापत्त्या जगच्छून्यमेव स्यादिति । तदपि न । शून्यस्य निस्स्वरूपतारूपत्वेनार्थक्रियानुपपत्तेः । अनिर्वाच्यतारूपत्वेत्विष्टापत्तेः । तृतीयप्रकारस्तु शून्यतया दुर्निरूपः । यत्तु निर्धर्मकत्वाद्ब्रह्मणः सत्त्वासत्त्वानुमापकधर्मद्वयशून्यत्वेन मिथ्यात्वापत्तिरिति । तदसत् । सद्रूपत्वेन ब्रह्मणः सत्त्वात्यन्ताभावानधिकरणत्वात् । सद्रूपं च सत्त्वोपहितप्रतियोगिकतादात्म्यानुयोगिकत्वं । तादात्म्यं चात्र विशिष्टकेवलभावेन बोध्यं । एवंच ब्रह्मणि सत्त्वस्यांगीकारे न तत्र तस्यात्यन्ताभावः स्वाश्रयवत् । स्वाश्रय इव केवलरूपेपि तदभावानभ्युपगमात् । अन्यथा गगनैकदेशवृत्तिविहंगमसंयोगादेर्गगनवृत्तितया गगने तदत्यन्ताभावस्वीकारापत्तेः । तथाच ब्रह्मणि सत्त्वासत्त्वरूपधर्मद्वयशून्यत्वसाधकत्वेन तदुक्तस्य निर्धर्मकत्वस्य ब्रह्मणि सत्त्वे तद्बाध्यत्वाभावरूपसत्त्वस्यापि ब्रह्मण्यभ्युपगमसंभवेन नातिव्याप्त्यवकाशः । तदन-

भ्युपगमे च तद्वदेवोक्ताभावद्वयस्यानभ्युगमसंभवेन नोक्तदोषः। यद्वा सद्रूपत्वेनेत्यस्य बाध्यत्वाभावत्वेनेत्यर्थः। तथाच ब्रह्मणि भावरूपधर्मानाश्रयत्वेप्यभावरूपधर्माश्रयत्वेन नातिव्याप्तिः। नोक्ताभावस्य ब्रह्मस्वरूपत्वेन तस्मिन् तदभावोऽस्त्येवेत्यतिव्याप्तिः। तद्भिन्नत्वेनैवाद्वैतहानिः भावाद्वैतपक्षेप्यभावाश्रयत्वादिना भावेन ब्रह्मणः सविशेषत्वापत्तिः अभाववत्पदवाच्यतापि स्यादिति वाच्यं। यतस्तादृशाभावस्य ब्रह्मात्मकत्वे तादृशाभावत्वोपहितसत्तादात्म्यस्य ब्रह्मणि सत्त्वेन तत्र तदत्यन्ताभावासंप्रतिपत्तेः तस्य तद्भिन्नत्वेपि नाद्वैतहानिः। भावाद्वैतपक्षाश्रयणात्। तादृशाभावाश्रयत्वादिकं च तादृशाभावब्रह्मोभयबहिर्भूतं। त्वन्मते भावेन सविशेषता ब्रह्मण इष्टैव। स्वसमानसत्ताकस्वाभिन्नाभावात्मकविशेषवत्ताया एव सविशेषतारूपत्वात्। एवं विषयादिपदवाच्यतापीष्टैवेति संबन्धः। नच ब्रह्मणोऽवाच्यत्वे सिद्धान्तविरोधः। अभावस्य स्वज्ञानाबाध्यधर्मप्रवृत्तिनिमित्तकशब्दवाच्यत्वस्यैव मतान्तरव्यावृत्तस्य तदर्थत्वात्। गुरुचरणास्तु सत्त्वाभाव इत्यत्र सत्त्वं सत्त्वोपहिततादात्म्यं सत्ता च सिद्धान्तेऽबाध्यत्वोपलक्षितब्रह्मस्वरूपभूतं। परमते तु तद्घटादिरूपाविषयसत्तात्मकं। तत्र सिद्धान्ते आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा इति पञ्चपादिकानुसारेणोक्तसत्ताया अधिकरणत्वमपि ब्रह्मणि कल्पितं स्वीक्रियते। साचाधिकरणता आरोपोपहिते ब्रह्मण्येव नतु शुद्धे। सत्त्वोपहिततादात्म्यं च शुद्धेपि स्वीक्रियते। एवंच स्वाभाविकोयं सत्त्वसंबन्धिनः तदुपहितप्रतियोगिकस्यानौपाधिकस्य तादात्म्य स्वरूपेण भावेन तादात्म्य प्रतियोगिन्यधिकरणोत्यन्ताभावः सत्यशब्देन विवक्षितः। सत्तायाश्च तत्पदशक्यतावच्छेदकत्वेन मतद्वयसाधारणरूपेण साध्यकोटौ निवेशः। नातो विशिष्य ब्रह्मसत्ताया उपादाने सिद्धसाधनं। तत्स्वरूपत्वोपादाने अंशतो बाधः। उक्तसत्तात्वेन निवेशेपि तद्धीत्यादिदूषणानवकाश इत्याहुः।

अबाध्यं सर्वं प्रमेयमित्याकारकयत्किंचिद्धीविषयत्वरूपं सत्त्वं तदभावश्चात्र साध्यकोटौ निविष्ट इत्यपि वदन्ति । न चात्र कल्पे सर्वं प्रमेयमित्यादिप्रतीतावबाध्यत्वेन तदुपाहितब्रह्मणो विषयत्वेपि शुद्धस्याविषयत्वात् शुद्धेऽतिव्याप्तिः । तद्धर्मप्रकारकप्रतीतौ तद्धर्मोपहितस्यैव विषयत्वमित्यन्यत्र व्यवस्थापितत्वात् । उपहितव्याप्तिश्च शुद्धब्रह्मणस्स्वप्रकारकवृत्तिवेद्यत्वाभ्युपमेप्यनेकत्वघटितसर्वत्वस्य तत्र बाधितत्वेनोक्तवाक्यस्य प्रामाण्यानिर्वाहश्चेति वाच्यं । पदार्थतावच्छेदकविशिष्टपरत्वशून्यतद्वाक्यतात्पर्य विलक्षणग्रहजन्यबोधविषयताया एव तदर्थत्वात्। नच विशिष्टार्थपरत्वशून्यतादृशवाक्यादुपलक्षणादिशाब्दबोधासंभव इति वाच्यं। विशिष्टपरत्वशून्यतानिश्चयसहकृतविशिष्टशक्तिग्रहादेवोपलक्षितार्थविषयकशाब्दबोधाभ्युपगमात् । उपपादितं चै तदन्यत्र । सर्वपदं वा अशेषार्थपरत्वतात्पर्यग्राहकं अतो न काचिदनुपपत्तिः । नन्वेवमपि प्रथमकल्पस्य प्रतिपन्नेत्यादिना पौनरुक्त्यापत्तिरिति चेन्न। प्रतिपन्नेत्यादेरुक्तसाध्यातिरिक्तसाध्यपरतायाः वक्ष्यमाणत्वात् । यत्तु सत्त्वेन प्रतीयमानत्वं नासत्त्वं तथासत्यसच्चेन्न प्रतीयतेति त्वदुक्ताप्याद्यापादकयोराविशेषप्रसङ्गादिति । तन्न । सत्तादात्म्यशून्यत्वस्यापादकत्वेन अपरोक्षप्रतीत्याविषयत्वस्य चापाद्यत्वेन विवक्षिततयोक्तदोषानवकाशात् । अधिकमनिर्वचनीयख्यातौ वक्ष्यते। एवं सद्भेदासद्भेदोभयवत्त्वं सद्भेदादिविशिष्टासद्भेदादिमत्त्वं वा। नच सदन्तरभेदस्यासद्भेदस्य च सिद्धत्वात्सिद्धसाधनता शंक्या। सत्त्वावच्छिन्नप्रतियोगिताकभेदस्य विवक्षितत्वात्। न च घटादिनिष्ठभेदप्रतियोगितावच्छेदकता सत्त्वपर्याप्ता। तथासति भवन्मते घटो न सन्नित्यादिबुद्धेः प्रमात्वापत्तेः। यावन्ति सत्त्वानि तदभावकूटवद्धर्मवत्त्वं वा सद्विलक्षणत्वं व्याहृत्युद्धारः प्राग्वादिति सर्वमनवद्यमिति प्रथमनिरुक्तिः। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं वा मिथ्यात्वं । त्रैकालिकनिषेधस्य तात्त्विकत्वेऽद्वैतहानिः ।

प्रातिभासिकत्वे सिद्धसाधनं। व्यावहारिकत्वे तस्य बाध्यत्वेन तात्विकसत्त्वाविरोधितया अर्थान्तरमद्वैतश्रुतेरतत्वावेदकत्वं च। तत्प्रतियोगिनो प्रातिभासिकप्रपञ्चस्य पारमार्थिकत्वं च स्यात्। अथ प्रपञ्चाधिकरणीभूतब्रह्मानेकत्वानिषेधस्य तात्विकत्वेपि नाद्वैतहानिकरत्वं। यद्वा तात्विक एव निषेधः। अतात्विकत्वेपि न प्रातिभासिकः किंतु व्यावहारिकः नच तर्हि निषेधस्य बाध्यत्वेन तात्विकसत्ताऽविरोधित्वादर्थान्तरमिति वाच्यं। स्वाप्नार्थस्य स्वाप्ननिषेधेन बाधदर्शनान्निषेधस्य बाध्यत्वं पारमार्थिकसत्त्वाविरोधित्वे न तंत्रं किन्तु निषेधापेक्षया न्यूनसत्ताकत्वं प्रकृते च तुल्यसत्ताकत्वात्कथं न विरोधः। नच मनोवच्छिन्नजीवरूपं ब्रह्मरूपं वा चैतन्यमविद्यावच्छिन्नब्रह्म वा स्वाप्नाद्यधिष्ठानमिति तद्धीरेव स्वाप्नबाधः नतु स्वाभावाभावोऽबाधः अधिष्ठानविषयकत्वादज्ञानविषयतावच्छेदकस्यैव ज्ञाननाश्यत्वनियमात्। स्वाप्नस्य प्रातिभासिकत्वेनाज्ञानविषयतानवच्छेदकत्वादिति वाच्यं। अत्रत्याबाधशब्देन मिथ्यात्वस्यैव विवक्षितत्वाच्च। अत एव स्वाप्नार्थस्वाप्ननिषेधयोरन्योन्यबाधकबाध्यत्वलक्षणमपि तुल्यसत्ताकत्वं निष्प्रत्यूहं। नच तर्हि निषेधस्य निषेधे प्रतियोगिनोऽधिकसत्तापत्तिरिति वाच्यं। परमार्थशुक्त्यादिनिष्ठयोः रजताभावतत्प्रतियोगिकनिषेधान्यूनसत्ताकयोः रजताभावनिषेधनिषेधप्रतियोगिकयोर्निषेधः रजताभावान्यूनासत्ताकरजताभावनिषेधप्रतियोगिकः रजताभाववृत्तिः। बाधकाबाध्यत्वलक्षणमपितु तुल्यसत्ताकत्वं निष्प्रत्यूहं। नच निषेधस्य निषेधे रजतप्रतियोगिनो निषेधाधिकसत्तापत्तिरिति वाच्यं। यदीययन्निषेधान्यूनसत्ताकत्वे सति यन्निषेधप्रतियोगिकयोर्निषेधः सः तन्न्यूनसत्ताकतन्निषेधप्रतियोगिकइत्यत्र तद्वृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वस्योपाधित्वात्। तार्किकपरमार्थरजतादिनिष्ठरजतत्वप्रतियोगिके रजतत्वाभावान्यूनसत्ताकतादृशाभावस्य निषेधे रजतत्वान्यूनसत्ताकरजतत्वाभावप्रतियोगि-

कोक्तोपाधेः साध्यव्यापकत्वात्पक्षे साधनाव्यापकत्वाच्च । यथाश्रुते नियमे प्राचीनमते घटात्यन्ताभावन्यूनसत्ताकपटतदत्यन्ताभावान्यतरत्वावच्छिन्नाभावे घटन्यूनसत्ताकतदत्यन्ताभावाप्रतियोगित्वाभावेन व्यभिचारश्च । तत्रहि निषेधस्य निषेध इत्यादिमूलस्यायमेवार्थः । निषेधस्य यत्प्रतियोगिकयन्निषेधस्य निषेधे यन्निषेधन्यूनसत्ताकनिषेधे प्रतियोगिनस्सत्त्वं निषेध्यापेक्षयाऽधिकसत्ताकत्वं प्रतियोगिसत्ताकत्वं व्यवस्थाप्यते । प्रतियोग्यात्मकः तद्व्याप्यो वा निषेधनिषेधो विषयीक्रियते अभिप्रायं स्फुटीकरोति यत्रत्वित्यादिना । अत्र पक्षे घटादिमिथ्यात्वानुरोधेन तदधिकरणे घटत्वादिना तदत्यन्ताभावाभ्युपगमो नावश्यकः । सर्वदृश्यसाधारणयत्किंचिद्रूपावच्छिन्नत्वस्य लौकिकपरमार्थसर्वदृश्याधिकरणे ब्रह्मणि स्वाकारमात्रेण दृश्यमिथ्यात्वोपपत्तिः तथाच यथामतं निषेधनिषेधान्यतरस्य प्रतियोग्यात्मकत्वमधिकरणात्मकत्वमतिरिक्तत्वं वेत्ति नाग्रहः। अतात्विकं प्रपंचनिषेधादिकं बोधयन्त्याः श्रुतेरप्रामाण्यं न शंक्यमिति चेन्न । भ्रमकालप्रतीतस्य सापेक्षदृश्यात्यन्ताभावभ्रमकालप्रतीतिनिरपेक्षब्रह्मात्मकत्वासंभवात् । न चाभावस्य सापेक्षकत्वं मायिकं । ब्रह्मणो निरपेक्षत्वं तात्विकमिति न विरोध इति वाच्यं । मिथ्यात्वसिद्धेः प्राक् मायिकामायिकविभागासंभवात्। सार्थबाधस्य निषेधस्य हि ततोऽधिकसत्ताकत्वं स्यादेव। नहि वल्मीके प्रतीतस्य पुरुषत्वस्य तत्रैव प्रतीतस्थाणुत्वेन बाधः । किन्तु वल्मीकत्वप्रकारकज्ञानेन । तथाच स्वाप्नार्थस्य स्वाप्ननिषेधेन विप्रतिपत्तिरेव नतु बाधः । वस्तुतस्तु स्वाप्ननिषेधस्य जगत्यबाध्यत्वनिश्चयेन न तस्य बाध्यत्वं । नच स्वप्नद्रष्टृत्वमात्रेण निषेधस्य बाध्यत्वमुक्तं । स्वप्नदृष्टस्यात्मादेरपि बाध्यत्वापत्तेः । न चादृष्टं द्रष्ट्रीति श्रुत्या स्वप्ने दृष्टत्वमेवात्मनो नास्तीति न बाध्यत्वापत्तिरिति वाच्यं । अदृष्टमित्यस्य वृत्तिभिन्नानुभवविषयत्वस्यैव व्याख्यातत्वात् । अन्तःवृत्तेरव्यविषयत्वे यथाहि न भानमिति तथाच

तावतैव घटस्सन्नित्यादिप्रत्ययोपपत्तिरिति भावः। यतस्सत्तादात्म्यानामानन्त्यं प्रामाणिकमिति योजना। तत्रावश्यकत्वेनेत्यन्तं तत्र चासंभवादित्यन्तं हेतुः एकस्यैव तादात्म्यस्य कपालादिघटादिनिष्ठविशेषणताविशेष्यतारूपविषयतारूपत्वे अवच्छेद्यावच्छेदकभावो न स्यादिति भावः। अत्र दारुशबिकसंवादमाह। नहीति। तत्तद्विषयतेति कपालतन्त्वादिविषयतावच्छिन्नघटपटादिविषयतानामित्यर्थः। सत्तादात्म्यानां नित्यत्वेऽवच्छेदकानियमानुपपत्तिर्वक्ष्यमाणरीत्या गौरवं चेति। अतस्तेषां जन्यत्वमाह। तेषां चेति दार्ष्टान्तिकमुपसंहरति। तस्मादिति। भ्रमविषयो नस्यादिति। अस्येति तर्केणेत्यत्रान्वयः आपाद्यापादकयोर्व्यतिरेकव्याप्तिनिश्चयं दर्शयति। विषयविशिष्टभ्रमस्येति। विषयतासंबन्धेन इदमादिविशिष्टे भ्रमो मिथ्यात्वप्रतियोगि। इदमादौ भ्रमविषयत्वं मिथ्यात्वं चावगाहमानः तदुभयसहचारप्रत्ययविधया व्यभिचारग्रहसाहित्येन तदुभयव्याप्तिनिश्चयं जनयतीति भावः। यद्वा इदमादेर्मिथ्यात्वग्राहकान्तरमाह। विषयविशिष्टस्येति। एतेनैतस्य तर्काकारे प्रवेशासंभवेपि नासंगतिरिति बोध्यं। इदमादितादात्म्यमिति। रजतावच्छेदेन रजततादात्म्यापन्नक्षितिरिति शेषः। सत्तादात्म्यमिति घटावच्छेदेन घटतादात्म्यपन्नक्षितिरिति शेषः। एवंच रजते इदं तादात्म्यं घटेपि सत्तात्म्यं पर्यवस्यतीति भावः। मिथ्येति ज्ञायत इति शेषः। तेनाकारद्वयादित्वस्य नान्वयः। नवा घटादौ सत्तादात्म्ये किं मानमिति प्रश्नोत्तरे तन्मिथ्यात्वमात्रोपसंहारस्यार्थान्तरता। मिथ्यात्वकथनं तु तत्सत्यत्वशङ्कानिरासाय। भ्रमकाले तदुत्पत्तौ बाध्यत्वरूपयुक्तिसूचनाय मिथ्यात्वस्य बाध्यत्वरूपत्वादिति ध्येयं। परस्पराध्यासे युक्तिसिद्धस्याचार्याननमिमिति शङ्कां परिहरति। तदिदमिति। घटस्याधिष्ठानत्वासंभवाद्व्याचष्टे। अन्योन्यस्मिन्निति। एवं रजते इदमित्युभयत्राप्यवच्छिन्नत्वमेव सप्तम्यर्थः। इदं रजतं वस्तुकल्पनस्य सर्वसिद्ध-

त्वाद्रजते इदमर्थकल्पनेपि रजतभ्रमस्य च परिस्फुरणादित्यर्थेन युक्तिरुक्ता। तत्रास्येति। व्याचष्टे। अस्येति। नयतीत्यत्र इदमर्थामिति पक्षवाचकं कल्पितामिति प्रतियोगिवाचकं च पूरयित्वा व्याचष्टे। नयतीत्यादीति। शुक्तेरपीदंत्वेन भ्रमे भानाच्छुक्तिरिवेति दृष्टान्तासंगतिरतो व्याचष्टे शुक्तिरिवेति। द्वितीयेन दार्ष्टान्तिकमुक्तं। तद्व्याचष्टे। इतरेतराध्यासनाभीति। चितिः सद्रूपाचितिः चेत्थं घटादि दृश्यं। ततस्तस्माद्रजतभ्रमादिष्वित्यर्थं व्याचष्टे। गुरुतरेत्यनुपस्थितविषयकत्वेनान्यत्र क्लृप्तजातीयत्वाभावेनोक्तकल्पनायाः गुरुत्वे युक्तिमुक्त्वा गुरुतरत्वे तामाह। आवश्यकानित्यादिना। नाध्यस्तत्वे तत्स्वीकारेण वस्तुतस्तेषां सत्यत्वं। नचाद्वैतश्रुतिविरोधः। तस्यास्सत्तादात्म्यातिरिक्तद्वैताभावप्रतिपादनपरत्वे नोपपत्तिसंभवादिति शङ्कां निरस्यति। अद्वैतश्रुतिसङ्कोचापत्तेश्चेति। सङ्कोचो द्वैतसामान्यार्थकपदस्य द्वैतविशेषे लक्षणाकल्पनं। तथाचैतत्कल्पनसापेक्षतया एकस्यैवाध्यास इति कल्पना गुरुतरेति भावः। न जन्यत्वं नोत्पत्तिः। किंत्वविद्यादिवदनादित्वमेवेति भावः। तादृशानित्येति घटादिनिष्ठविषयतारूपसत्तादात्म्यरूपनिष्ठेत्यर्थः। उक्तरूपेण कपालाद्यवच्छिन्नत्वेन संयोगादीनां कपालादिकार्यता। तथाचैतत्कल्पनासापेक्षत्वेकस्यैवोत्पत्तिरिति कल्पना गुरुतरेति भावः। इत्यर्थ इति। तथाच रजतभ्रमादिष्वित्यादेश्चिच्चैत्ययोः परस्पराध्यासादौ स्वीकृते सति। रजतभ्रमे परस्पराध्यासादेः दृष्टत्वाद्गुरुतरकल्पना न घटते नापतत्तीत्यर्थ इति भावः। अनुभूत्यादितृतीयश्लोकमुपसंहारतया व्याचष्टे। अनुभूतिरिति तृतीयेत्याद्यपदस्येत्यनुषङ्गः। एवं चतुर्थेत्यत्रापि। तत्र ततस्तस्मादनुभूत्यादितृतीयाच्चिति चैत्ययुगळस्येतरेतराध्यस्तत्वमेव युक्तमितियोजना। विमतं मिथ्येति प्रतिज्ञाया असङ्गतिमाशङ्कते। नन्विति। मिथ्यात्वविशेषस्य प्रतिपन्नोपाधिनिष्ठत्रैकालिकनिषेधप्रतियोगित्वावच्छिन्नत्वस्य साध्यतया कोटितया न्यायेप्रयोगे तद्धटक-

प्रतिज्ञया तस्यैव् तादृशप्रतियोगित्वावच्छिन्नस्यैव तादात्म्येन पक्ष-विशेषणतापन्नधर्मिविशेषणतारूपसाध्यतया प्रतिसाधनमुचितमिति तस्यैव जिज्ञासितत्वादिति भावः। ननु मिथ्यात्वसामान्यस्येति। पञ्चविधमिथ्यात्वानुगतरूपावच्छिन्नस्य तदुचितमित्यर्थः। तस्यि विप्रतिपत्तिकोटित्वं भावेनाजिज्ञासितत्वेनार्थान्तरापत्तोरिति भावः। नच विमतं मिथ्येत्यत्र मिथ्यापदस्य प्रतिपन्नोपाधिनिष्ठत्रैकालिकनिषेधप्रतियोगितार्थकतया नायं दोष इति वाच्यं। तथासति ननु किमिदं मिथ्यात्वं साध्यत इत्युत्तरग्रन्थानुत्थानापत्तोरिति बोध्यं। तात्पर्यादिति। अन्यथान्यविधमिथ्यात्वसाधकविप्रतिपत्तिप्रदर्शनान्न्यूनतापत्तेरिति भावः। मिथ्यात्वसंबन्धस्य तद्धर्मिणश्च वारणायाह। मिथ्याशब्दप्रवृत्तिनिमित्तत्वरूपमिति ॥ ७ ७ ७

॥ समाप्तम् ॥

Indira Gandhi National
Centre for the Arts

IGNCA RAR
ACC. No. R-628

प्रवृत्त्यनुपपत्तिः। एकेनैव हि चैत्रमैत्रादिदेहानां सजीवत्वं मयोपेयते। किं च कोसाविति प्रश्नस्य केनचिद्विशिष्टं शुद्धं वा विषयः, नाद्यः, तस्य कल्पितत्वेन कल्पकत्वासम्भवात्, नान्त्यः, सर्वदेहगतस्यैकत्वेन तन्निश्चयासिद्धेः, इति चेन्न। उक्तनिश्चयेऽप्रामाण्यशङ्कया निःशङ्कप्रवृत्त्यनुपपत्तेः। किं च यत्किंचिद्देहाद्यवच्छेदेन साधनं कुर्वतो मोक्षः, सकलदेहावच्छेदेन वा। आद्ये स देहो मुक्तः इति निश्चयः। द्वितीये देहान्तरेषु मोक्षसाधनमपश्यतस्तत्र प्रवृत्त्यनुपपत्तिरेव। न च शुद्धचित एकत्वेन वस्तुतोऽसंसारित्वेऽप्यावरणविक्षेपशक्तिद्वयशालिस्वाश्रिताविद्यावशात् संसारित्वकल्पकत्वमोक्षार्थयतमानत्वाद्युपपत्तिः। निर्विशेषस्य स्वप्रकाशस्याज्ञानावरणासंभवात्। उपदेशकाभावेन मोक्षोपपत्त्यसंभवाच्च। किं चानादिसंसारे कस्यचित्तत्त्वज्ञानं मोक्षश्चाभून्न वा। आद्ये जीवस्यैकत्वेनेदानीं संसारोपलब्धिर्न स्यात्। अन्त्ये संप्रदायाभावेन तत्त्वज्ञानासंभवः। न च ज्ञानसामग्र्येव ज्ञानहेतुर्न संप्रदायः। संप्रदायस्यापि वेदतात्पर्यजन्यज्ञानसामग्र्यां निविष्टत्वात्। तत्त्ववित्त्वेन श्रुत्यादिसिद्धानां शुकवामदेवादीनां त्वदभिमतगौडपादादीनां मुक्तिर्नाभून्मम तु कथं भविष्यतीति शङ्कया वेदान्तश्रवणादौ निःशङ्कप्रवृत्त्यनुपपत्तेश्च। न च शास्त्रप्रामाण्यादार्ढ्यात् प्रवृत्त्यनुपपत्तिः। श्रुतिप्रामाण्यादेव हि सदा सिद्धो जीवभेदः पूर्वमपि केषांचिन्मुक्तिश्च कुतो नाङ्गीक्रियते। श्रूयते हि ‘यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्।’, ‘अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।’ ‘नित्यो नित्यानां चेतनश्चेतनानाम्।’ इति। स्मर्यते च ‘बहवो ज्ञानतपसा पूता मद्भावमागताः।’ इति। न चोक्तवाक्यानि सार्वलौकिकभ्रमसिद्धभेदानुवादकानि, भ्रमगृहीतमात्रग्राहित्वेनात्यन्ताप्रामाण्यापत्तेः। बाधकाभावेन भेदधियो भ्रमत्वासंभवाच्च। त्वन्मते सर्वप्रत्ययविषयब्रह्मभिन्नाभेदाद्यभावेनाभेदवाक्यानामेवानुवादकत्वाच्च। ‘अतीतानागताश्चैव यावन्तः सहिताः क्षणाः। ततोऽप्यनन्तगुणिता जीवानां राशयः पृथक्॥’ इत्यादिस्मृत्यनुसारात् प्रतिक्षणमेकैकजीवमुक्तावपि न जीवानां समाप्त्या संसारसमाप्तिरतः प्रतिदेहं वास्तवजीवभेदेन बन्धमुक्तिस्वर्गनरकगुरुशिष्यादिव्यवस्थोपपन्ना।

इति जीवैक्यभङ्गः ॥ ४ ॥

## ५. भेदश्रुतेरनुवादकत्वभङ्गः ।

' ज्ञाज्ञौ द्वावजावीशानीशौ ' ' द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥ ' ' य आत्मनि तिष्ठन्नात्मानमन्तरोपयमयति, यो विज्ञाने तिष्ठन् विज्ञानमन्तरोपयमयति । ' इत्याद्याः श्रुतयो भेदे मानम् । न चात्र भेदबोधकशब्दाभावः । ' भेदव्यपदेशाच्चान्यः । ' ' शारीरश्चोभयेऽपि हि भेदेनैनमधीयते । ' इत्यादिसूत्रैस्तच्छ्रुतीनां भेदपरतयाव्याख्यातत्वात् । ' यदा पश्यत्यन्यमीशमस्य महिमानमेति ' ' पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति । ' इत्यादिश्रुतिभिर्भेदज्ञानस्य मोक्षहेतुत्वोक्तेः । ' अस्त्यन्यो भूतात्मा स वा एषोऽभिभूतः प्राकृतैर्गुणैरित्यथाभिभूतत्वात्संमूढः संमूढत्वादात्मस्थं प्रभुं भगवन्तं कारयितारं नापश्यत् । ' इति मैत्रायणीयश्रुत्या जीवेशभेदप्रतिपादनात् । ' स तत्र पर्येति जक्षन् क्रीडन् रममाणः ।' ' सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता । ' ' यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥' इति श्रुतिभिर्मोक्षेऽपि भेदप्रतिपादनात् । न च पुत्रेण सहागतः पितेत्यत्रागमने पुत्रस्याप्रधानतयान्वयवद्ब्रह्मणोऽपि सर्वकामभोगेऽप्रधानतयान्वयः स्यादिति वाच्यम् । ब्रह्मणा हेतुना सह युगपत्सर्वान् कामान्प्राप्नोतीत्यर्थात् । यद्वा ब्रह्मणा चतुर्मुखेन सह तन्मुक्तिकाले मुक्तो भवतीत्यर्थात् । ' सह शाखया प्रस्तरं प्रहरति । ' इत्यत्र प्रस्तरेण सह प्रस्तरप्रहरणकाले अप्रसिद्धकालां शाखां प्रहरतीति विभक्तिव्यत्ययेन सहशब्दस्य वार्तिके कालार्थकताया उक्तत्वात् । ननु ' तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम् । अनश्नन्नन्योऽभिपश्यति ज्ञः । तावेतौ सत्त्वक्षेत्रज्ञौ तदेतत्सत्त्वं येन स्वप्नमभिपश्यति । अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञः । ' इति पैङ्गिरहस्यब्राह्मणेन बुद्धिजीवपरतयायं मंत्रो व्याख्यात इति चेन्न । सत्त्वशब्देन जीवस्य, क्षेत्रज्ञशब्देन चेशस्योक्तेः । 'रजनीं घोरसत्त्वनिषेविताम्' 'महिषीं ससत्त्वाम्' ' क्षेत्रज्ञं चापि मां विद्धि ' इत्यादिषु जीवेशयोस्तयोः प्रसिद्धत्वात् । धान्येन धनमितिवत् येनेत्याद्यभेदे तृतीया । शारीरे जीवे य उपद्रष्टा उदासीनोऽन्तर्यामी परेशः । न च ' स तत्र पर्येति जक्षन् क्रीडन् रममाणः ' इति श्रुत्युक्तोऽवान्तरमोक्षः । ' अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । ' इति स्वस्वरूपाविर्भावरूपपरममोक्षोक्तेः । ' नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । ' ' अजो ह्येको जुषमाणोऽ-

नुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।' इत्याद्याः श्रुतयः स्पष्टं भेदं वदन्ति । न च द्वौ चन्द्राविवितिवत् कल्पितभेदेनोपपत्तिः । 'अजोऽन्यः' इत्यादेः मृषाभेदपरत्वेऽप्रामाण्यापत्तेः । एतच्छ्रुतिविरोधात्त्वदभिमतश्रुतेरन्यपरत्वोपपत्तेः । न च प्रत्यक्षप्राप्तभेदानुवादित्वाद्भेदश्रुतिर्दुर्बला । वर्तमानमात्रग्राहिप्रत्यक्षागृहीतत्रैकालिकभेदपरत्वेन श्रुतेरननुवादकत्वात् । न च 'अजोऽन्यः' इत्यादौ त्रिकालाबाध्यत्वबोधकपदाभावः । वर्तमानादिकालोदासीनतया बोध्यमानभेदस्य श्रुतिप्रामाण्यवशात् त्रिकालाबाध्यत्वसिद्धेः । 'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतःपरम् ॥' इति भेदव्याप्यबहुत्वस्य प्रत्यक्षायोग्यातीतादिकालसंबन्धोक्तेः । स्मृतेश्च श्रुतिव्याख्यारूपत्वात् । किं च प्रत्यक्षस्य प्रामाण्ये तत एव भेदसिद्धिरस्तु । श्रुतेर्नित्यानुवादः । अप्रामाण्ये च न स्यादेव श्रुतेरनुवादकत्वम् । न च ज्ञातज्ञापकत्वमनुवादकत्वे तन्त्रं, न तु प्रमाणगृहीतग्राहित्वमिति वाच्यम् । अप्रमाणगृहीतमात्रग्राहित्वेन शुक्तिरूप्यबोधकवाक्यवच्छ्रुतेरत्यन्ताप्रामाण्यापत्तेः । इष्टापत्तौ च तद्दृष्टान्तेन वेदमात्रस्य तत्त्वापत्तेः । अनुवादकत्वेऽपि तद्वति तत्प्रकारकत्वरूपयाथार्थ्यप्रामाण्याहानेश्च । न च शास्त्रवैयर्थ्यम् । यथा पिशाचभेदे प्रत्यक्षेऽपि पिशाचोऽप्रत्यक्षस्तथेशभेदे प्रत्यक्षेऽपीशस्याप्रत्यक्षत्वेन तत्परशास्त्रस्य सार्थक्यात् । किं चौपनिषदस्य ब्रह्मणः शास्त्रातिरिक्तेनाप्राप्तेस्तद्धर्मिकस्य तत्प्रतियोगिकस्य वा भेदस्य न शास्त्रनिरपेक्षप्रत्यक्षादिना प्राप्तिः । ननु प्रतियोगिग्रहार्थं शास्त्रापेक्षत्वेऽपि स्वसमानविषयकप्रमाणपूर्वकत्वानियमेन प्रत्यक्षभेदप्रमापकत्वोपपत्तिरिति चेन्न । स्वनिरपेक्षप्रमाणगृहीतग्राहित्वेनैव ह्यनुवादकत्वम् । अन्यथा स्मृतिगृहीतार्थग्राहित्वेनानुवादकत्वापत्तेः । तथा च श्रुतिसापेक्षप्रत्यक्षगृहीतग्राहित्वेन न श्रुतेरनुवादकत्वम् ।

इति भेदश्रुतेरनुवादकत्वभङ्गः ॥ ५ ॥

## ६. श्रुतेः पारमार्थिकभेदपरत्वम् ।

नन्वनुवादकत्वाभावेऽपि व्यावहारिकभेदपरत्वेनैव श्रुत्युपपत्तिरिति चेन्न । श्रुतेरप्रामाण्यापत्तेः । न चार्थवादवाक्यवदुपपत्तिः । अर्थवादतात्पर्यविषयार्थस्य प्राशस्त्यादेरिव भेदवाक्यार्थस्याबाधितस्यासत्त्वात् । न चाभेदश्रुतिविरोधेन प्रतीयमानेऽर्थे अप्रामाण्यमिष्टम् । अभेदश्रुतेरखण्डचिन्मात्रपरत्वेन भेदाविरोधित्वात् ।

न हि धर्मिमात्रबोधकं मानं तत्र धर्मवैशिष्ट्यविरोधि। न चावान्तरतात्पर्येण भेदाभावो, महातात्पर्येण चाखण्डं बोध्यतेऽवान्तरतात्पर्यमादाय विरोधोपपत्तिरिति वाच्यम्। अवान्तरतात्पर्ये विषयस्य भेदाभावादेर्निषेधकाभावेन तात्त्विकत्वापत्तेः। महातात्पर्यजन्यबोधस्य सर्वाविरोधित्वात्। अवान्तरतात्पर्यजन्यबोधस्य व्याघातेन स्वविहितानिषेधकत्वात्। न च भेदाद्यभावो ब्रह्मैव। तज्ज्ञानस्य भेदाद्यविरोधित्वात्। किं च ' इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ ' इत्यादिस्मृतौ सर्गाद्यभावोक्तेः। ' न तत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः। श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः ॥ ' इति स्मृतौ मायानिषेधाच्च। ' यो वेद निहितं गुहायां परमे व्योमन्। ' ' सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता। ' इत्यत्र सर्वकामावाप्तेः शुद्धब्रह्मज्ञानफलत्वोक्तेश्च। त्वया विशुद्धब्रह्मविषयत्वेन स्वीकृतायाः भूमाविद्यायाः फलोक्त्यवसरे ' तस्य सर्वेषु लोकेषु कामचारो भवति, ' पञ्चधा सप्तधा ' इति भेदोक्तेः, ' परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। ' ' स तत्र पर्येति जक्षन् क्रीडन् रममाणः ' इत्यादौ स्वरूपाभिव्यक्त्युक्तेश्च। ' तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति। ' इत्यत्र कर्मक्षयोक्तेश्च। ' जुष्टं यदा पश्यत्यन्यमीशं ( यस्य ) महिमानं ' इत्यत्र भेदोक्तेश्च। त्वन्मतेऽपि भेदभोगादिपरेषु फलाध्यायान्तपादस्थेषु ' जगद्व्यापारवर्जम्। ' ' संकल्पादेव तच्छ्रुतेः। ' ' भोगमात्रसाम्यलिङ्गाच्च। ' इत्यादिसूत्रेषु प्रक्रान्तशुद्धविद्यायाः फलस्यैव वक्तव्यत्वाच्च। ' पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ' इति भेदज्ञानान्मोक्षोक्तेश्चेति भेदः पारमार्थिकः। ननु सगुणोपासनया ब्रह्मलोकं गतस्यापि ' न स पुनरावर्तते। ' इत्यादिश्रुत्या दैनंदिनसर्गाद्यसंबन्धो बोध्यत इति चेन्न। संकोचे मानाभावात्। न च ' न तत्र माया ' इत्यनेन स्पर्धादिनिषेधः। मायाशब्दस्य स्पर्धायां लाक्षणिकत्वे मानाभावात्। न च ' यो वेद ' इति श्रुतिः सर्ववैषयिकसुखानां ' एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति। ' इति श्रुत्या ब्रह्मानन्देऽन्तर्भावोक्तेस्तदभिप्रायेति न तद्बलात् नानाकामावाप्तेः शुद्धज्ञानफलत्वमिति वाच्यम्। अशब्दार्थत्वात्। वैषयिकाणां मृषाभूतानां ब्रह्मानन्देऽन्तर्भावासंभवाच्च। न च तस्य सर्वेष्वित्यादेर्निर्गुणविद्यास्तावकत्वेनाप्युपपत्तिः। निर्गुणविद्याया एवालीकत्वात्। न च परमं साम्यमैक्यमेव। अपदार्थत्वात्। स्वरूपभिन्नैक्यस्य तत्प्राप्तेश्च तवालीकत्वाच्च। न च जुष्टमित्यत्रान्यपदेन देहादिभिन्नमिति न तेन जीवेशभेद-

सिद्धिः। योऽहं बाल्ये पितॄनन्वभूवं सोऽहं नप्तॄननुभवामीति देहात्मभेदस्य प्रत्यक्षत्वेन श्रुतेर्वैयर्थ्यापत्तेः। ईशपदास्वारस्याच्च।

इति श्रुतेः पारमार्थिकभेदपरत्वम् ॥ ६ ॥

## ७. भेदे षड्विधतात्पर्यलिङ्गम्।

षड्विधतात्पर्यलिङ्गोपेतश्रुतिगम्यो भेदः परमार्थसन्नेव। तथा हि। आथर्वणे 'द्वा सुपर्णौ' इत्युपक्रमः, 'परमं साम्यमुपैति' इत्युपसंहारः, 'तयोरन्यः', 'अनश्नन्नन्यः', 'अन्यमीशम्' इत्यभ्यासः, शास्त्रैकगम्येश्वरप्रतियोगिकस्य कालत्रयाबाध्यभेदस्य शास्त्रं विना अप्राप्तेरपूर्वता, 'पुण्यपापे विधूय' इति फलम्, 'तस्य महिमानमेति' इति स्तुतिरूपोऽर्थवादः, अन्योऽनश्नन् इत्युपपत्तिः। अत्र 'भेदव्यपदेशात्।' 'पृथगुपदेशात्।' इत्यादिसूत्रैर्व्याख्यातो द्विशब्दो भेदपरस्तदाक्षेपको वा द्वित्वसंख्यैवैक्यविरोधिनीति वा भवत्युपक्रमो भेदपरः। तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं तत्सादृश्यम्। नायं सः किं तु तत्सदृशः, नायं तत्सदृशः किं तु स एवेति सादृश्यैक्ययोरेकतरनिषेधेनान्यतरविधानात्। 'गगनं गगनाकारम्' इत्यादि तु तत्सदृशवस्त्वन्तरनिषेधपरं, गगनाद्येकदेशस्य तदेकदेशसादृश्यपरं वेत्युपसंहारोऽपि भेदपरः। 'अन्यमीशम्, इत्यत्रेशतोऽन्यत्वं प्रतिपद्यतीति प्रकृतो जीव एव प्रतियोगितया संबध्यत इत्यभ्यासोऽपि भेदपरः। नन्वाथर्वणे प्रथममुण्डके 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति।' इति शौनकप्रश्नानन्तरं 'द्वे विद्ये वेदितव्ये।' इति विद्याद्वयमवतार्यापरामुक्त्वा 'अथ परा यया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्रम्' इत्यादिपरविद्याविषयाक्षरप्रश्नोत्तरेणाभेदस्यैवोपक्रम इति चेन्न। इन्द्राद्यवान्तरार्थपरत्वे ऋगाद्या एवापरविद्या, उत्तमाक्षरपरत्वे तु ता एव पराः इत्युक्तस्य सिद्धये तदर्थस्याक्षरस्य सर्वोत्तमत्वं प्रतिपादयितुं सर्वकारणत्वं ह्यक्षरस्योक्तं, न त्वभेदः। साकल्येनादृश्यत्वादिकं 'अदृश्यत्वादिगुणको धर्मोक्तेः।' इति सूत्रात्। न च द्वितीयमुण्डके 'एष एवेदं विश्वं ब्रह्मैवेदं विश्वं वरिष्ठम्।' इति मध्येऽभेदोक्तिः। 'सर्वं समाप्नोषि ततोऽसि सर्वः।' इत्यनुसारात् पुरुषस्य विश्वव्यापकत्वोक्तेः। सत्ये ब्रह्मणि यथाश्रुतानृतविश्वाभेदस्यासंभवात् त्वयानङ्गीकाराच्च। न च तृतीयमुण्डकान्ते च 'परेऽव्यये सर्व एकीभवन्ति।' 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति।' इत्यैक्यरूपफलेनोपसंहार इति वाच्यम्।

अभूततद्भावार्थकच्विप्रत्ययेन त्वत्प्रतिकूलस्य प्रागविद्यमानस्य निर्मुक्तत्वादिना 'सायं गोष्ठे गाव एकीभवन्ति ।' इत्यादिवदेकस्थानस्थत्वादिना कीटभृङ्गन्यायेन वा जीवेशाभेदस्योक्तेः । अभेदे 'परमं ब्रह्म' इत्यसंगतेः । किं चान्तर्यामिब्राह्मणेऽपि षड्विधतात्पर्यलिङ्गोपेतं वाक्यं भेदे प्रमाणम् । तथा हि 'वेत्थ नु त्वं काप्यतमन्तर्यामिणम् ।' इत्युपक्रमः, 'एष आत्मान्तर्यामी' इत्युपसंहारः, 'एष त आत्मा' इत्याद्येकविंशतिकृत्वोऽभ्यासः, अन्तर्यामित्वस्याप्राप्ततयापूर्वता, 'स वै ब्रह्मवित्' इत्यादिफलम्, 'तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तवान्तर्यामिणं ब्रह्मगवीरुदजसे, मूर्धा ते पतिष्यति ।' इति निन्दारूपोऽर्थवादः, 'यस्य पृथिवी शरीरं, यं पृथिवी न वेद ।' इत्याद्युपपत्तिः । ननु 'अनेन ह्येतत्सर्वं वेद ।' इत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञापूर्वकं 'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्सर्वमभवत् ।' इत्यभेदेनोपक्रम्य षष्ठाध्यायान्ते मैत्रेयीब्राह्मणे 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्याद्यभेदेनैवोपसंहार इति चेन्न । इन्द्रादिदेवानां ज्ञानाद्यत्फलं ब्रह्मज्ञानात्तत्तदधिकं च फलं भवतीत्येकविज्ञानश्रुत्यर्थात्।यत्र सुषुप्तौ ज्ञानज्ञेयादिकमात्मैव जीवः स्वयमेवाभूत्तत् केन साधनेन कं पश्येत् स्वेनैव स्वयमेव पश्येदित्यर्थः । तदानीं ज्ञानकरणचक्षुराद्यभावे 'यत्र' इत्यादिश्रुतेस्तात्पर्यात् । अन्यथा 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ।' इत्यन्तर्यामिप्रकरणस्य भेदपरत्वं बोधयता सूत्रेण विरोधः । न च व्यावहारिकभेदपरं सूत्रम् । एवं हि बौद्धोऽपि वेदव्याख्याता, तच्छास्त्रं च वेदव्याख्यानं स्यात् । सोऽपि ब्रह्मसूत्राणि व्याख्यायान्ते मिथ्यैवैषोऽर्थः, वास्तवं तु शून्यत्वमेव तत्त्वमिति भवानिव वदेत् । 'असद्वा' इत्यादिवाक्यं तस्य तात्त्विकं स्यात् ।

इति भेदे षड्विधतात्पर्यलिङ्गम् ॥ ७ ॥

## ८. पराभिमतैक्यभङ्गः ।

किं चैक्यं स्वरूपभिन्नं चेदद्वैतहानिः, मृषात्वे भेदस्य सत्यत्वं स्यात् । 'तत्त्वमसि' इत्यादेः सखण्डार्थकत्वं च स्यात् । स्वरूपात्मकत्वे शास्त्रवैयर्थ्यम् । अज्ञानाद्यधिष्ठानतया स्वरूपस्य सदा भानात् । ऐक्याभिन्ननिर्विशेषस्वरूपस्यावरणे जगदान्ध्यापत्तेः । किं चाभेदेऽभेदस्यपारमार्थिकत्वासद्वैलक्षण्यादीनि तत्त्वतः

सन्ति न वा । आद्ये सद्वितीयत्वापत्तिः । द्वितीये अभेदत्वहानिः । न चात्मस्वरूपाण्येव तानीति वाच्यम् । आत्मस्वरूपस्य सर्वैः स्वीकृतत्वेन त्वद्रीत्या नित्यसिद्धत्वेन च त्वच्छास्त्राविषयत्वात् । न च जीवावृत्तिधर्मानधिकरणत्वं तदिति वाच्यम् । जीवावृत्तिधर्मानधिकरणत्वस्य शून्येऽपि सत्त्वेन तस्यापि जीवाभिन्नत्वापत्तेः । न च शून्यं निस्स्वरूपमात्मा तु सस्वरूप इति वाच्यम् । स्वरूपत्वादिधर्महीनस्यैक्यस्य सस्वरूपत्ववच्छून्यस्यापि सस्वरूपत्वसौलभ्यात् । किं च तदवृत्तिधर्मनिषेधेन तद्वृत्तिधर्मविधानमेव, विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकत्वात् । ननु विशेषनिषेधेऽपि न शेषाभ्यनुज्ञा । वायौ न नीलं रूपमित्यस्य रक्तं प्रत्यनभ्यनुज्ञत्वादिति चेन्न । विशेषनिषेधशेषाभ्यनुज्ञान्यप्रकारासंभवे तस्य तथात्वनियमात् । वायौ नीरूपत्वरूपतृतीयप्रकारस्य सत्त्वात् । न हि ब्रह्मणि धर्मबोधकमानवद्वायौ रूपबोधकमानमस्ति । वस्तुतस्तु जीवावृत्तिधर्मानधिकरणत्वं सर्वज्ञत्वादिविशिष्टे, त्वदभिमते निर्धर्मके वा । नाद्यः । व्याघातात् । अल्पज्ञत्वेनानुभूतो यो जीवस्तदवृत्तिसर्वज्ञत्वादेस्तत्र सत्त्वात् । नान्त्यः । जीवभिन्नेऽपि निर्धर्मकत्वादेव तदवृत्तिधर्मानधिकरणत्वोपपत्तेः । न च जीवावृत्तिधर्मानधिकरणत्वोपलक्षितात्मस्वरूपं परैर्नाङ्गीक्रियत इति वाच्यम् । तादृशधर्मानधिकरणत्वस्य ब्रह्मभिन्नस्योपलक्षणतया बोधे श्रुतेः सखण्डार्थकत्वापत्तेः । अबोधे ज्ञातमात्रज्ञापकत्वेन वैयर्थ्यात् । नित्यसिद्धस्य निर्विशेषस्य धर्मान्तरोत्थापनेन व्यावर्त्यत्वरूपोपलक्षितत्वायोगाच्च ।

इति पराभिमतैक्यभङ्गः ॥ ८ ॥

## ९. ऐक्यप्रामाण्यभङ्गः ।

किं च सार्वज्ञ्यासार्वज्ञ्यादिविशिष्टयोरैक्यमयोग्यतापराहतम् । ननु विरुद्धाकारस्याविवक्षया ब्रह्मानुभवाविषयत्वरूपस्त्यागो न त्वपायः स चरमसाक्षात्कारसाध्यः, तथा च तत्तेदंते इवानपेते अपि सार्वज्ञ्यासार्वज्ञ्ये नाश्रयाभेदविरुद्धे इति चेन्न । तत्तेदंतयोः कालभेदेनैकत्रैव संबन्धसंभवेन दृष्टान्तासिद्धेः । न हि तत्तेदंते एकत्रैककावच्छेदेन प्रतीयेते येन विरोधः स्यात् । न च सार्वज्ञ्यादिकं कालभेदेनैकत्र वर्तते, येन सोऽयं देवदत्त इति दृष्टान्तः स्यात् । तत्तेदंतयोः प्रत्यभिज्ञायामभाने तात्कालिकैतत्कालिकपिण्डाभेदासिद्ध्यापत्त्या पिण्डस्य क्षणिकत्वापत्तेः । एतेन,

तद्देशकालविशिष्टे एतद्देशकालवैशिष्ट्यं एतद्देशकालविशिष्टे तद्देशकालवैशिष्ट्यं वा, विशिष्टयोरैक्यं वा सोऽयमिति वाक्येन प्रतिपाद्यम्; नाद्यः। तत्कालादेरिदानीं सत्त्वापत्तेः; न द्वितीयः, एतत्कालादेस्तदा सत्त्वापत्तेः; न तृतीयः, बाधादिति निरस्तम्। पक्षत्रयस्यापि निर्दुष्टत्वात्। तथा हि यदन्विततया ज्ञात एवेतरान्वयधीस्तत्तत्र विशेषणं इदंतान्विततया ज्ञात एव पिण्डे तत्तान्वयधीस्तत्तान्विततया ज्ञात एवेदंतान्वयधीः सोऽयमित्येकस्मिन् पिण्डे भवतीति तत्तादिकं विशेषणम्। अत एवधीकाले विद्यमानस्यापि धर्मान्तरमुत्थाप्य व्यावर्तकस्य काकवद्गृहमित्यत्र काकस्य निर्विशेषणत्वम्। दण्डययमासीदित्यत्र दण्डस्य विशेषणत्वम्। काकोत्थापितोत्तृणत्वान्विततया च ज्ञाते गृहे देवदत्तीयत्वान्वयधीर्न तु काकान्विततया। किं च सोऽयमिति प्रत्यभिज्ञा नाखण्डार्थविषया, तत्र प्रत्यक्षे शब्दवृत्तेर्लक्षणाया अभावात्। तत्तेदंतोल्लेखित्वेन तत्र निष्प्रकारत्वस्यानुभवपराहतत्वात्। तदनुल्लेखे त्वभिज्ञातो वैलक्षण्यानुपपत्तेः। शाब्दप्रत्यभिज्ञापि नाखण्डार्था, स्वप्रत्यभिज्ञावगतस्यैव परं प्रति बोधनात्। न च प्रत्यक्षस्य लक्षणानपेक्षत्वेऽपि बाधादेव स्वरूपमात्रविषयकत्वमिति वाच्यम्। विद्यमानतयेदंताया अतीततया तत्ताया अवगाहिनः प्रत्यक्षस्य विरोधलेशाभावात्। किं च स्वप्रकाशस्वरूपाभिन्नाभेदस्य नित्यसिद्धत्वेनोपदेशवैयर्थ्यात्। तदस्फुरणे बुभुत्सानुपपत्तेः। भ्रमकालज्ञाताधिकाप्रतीतेर्महावाक्याद्भेदभ्रमनिवृत्त्यनापत्तेः। न च तदादिपदद्वयजन्यसार्वज्ञ्याद्युपलक्षितस्वरूपज्ञानमज्ञाननिवर्तकमिति वाच्यम्। स्वरूपभिन्नसार्वज्ञ्यादेरुपलक्षणतया भाने श्रुतेरखण्डार्थकत्वहानेरभाने भ्रमनिवर्तकत्वासंभवात्। यत्तु तत्त्वमसीति वाक्यस्य सत्यादिवाक्यात् तत्पदाच्च प्रमेयावैलक्षण्येऽपि धर्मिद्वयपरामर्शित्वेन भ्रमनिवर्तकत्वात् प्रामाण्यमिति तत्तुच्छम्।प्रमेयावैलक्षण्ये अज्ञातज्ञापकत्वरूपप्रामाण्यासंभवात्। धर्मद्वयावगाहित्वे प्रमेयावैलक्षण्येऽस्य श्रुतेरखण्डार्थकत्वस्य वासिद्ध्यापत्तेः। किं च श्रुत्या प्रत्यक्षसिद्धजीवमनूद्य ब्रह्मत्वं बोध्यं, श्रुतिसिद्धब्रह्मानूद्य तस्य जीवत्वं वा, उभयानुवादेनाभेदो वा विधेयः। उपजीव्यप्रत्यक्षादिविरोधात् पक्षत्रयस्यासंभवात्। न च प्रतियोग्यर्पकतयोपजीव्यमिदं रूप्यमिति नेदं रूप्यमित्यस्य बाधकं स्यादिति वाच्यम्। यत्प्रामाण्यं यत्प्रामाण्याधीनं तद्धि तस्योपजीव्यम्। न हि नेदमित्यस्य प्रामाण्यमिदं रूप्यमिति प्रामाण्याधीनम्। ब्रह्मादिरूपधर्मिज्ञानप्रामाण्याधीनमैक्यधीप्रामाण्यमिति भवति तदुपजीव्यम्। ननु सार्वज्ञ्यादिविशिष्टं न तद्धर्मि, किं तु ब्रह्मस्वरूपमात्रम् विशिष्टधर्मिज्ञानप्रामाण्यमैक्यज्ञानप्रामाण्यं नापेक्षते किं तु स्वरूपज्ञानप्रामाण्यमात्रम्; अन्यथेदं रजतमित्यस्यापि धर्मिज्ञानत्वेनोपजीव्य-

तया निषेधज्ञानप्रामाण्ये रूप्यत्वविशिष्टेदंज्ञानप्रामाण्यमुपजीव्यं स्यादिति चेन्न। इदंत्व-विशिष्टस्यैव धर्मित्वेन रजतत्ववैशिष्ट्यस्य धर्मित्वाप्रयोजकत्वात्। किं चासाधारण-सार्वज्ञ्यादिधर्मावच्छेदेन ब्रह्मणोऽनुद्देश्यत्वे साधारणधर्मेण स्वरूपेण वा उद्देश्यता वाच्या। न चाद्ये इष्टापत्तिः। चित्त्वादिसाधारणधर्मेणैक्यस्यास्माभिरप्यङ्गीकारात्। द्वितीये ब्रह्मैक्यासिद्धिः। असाधारणब्रह्मस्वरूपोद्देशस्याधारणधर्मं विनासंभवात्। न च सार्वज्ञ्यादिविशिष्टस्योद्देश्यत्वेऽपि नोपजीव्यविरोधो, विशिष्टयोरैक्यानङ्गीकारात् तत्त्वं-पदलक्षितयोरैक्याङ्गीकाराच्चेति वाच्यम्। उद्देश्यतावच्छेदकसार्वज्ञ्याद्यवच्छेदेन विधेयस्याभेदस्यासिद्धौ वाक्यवैयर्थ्यापत्तेः। न च चित्त्वेनैक्यस्येष्टत्वेऽपि तदाश्रयैक्यं न त्वदिष्टम्। आश्रयाणां सर्वज्ञत्वाज्ञत्वतत्तद्व्यक्तितत्त्वादिना भेदोऽपि चित्त्वेनाभेदेन वाक्यस्योपपत्त्याश्रयाणां तद्व्यक्तित्वादिनाभेदाबोधकत्वात्। न हि प्रमेयाभिन्नं प्रमे-यमभिधेयं चेत्यत्र सकलव्यक्त्यभेदः प्रतीयते।

इति ऐक्यप्रामाण्यभङ्गः ॥ ९ ॥

## १०. आगमस्यैक्यपरत्वभङ्गः।

'तत्त्वमसि' इत्यत्र पदद्वये प्रातिपदिकलक्षणापेक्षया पदैकदेशविभक्तौ लक्षणा लघीयसी। अस्तु वा तच्छब्दात्परत्र तृतीयादिविभक्तेः 'सुपां सुलुक्' इत्या-दिना प्रथमैकवचनादेशो वा लुग्वा। तथा च तेन त्वं तिष्ठसीति वा, ततः संजात इति वा, तस्य त्वमिति वा, तस्मिंस्त्वमिति वार्थः। 'अनेन जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति।' 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः।' 'ऐतदात्म्य-मिदं सर्वम्।' 'सदायतनाः सत्प्रतिष्ठाः।' इति वाक्यशेषात्। न च सर्वज्ञत्वादि-विशेषणस्य त्यागेऽपि विशेष्यांशस्यात्यागाज्जहदजहल्लक्षणा जहत्स्वार्थविभक्ति-लक्षणापेक्षया ज्यायसीति वाच्यम्। जहदजहल्लक्षणाया हि वाच्यान्तर्गतत्वेन प्रागधीस्थस्य बाधकात्त्यक्तस्य पुनः स्वीकारः। जहल्लक्षणायामधीस्थस्यात्यक्तस्यैव स्वीकारः। त्यक्तस्वीकाराद्वरमधीस्थस्वीकारः। किं च शाब्दबोधाविषयीकृतस्या-भेदादेर्लाक्षणिकबोधे भानाङ्गीकारे श्रुतेः सखण्डार्थकत्वापत्तेः। तदनङ्गीकारे लक्षणा-वैयर्थ्यात्। यद्वा शब्दोऽनित्यः, शब्दत्वात्, घटवदित्यत्र यथा दृष्टान्तानुसाराद-नित्य इति पदच्छेदस्तथा भेदबोधकनवदृष्टान्तानुसारादतत्त्वमसीति पदच्छेदः। निर्मुक्तत्वपूर्णज्ञानानन्दत्वादिना नञा सादृश्यबोधनात्। तथा हि परिभ्रमणेन

श्रान्तः सूत्रबद्धः पक्षी शङ्कुमेवाश्रयति, तथा जागरे परिभ्रमणेन श्रान्तो जीवः सुषुप्तौ परेशं संश्रयतीत्याह, 'यथा शकुनिः सूत्रेण प्रबद्धः ' इत्यादिना। ननु मत्तोऽन्यश्चेतनश्चेन्मया ज्ञायेत, तत्राह; यथा मधुकरैः संगृहीता रसाः अयमाम्रस्याहं पनसस्येति स्वं भेदं न जानन्ति, तथा जीवे विद्यमानोऽप्यविवेकिभिर्न स्वभिन्नतया ज्ञायते परेश इति 'यथा सोम्य मधुकृतः ' इत्यादिना। ननु रसैरचेतनैर्विद्यमानो भेदो मा ज्ञायि, मया चेतनेन कुतो न ज्ञायते, तत्राह; यथा चेतनाभिरपि नदीभिः समुद्रे मिलिताभिः इयं गङ्गाहं यमुनेति स्वभेदो न ज्ञायते, तथा त्वयि स्थित ईशस्त्वया न ज्ञायत इति 'इमाः सोम्य ' इत्यादिना। नन्वस्तु जीवे ईशो, जीवस्य तदधीनत्वं कुतस्तत्राह; यथा वृक्षस्य विघातिनि विद्यमानेऽपीशानुग्रहात् सुखमवस्थानं, तदभावे च विघातकाभावेऽपि शुष्कता, तथा जीवस्य मानुषादिदेहेऽपीशाधीनत्वमिति 'यथा सोम्य महतो वृक्षस्य ' इत्यादिना। ननु सूक्ष्ममपि स्वस्वरूपं ज्ञायते, तथेशोऽस्ति चेज्ज्ञायेतैव, तत्राह; यथा वटबीजे महान् वटो यच्छक्त्या सन्नपि नोपलभ्यते, एवं जीवान्तर्गतो हरिर्न दृश्यत इति 'न्यग्रोधफलम् ' इत्यादिना। ननु तद्धर्मे गृह्यमाणेऽपि स न गृह्यत इति कथं जानीयां, तत्राह; यथा जलप्रक्षिप्तलवणधर्मे क्षारत्वे गृह्यमाणे लवणं न गृह्यते तथा वटावस्थानहेतुसामर्थ्ये गृह्यमाणेऽपि स न गृह्यत इति 'लवणमेतदुदकेऽवधाय' इत्यादिना। ननु तर्हीशस्याज्ञेयत्वात्तज्ज्ञानसाधनवैयर्थ्यं, तत्राह; यथा चौरैः कश्चन पुरुषो बद्धाक्षो देशान्तरे नीत्वा मुक्तः, पृष्ट्वा पृष्ट्वा स्वदेशमायाति तथा दुर्ज्ञेयोऽपीशो गुरूपदेशादिना ज्ञायत इति 'यथा सोम्य पुरुषम् ' इत्यादिना। ननु वृक्षदेहे जीवस्य पराधीनत्वमुक्तं, मानुषदेहे कथं तज्जानीयां, तत्राह; रोगी ग्रस्तव्यापारः पार्श्वस्थान्न वेद, तथा सुषुप्तौ संपन्नो जीवस्तं न वेदेति 'पुरुषं सोम्योपतापिनम् ' इत्यादिना। ननु यो मत्तोऽन्य ईश इति जानाति, यश्चाहमेव ब्रह्मेति जानाति, तयोः कीदृशफलं तत्राह; यथा कश्चन पुरुषो राजभटैरानीतश्चौरोऽयमिति, यदा स चौरस्तदा दण्ड्यो, यदा न चौरस्तदा न, तथा योऽहं ब्रह्मेति ज्ञानी परकीयब्रह्मत्वापहारकत्वाद्दण्ड्यः, मद्भिन्नं ब्रह्मेति जानन्नदण्ड्य इति 'पुरुषम् ' इत्यादिना। ननु 'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मि ' इति वाक्यमभेदपरमिति चेन्न। अहमर्थस्यानात्मतया त्वदङ्गीकृतस्य हि यथाश्रुताभेदो ब्रह्मणि बाधितः। जीवस्यापि बृहद्गुणकत्वेन कीटस्य भृङ्गाभेदवद्ब्रह्माभेदोपपत्तेः। 'द्वे ब्रह्मणी वेदितव्ये ' इति श्रुतेः। 'यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्।' इत्युक्तं तद्वचनमपि

कीटभृङ्गन्यायेनोपपद्यते । ' अहं हरिः सर्वमिदं जनार्दनः । ' इति स्मृतेर्मयि हरिः सर्वस्मिन् जनार्दन इत्यर्थः । त्वदीयपदद्वयलक्षणापेक्षया विभक्तिलक्षणाया लघुत्वात् । ' योऽन्यां देवतामुपास्ते, अन्योऽसावन्योऽहमस्मीति, न स वेद यथा पशुः । ' इत्यस्य यो नारायणान्यां देवतामुपास्ते स देवानां पशुः जीविका । उपासनमाह । अन्योऽसावन्योऽस्मीत्यर्थः । हरिभक्तस्तु न तथा । ' देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् । सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कृत्यम् ॥ ' इति स्मृतेः । ' स यो ह वै परमं ब्रह्म वेद ब्रह्मैव भवति । ' इत्यत्र द्वितीयो ब्रह्मशब्दो जीवपरः । तस्य जातिजीवकमलासनाद्यनेकार्थत्वात् । ' द्वे ब्रह्मणी ' इत्यादौ जीवे ब्रह्मशब्दप्रयोगाच्च । तथा च यः परमं ब्रह्म वेद स जीव एव भवति न तु परमं ब्रह्मेत्यर्थः । अत एवाद्यब्रह्मशब्दः परमत्वेन विशेषितः । न च तादृशजीवस्वरूपं प्रागेव सिद्धम् । ब्रह्म भवतीत्यस्याविर्भूतबृंहितत्वरूपब्रह्मत्वाक्रान्तो भवतीत्यर्थात् । कीटभृङ्गन्यायात् । प्रथमब्रह्मपदस्य जीवभिन्नेशपरत्वाभावे कर्तृकर्मभावानुपपत्तेः । ' परेऽव्यये सर्व एकीभवन्ति । ' इत्यस्य, गोष्ठे गावः एकीभवन्ति, सर्वे नृपा एकीभवन्तीत्यादिवत्स्थानैक्यमत्यैक्यादिपरत्वम् । अन्यथैकस्य ब्रह्मरूपस्य प्रागेव सिद्धतयाभूततद्भावार्थकच्विप्रत्ययानुपपत्तेः । न च स्वगृहनिक्षिप्ताज्ञातनिधिवत् सतोऽप्यावृतत्वेनाभूतसत्तया च्विप्रत्ययोपपत्तिरिति वाच्यम् । सदा भासमाननिर्विशेषस्वरूपाभिन्नस्यावृतत्वासंभवात् । अन्तर्यामिप्रकरणस्थं अक्षरप्रकरणस्थं च ' नान्योऽतोऽस्ति द्रष्टा ' इत्यादिवाक्यं न चाभेदपरम् । ' अत ' इत्यनेन प्रस्तुतं सर्वनियन्तारं परामृश्य अन्यो द्रष्टा नास्तीत्युक्ते नियामकद्रष्ट्रन्तरनिषेधस्यैव प्राप्तेः । न तु द्रष्टृसामान्यनिषेधस्य अस्मिन् ग्रामेऽयमेव सर्वनियामकोऽतो नान्यः पुरुषोऽस्तीत्यादावन्यशब्दस्य प्रस्तुतसदृशान्यपरतया व्युत्पन्नत्वात् । ननु 'अनेन ह्येतत्सर्वं वेद' इति प्रतिज्ञातस्यैकविज्ञानेन सर्वविज्ञानस्योपपादनार्थं अन्यत्वेन प्रतीतेन जीवेनाभेदो बोध्यत इति चेन्न । अनेनेत्यनेनान्तर्यामिणो जीवज्ञानसाधनत्वोक्त्याभेदबोधकपदाभावात् । अन्तर्यामिवाक्ये ' य आत्मनोऽन्तरः, ' ' यमात्मा न वेद ' ' यस्यात्मा शरीरं ' ' य आत्मानमन्तरोपयमयति ' इति पूर्ववाक्येन ' एष त आत्मा अन्तर्याम्यमृतः । अतोऽन्यदार्तम् ' इत्युत्तरवाक्येन च विरोधापत्तेः । तत्र परमात्मनोऽन्यं चेतनमङ्गीकृत्य तस्यार्तियुक्तत्वेनास्वातन्त्र्यस्यैवोक्तेः । न चान्तर्यामिणो भिन्नं सर्वमार्तं नश्वरं वितथं वेति वाच्यम् । ' आर्तं वा अभिदीक्षन्ते य एकाष्टकायामभिदीक्षन्ते । ' इति श्रुतेः । आर्तं शीतेन दुःखं यथा स्यात्तथा दीक्षन्ते शीतेनार्ता दुःखिनो भवन्ती-

त्यर्थात् । 'आर्तो जिज्ञासुः' इत्यादिस्मृतेश्चार्तशब्दस्य दुःखिपरत्वात् । अक्षरवाक्येऽपि 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः । ' इत्यादि पूर्ववाक्येन विरोधात् । न च 'द्वितीयाद्वै भयं भवति । ' इतिश्रुतिविरोधः । लोके समानादधिकाच्च विरुद्धात् प्राप्तस्य भयस्यानयानुवादात् । पूर्वत्र 'तस्मादेकाकी बिभेति । ' उत्तरत्र 'तस्मादेकाकी न रमते । ' इति भेदस्यैव प्रतिपादनात् । न च 'यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय । ' इति श्रुत्या सामान्यद्वितीयमात्रदर्शनस्यैव भयहेतुतोक्तेति वाच्यम् । द्वितीयाभावस्यैव द्वितीयत्वेन द्वितीयमात्रनिषेधासिद्धेः । मदन्यद्विरुद्धं स्वतन्त्रं नास्ति, सर्वस्येशाधीनत्वादीश्वरस्य परमाप्तत्वात्, तत एव स्वतन्त्रादीश्वरादस्य जीवस्य भयं वीयायेत्यर्थात् । 'ईश्वरः सर्वभूतानाम्' इत्यादिस्मृतेः । 'य एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवत्यनेनैतस्मिन्' इति श्रवणादवतारान्तर्यामित्वादिना प्रसक्तेशभेदो निषिध्यते । 'एको देवः सर्वभूतेषु गूढः । ' इत्येतत्तु स्पष्टं भेदपरम् । ननु 'यावन्मोहं तु भेदः स्याज्जीवस्य च परस्य च । ततः परं न भेदोऽस्ति भेदहेतोरभावतः ॥ विभेदजनके ज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥ ' इत्यादिस्मृत्या भेदस्याविद्यकत्वमिति चेन्न । जीवस्य भेदो हि देवब्राह्मणादिरूपेण जीवेशयोश्च निर्मुक्तत्वानिर्मुक्तत्वादिना भेदो यावन्मोहं, तदभावे तु नास्तीत्यर्थः । आत्मनो जीवस्य ब्रह्मणो बृहद्गुणतां प्राप्तस्य देवादिधीजनके ज्ञाने नष्टे सति असन्तमसाधुमस्वाभाविकं कः करिष्यतीत्यर्थः । 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु' इत्यनेन स्वस्य सर्वज्ञत्वमुक्तं न तु जीवाभेदः । 'क्षेत्राणि च शरीराणि बीजानि च शुभाशुभे । एतानि वेत्ति योगात्मा ततः क्षेत्रज्ञ उच्यते ॥ प्रकृतेश्च विकाराणां द्रष्टारमगुणान्वितम् । क्षेत्रज्ञमाहुर्जीवं तु कर्तारं गुणसंवृतम् ॥ ' इति भारते क्षेत्रज्ञशब्दस्य सर्वान्तर्यामिसर्वज्ञपरत्वस्य स्पष्टत्वात् ।

**इति आगमस्यैक्यपरत्वभङ्गः ॥ १० ॥**

## ११. ऐक्येऽनुमानभङ्गः ।

ननु जीवाः परमात्मनस्तत्त्वतो न भिद्यन्ते, आत्मत्वात्, परमात्मवदित्यनुमानमभेदे मानमिति चेन्न । सर्वज्ञत्वसर्वकर्तृत्वादेरुपाधित्वात् । भेदाभावे पक्षसाध्यदृष्टान्ताद्यसंभवात् । न च व्यावहारिकभेदमादाय पक्षदृष्टान्ताद्युपपत्तिः । कल्पितपक्षादिक-

Indira Gandhi National

मादायोपपत्तावाश्रयासिद्ध्यादेरदोषत्वापत्तेः। कल्पितभेदवतो जीवादेर्मृषात्वेनाभेदाधिकरणत्वाद्यसंभवाच्च। न च स्वव्यवहारे स्वभिन्नज्ञानानपेक्षत्वं वा हेतुरिति वाच्यम्। अप्रयोजकत्वात्। संसारदशायां स्वव्यवहारे ब्रह्मणो वृत्त्यपेक्षणात्। मोक्षे व्यवहारस्यैवाभावाच्च। न चाबाध्यत्वं हेतुः। जडे संदिग्धानैकान्त्यात्। तत एव व्यावहारिकभेदाभावसिद्ध्यापत्तेश्च। न च प्रत्यक्षविरोधान्न तदभावसिद्धिः। प्रत्यक्षस्य प्रामाण्ये पारमार्थिकभेदस्यैव सिद्धेः। अप्रामाण्ये तद्विरोधस्यैवासिद्धेः। विमता जीवाः चैत्रान्न भिद्यन्ते, जीवत्वाच्चैत्रवदित्यत्र विमता जीवा वस्तुतो ब्रह्मणो न भिद्यन्ते, वस्तुत्वाद्ब्रह्मवदित्यत्र च व्यवहारतोऽपि न भिद्यन्त इत्यस्यापि सिद्ध्यापत्तेः। न च विमतानि शरीराणि चैत्राधिष्ठितानि,शरीरत्वात्संमतवदित्यनेनाभेदसिद्धिः। चैत्राधिष्ठितत्वेऽप्यन्याधिष्ठितत्वसंभवेन जीवाभेदासिद्धेः। न च चैत्रमात्राधिष्ठितत्वं वा चैत्रस्यैव भोगायतनानीति वा साध्यमिति वाच्यम्। चैत्रे सुप्ते मृते च सर्वस्य स्वप्नमरणाद्यापत्तेः। भोक्तुरन्तःकरणविशिष्टस्य प्रतिशरीरं भिन्नत्वेन बाधाच्च। न च भोक्तृत्वस्य विशिष्टवृत्तित्वेऽपि विशेष्यवृत्तित्वमप्यस्तीति वाच्यम्। भोक्तृत्वाधिकरणस्यैव प्रतिशरीरं भिन्नत्वात्। विमतानि शरीराणि चैत्रमनसैव युक्तानीत्याभाससाम्याच्च। ननु विमतो भेदो मिथ्या, एकस्यां दृशि कल्पितो वा, भेदत्वात्, दृश्यत्वाद्वा, चन्द्रभेदवत्, एकस्यां दृशि क्षणिकत्वादिकल्पितभेदवद्वेति चेन्न। अध्यस्ताधिकसत्ताकदोषप्रयुक्तभानत्वस्यात्रोपाधित्वात्। प्रातिभासिकाप्रातिभासिकसाधारणैकभेदत्वस्यासिद्धेश्च। ब्रह्मण्यनृतादिभेदस्य मिथ्यात्वे ब्रह्मणोऽनृतत्वाद्यापत्तेश्च। विमतो भेदः परमार्थसन्, असद्भिन्नत्वे सति प्रातिभासिकभिन्नत्वात् ब्रह्मवदिति प्रतिरोधाच्च। ननु संवित् स्वान्तर्गणिकस्वाभाविकभेदहीना, उपाधिमन्तरेणाविभाव्यमानभेदत्वात्, गगनवदिति चेन्न। इच्छादीनां घटपटाद्युपाधिभेदेनैव विभाव्यमानभेदतया तेषु व्यभिचारात्। न चेच्छादीनामेकान्तःकरणपरिणामत्वेन तत्रापि साध्यमस्तीति वाच्यम्। सावयवान्तःकरणभिन्नभिन्नभागस्यैव तदुपादानत्वादन्यथैकेच्छादिकार्येणैवान्तःकरणक्षयापत्तेः। घटाद्युपाधिभेदेनैव विभाव्यमानभेदेषु घटाद्यत्यन्ताभावादिषु व्यभिचारस्य दुर्वारत्वाच्च। यत्तु विमतोऽव्याप्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको भेदः स्वसमानाधिकरणात्यन्ताभावप्रतियोगी, भेदत्वात्, संयुक्तभेदवत्; विमतो भेदः केवलान्वय्यत्यन्ताभावप्रतियोगी, पदार्थत्वात्, नित्यद्रव्यवदिति तन्न। आद्ये विमतो भेदः स्वसमानाधिकरणात्यन्ताभावप्रतियोगी न अव्याप्यवृत्तिभिन्नत्वे सत्यसद्भिन्नत्वे सति प्रातिभासिकभिन्नत्वात्, ब्रह्मवदिति

प्रतिरोधात् । द्वितीये प्रमेयत्वादिषु केवलान्वयिषु व्यभिचारात् । तेषामप्यभावाङ्गीकारे अत्यन्ताभावप्रतियोगित्वे व्यभिचारात् । न चात्मत्वमेकत्वव्याप्यम्, आत्ममात्रवृत्तित्वाच्चैत्रवदिति वाच्यम् । निर्विशेषे आत्मत्वैकत्वाद्यभावेन बाधादिदोषात् । 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।' इत्याद्युक्तात्मनिष्ठबहुत्वे व्यभिचाराच्च ।

## ऐक्येऽनुमानभङ्गः ॥ ११ ॥

## १२. अंशत्वेनैक्यभङ्गः ।

ननु 'पादोऽस्य विश्वा भूतानि' इत्यादौ 'ममैवांशो जीवलोके जीवभूतः सनातनः ।' इत्यादिस्मृतौ चांशत्वोक्तेरभेदसिद्धिः । अंशत्वं तु घटाकाशस्य महाकाशं प्रतीव कल्पितप्रदेशत्वमिति चेन्न । घटाकाशादेरंशत्वादिव्यवहाराभावात् । स्वतः सांशस्याकाशस्य घटाद्यवच्छेदसंभवेऽपि स्वतो निरंशस्यासङ्गस्य ब्रह्मणस्तदसंभवात् । द्रोणो बृहस्पतेर्भागोऽश्वत्थामा शंकरस्यांशः, भ्रातॄणामंशः द्रव्यं, पुत्रः पित्रंश इत्यादिप्रयोगादंशशब्दो नानार्थः । प्रकृते तु तत्सदृशत्वे सति तदधीनत्वं जीवस्येशांशत्वम् । 'अन्ये चांशकला' इत्यादौ मत्स्यादेरभिन्नस्यापि सामर्थ्यविशेषो गौणमंशत्वं, 'अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ।' इति सूत्रे 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ।' 'एतदेव विदित्वा मुनिर्भवति ।' 'य आत्मनि तिष्ठन्' इत्यादि भेदव्यपदेशस्य 'ब्रह्म दाशा ब्रह्म दासा ब्रह्म कितवाः' इत्याद्यभेदव्यपदेशस्य 'त्वमेव माता च पिता' इत्यादि पितृपुत्रत्वादेर्नानासंबन्धस्योदाहृतत्वेन पितृपुत्रभावेनैवेशजीवयोरंश्यंशभावोपपत्तेः । दाशादीनां ब्रह्मणो जातत्वाद् 'ब्राह्मणोऽस्य मुखम्' इतिवद्ब्रह्माभेदोपपत्तिः । किं च जीवस्य शुद्धचिदंशत्वं वा ईश्वरांशत्वं वा 'पादोऽस्य' इयादिना बोध्यते । नाद्यः । 'पादोऽस्य विश्वा भूतानि' इति श्रुताविदंशब्देन सहस्रशीर्षत्वादिविशिष्टप्रकृतेश्वरस्य, 'ममैवांशः' इति स्मृतौ चेश्वरप्रयुक्तास्मच्छब्देनेश्वरस्यैवोक्तेः । नान्त्यः । त्वन्मते ईशस्याप्युपहितत्वेन घटाकाशं प्रति करकाकाशस्येवेश्वरं प्रति जीवस्यांशत्वायोगात् । न च मठाकाशस्य घटेनेवेशोपाध्यवच्छिन्नमेव जीवोपाधिनावच्छिद्यत इति वाच्यम् । तथात्वे हि मुक्तस्य शुद्धब्रह्मत्वं न स्यात् । न च सहस्रशीर्षत्वाद्युपलक्षितमेव इदंपदेन परामृश्यत इति वाच्यम् । सहस्रशीर्षत्वादेर्धर्मान्तरोत्थापनेन व्यावर्तकत्वरूपोपलक्षणत्वस्य निर्विशेषं प्रत्यसंभवात् । सहस्रशीर्षत्वादेर्विशेषणत्वे बाधकाभावाच्च । 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत

वा कुमारी । त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः ॥ ' ' सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते । ' इत्यादौ ' सर्वे वेदा यत्पदमामनन्ति सर्वाणि नामानि यमाविशन्ति । ' इति श्रुत्यनुसारेण समन्वयोक्तरीत्या तत्तत्पदवाच्यत्वमेवेशस्योक्तम् । यथाश्रुताभेदस्य सर्वमानविरुद्धत्वात् । यथा हि भृत्यनिष्ठजयस्य राजाधीनत्वेन राजा जयतीति व्यवहारस्तथा स्त्रीशब्दादिप्रवृत्तिनिमित्तस्येशाधीनत्वेन तत्तत्पदानां तत्र मुख्यताप्रसिद्धिः । स्त्र्यादौ त्वमुख्यतया प्रयोगः । अस्तु वा विभक्तौ सप्तम्यर्थे लक्षणा, त्वदीयपदद्वयलक्षणापेक्षया लघुत्वात् ।

इति अंशत्वेनैक्यभङ्गः ॥ १२ ॥

## १३. जीवस्य प्रतिबिम्बत्वेनैक्यभङ्गः ।

ननु मुखप्रतिमुखवज्जीवब्रह्मणोरभेदसिद्धिः, जीवस्य प्रतिबिम्बत्वादिति चेन्न । दृष्टान्तासंप्रतिपत्तेः । चैत्रच्छाये भिन्ने इतिवच्चैत्रतत्प्रतिबिम्बे भिन्ने इत्येव पार्श्वे स्थितेन ग्रहणात्, स्वेनापि स्वकरतत्प्रतिबिम्बे भिन्ने इति ग्रहणाच्च । न च ग्रीवास्थं मुखं यत्सलक्षणकं प्रतिपन्नं दर्पणस्थमपि तथेत्यवधार्य तदेवेदं मुखमिति स एवायं कर इति च प्रतीतिरनुभवसिद्धेति वाच्यम् । चैत्रपादलेखाच्छाययोश्चैत्रस्य पादोऽयं चैत्रस्य शिरः इतिवत् काचित्कस्य बिम्बप्रतिबिम्बाभेदव्यवहारस्य गौणत्वात् । ' यथैषा पुरुषे छाया एतस्मिन्नेतदातता । छाया यथा पुंसदृशी पुमधीना च दृश्यते ।। एवमेवात्मकाः सर्वे ब्रह्माद्याः परमात्मनः । ' इत्यादिश्रुत्या तदधीनत्वे सति तत्सदृशत्वरूपं जीवस्येशप्रतिबिम्बत्वमुक्तम् । न च दर्पणादिप्रतिहता दृष्टिः स्वमुखमेव प्रतिगृह्णातीति वाच्यम् । दर्पणादेर्नेत्राभिघातमात्रोपक्षीणतया मलिनदर्पणप्रतिघातेन स्वच्छदर्पणप्रतिघातेन च मुखमालिन्यप्रतीत्यनुपपत्तेः । परावृत्य स्वमुखस्यैव ग्रहणे पार्श्वस्थस्य मुखद्वयं प्रतीत्ययोगाच्च । मणिदर्पणकृपाणेषु च विरुद्धरूपानेकमुखप्रतीतेरयोगाच्च । चक्षुःपरिवृत्तिप्रक्रियाया ब्रह्मप्रतिबिम्बे जीवेऽसंभवाच्च । दर्पणस्थत्वेनैव मुखानुभवाच्च । न च दर्पणस्थत्वानुभवो भ्रमः । नात्र रूप्यमासीदितिवन्नात्र प्रतिबिम्बमासीन्नात्र प्रतिमुखमासीदिति बाधाभावात् । किं चानादेर्जीवस्योपाध्यधीनत्वस्यासंभवात् । जीवस्य प्रतिबिम्बत्वबोधकमानं तु तदधीनत्वे सति तत्सदृशत्वपरं, तत्त्वं तु भेदव्याप्तमेव । उक्तं हि भगवता, ' अत एवोपमा सूर्यकादिवत् । ' इति । किं चोपाधि-

संबन्धो जीवे स्वाभाविक औपाधिको वा। आद्ये तस्य सत्यत्वापत्तिः, द्वितीयेऽनवस्थाद्यापत्तेः। वस्तुतस्तु बिम्बान्यूनसत्ताके ह्युपाधौ प्रतिबिम्बं लोके दृष्टम्। कथं ब्रह्मन्यूनसत्ताकाविद्यादौ प्रतिबिम्बम्। अन्यथा मरुमरीचिकाजलेऽपि सूर्यादिप्रतिबिम्बः स्यात्। न च दर्पणस्थनेत्रप्रतिफलितमुखादिस्थले व्यभिचारः। सोपाधिकारोपे दृष्टस्य स्वबाध्योपाधिकत्वस्यात्रासत्त्वेन तन्नेत्रदेशावच्छेदेन तन्मुखप्रतिफलनमित्यङ्गीकार्यत्वात्। वस्तुतस्तु प्रतिबिम्बस्य मिथ्यात्वासंप्रतिपत्तेर्वृथैव त्वत्प्रलापः। किं चैकदेशस्थितस्य देशान्तरस्थिते प्रतिबिम्बं, न तूपाध्यन्तर्गतस्य। न चाकाशस्य जले कथं प्रतिबिम्बम्। सदेशस्याकाशस्य जलाद्बहिर्भागस्यैव प्रतिबिम्बनात्। न ह्यविद्याद्युपाधिर्ब्रह्मैकदेशस्थः। किं चाकाशस्य प्रतिबिम्बमसिद्धम्। नक्षत्रादिप्रभामण्डलस्यैव जले प्रतिबिम्बनात्। अचाक्षुषाकाशप्रतिबिम्बस्य चाक्षुषत्वासंभवात्। अन्यथा वायुकालधर्मपिशाचादिप्रतिबिम्बस्यापि चाक्षुषतापत्तेः। 'रूपं रूपं प्रतिरूपो बभूव।' 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्।' इत्याद्यागमस्त्वन्तर्यामिपरः। रूपं रूपं जीवं जीवं प्रति तावद्रूपैराविर्भूतो बभूव। एकधा मूलरूपेण, बहुधान्तर्यामित्वादिनेत्यर्थः।

**इति जीवस्य प्रतिबिम्बत्वेनैवयभङ्गः ॥ १३ ॥**

Indira Gandhi National Centre for the Arts

## १४. जीवाणुत्वोपपत्तिः।

अणोर्जीवस्य व्यापकादीशाद्वास्तवो भेदः। न च 'नित्यः सर्वगतः' 'स वा एष महानज आत्मा' इत्यादिश्रुतेः, जीवो नाणुः, प्रत्यक्षत्वात् प्रत्यक्षगुणवत्त्वाच्च, घटवदित्याद्यनुमानाच्च जीवो व्याप्त एवेति वाच्यम्। सर्वत्र गमनं त्वणोरेव संभवात्। गुणगरिष्ठत्वादिना महत्त्वोपपत्तेश्च। न चाणुत्वे प्रत्यक्षत्वानुपपत्तिः। त्रसरेण्वतिरिक्तातीन्द्रियद्रव्यस्य नव्यतार्किकैरपि निराकृतत्वेन नित्यद्रव्यत्रसरेणोरेव प्रत्यक्षत्वोपपत्तेः। वस्तुतस्तु अणुजीवात्मनः स्वप्रकाशतया साक्षिस्वरूपेन्द्रियविषयतया च नित्यसाक्षिस्वरूपप्रत्यक्षस्य महत्त्वाभावेऽप्यसंभवे दोषाभावः। द्रव्यस्य जन्यप्रत्यक्षे महत्त्वस्य कारणत्वेऽपि नित्यसाक्षिप्रत्यक्षे कारणत्वाभावात्। 'अणुर्ह्येष आत्मा यं वा एते सिनीतः पुण्यं च पापं च।' 'बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते॥' इति श्रुतेः। न च श्रुतिर्दुर्विज्ञेयत्वपरा, ईशस्य दुर्विज्ञेयत्वेऽपि जीवस्य तदभावात्। जीवो न व्याप्तः,

उत्क्रान्तिमत्त्वाद्गतिमत्त्वात्, खगदेहवदित्यनुमानाच्च। न चासिद्धिः। ‘ सोऽस्माच्छरीरात्समुत्क्रम्यामुं लोकमधिगच्छति। अमुष्मादिमं लोकमागच्छति। ’ इत्यादिश्रुतेर्हेतुसिद्धेः। न च बुद्धिगतमुत्क्रमणादिकं श्रुत्योपहिते बोध्यते। श्रुतेर्भ्रान्तिहेतुत्वेनाप्रामाण्यापत्तेः। ‘ स एतान् ब्रह्म गमयति। ’ ‘ तत्र प्रयाता गच्छति ब्रह्म ब्रह्मविदो जनाः। ’ इत्यादिश्रुतिस्मृतिषु गतेर्मुक्तिसामान्याधिकरण्योक्तेः। न च व्यापकं ब्रह्म प्रति गमनमसंभवि। निःशेषाविद्यानिवृत्त्यर्थं लोकविशेषस्थभगवद्रूपविशेषप्राप्त्यर्थं गमनोक्तेः। ‘ तेन प्रद्योतेनैष आत्मा निष्क्रामति। ’ इत्यात्मनिष्ठत्वश्रुतेश्च। ‘ तद्यथा नः सुसमाहितमुत्सर्जद्यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जद्याति। ’ इति स्वाभाविकगत्याश्रयशकटदृष्टान्तोक्तेश्च। न च ‘एष’ इति बुद्ध्युपहितस्यैव परामर्शः। तद्बोधकपदाभावात्। ‘ मन उदक्रामन्मीलित इवाश्नन्पिबन्नास्ते वा। ’ इत्यादिश्रुतौ मनउत्क्रमणेऽपि आत्मनस्तदभावश्रवणाच्च। न चोपहितस्योपाधिनिबन्धनगतिमत्त्वेऽपि बुद्ध्यनुपहितस्य गत्यभावो न विरुद्धः। बुद्धिं विनैवाशनपानादिवद्गमनस्योपपत्तेः। ‘ विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्। ’ ‘ परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। ’ स तत्र पर्यैति जक्षन् क्रीडन् रममाणः। ’ इति श्रुतिषु मुक्तावपि गत्युक्तेः। एतेनोपाधिगत्योपहितगतिप्रयोग औपचारिक इति निरस्तम्। कृतहानाकृताभ्यागमाद्यापत्तेश्च। न च यद्बुध्यवच्छिन्नेन येनैवात्मना यत्कृतं तदवच्छिन्नस्य तस्यैव भोगः, आत्मनो निरवयवत्वान्निरंशत्वादेकत्वाच्चेति वाच्यम्। एकोपाधिनिर्मुक्तस्याप्युपाध्यन्तरोपहितत्वेनानिर्मोक्षप्रसङ्गात्। आत्मत्वमणुनिष्ठं द्रव्यत्वसाक्षाद्व्याप्यजातित्वात्, पृथिवीत्ववत्। न च व्यापकावृत्तित्वमुपाधिः। द्रव्यत्वसत्त्वादौ साध्याव्यापकत्वात्। न च तेनैव स्पर्शादिसामानाधिकरण्यमपि साध्यम्। भूतवृत्तित्वादेरुपाधित्वात्। जीवो न व्याप्तः, महाभूतेतरत्वे सति विशेषगुणवत्त्वे सत्यसर्वज्ञत्वात्, शब्देतरानित्यविशेषगुणाश्रयत्वात्, संस्काराश्रयत्वाच्च घटवत्। न चानात्मत्वमुपाधिः। उपाध्यभावेन साध्याभावस्य विभुत्वस्य साधनीयस्याहमिहैव सदने आसमिति धर्मिग्राहकेनाक्षेण बाधेनोपाधेरप्रयोजकत्वात्। विशेषगुणसंस्कारादीनामन्तःकरणोत्पन्नत्वेऽपि अविद्यासहकृतस्वामित्वादिना जीवधर्मत्वात्। न चैकस्याणोरेकदा व्यवहितदेशद्वयावच्छेदासंभवेन पादे मे सुखं, शिरसि मे वेदनेत्यादियुगपदनुभवविरोध इति वाच्यम्। गुणिनोऽणुत्वेपि गुणव्याप्त्या व्यापिसुखाद्यनुभवविरोधात्। आरुण्यादिरेकैकव्यक्तिरिति मते आरुण्यादेरिव जातिसमवायादेरिव च धर्मितोऽन्यत्र धर्मावस्था-

नोपपत्तेः। न च तद्वदेव व्यापकत्वापत्तिः। देहातिरिक्ते ज्ञानादिकार्यानुपलब्ध्या व्यापकत्वे मानाभावात्। गृहैकदेशस्थदीपस्य प्रभा यथा गृहव्यापिनी, तद्वज्ज्ञानादेर्देहव्याप्त्युपपत्तेः। न च प्रभा द्रव्यान्तरं, न गुणः। दीपे नष्टे क्षणचतुष्टयाद्यवस्थानापत्तेः। अस्तु वा द्रव्यमन्वयव्यतिरेकाभ्याम्। दीपधर्मस्य त्वनुभवसिद्धत्वात्। किं च वह्निं विहाय स्पष्टमौष्ण्यमुपलभ्यते। न च वह्निसमीपवर्त्यनुद्भूतरूपतेजसस्तदिति वाच्यम्। वह्नेरौष्ण्यस्यासिद्ध्यापत्तेः। न च बाधके सति सविधे तेजोन्तरकल्पनेऽपि दृश्यमानवह्नावनुभूयमानौष्ण्यस्पर्शे बाधकाभावेन तस्मिन् तेजोन्तरीयत्वं न कल्प्यमिति वाच्यम्। वह्निसमीपे कल्प्यस्याचाक्षुषस्य तेजस एवौष्ण्याश्रयत्वोपपत्तौ वह्नेस्तदाश्रयत्वकल्पने गौरवात्। जात्यादेरिवौष्ण्यस्य वह्निं विहायावस्थाने बाधकाभावाच्च। केतक्यादिगन्धस्य द्रव्यं विहायान्यत्र प्रसरणाच्च। न च केतक्यवयवगमनेन तदुपपत्तिः। द्रव्यक्षयापत्तेः। न च पुनरवयवान्तरप्रवेशात्तदक्षयः। अप्रामाणिकावयवान्तरकल्पनापेक्षया गुणस्यैव प्रसरणाङ्गीकारे लाघवात्। वस्तुतस्तु जलूकादिवत् संकोचविकासशाल्यन्तःकरणे सुखदुःखादिक्षेत्रे हस्तपादाद्यवच्छेदेनोत्पन्नसुखादिकमविद्यासहकृतस्वामित्वसंबन्धेन जीवे वर्तत इत्यहं सुखी दुःखी मम शिरसि सुखं पादे च वेदनेत्याद्यनुभवः योगिनः कायव्यूहे भोगश्च सूपपन्नः। आत्मनां व्यापकत्वे सर्वाणि शरीराणि सर्वस्यैव भोगायतनानि स्युः। सर्वशरीरेन्द्रियादीनां सदा सर्वात्मसंयुक्तत्वात्। कर्मणामपि साधारणदेहादिकृतत्वेनासाधारण्यायोगात्। अहंत्वारोपादेरपि नियामकमूलसंबन्धादेरभावे नैयत्यायोगात्। न च तवापीश्वरस्य व्यापकत्वेन शरीराणां तद्भोगजनकत्वं स्यादिति वाच्यम्। ईश्वरस्य भोगमात्रं प्रति स्वरूपायोग्यत्वात्। भोगयोग्यस्यैव ह्यायतनचिन्ता, न तु तदयोग्यस्य। न च चैत्रभोगजनकाङ्कुरादेस्तददृष्टजन्यत्वादात्मसमवेतस्य चादृष्टस्य साक्षादङ्कुरासंभवात् आत्मद्वारकसंबन्धो वाच्योऽतस्तस्य विभुत्वमिति वाच्यम्। चैत्रभोगाहेतोरप्यङ्कुरादेरात्मद्वारादृष्टसंबन्धेऽपि तदजन्यत्वेन तस्यातन्त्रत्वात्। विम्वाकाशस्थशब्देऽदृष्टस्यात्मद्वारकसंबन्धासंभवाच्च। न च जनकादृष्टनिरूपितात्मद्वारकसंनिकर्षस्यातिप्रसङ्गाभावेन तन्त्रत्वम्, जनकता त्वदृष्टस्य फलोन्नेयेति वाच्यम्। प्रतियोग्यभावज्ञानज्ञेयवाच्यवाचकेच्छेष्यमाणकृतिकार्यादीनामिवाणुनिष्ठादृष्टस्यैव संबन्धान्तरस्याङ्कुरादौ कल्प्यत्वात्।

न च ' बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः । ' इति श्रुतौ बुद्धिगुणेनाराग्रमात्रं, स्वाभाविकं च विभुत्वमुक्तमिति वाच्यम् । आत्मगुणेनाराग्रमात्रः बुद्धेर्गुणेनावर इति योजनात् । 'यथाणुर्न चक्षुषः प्रकाशोऽव्याप्त एवमेवास्य पुरुषस्य प्रकाशोऽव्याप्तः, अणुर्ह्येवैष पुरुषः । ' इत्यादिश्रुत्यनुग्रहाद्व्यवहितयोजनस्यादोषत्वात् ।

इति जीवाणुत्वोपपत्तिः ॥ १४ ॥

## १५. सदनन्तगुणे ब्रह्मणि प्रमाणम् ।

नन्वस्तु जीवभिन्नः परेशस्तस्य गुणानन्त्ये मानाभाव इति चेन्न । ' यः सर्वज्ञः सर्ववित् ' ' यस्य ज्ञानमयं तपः ' ' बृहन्तो ह्यस्मिन् गुणाः' इत्यादिश्रुतेः, ' ब्रह्मेशानादिभिर्देवैः समेतैर्यद्गुणांशकः । नावसाययितुं शक्यो व्याचक्षाणैश्च सर्वदा ॥ ' ' यो वा अनन्तस्य गुणाननन्ताननुक्रमिष्यन् स तु बालबुद्धिः । ' इत्यादिस्मृतेश्च मानत्वात् । ननु ' जर्तिलयवाग्वा जुहुयाद्गवीधुक् यवाग्वा जुहुयात् ।' इत्यादौ जर्तिलयवाग्वादेर्होमसाधनत्वस्य ' अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च । ' इति निन्दायाश्च बोधकस्य ' अजक्षीरेण जुहोति । ' इति विध्येकवाक्यतया न तत्परत्वं, किं तु स्तावकत्वं यथा, तथैव क्वचिदुपास्तिवाक्यशेषतया क्वचिन्निषेधवाक्यशेषतयोपपत्त्या न गुणविधाने तात्पर्यं सगुणवाक्यस्येति चेन्न । ' यः सर्वज्ञः सर्ववित् ' इत्यादेरुपास्तिनिषेधवाक्यसांनिध्याभावेन गुणविधाने तात्पर्यावश्यकत्वात् । जर्तिलादीनां यागसाधनताया इव व्यावहारिकगुणानामप्यसिद्ध्याप्तेश्च । किं च श्रुतिप्राप्तस्य श्रुत्यादिनिषेधे अहिंसावाक्यमग्नीषोमीयहिंसाया, अग्रहणवाक्यं च षोडशिग्रहणस्य, ' असद्वा ' इत्यादिवाक्यं ब्रह्मसत्त्वस्य निषेधकं स्यात् । न च श्रुतिप्राप्तत्वं न तत्प्रसक्तमतिप्रसङ्गात्, किं तु तत्प्रमितत्वं, तच्च प्रकृते नास्तीति वाच्यम् । मानान्तराप्राप्तगुणबोधकत्वेऽप्यप्रामाण्ये तद्दृष्टान्तेन वेदमात्रस्यैवाप्रामाण्यापत्तेः । ' मत्तः परतरं नान्यत् किंचिदस्ति धनंजय । ' ' परः पराणाम् ' इत्यादिस्मृत्या सगुणात्परस्योत्कृष्टस्य निषेधः । सगुणे परादपि परत्वं हि स्पष्टमुक्तम् । न च जडापेक्षया परं किंचिज्जडं, तदपेक्षया परः सर्वज्ञः शुद्धापेक्षया चापर इति वाच्यम् । सर्वज्ञभिन्ने शुद्धे मानाभावात् । ' वेदैश्च सर्वैरहमेव वेद्यः ' इति स्मृत्या सगुणस्यैव सर्ववेदवेद्यत्वोक्तेः । अन्यथा ' सदेव सोम्येदमग्र आसीत् । ' ' असद्वा इदमग्र आसीत् । ' इति श्रुती परापरब्रह्मविषये स्याताम् । न

च इदम् इति प्रपञ्चस्य प्रकृतत्वेन प्रपञ्चस्यैव कारणात्मना सत्त्वं, कार्यरूपेणासत्त्वमिति वाच्यम् । त्वन्मते प्रपञ्चे अबाधितार्थकसत्पदस्यास्वारस्यात् सदेवेत्यादिसत्पदस्य प्रधानभिन्नजगत्कारणब्रह्मपरताया ईक्षत्यधिकरणे त्वया स्थापितत्वात् । किं च ग्रहणाग्रहणवाक्ये अपि परापरयागविषयके स्याताम् । न चैन्द्रवायवं गृह्णाति । ' इत्यादिवत् षोडशिग्रहणवाक्यस्य यागपरत्वेऽप्यग्रहणवाक्यस्य तदभावबोधकतया न यागविषयकत्वमिति वाच्यम् । त्वदभिमतनिर्गुणवाक्यस्यापि गुणाभावमात्रपरत्वेन परब्रह्मपरत्वाभावात् । न च सगुणवाक्यं व्यावहारिकगुणपरं, निर्गुणवाक्यं तात्त्विकनैर्गुण्यपरम् । ' असन्नेव स भवत्यसद्ब्रह्मेति वेद चेत्। ' इति श्रुतिर्नासत्त्वनिन्दार्था किं तु शून्यतापत्तिरूपपरममोक्षपरेत्यापत्तेश्च । न च शून्यता न पुरुषार्थः, किं त्वानन्दप्राप्तिरेव । त्वन्मते स्वरूपभिन्नानन्दावाप्त्यादेरभावात् । किं च ' विकारशब्दान्नेति चेन्न प्राचुर्यात्। ' 'उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ।' ' गौण्यसंभवात् ' इत्यादौ शास्त्रयोर्विरोधे तात्त्विकार्थान्तरपरतोक्ता, न त्वारोपितार्थकता । अन्यथेक्षत्याद्यधिकरणेषु सिद्धान्तसाधकानामीक्षणादीनां सांख्याद्यभिमतप्रधानादावारोपसंभवेन प्रधाननिराकरणादिकं न सिध्येत् । न च सदृश एवामात्यादौ राजत्वारोपो दृश्यते, न तु स्तम्भादाविति चेतन एवेक्षितृत्वदर्शनाच्चेतने ब्रह्मणि तदारोपो युज्यते, नाचेतने प्रधान इति वाच्यम् । ' नामब्रह्मोपासीत। ', ' योषितमग्निमुपासीत । ' इत्यादौ विसदृशे नामयोषिदादौ ब्रह्मत्वाग्नित्वाद्यारोपदर्शनात् । न च विश्वकर्तृत्वादिनाक्षिप्तसार्वज्ञ्यादिकः ' यः सर्वज्ञः ' इत्यादिना निषेधायानूद्यत इति वाच्यम् । जगदारोपाधिष्ठानत्वेनाक्षिप्तस्य ब्रह्मसत्त्वस्य ' असद्वा इदमग्र आसीत् । ' इति निषेधाय ' सदेव सोम्य ' इत्यादेरनुवादकतापत्तेः । व्यावहारिकगुणानामप्यसिद्ध्यापत्तेश्च । न हि निषिद्धे ब्राह्मणहननादाववान्तरतात्पर्यमस्ति । न च देवताविग्रहादौ विधिस्तुतिद्वारतयोपात्ते मानान्तरप्राप्तिविरोधयोरभावात् तदत्यागमात्रेण तदसिद्धिवदत्रापि निषेधोपाधिकतयोपात्तस्य सार्वज्ञ्यादेर्मानान्तरादप्राप्तस्य व्यावहारिकमानाविरुद्धतया व्यवहारदशायामत्यागमात्रेण व्यावहारिकत्वोपपत्तिरिति वाच्यम् । मानान्तरेणाप्राप्तौ निषेधायानुवादकत्वोक्तेस्तुच्छत्वात् । अनिषिद्धस्य देवताविग्रहादेर्व्यावहारिकत्वसिद्धावपि श्रुतिनिषिद्धस्य तदसंभवाच्च । मानानां व्यावहारिकत्वादिव्यवस्थायास्त्वद्दुराशामात्रत्वाच्च । नैर्गुण्यस्य ब्रह्मभिन्नस्य व्यावहारिकत्वाच्च । तदभिन्नस्य नित्यसिद्धत्वेन शास्त्राप्रमेयत्वात् । तज्ज्ञानस्य गुणाविरोधित्वाच्च । सार्वज्ञ्यादेर्विश्वकर्तृत्वादिना-

क्षेपसंभवेऽपि 'आनन्दं ब्रह्मणो विद्वान् न बिभेति' इत्याद्युक्तानन्दादेः सार्वज्ञ्याद्याक्षेपककर्तृत्वादेश्चानाक्षेपेण तद्बोधकस्यानुवादकत्वासंभवात् न वान्यशेषतयोपात्ते सार्वज्ञ्यादौ तात्पर्ये वाक्यभेदः। अनुपासनानिषेधप्रकरणस्थस्य 'यः सर्वज्ञः' इत्यादेरन्यशेषत्वासिद्धेः। न च तटस्थलक्षणद्वारा ब्रह्मबोधे तात्पर्यं, न विशेषण इति वाच्यम्। शाखोपस्थाप्यचन्द्रनिष्ठप्रकाशस्येव निर्विशेषे सार्वज्ञ्योत्थाप्यधर्मान्तराभावात्तटस्थत्वासंभवात्। किं च 'व्यतिहार' इति सूत्रे 'तद्योऽहम्' इति श्रुत्युक्तस्य जीवे ईश्वरत्वस्येश्वरे वा जीवत्वस्योपास्यतयोत्तरतापनीयादौ निर्गुणोपास्तेरुक्तत्वेपि यथैक्यस्य निर्गुणस्य च सिद्धिस्तथा सत्यकामत्वादेस्तात्त्विकतासिद्धिः। भाषितं हि त्वयैव 'व्यतिहार' इति सूत्रे 'यथा ध्यानार्थेऽपि सत्यकामत्वाद्युपदेश इव तद्गुण ईश्वरः सिध्यति तद्वदैक्यम्।' इति। न च जीवे ईश्वराभेदध्यानस्येश्वरे जीवाभेदध्यानस्योपासनाप्रकरणपठितस्यापि जीवेशाभेदः सगुणोपासनयापि दृढीकार्य इत्येवंपरतयैक्यस्योपासाविषयत्वेऽपि सत्यकामत्वादिवन्नातात्त्विकत्वमिति वाच्यम्। वैषम्ये मानाभावात्। 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः।' इत्यादिना सत्यकामत्वादिविशिष्टस्य जिज्ञास्यत्वोक्तेश्च। न चोत्तरतापनीयोक्तोपास्तिर्ज्ञानरूपा, उपास्तेर्विशिष्टविषयकत्वेन निर्विशेषे तदसंभवादिति वाच्यम्। शाब्दज्ञानस्यापि विशिष्टविषयकत्वनियमेन निर्विशेषज्ञानस्याप्यसंभवात्। किं च ब्रह्मणि कर्तृत्वादीनामारोप्योपास्यत्वे नाम्नि ब्रह्मवाक्यानामिव ब्रह्मण्यपि कारणवाक्यानां समन्वयस्यावक्तव्यत्वेन समन्वयाद्यध्यायानारम्भः स्यात्। न च नाम्नो ब्रह्मविकारत्वेनासमन्वयेऽपि ब्रह्मणोऽविकारतया मुमुक्षुज्ञेयत्वेन कारणवाक्यानां तटस्थलक्षणकर्तृत्वद्वारा तत्र तात्पर्यात् समन्वयाद्यावश्यकतेति वाच्यम्। ब्रह्मणो मुमुक्षुज्ञेयत्वेऽपि कर्तृत्वादीनामुपास्यानां तदनिष्ठानामप्युपासासंभवेन तत्समन्वयस्यानपेक्ष्यत्वात्। 'य आत्मा अपहतपाप्मा' इत्यारभ्य 'सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इति सत्यकामत्वादीनामपहतपाप्मत्वादिभिः सह जिज्ञास्यत्वश्रवणेन ज्ञेयत्वाच्च। न चापहतपाप्मत्वादीनां स्वरूपतया जिज्ञास्यत्वेऽपि स्वरूपबहिर्भूतानां सत्यकामत्वादीनां न जिज्ञास्यत्वम्। स्वरूपस्याज्ञानादिसाक्षितया नित्यसिद्धत्वाज्जिज्ञासासंभवात्। धर्मिणि संशयासंभवात्तदज्ञाने बुभुत्सायोगाच्च। 'एष सर्वेश्वर एष भूतपतिः' इत्यादिधर्मानुक्त्वा 'तेषां तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति।' इति मुमुक्षुज्ञेयत्वोक्तेः। 'यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि।' इत्युक्त्वा 'तद्विज्ञानेन परिपश्यन्ति धीराः।' इत्यपरोक्षप्रमा-

Indira Gandhi National

विषयत्वोक्तेः । ‘ तुरीयं सर्वदृक् सदा । ’ इति तुरीयसार्वज्ञ्यादिश्रुतेश्च सार्वज्ञ्यादीनां पारमार्थिकत्वसिद्धेः । किं चापहतपाप्मत्वादीनामुपास्यत्वे तेषां भूताकाशेऽपि संभवेन दहराकाशस्य ब्रह्मत्वप्रतिपादकदहराद्यधिकरणविरोधः स्यात् । न च पापाभावस्याकाशे संभवेऽपि चेतनधर्मस्य सत्यकामत्वादेरसंभवः, नाम्नि ब्रह्मत्ववाकाशेऽस्ये धीपूर्वकतदारोपसंभवात् । ‘ सत्यः सोऽस्य महिमा ’ इति सत्यत्वश्रुतेश्च । किं च ‘ पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति । ’ ‘ यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ ’ इत्यादिश्रुतिषु, ‘ यो मामशेषदोषोज्झं गुणसर्वस्वबृंहितम् । जानात्यस्मै प्रसन्नोऽहं दद्यां मुक्तिं न चान्यथा ॥’ ‘भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ ’ इत्यादिस्मृतिषु च सगुणज्ञानादेव मोक्षोक्तेः । न चायमवान्तरमोक्षः । पुण्यादिराहित्यस्य निरञ्जनत्वादेश्च परममुक्तावेव संभवात् । न च सगुणज्ञानस्य फलान्तरश्रवणान्न मोक्षहेतुत्वं, ‘नास्याब्रह्मवित् कुले भवति ।’ इति निर्गुणज्ञानस्यापि फलान्तरश्रवणात् । ‘संयोगपृथक्त्वन्यायेनोभयपरत्वस्य प्रकृतेऽपि साम्याच्च । अन्यथा निर्गुणधीजन्यमोक्षोऽवान्तरः, ‘ असन्नेव स भवति ’ इत्युक्तशून्यतापत्तिरूपः परममोक्षः स्यात् । न च शून्यं न सुखरूपं, सुखित्वस्यैव पुरुषार्थत्वेन सुखरूपतायाः शून्यरूपताया इवापुरुषार्थत्वात् । किं च ‘ अन्तस्तद्धर्मोपदेशात् । ’, ‘ विवक्षितगुणोपपत्तेश्च ।’, ‘अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ।’, ‘ अदृश्यत्वादिगुणको धर्मोक्तेश्च । ’ इत्याद्यधिकरणेष्वादृतत्वेन गुणानां सत्त्वम् । न चारोपितमादायोपपत्तिः । आरोपितगुणसंबन्धस्य जीवादावसंभवेन ‘ भेदव्यपदेशाच्चान्यः ।’, ‘शारीरश्च’ इत्यादिना तन्निरासानुपपत्तेः । न चानुभूतिः निर्विशेषानुभूतित्वादिति व्यतिरेकानुमानं बाधकम् । निर्विशेषत्वानुभूतित्वयोर्व्याहतत्वात् । न च निर्विशेषत्वादिकं न ब्रह्मभिन्नमित्यव्याघातः, हेतुसाध्यभागासंभवात् स्वरूपस्य नित्यसिद्धत्वेनानुमानवैयर्थ्याच्च । तन्मात्रज्ञानस्य विशेषाविरोधित्वाच्च । न च विशेषत्वमभावप्रतियोगितावच्छेदकमभावप्रतियोगिमात्रवृत्तित्वात् घटवदित्यनुमानं मानम् । स्वोपरक्तबुद्धिजनकत्वरूपविशेषत्वस्य वाच्यत्वादौ केवलान्वयिसत्त्वेन पक्षे हेतोरसत्त्वात् । व्यावर्तकत्वरूपविशेषत्वस्य पक्षत्वे ब्रह्मणि धर्ममात्राभावासिद्ध्यापत्त्यार्थान्तरत्वात् । विशेषाभावस्यैव विशेषत्वेन व्याघाताच्च । न च गुणानां भिन्नत्वे असंबद्धत्वे च धर्मधर्मिभावहानिः, संबद्धत्वे च तत्संबन्धोऽपि भिन्न इत्यनवस्थेति वाच्यम् । व्यावहारिकेष्वनुपपत्तेस्त्वयापि समाधेयत्वात् । अन्यथाविरोधाध्यायस्या-

नारम्भापातात् । जीवप्रकृत्यादिकर्तृत्वादिनिरासकेक्षत्याद्यधिकरणानामुच्छेदापत्तेश्च । अघटघटनापटीयस्याविद्यया सर्वोपपादने परेशेऽचिन्त्यशक्त्या सत्यानामेव तथोपपत्तेः । न च ज्ञानादेर्धर्मत्वे स्वरूपस्य जडत्वाद्यापत्तिः । मानबलेनोभयोरपि ज्ञानत्वाद्युपपत्तिः । न च धर्मज्ञानेनैव व्यवहारोपपत्तौ धर्मिणो ज्ञानत्वादिकं न स्यात् । प्रमाणेन प्रयोजनमुखानिरीक्षणात् । पार्थिवयोः पुरुषदण्डयोः पुरुषत्वादिवत् । आत्मत्वगुणत्वादिज्ञानादिरूपयोरपि धर्मिधर्मयोर्भेदोपपत्तेः । अहिकुण्डलन्यायेन गुणगुणिनोरभेदेऽपि भेदप्रतिनिधिविशेषेण भेदव्यवहारोपपत्तेश्च । विशेषं विनैकस्यैव निर्धर्मकस्य सच्चिदानन्दादिव्यवहारानुपपत्तेः । किं च निर्विशेषत्वस्यापि विशेषत्वेन विशेषत्वस्य भावाभावाभ्यां मूकोऽहमितिवद्व्याघातः । न च निर्विशेषत्वस्य विशेषत्वेनैव रूपेण निषेधोऽद्वितीयवाक्येन द्वितीयाभावरूपद्वितीयनिषेधवदुपपन्नोऽन्यथा विशेषत्वावच्छिन्ननिषेधप्रतीत्यनुपपत्तिरिति वाच्यम् । स्वविहितद्वितीयाभावस्य स्वेनैव निषेधे व्याघातेन दृष्टान्तासिद्धेः । अतिप्रसक्तस्य द्वितीयत्वादेर्निषेध्यत्वानवच्छेदकत्वाच्च । द्वितीयत्वेन निषेधे अभावत्वेन चानिषेधे ब्रह्मण एवाभावत्वापत्तेः । तज्ज्ञानस्य च द्वैताविरोधित्वेन तत्सत्त्वोपपत्तेः । न हि भूतलज्ञानं घटतदभावान्यतरधीविरोधि । किं च ब्रह्मणः शून्यानिर्वाच्यव्यावर्तकविशेषाभावे शून्यत्वमिथ्यात्वाद्यापत्तिस्तत्सत्त्वे तु सविशेषत्वमेव । न च व्यावर्त्यसमानसत्ताकविशेषाभावेऽपि व्यावृत्तिबोधसमसत्ताकधर्मेण भिन्नत्वनिर्विशेषत्वयोरुपपत्तिरिति वाच्यम् । मुक्तौ व्यावृत्तिबोधसमसत्ताकस्यापि धर्मस्याभावेन तदानीं शून्याद्यभेदापत्तेः । किं च ब्रह्मणो निर्विशेषत्वे विचारविषयत्वानुपपत्तिः । इदमित्थमिति ज्ञानं जिज्ञासायाः प्रयोजनम् । इत्थंभावो हि धर्म एव । न च विचारकाले कल्पिता धर्माः सन्ति । केनचिद्रूपेण ज्ञातं रूपान्तरेण चाज्ञातं ह्यधिष्ठानम् । अज्ञानकल्पितस्याज्ञानाविषयत्वेन तदकल्पिताः सत्या एव धर्मा आरोपार्थं स्वीकार्याः । ब्रह्म स्वज्ञानाबाध्यप्रकारवत्, स्वारोपितव्यावर्तकज्ञानाबाध्यप्रकारवद्वा । अधिष्ठानत्वात् । शुक्तिवत् । ब्रह्म स्वज्ञानाबाध्यदुःखव्यावर्तकधर्मवत् । दुःखानात्मकत्वात् । घटवत् । ब्रह्म स्वज्ञानाबाध्यप्रकारविशेष्यम्, संदिग्धत्वाद्विचार्यत्वात्, निर्णेतव्यत्वाद्वा । स्थाणुवत् । ब्रह्म वेदान्ततात्पर्यगोचरप्रकारवत् । वेदान्तविचारविषयत्वात् । यदेवं तदेवं, यथा कर्मकाण्डविचारविषयो धर्मः । ईश्वरः सदाप्तःसमस्तकल्याणगुणः, सदा तत्प्रेप्सुत्वे सति तत्र शक्तत्वात् । ईश्वरः सदा त्यक्तसमस्तदोषः, सदा तज्जिहासुत्वे सति तत्त्यागे शक्तत्वात् । यश्चैवं स तथैव, यथा चैत्र इत्याद्यनुमानमपि मानम् ।

न च दृष्टान्तसमसत्ताकधर्मसिद्धौ सिद्धसाधनं, पक्षसमसत्ताकधर्माप्रसिद्ध्या साध्याप्रसिद्धिरिति वाच्यम्। स्वपदस्य समभिव्याहृतपरत्वेन दृष्टान्ते तत्समसत्ताकस्य पक्षे तत्समसत्ताकस्य च धर्मस्य सिद्ध्योक्तदोषाभावात्। न चानुमाने शब्दस्वभावोपन्यासोऽनुपयुक्तः, परार्थानुमाने पञ्चावयवसत्त्वेन शब्दस्वभावोपन्यासस्योपयोगात्। न च वेदान्तावान्तरतात्पर्यमादाय सिद्धसाधनं, मुख्यतात्पर्योक्तौ च वेदान्तमुख्यतात्पर्यविषयप्रकाराप्रसिद्ध्या साध्याप्रसिद्धिरिति वाच्यम्। यद्यद्विचारविषयीभवति तत्तच्छब्दतात्पर्यविषयप्रकारवदिति सामान्यव्याप्त्यानुमानप्रवृत्तेः। त्वदीयाभेदानुमानवच्छुद्धस्यैव पक्षत्वान्न विशिष्टसमसत्ताकधर्ममादाय सिद्धसाधनादिकम्। न च कल्याणगुणानां नित्यत्वेन तत्र प्रेप्सानुपपत्तिः। सदैकाकारतया तत्स्थापने नित्येच्छासत्त्वात्। एवं हीनानामेव नित्यजिहासोपपत्तेश्च। अधिष्ठानत्वसंदिग्धत्वाद्यनुपपत्त्यादेरनुकूलतर्कत्वाच्च। मृषाधर्मस्याज्ञानाविषयत्वेनाधिष्ठानत्वप्रयोजकस्याज्ञातधर्मस्य तात्त्विकनियमात्।

इति सदनन्तगुणे ब्रह्मणि प्रमाणम् ॥ १५ ॥

## १६. निर्विशेषे प्रमाणभङ्गः।

त्वन्मते जातिगुणक्रियादिरूपनिमित्ताभावेन तत्र वेदान्तानां न मुख्यवृत्तिः। आरोपितनिमित्तविषयकप्रतीतेर्निर्विशेषे न हि प्रामाण्यं, गौण्याश्च मुख्यार्थगुणयुक्ततयैव, लक्षणायाश्च शक्यार्थसंबन्धितावच्छेदकरूपवत्तयैव स्वार्थोपस्थापकत्वेन निर्विशेषे वृत्तिमात्रायोगान्न निर्विशेषे पदविधया वाक्यविधया चोपनिषन्मानम्। न च संसर्गबोधकवाक्यपदानां नियमेऽप्यखण्डार्थकवाक्यस्थपदैर्लक्षणया बोधजननेन तन्नियमः। अखण्डार्थकवाक्यस्यालीकत्वात्। न च वृत्तिं विनापि सुप्तोत्थापकवाक्यस्येव वेदान्तवाक्यस्य निर्विशेषे प्रामाण्यमिति वाच्यम्। सुषुप्तौ ज्ञानसामान्यसामग्र्यभावेन शाब्दबोधस्यासंभवात्। तत्सत्त्वे वृत्तिज्ञानस्यापि संभवाच्च। भेर्यादिशब्दवन्निद्राभङ्ग एवं शब्देन बोधो हि जागरे सति हेत्वन्तरेण। किं च निर्विशेषविषयकज्ञानस्य निष्प्रकारकत्वे निर्विशेषत्वासिद्ध्या तत्सिद्ध्यर्थं विशेषाभावरूपविशेषविषयत्वमावश्यकम्। न च विशेषाभावस्य स्वरूपतया तत्स्फूर्तौ प्रमाणं नापेक्ष्यत इति वाच्यम्। अप्रामाणिकस्वीकारस्यातिप्रसङ्गात्। शशशृङ्गादीनामपि सिद्ध्यापत्तेश्च।

इति निर्विशेषे प्रमाणभङ्गः ॥ १६ ॥

## १७. ईश्वरस्य नित्यविग्रहोपपत्तिः ।

विविधविचित्रविश्वकर्ता नित्यविग्रह ईश्वरः। अदृष्टाद्यभावेन जन्यविग्रहासंभवात् । अविग्रहस्य कर्तृत्वासंभवाच्च । न च तत्र मानाभावः । ‘ आदित्यवर्णस्तमसः परस्तात्। ’ ‘ यदा पश्यः पश्यते रुक्मवर्णम् ’ ‘ ऋतं सत्यं परं ब्रह्म ’ ‘ पुरुषं कृष्णं पिङ्गलम् ’ ‘विश्वतश्चक्षुः’ ‘ सहस्रशीर्षा पुरुषः ’ इत्यादिश्रुतेः । ‘पश्य मे पार्थ रूपाणि’ ‘सर्वतः पाणिपादं तत्’ इत्यादिस्मृतेः । ब्रह्म सविग्रहं स्रष्टृत्वात्पालयितृत्वादुपदेष्टृत्वादित्याद्यनुमानाच्च । न चोपासापराण्युक्तवाक्यानि । ‘ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते ’ इत्यत्र वर्तमानत्वेनापरोक्षज्ञानविषयत्वेन चोक्तेः । न हि योषित्यग्निर्दृश्यत इत्युच्यते । न च विराट्रूपमिदं, ‘तमसः परस्तात्’ इति प्रकृतिपरतोक्तेः। न च ‘सर्वतः पाणिपादम्’इत्यादिकं सर्वात्मकतया सर्वान्तर्यामितया च नियम्यजीवपाण्यादिपरं, सर्वतः पाणिपादत्वादेरसंभवादिति वाच्यम् । जीवपाण्यादौ लक्षणायां मानाभावात् । पाण्यादेश्चक्षुरादिसर्वाङ्गकार्यकरत्वपरत्वात् । ‘तदेवानुप्राविशत्। ’ ‘ ब्रह्मविदाप्नोति परम्। ’इत्यादिश्रुत्युक्तस्य सर्वगते प्रवेष्टृत्वस्य गम्यत्वस्य विग्रहं विनानुपपत्तेश्च । ‘ तमेवं विद्वानमृत इह भवति ’ ‘ यदा पश्यः ’ इत्यादिश्रुतौ पूर्वप्रक्रान्तसहस्रशीर्षत्वादिविशिष्टपरामर्शकतच्छब्दयुक्तवाक्येन विग्रहज्ञानस्यैव मोचकत्वोक्तेः । ‘अपाणिपादो जवनो ग्रहीता ’ इत्यादिश्रुतिः प्राकृतपाण्यादिराहित्यपरा । ‘ सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः। ’ इति वैष्णवोक्तेः । ‘नाभ्या आसीदन्तरिक्षम्’ इति भूतकारणत्वोक्त्या अभौतिकत्वसिद्धेः । ‘ एको नारायण आसीन्न ब्रह्मा न च शंकरः।’ इति श्रुत्या महाप्रलये नारायणस्थित्युक्त्या नित्यविग्रहसिद्धेश्च । न च नारायणशब्दो मायोपहितब्रह्मपरः । विग्रहविशिष्टे योगरूढत्वात् । मायोपहितस्य शंकरादिसाधारण्याच्च । ‘ पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं शेते ’ इति श्रुत्या प्रलये विग्रहोक्तेश्च । न च ब्रह्माण्डस्य तदुदरप्रवेशमात्रेण प्रलयोऽसिद्धः । ‘ यथोर्णनाभिः सृजते गृह्णते च ’ इत्यादिश्रुत्योर्णनाभिवदुदरप्रवेशस्यैव प्रलयत्वोक्तेः । ‘ संहृत्य सर्वं निजदेहसंस्थं कृत्वाप्सु शेते जगदन्तरात्मा। ’ इति स्मृतेश्च । ‘ वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि । तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तौ महामुने ।। यस्मिन्प्रयुज्यमाने तु गुणयोगः सुपुष्कलः । तत्रैव मुख्यवृत्तोऽयमन्यत्र ह्युपचारतः।।’ इति गारुडे विग्रहस्य मुख्यब्रह्मशब्दार्थत्वोक्तेश्च । ‘ आनन्दरूपममृतं यद्विभाति ।’ ‘ आप्रणखात्सर्व एवानन्दः। ’ ‘यदात्मको भगवांस्तदात्मिका व्यक्तिः। ’ ‘किमात्मको भगवान्, ज्ञानात्मक ऐश्वर्यात्मकः । ’ इत्यादिश्रुतेर्भेदाभावेऽप्यहिकुण्डलन्यायेन विग्रहत्वोपपत्तिः ।

षोडशसहस्रसंख्याकानां विवाहे एकस्मिन्नेव मुहूर्ते वसुदेवादीनां स्वस्य चानेकत्वव- देकस्यानेकरूपत्वोपपत्तेः । 'अणोरणीयान् महतो महीयान् ' इत्यादिश्रुतेरणुत्वमहत्त्वा- दिकमपि तत्रास्ति । 'स्वाभाविकी ज्ञानबलक्रिया ' इत्यादिश्रुत्युक्ता क्रियापि तत्रोपपन्ना । अङ्कादिस्थस्य मुखे ब्रह्माण्डादिकं पश्यतां श्रीयशोदार्जुनादीनां प्रत्यक्षमप्यणुत्वमहत्त्वयोर्मानम् । न हि परमाप्तेन स्वैकशरणा मिथ्यार्थं प्रदर्श्य प्रतारणीयाः । विरोधस्त्वचिन्त्यशक्त्या परिहार्यः । 'आत्मनि चैवं विचित्राश्च हि । ' इति सूत्रात् । 'विचित्रशक्तिः पुरुषः पुराणः ' इत्यादि- स्मृतेश्च । न चाज्ञत्वादिकमपि तत्रास्तु । अज्ञत्वस्य विरोधोपापादकैश्वर्य- विरोधित्वात् । ऐश्वर्याविरोधिनामेव हि परस्परविरुद्धानामचिन्त्यशक्त्या समावेश उपपाद्यः । यत्तु 'भगवद्विग्रहो न नित्यो, महत्त्वे सति रूपवत्त्वात् विग्रहत्वादस्मद्वि- ग्रहवत् ।'इति गौडाधमप्रलापस्तन्न । प्राकृतत्वस्योपाधित्वात् । न च साधनव्यापकः, भोगादृष्टाद्यभावेन धर्मिग्राहकमानेन नित्यविग्रहस्यैव सिद्धेः । अप्रामाणिकप्राग- भावध्वंसकल्पनागौरवाच्च । 'प्रकृतिं पुरुषं चापि प्रविश्यात्मेच्छया हरिः । क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययौ ।। ' इति प्रकृतिक्षोभात्प्राग्विग्रहोक्तेः । 'मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् । तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्॥ ' 'सुदुर्दर्शमिदं रूपं दृष्टवानसि मां यथा(यन्मम?) । देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ।। नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ।। भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ।। ' इति स्मृत्या ज्ञेयत्वं मुक्तप्राप्यत्वं चोक्तम् । अवतारविग्रहा अपि नित्या एव । तथा हि । अन्तरतः 'कूर्मं सर्पं तम् ' इत्यारभ्य 'पूर्वमेवाहमिहासम् ' इति स्मृतेः । उत्पत्तिरप्याविर्भाव एव, 'ततोऽवबोधायाच्युत- भानुना देवकीसंध्यायामाविर्भूतमहात्मना ' इति वैष्णवोक्तेः । यत्तु क्वचिदवतार- विग्रहे क्षतरुधिरादिकं विग्रहत्यागश्चेति, तदसुराणां मोहाय सदृशदेहान्तरं सृष्ट्वा तद्विसर्जनम् । रोदनादिकमपि तदर्थमेव । हरिलोकोऽपि रमादीनां क्रीडार्थं नित्योऽस्ति । ' सहस्रस्थूणे वितते दृढे उग्रे यत्र देवानामधिदेव आस्ते । क्षयं तमस्यो रजसः पराके योऽस्याध्यक्षः परमे व्योमन् ।। ' ' तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । ' ' यत्र पूर्वे साध्याः सन्ति देवाः । ' ' तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।' इति श्रुतेः । ' श्लोकं वैकुण्ठनामानं दिव्यं षाड्गुण्यसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ।। ' इति पाञ्चरात्रोक्तेः । ' न देवा अपि

पश्यन्ति सर्वतेजोमयं शुभम् । अत्यर्कानलदीप्तं तत्स्थानं विष्णोर्महात्मनः ॥ ' इति भारतोक्तेश्च ।

इतीश्वरस्य नित्यविग्रहोपपत्तिः ॥ १७ ॥

## १८. निमित्तोपादानत्वभङ्गः ।

ईश्वरो विश्वस्य कर्तृरूपनिमित्तकारणं, प्रधानमुपादानं, कालादिसहकारिकारणम् । ' निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि । ' ' मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । ' इति स्मृतेः । न चोपादानं, विकारापत्तेः । न च तात्त्विकान्यथाभावरूपविवर्तोपादानत्वं ब्रह्मणोऽङ्गीक्रियते । अन्यथाभावो ह्यन्यथाभवनं, अन्यथाभानमात्रं वा । आद्ये विकारः स्यादेव । न द्वितीयो, निर्विशेषस्य स्वप्रकाशतया ज्ञानाद्यधिष्ठानतया भासमानस्यान्यथा भानासंभवात् । अन्यथाभावस्यावरकप्रयुक्तत्वेन तस्यापि तद्विवर्तत्वेनावरकान्तरापेक्षायामनवस्थाद्यापत्तेश्च । किं चाविद्याविषयीकृतं ब्रह्म जगदात्मना भातीति त्वन्मतम् । तथा चाविद्याया उपादानत्वकल्पनं व्यर्थम् । अविद्यान्वयव्यतिरेकयोर्निमित्तत्वमात्रेणान्यथासिद्धेः । न च घटादेः परिणाम्यपेक्षादर्शनेनाकाशादावविद्यायाः परिणाम्युपादानत्वं, घटादिकार्ये स्वसमसत्ताककर्तृकत्वदर्शनेन शुक्तिरूप्यादावपि तथात्वापत्तेः । न च विकारित्वेनाविद्याकल्पनम् । अविद्याविषयीकृतब्रह्मण एव ह्यतात्त्विकविकारस्तात्त्विकनिर्विकारत्वाविरोध्यस्तु । अविद्याया उपादानत्वं किमर्थम् । न च कार्यापेक्षितस्वसमसत्ताकोपादानकत्वेनाविद्याया उपादानत्वम्, शुक्तिरूप्येऽपि प्रातिभासिकमज्ञानमस्त्येवेति वाच्यम् । इदं रूप्यमित्यत्राज्ञानप्रतीत्यभावेनाप्रतीतस्य प्रातिभासिकत्वाभावेन प्रातिभासिकाज्ञाने मानाभावेन रूप्ये व्यभिचारात् । अन्यथा रूप्यस्य स्वसमसत्ताककर्तृत्वापत्तेश्च । न चैकस्यैवाविद्योपहितत्वेनोपादानत्वमविद्यापरिणामेच्छाकृत्याद्याश्रयत्वेन निमित्तत्वमित्यभिन्ननिमित्तोपादानत्वमुपपन्नम् । इच्छाद्याश्रयस्याविद्योपहितस्य चाविद्याधीनत्वेनाविद्यादिभ्रमाधिष्ठानत्वासंभवात् । अधिष्ठानस्याध्यस्तादधिकसत्ताकत्वनियमात् । अत एव शुद्धमधिष्ठानं, विशिष्टं निमित्तमित्यभिन्ननिमित्तोपादानं ब्रह्मेति निरस्तम् । विशिष्टस्य मिथ्याभूतस्य शुद्धाभिन्नत्वासंभवात् ।

इति निमित्तोपादानत्वभङ्गः ॥ १८ ॥

## १९. परमते निमित्तत्वभङ्गः ।

कार्यस्य कल्प्यत्वे कुलालादिवदुपादानगोचरप्रयत्नादिमत्त्वं ब्रह्मणो न स्यात् । न हि कल्पितं रूप्यादिकं प्रति भ्रान्तस्यान्यस्य वा कर्तृत्वं प्रामाणिकम् । न च रूप्यादौ साक्ष्येव कर्ता । न ह्यदर्शनमात्रेण कर्त्रपलापः । त्वन्मते सर्वज्ञकर्तुरपलापापत्तेः । इदमर्थावच्छिन्नस्येदमाकारवृत्त्यवच्छिन्नस्य वा त्वदभिमतसाक्षिण इच्छाद्यभावेन कर्तृत्वासंभवात् । सर्वज्ञे कर्तरि श्रुत्यादेरिव शुक्तिरूप्यादिकर्तरि मानाभावात् । न हि ' नामरूपे व्याकरवाणि ' इत्युक्तेश्वरस्येव शुक्तिरूप्यं करवाणीति कस्याप्यनुभवः । न च भ्रान्तवदध्यासद्रष्टृत्वं, भ्रान्तस्य प्रेक्षापूर्वकमारोपितकर्तृत्वाभावात् । न च मायाविवद्व्यामोहकत्वम् । व्यामोहनीयानामपि कल्पितत्वेन तद्दर्शने चेशस्य भ्रान्तत्वापत्तेः । न ह्यैन्द्रजालिकः स्वकल्पितानेव मोहयति । जन्मादिसूत्रे लब्धसार्वज्ञ्यस्फोरणार्थं शास्त्रयोनिसूत्रमिति त्वन्मतस्य भङ्गापत्तेश्च । अध्यस्तद्रष्टुर्व्यामोहकस्य सार्वज्ञ्यासंभवात् । न च करवाणीति संकल्पपूर्वकं कर्तृत्वं मायिन्यप्यस्ति । कल्पितपदार्थकर्तृत्वाभावेऽपि प्रतारकस्य मायिनः करवाणि करोमीत्याद्युक्तिसंभवेऽपि परमाप्तस्येशस्य वास्तवकर्तृत्वं विना तथोक्त्यसंभवात् । न च मायावित्वेऽपि सृज्यमानमायिकविश्वाकारमायासत्त्वांशपरिणामाधारतया सार्वज्ञ्यलाभः । मायामोहं विना मायिनो मायिकानां दर्शनाभावेन सार्वज्ञ्यस्य दूरापास्तत्वात् । स्वस्मिन् स्वमायामोहनस्य व्याहतत्वात् ।

**इति परमते निमित्तत्वभङ्गः ॥ १९ ॥**

## २०. ब्रह्मणो विश्वोपादानत्वे प्रमाणभङ्गः ।

ब्रह्मण उपादानत्वे मानाभावः । न च ' यतो वा इमानि भूतानि जायन्ते ' इति श्रुतौ ' जनिकर्तुः प्रकृतिः । ' इति सूत्रे प्रकृत्यर्थपञ्चमी मानम् । वृत्तौ " पुत्रात् प्रमोदो जायते' इत्यनुपादानेऽपि पञ्चमीदर्शनात् प्रकृतिपदं हेतुमात्रपरम् ।"इत्युक्तेः । न्यासेऽपीदमेवाश्रित्य 'असति प्रकृतिग्रहणे उपादानस्यैवापादानसंज्ञा स्यात् । प्रत्यासन्नत्वान्नेतरस्य।प्रकृतिग्रहणात् कारणमात्रस्य भवतीति प्रकृतिपदमनुपादानेऽप्यपादानसंज्ञासिद्ध्यर्थम् ।" इत्युक्तत्वात् । महाभाष्ये 'अयमपि योगः शक्योऽवक्तुम् । "गोलोमाविलोमभ्यो दूर्वा जायन्ते, अपक्रामन्ति तास्तेभ्यः ' इत्यादिना लोमादीनां दूर्वादीन् प्रत्यवधित्वात् । ' ध्रुवमपायेऽपादानम् ' इत्यनेनैवापादानसंज्ञासिद्धेरि सूत्रमनादं-

रम्यम्" इति सूत्रं प्रत्याख्यातम् । कैयटेऽपि 'अपक्रमणावधित्वे लोमादिषु कार्यस्य प्रतीतिर्न संभवति ।' इत्याशङ्क्य 'बिलान्निष्क्रामतो दीर्घभोगस्य भोगिनः अविच्छिन्नतया तत्रोपलब्धिवत् कार्यस्यापि दूर्वादेस्तत्रोपलब्धिः ।' इत्यवधित्वमेव तत्रोपपादितम् । अत उपादान एव 'जनिकर्तुः' इत्यादिना पञ्चमीति न नियमः । न च 'पशुना यजेत ।' इत्यादौ पशुपदस्य पशुमात्रवाचकत्वेऽपि 'छागस्य वपायाः' इति वाक्यशेषात् पशुविशेषपरत्ववदत्रापि कारणमात्रार्थत्वेऽप्युपादानपरत्वमिति वाच्यम् । तद्वदत्रोपादानार्थकत्वनिश्चायकवाक्यशेषाभावात् । न च 'आत्मन आकाशः संभूतः ।' इत्यादावुपादाने पञ्चमी । 'सच्च त्यच्चाभवत्' इति वाक्यशेषेण 'सोऽकामयत' इत्येतच्छाखान्तरवाक्येन च प्रतीतसामानाधिकरण्यं नियामकम् । 'स तपोऽतप्यत । स तपस्तप्त्वा इदं सर्वमसृजत । तत्सृष्ट्वा तदनुप्राविशत् । तदनुप्रविश्य सच्च त्यच्चाभवत् ।' इत्यादिश्रुत्या सदादिभवनस्य जगत्सृष्टितदनुप्रवेशानन्तरभावित्वेन जगत्स्रष्टृत्वानुपपत्तौ परमेश्वरस्य सत्त्वादिगुणाभिव्यक्तिपरत्वेन ब्रह्मोपादानत्वेऽस्या अप्रमाणत्वात् । न ह्युपादानं कार्ये पश्चात् प्रविशति । न च 'मुखं व्यादाय स्वपिति' इतिवत् 'तदनुप्रविश्य' इत्यस्योपपत्तिः । मुखव्यादानोत्तरकालिकस्वापमादायैव वैयाकरणैरेतत्प्रयोगस्य समर्थनात् । उक्तं च वर्धमाने "'मुखं व्यादाय स्वपिति' इत्यत्र व्यादानोत्तरमपि स्वापानुकृत्या तदभिप्रायेण क्त्वाप्रत्ययः ।" इति । 'सुप्त्वा व्यादत्त इति स्वापात् प्रयोगः ।' इति प्रेत्यभावपरीक्षायां वाचस्पतिमिश्राः । न चेश्वरभिन्नजीवरूपेणात्र प्रवेशः श्रुतेर्विवक्षित इति नानुपपत्तिरिति वाच्यम् । 'समानकर्तृकयोः पूर्वकाले क्त्वा ।' इति व्याकरणस्य भिन्नकर्तृकत्वेऽनुपपत्तेः । 'इदं सर्वमसृजत' इत्यनेन पौनरुक्त्यापत्तेश्च । न च निमित्तत्वमात्रभ्रान्तिव्युदासाय सार्थकत्वम् । भ्रमाधिष्ठाने शुक्त्यादावभवदिति प्रयोगाभावात् । तत्प्रयोगविषयपरिणाम्युपादानताया ब्रह्मणस्त्वयानङ्गीकाराच्च । न च शुक्ते रूप्यानुपादानत्वाच्छुक्तौ रूप्यमभवदिति व्यवहाराभावः । इदं रूप्यमित्यत्र रूप्याभिन्नतया प्रतीतेदमर्थस्य रूप्योपादानतया त्वदभिमतस्येदं रूप्यमभवदिति व्यवहाराविषयत्वात् । 'सोऽकामयत बहु स्याम्' इत्यादिवाक्यं तु परेशस्य 'अजायमानो बहुधा विजायते' 'यदेकमव्यक्तमनन्तरूपम्' इत्यादिश्रुतिसिद्धतत्तदनन्तपदार्थप्रेरकानन्तरूपैर्बहुभावसंकल्पमाह । न च स्वस्यानन्तरूपैर्बहुभावं संकल्प्य 'इदं सर्वमसृजत' इति जगत्सर्जनादुपपत्तिः । गुरुः स्यामिति संकल्प्य शिष्यसंपादनवत् । नियामकरूपैर्बहुभावस्य नियम्यसापेक्षत्वान्नियम्यं सृष्ट्वा नियामकरूपैः

प्रवेशोक्त्युपपत्तेः, सृष्टेः प्रागन्तःकरणाभावेन तद्विशिष्टाहमर्थाभावेनोत्तमपुरुषानुपपत्तेश्च । न च ‘ बहु स्याम् ’ इत्यत्र बहुपदं सृज्यपरमेव, नियामकरूपाणामीश्वराभिन्नतया नित्यसिद्धत्वेन तत्रेच्छाविरहादिति वाच्यम् । ‘भूतग्रामः स एवायम्’ इति स्मृतेः । सत्कार्यवादे सृज्यानामपि नित्यसिद्धत्वेन तत्रापीच्छासंभवात् । रूपाणां नित्यसिद्धत्वेऽप्याविर्भावस्यैवेच्छाविषयत्वात् । ‘ बहु स्याम् ’ इति संकल्प्य तेजःप्रभृतिसर्जनं, गुरुः स्यामिति संकल्प्य शिष्यसंपादनादिवदिति सूपपन्नम् । न चाविद्यापरिणामविशिष्टे अहमितिप्रयोगसंभवेनोत्तमपुरुषोपपत्तिः । उक्तसंकल्पात् प्रागविद्यापरिणामाभावात् । न च ‘ तदात्मानं स्वयमकुरुत ’ इति श्रुतिस्तत्र मानम् । अन्तर्यामितयात्मन आविर्भावोक्तेः । अन्यथा ‘ अकुरुत ’ इति सत्त्वोक्त्ययुक्तेः । न चाकाशाद्यात्मना क्रियमाणत्वेऽपि स्वरूपेण सत्त्वोपपत्तिः । क्रियमाणत्वेन सत्त्वप्रतीतेः स्वरूपमात्रपरत्वोक्तेर्निर्मूलत्वात् । आरोपाधिष्ठान इदमर्थे आत्मानं रूप्यात्मनाकुरुतेति व्यवहाराभावाच्च । न च तत्र लयोक्त्या तदुपादानम् । अनुपादान एव लूतायां तन्तूनां लयदर्शनात् । न च लूतोपादानम् । तन्नाशेऽपि तन्त्ववस्थानात् । न च लूतायां न लयः, किं तु प्रवेशमात्रम् । ‘ यथोर्णनाभिः सृजते गृह्णते च ’ इति श्रुत्योर्णनाभिवदेवेशस्य संहर्तृत्वोक्तेः न च ‘ तज्जलान् ’ इत्यादिना तत्र लय उक्तः । सत्कार्यवादे संश्लेषस्यैव लयपदार्थत्वात् । ‘भूतग्रामः स एवायम् ’ इति स्मृतेः । न च ‘तद्भूतयोनिम् ’ इति श्रुतिस्तत्र मानम् । अनुपादान एव मातरि योनिशब्दप्रयोगात् । इदमर्थे रूप्याद्यधिष्ठाने योनिशब्दाप्रयोगाच्च । ‘ योनिष्ट इन्द्र सदन ’ इत्यादिश्रुतौ निमित्त एव प्रयोगाच्च । न च ‘ सर्वं खल्विदं ब्रह्म ’ इति सामानाधिकरण्यश्रुतिस्तत्र मानम् । ‘ सर्वं समाप्नोषि ततोऽसि सर्वः ’ इति स्मृत्या व्यापकत्वपरतया श्रुतेर्व्याख्यातत्वात् । ब्रह्मण्यारोपिताभेदपरत्वे शुक्तात्विदं रूप्यमिति शब्दस्येव श्रुतेरप्रामाण्यापत्तेः । ‘ शान्त उपासीत ’ इत्युपासाविधिशेषत्वेनार्थतत्त्वाभावाच्च । न च महाभूतानि सद्वस्तुप्रकृतीनि, सत्स्वभावानुरक्तत्वे सति विविधविकारत्वान्मृदनुस्यूतघटादिवदित्यनुमानं तत्र मानम् । सत्प्रधानोपादानकत्वेनार्थान्तरत्वात् । न च प्रधानं न सत् । व्यावहारिकसत्त्वस्य प्रधाने त्वयाभ्युपगमात् । तस्यैव घटादौ प्रतीतेः । अन्यथा तत्र दृश्यत्वादेर्व्यभिचारापत्तेः । खण्डो गौर्मुण्डो गौरिति गोत्वानुरक्तखण्डादौ व्यभिचाराच्च । न च तदनुरक्तत्वे सति तद्विकारत्वं हेतुः । त्वदभिमतसद्विकारत्वस्य महाभूतादावसिद्धेः । न च सद्भिन्नगोत्वादिकं नास्ति । शुद्धस्य घटादितो व्यावृत्तगोत्वादिरूपताया असंभवात् । विशिष्टस्य घटाद्यधिष्ठानत्वासंभवात् ।

अधिष्ठानस्याध्यस्ताधिकसत्ताकत्वनियमात् । असत्खपुष्पमसन्नृशृङ्गमित्यादावसतोऽपि खपुष्पाद्युपादानत्वापत्तेः । सद्ब्रह्मेति सत्स्वभावानुरक्तत्वेन ब्रह्मणोऽपि सदुपादानकत्वापत्तेश्च । ब्रह्म न द्रव्योपादानं चेतनत्वाच्चैत्रवत्; जगन्नानन्दप्रकृतिकं, तत्स्वभावाननुरक्तत्वाद्यद्यत्स्वभावाननुरक्तं न तत्तत्प्रकृतिकं, यथा घटस्वभावाननुरक्तं पटादि न घटोपादानकमित्यादिसत्प्रतिपक्षाच्च । न च द्वितीयानुमाने कपालस्वभावाननुरक्ते घटे व्यभिचारः । कपालं घट इत्यप्रतीतावपि मृद्घट इति मृत्त्वेनानुरक्तत्वप्रतीतेः । न च सत्त्वेनेहाप्यनुरक्तप्रतीतिरस्ति । सविशेषस्य मृत्त्वकपालत्वाभ्यां भानाभानयोः संभवेऽपि निर्विशेषस्य सत्त्वानन्दत्वादिना भानाभानयोरसंभवात् । न च जगदभिन्ननिमित्तोपादानकं, प्रेक्षापूर्वजनितकार्यत्वात्, सुखदुःखादिवदित्यभिन्ननिमित्तोपादानं ब्रह्मेति वाच्यम् । दुःखादीनामन्तःकरणोपादानत्वेन दृष्टान्तस्य साध्यवैकल्यात् । न चान्तःकरणस्य परिणाम्युपादानत्वेऽप्यन्तःकरणरूपेण परिणताज्ञानाधारतया चेतनस्यापि विवर्तोपादानत्वमस्ति । उभयवादिसंमतस्यैव दृष्टान्तीकरणीयत्वात् । हेतौ व्यर्थविशेषणत्वाच्च । न च हेतुद्वये तात्पर्यम् । तथा च कार्यत्वादिति हेतौ सर्वकार्यनिमित्तकालघटसंयोग उभयसंप्रतिपन्नो दृष्टान्तः । संयोगादिना परिणतस्योपादानत्वेनापरिणतभागस्यैव कालस्य निमित्तत्वेन दृष्टान्तासंप्रतिपत्तेः । जगदुपादानं न कर्तृ द्रव्योपादानत्वात्, मृद्वत्; जगत्कर्ता वा न द्रव्योपादानं, कर्तृत्वात्, कुलालादिवदित्यादिना सत्प्रतिपक्षत्वात् । न चाद्ये जडत्वं द्वितीये सर्वान्तर्यामित्वं चोपाधिः । आद्ये उपाधेः साधनव्यापकत्वेन तद्व्यभिचारेण हेतौ साध्यव्यभिचारानुमानासंभवात् । शुद्धे ब्रह्मणि तुच्छे च व्यभिचारेण प्रधाने भागासिद्ध्या च जडत्वाभावेन कर्तृत्वसाधनासंभवाच्च । द्वितीये पक्षेतरत्वात् ।

इति ब्रह्मणो विश्वोपादानत्वे प्रमाणभङ्गः ॥ २० ॥

## २१. अखण्डलक्षणभङ्गः ।

ननु भवेदीश्वरोऽनन्तगुणः सविग्रहो विश्वोदयादिकर्ता, यदि तत्र मानं स्यात्तदेव न, वेदान्तानामखण्डार्थकत्वात् । तथा हि द्विविधं वेदान्तवाक्यम् । पदार्थनिष्ठमेकं, वाक्यार्थनिष्ठं चान्यत् । एकैकं लौकिकवैदिकभेदेन द्विविधम् । तत्र 'सत्यं ज्ञानमनन्तम्' इत्यादि तत्पदार्थनिष्ठम्, 'यो विज्ञानघनः' इत्यादि त्वंपदार्थनिष्ठम्, 'तत्त्वमसि' इत्यादि वाक्यार्थनिष्ठं वैदिकम् । 'प्रकृष्टप्रकाशः' इत्यादि पदार्थनिष्ठम्, 'सोऽयम्' इत्यादि वाक्यार्थनिष्ठं च

लौकिकम् । अपर्यायशब्दानां पदवृत्तिस्मारितातिरिक्तसंसर्गागोचरप्रमाजनकत्वं तेषामेकप्रातिपदिकार्थमात्रपर्यवसायित्वं वा अखण्डार्थकत्वम् । अप्राप्तयोः प्राप्तिः संयोग इति लक्षणवाक्येन पदस्मारितसंसर्गस्यैव बोधनान्नाव्याप्तिः । द्वितीये प्रातिपादिकार्थस्यैकत्वं एकधर्मावच्छेदेन वृत्तिविषयत्वम् । न त्वेकमात्रव्यक्तित्वम् । अतो यौगिकार्थौपगवादिप्रश्नोत्तरे श्यामो दीर्घो लोहिताक्ष औपगव इत्यादावनेकार्थात्मकवनसेनादिप्रश्नोत्तरे एकदेशस्था वृक्षा वनमित्यादौ च नाव्याप्तिरिति चेन्न । आद्ये द्विषदन्नं भोक्तव्यमित्येतत्परे विषं भुङ्क्ष्वेति वाक्येऽतिव्याप्तेः । न च तत्राप्यनिष्टसाधनत्वसंसर्गः पदवृत्त्यस्मारितो बोध्यते । अनिष्टत्वस्य भोजनेऽनुमानादिगम्यत्वेन तत्संसर्गस्य तत्र शाब्दत्वाभावात् । न च प्रतिपिपादयिषितपदार्थसंसर्गप्रमापकत्वमात्रं विवक्षितम् । चन्द्रब्रह्मादिशब्दार्थानां स्वरूपतो ज्ञाततया प्रतिपिपादयिषितत्वेन संसर्गप्रतियोगित्वेनैव प्रतिपिपादयिषितत्वेन तत्रासंभवात् । द्वितीये शीतोष्णस्पर्शवन्तौ पयःपावकावित्याद्यनेकार्थके सेनावनादिप्रश्नोत्तरे चातिव्याप्तेः । न हि धर्मधर्मिभावासहमखण्डार्थत्वं धर्मिभेदसहम् । न च शीतस्पर्शवत्य आपः उष्णस्पर्शवान् पावक इति साक्षात् प्रत्येकवाक्यद्वयद्वाराखण्डविषयकबोधद्वयमात्रे तात्पर्यान्न दोषः इति वाच्यम् । 'चन्द्रे कलङ्कः सुजने दरिद्रता विकासलक्ष्मीः कुमुदेषु चञ्चला । मुखाप्रसादो सधनेषु नित्यशो यशो विधातुः कथयन्ति खण्डितम् ॥' इत्येकस्मृत्युपारूढानां बहुत्वान्वयवदिहाप्यन्वयोपपत्तेः । 'यशो विधातुः कथयन्ति खण्डितम्' इत्यादाविवैकवाक्यातायां बाधकाभावात् । सेनादिप्रश्नोत्तरेऽतिव्याप्तेरनुद्धाराच्च । किं च प्रवृत्तिनिमित्तानां भिन्नानां भानेऽखण्डार्थत्वहानिरभाने पर्यायत्वमेव । न च प्रवृत्तिनिमित्तभेदमङ्गीकृत्यैव सत्यपदादीनां लक्षणयाखण्डशुद्धब्रह्मपरत्वम् । लाक्षणिकबोधेऽधिकभाने वाक्यस्याखण्डार्थकत्वहानिरभाने लक्षणाया वैयर्थ्यात् । न हि शाक्तबोधानधिकविषयकबोधार्थं लक्षणासार्थक्यम् ।

इत्यखण्डलक्षणभङ्गः ॥ २१ ॥

## २२. अखण्डार्थभङ्गः ।

प्रमाणमात्रस्य सविकल्पकज्ञानजनन एव पर्यवसानेनाखण्डे मानाभावः । ननु सत्यादिवाक्यमखण्डार्थनिष्ठं ब्रह्मप्रातिपदिकार्थमात्रनिष्ठं वा, लक्षणवाक्यत्वात् तन्मात्रप्रश्नोत्तरत्वाद्वा, प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदिति पदार्थविषयकम् ; तत्त्वमस्यादिवाक्यमखण्डार्थनिष्ठमात्मस्वरूपमात्रनिष्ठं वा, अकार्यकारणद्रव्यमात्रनिष्ठत्वे सति समा-

नाधिकरणत्वात्तन्मात्रप्रश्नोत्तरत्वाद्वा, सोऽयमित्यादिवाक्यवदिति वाक्यार्थविषयकमनुमानम्; मृद्घटः श्यामो घट इति सखण्डार्थके व्यभिचारवारणायाकार्यकारणद्रव्यमात्रेति विशेषणमिति चेन्न। प्रकृष्टादिवाक्यस्य सखण्डार्थकत्वेन दृष्टान्ताभावात्। तत्रापि साधनीयत्वे दृष्टान्तान्तरस्यान्वेषणीयत्वेनानवस्थापत्तेः। प्रत्यक्षं निर्विकल्पकधीहेतुरिति मतस्याप्रामाणिकत्वेन प्रमाणमात्रस्य सविकल्पधीजनकत्वनियमेन साध्याप्रसिद्धेश्च। न च प्रमात्वं संसर्गागोचरवृत्ति, सकलप्रमावृत्तित्वादभिधेयत्ववदिति सामान्यतस्तत्सिद्धिः। प्रमात्वं संसर्गागोचरवृत्ति न, ज्ञानत्वव्याप्यधर्मत्वादनुमितित्वादिवदिति सत्प्रतिपक्षात्, मृषासत्यत्वादेरन्यत्र संभवेन तात्त्विकस्य ब्रह्मण्यभावेन लक्षणत्वासंभवाच्च। सत्यादिस्वरूपं न तु लक्षणम्। न हि घटो घटस्य लक्षणम्। किं त्वसाधारणो धर्मः। न चैवं स्वरूपतटस्थलक्षणयोर्भेदो न स्यात्। यावद्द्रव्यभावित्वाभावित्वाभ्यां भेदोपपत्तेः। न च पार्थिवरूपादौ स्वरूपलक्षणेऽव्याप्तिः। रूपत्वाद्यवच्छिन्नस्य यावद्द्रव्यभावित्वेनाव्याप्तेरभावात्। न च द्वारत्वेन लक्षणे तात्पर्यं न द्वारिणोऽखण्डार्थत्वविरोधि। स्वरूपस्य प्रागेव ज्ञातत्वेन तन्मात्रज्ञाने द्वारानपेक्षणात्। न च संशयविरोधिस्वरूपज्ञाने द्वारापेक्षा, न सर्वत्रेति वाच्यम्। भ्रमसंशयानधिकविषयकस्वरूपज्ञानस्य संशयाद्यविरोधित्वात्। प्रकृष्टप्रकाशश्चन्द्र इत्यादौ व्यभिचाराच्च। संशयबुभुत्साद्यन्यथानुपपत्त्या धर्मिणः प्रागेव ज्ञातत्वेन धर्मस्यैव पृष्टत्वात्। न च प्रकर्षोपलक्षितप्रकाशव्यक्तिमात्रपरत्वादखण्डार्थकं तद्वाक्यम्। उपलक्षणस्य प्रकारस्य भाने हि सखण्डार्थकतैव। अभाने वाक्यवैयर्थ्यम्। किं च धर्मिज्ञानाधीनसप्रकारसंशयादिनिवर्तकं मोहहेतुं सप्रकारकं ज्ञानं प्रति साधनत्वेन वेदान्तविचारविधानान्यथानुपपत्त्या वेदान्तवाक्ये साध्याभावनिश्चयाद्बाधः। न चाज्ञानसमविषयकज्ञानमेव संशयादिनिवर्तकम्, न तु सप्रकारकम्। गौरवात्। अज्ञानविषयचिन्मात्रविषयकज्ञानस्य संशयादितः प्रागेव सत्त्वेन तस्य तदविरोधित्वात्। भ्रमादिकालागृहीतस्य भ्रमादिविरोधिज्ञानविषयस्य धर्मस्यैव अज्ञानविषयत्वं, न तु स्वरूपस्य। स्वरूपाज्ञाने संशयाद्यनुपपत्तेः। न च ब्रह्माकारधीरेव तदज्ञानविरोधिनी। द्रव्याद्याकारज्ञानस्य घटाद्याकाराज्ञाननिवृत्त्यापत्तेः। न च द्रव्याद्याकारज्ञानस्य घटाद्याकारत्वमनुभवविरुद्धं, ज्ञानगताकाराङ्गीकारे साकारवादापत्तेः। न चाज्ञानतत्कार्यान्यतराविषयकं ज्ञानमज्ञाननिवर्तकम्। रूप्यहेत्वज्ञानतत्कार्यान्यतराविषयकेदं शुक्लमिति ज्ञानस्यापि रूप्यनिवर्तकत्वापत्तेः। तस्यापि रूप्यहेत्वज्ञानतत्कार्यरूप्यान्यतराविषयकत्वात्। अदण्डिनि दण्डीति भ्रमस्य पुरुषोऽयमिति ज्ञानेन निवृत्त्यापत्तेश्च। सत्यादिवाक्यतात्पर्यविषयः संसृष्टरूपः संसर्गरूपो वा। प्रमाणवाक्यतात्पर्यविषयत्वात्।

संमतवत् । सत्यादिवाक्यं स्वतात्पर्यविषयज्ञानाबाध्यसंसर्गपरं स्वतात्पर्यविषयज्ञानाबाध्यस्वकरणकप्रमाविषयपदार्थनिरूप्यसंसर्गपरं वा । प्रमाणवाक्यत्वादग्निहोत्रादिवाक्यवत् । विषं भुङ्क्ष्वेत्यादौ वाक्यार्थसंसर्गपरत्वाभावेऽपि स्वकरणकप्रमाविषयपदार्थसंसर्गपरत्वान्न व्यभिचारः । खं छिद्रं, कोकिलः पिक इत्यादावभिन्नार्थकत्वे सामानाधिकरण्यायोगेन छिद्रकोकिलादीनां पिकादिपदवाच्यत्वसंसर्गपरत्वान्न व्यभिचारः । न चाप्रयोजकम् । हेतूच्छित्तेरेव विपक्षे बाधकत्वात् । न चाद्यानुमाने संसृष्टरूप इति साध्ये संसर्गे संसर्गरूप इति साध्ये च संसृष्टरूपे पदार्थे व्यभिचारः , उभयोरपि प्रामाणिकवाक्यतात्पर्यविषयत्वादिति वाच्यम् । पक्षसमे व्यभिचारस्यादोषत्वात् । अन्यतरत्वावच्छिन्नस्य साध्यत्वेऽदोषत्वाच्च । न चालक्षणवाक्यत्वं द्वितीये उपाधिः । अलक्षणवाक्यस्य लक्षणवाक्यभिन्नत्वरूपत्वे पक्षेतरत्वात् । लक्षणवाक्यभिन्नवाक्यत्वरूपत्वे हि वाक्यत्वस्यैव साध्याव्यापकत्वेन शेषवैयर्थ्यात् । वेदान्तजन्या प्रमा सप्रकारिका, विचारजन्यज्ञानत्वात्, संशयादिनिवर्तकज्ञानत्वाद्वा, यदेवं तदेवं, कर्मकाण्डजन्यज्ञानवत् । वेदान्तवाक्यजन्या प्रमा ब्रह्मप्रकारविषया, ब्रह्मधर्मिकसंशयादिविरोधित्वात् , ब्रह्मविचारजन्यत्वाद्वा, यदेवं तदेवं, कर्मकाण्डविचारजन्यज्ञानवत् । न च त्वन्मते ज्ञानमात्रस्य सप्रकारत्वेन विचारजन्यत्वसंशयविरोधित्वयोर्वैयर्थ्यम् । निर्विकल्पकप्रत्यक्षाङ्गीकारमते व्यभिचारवारकत्वात् । मतान्तरे तद्रहितस्यैव हेतुत्वात् । न चालक्षणवाक्यजन्यत्वमुपाधिः । आद्ये सप्रकारकप्रत्यक्षानुमित्यादौ, द्वितीये ब्रह्मनिष्ठप्रकारविषयकस्वप्रकाशकत्वाद्यनुमितीश्वरप्रत्यक्षादौ साध्याव्यापकत्वात् । न च लक्षणवाक्यभिन्नजन्यत्वमुपाधिः । ईशज्ञाने साध्याव्यापकत्वात् । जन्यत्वस्यैव साध्यव्यापकत्वसंभवेन विशेषणवैयर्थ्यात् । विशेष्यमात्रस्य साधनव्यापकत्वात् । किं च दृष्टान्तः साध्यविकलः, प्रकृष्टप्रकाशशब्देन शक्त्याखण्डार्थाबोधनात् लक्षणायाश्चान्वयानुपपत्त्या प्रागेव ज्ञातत्वेन तत्र तात्पर्यासंभवादिबीजाभावात् । न च लक्षणयैवाखण्डचन्द्रबोधः । यष्टीः प्रवेशयेत्यादाविव लक्षणाबीजतात्पर्यानुपपत्तेः सत्त्वात् । चन्द्रव्यक्तेः संशयाद्यनुपपत्त्या प्रागेव ज्ञातत्वेन तत्र तात्पर्यासंभवात् । चन्द्रस्वरूपाज्ञाने धर्मिधीसाध्यबुभुत्सासंदेहयोश्चन्द्र इत्यनूद्य क इति प्रश्नस्य चायोगात् । न च चन्द्रस्वरूपज्ञानेऽपि विरोधिज्ञानानुदयदशायां तदुदयार्थं प्रश्नादिकं युज्यते, ज्ञानविशेष एव विपर्ययविरोधी, शङ्खः श्वेतो न पीत इत्यादिपरोक्षज्ञाने भासते यादृशं श्वैत्यस्वरूपं पीताभावो वा तादृशमेवापरोक्षधीविषयदशायां विपर्ययविरोधीति विपर्ययविरोधिधीकालीनमेवासंकीर्णं स्वरूपं तज्ज्ञानमेव विपर्ययविरोधीति वाच्यम् ।

अपरोक्षविपर्ययं प्रत्यपरोक्षत्वेनैव हि निवर्तकत्वम्। शङ्कश्चैत्यानुमितौ सत्यामपि तदपरोक्षाभावाद्युक्ता विपर्ययानिवृत्तिः। चन्द्रव्यक्तिप्रत्यक्षानिवर्तितस्य प्रत्यक्षानधिकविषयकप्रत्यक्षशब्दादिना निवृत्तिस्तु न दृष्टा, न वा युक्ता। अतश्च व्यावृत्तेर्व्यावर्तकस्य वा वैशिष्ट्यमेव पृष्टं, तदेव चोत्तरितम्। न च यश्चन्द्रस्तत्र चंद्रत्वं तमोनक्षत्रादिव्यावृत्तिश्चास्तीति मया ज्ञायते, चन्द्रस्वरूपं तु न ज्ञायत, इत्यनुभवेन व्यावर्तकव्यावृत्तिवैशिष्ट्यस्य जिज्ञासितत्वेन जिज्ञासितं चन्द्रस्वरूपमेव विपर्ययविरोधिज्ञानविशेषं जनयता प्रकृष्टादिवाक्येन बोध्यते इति वाच्यम्। सामान्यतो व्यावृत्त्यादेर्ज्ञानेऽपि पुरोवर्त्यपरोक्षचन्द्रव्यक्तिनिष्ठतयायं चन्द्रो नक्षत्रादिव्यावृत्त इति विशेषतो ज्ञानाभावात्। न च चक्षुःसंनिकर्षादिसत्त्वाच्चन्द्रत्वादिकमपि कुतो न ज्ञायते। पद्मरागत्वादेरिव कासांचिज्जातीनामुपदेशसहकृतेन्द्रियवेद्यत्वेन व्यक्तिप्रत्यक्षेऽपि चन्द्रत्वस्याप्रत्यक्षत्वोपपत्तेः। एतेन चन्द्रव्यावृत्तिर्बोध्यते व्यक्तिविशेषो वा; नाद्यः, या शुक्तिः सा रजतादिभिन्नेति व्यावृत्तिज्ञानेऽपि शुक्तिस्वरूपाज्ञानतत्कार्यविपर्ययवद्यश्चन्द्रः स नक्षत्रादिविलक्षण इति ज्ञानेऽपि चन्द्रस्वरूपाज्ञानतत्कार्यविपर्ययादिदर्शनात्; नान्त्यः, आवश्यकत्वाद्व्यक्तेरेव बोध्यत्वेन व्यावृत्तिबोधवैयर्थ्यात्।' इति निरस्तम्। संशयप्रश्नाद्यनुपपत्त्या व्यक्तेः प्रागेव ज्ञातत्वात्। शृङ्गग्राहकतया व्यावृत्तेर्व्यावर्तकस्य वा व्यक्तिनिष्ठतया बोधनीयत्वात्। अन्यथा कश्चन्द्र इति प्रश्नस्य चन्द्रश्चन्द्र इत्येवोत्तरं स्यात्। न तु प्रकृष्टप्रकाश इत्यादिकम्। न च स्वरूपमात्रस्य ज्ञेयत्वेऽपि स्वरूपज्ञानस्य तावत्पदार्थज्ञानाधीनत्वे सत्येव तावत्पदार्थेतरव्यावृत्तिफलत्वेन सर्वपदानां सार्थक्यम्। तावत्पदैर्धर्मिणि तावद्व्यावर्तकधर्मवैशिष्ट्याबोधे तावत्पदार्थेतरव्यावृत्तेरसंभवात्। व्यावृत्तेः शाब्दबोधाभाने फलत्वासंभवात्। पदान्तरवैयर्थ्यानुद्धाराच्च। किं चोत्तरस्य प्रकृष्टत्वादिबोधपरत्वाभावे तात्पर्यतो यः कश्चिच्चन्द्र इत्येव बोधनात्। वस्तुतो यः कश्चिच्चन्द्रः स्यात्। तात्पर्यविषये चायं चन्द्र इति लक्षणलक्ष्यरूपोद्देश्यविधेयविभागाभावेन चन्द्रबुभुत्साया अनिवृत्तेः कश्चन्द्र इति प्रश्नस्योत्तरं च न स्यात्। न च यथा गङ्गासंबन्धित्वविशिष्टे तात्पर्याभावेऽपि वस्तुगत्या गङ्गासंबन्ध्येव तीरं लक्ष्यते, तथेह प्रकृष्टप्रकाशपदाभ्यां वस्तुगत्या प्रकृष्टत्वाद्याश्रयीभूतैव व्यक्तिर्लक्ष्यते, न या काचित्, अयं चन्द्र इति लक्ष्यलक्षणभागाभावेऽपि तदुभयप्रतिपादकपदाभ्यामुपस्थितस्यैकरूपस्योद्देश्यविधेयभावादिसंभव इति वाच्यम्। वस्तुगत्या व्यक्तेः प्रकृष्टप्रकाशाश्रयत्वेऽपि तस्य शाब्दबोधप्रकारत्वेनाभाने चन्द्रश्चन्द्रः यः कश्चिच्चन्द्र इत्येव हि बोधः स्यात्। तस्य च बुभुत्साद्यनिवर्तकत्वेन तज्जनकवाक्यमुत्तरं न

स्यादेव । अर्थभेदं विना पदद्वयोपस्थितस्याप्युद्देश्यत्वाद्यसंभवात् । घटकुम्भाद्यनेकपदोपस्थितस्य घटादेरुद्देश्यत्वविधेयत्वादर्शनात् । शाक्तबोधगृहीताधिकस्य लाक्षणिकबोधेऽभाने लक्षणावैयर्थ्याच्च । एकपदलक्षणयैव व्यक्तिधीसंभवेऽनेकपदलक्षणावैयर्थ्याच्च । किं च स्वरूपस्य प्रागेव ज्ञातस्य बुभुत्साद्यसंभवेनोत्तरे धर्मवाचकपदानुरोधेन च प्रश्ने धर्मबोधकपदमध्याहार्यं, तत्सूचककिंशब्दस्य सत्त्वात् । किं च ब्रह्मपदस्य यौगिकत्वेन ब्रह्मप्रातिपदिकार्थमात्रनिष्ठत्वेऽपि नाखण्डार्थकत्वसिद्धिः । न च ब्रह्मप्रातिपदिकार्थविशेष्यमात्रनिष्ठत्वं, संदिग्धबोधकशब्दस्य विशेष्यमात्रनिष्ठत्वाभावेन दृष्टान्ताभावात् । चन्द्रव्यक्तेः प्रागेव ज्ञातत्वेन प्रकृष्टादिवाक्यस्य तत्परत्वासंभवात् । किं च कतमश्चात्मेत्यत्र कतर आत्मेत्यत्र त्वंपदार्थप्रश्ने वा ' बहूनां जातिपरिप्रश्ने डतमच् । ' ' द्वयोरेकस्य निर्धारणे डतरच् । ' इति सूत्राभ्यां निर्णीतजात्याद्यर्थककतमादिप्रयोगात्तत्प्रतिवचने ' योऽयं विज्ञानमयः ' इत्यादौ पक्षे हेतुरसिद्धः । न च प्रश्नादौ धर्मवाचकपदसत्त्वेऽपि न तत्र तात्पर्यम् । आत्मस्वरूपज्ञानस्य सदैव सत्त्वात् । सर्वस्याप्युत्तरस्य प्रष्टृनिर्धारितधर्मिनिष्ठनिर्धारितैकधर्मपरत्वाद्विरुद्धश्च हेतुः । धर्मिनिर्धारणं विना संशयाद्यभावेन धर्मस्यैव निर्धारणीयत्वात् । प्रश्नानधिकविषयकस्यानुत्तरत्वाच्च । अन्यथा प्रश्नस्यैवोत्तरत्वं स्यात् । किं च सप्रकारकज्ञानमेव मोक्षहेतुः । ' ब्रह्मविदाप्नोति परम् ' ' य एवं विद्वानमृत इह भवति ' ' यो वेद निहितं गुहायाम् ' ' सोऽश्नुते सर्वान् कामान् ' इत्यादिश्रुतेः, ' भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ ' इत्यादिस्मृतेश्च । अतः सप्रकारकज्ञान एव मुमुक्षोः जिज्ञासा । किं चैवं कर्मकाण्डमखण्डकर्मपरं वैद्यकादिशास्त्रमखण्डौषधपरं स्यात् । न च तत्र विशिष्टकर्मादिपरत्वे बाधकाभावः । प्रकृतेऽपि तदभावात् । न च ' एकधैवानुद्रष्टव्यम् ' इत्यनेकप्रकारनिषेधकम्, 'उदरमन्तरं कुरुते' इति भेदनिषेधकम्, 'एकमेवाद्वितीयम्' इति द्वितीयमात्रनिषेधकं, सर्वतोऽनवच्छिन्नवस्तुपरानन्तशब्दब्रह्मशब्दौ च बाधकमिति वाच्यम् । तेषामैक्यभेदाभावादिविशिष्टार्थपरत्वे वेदान्तमात्रस्याखण्डार्थकत्वासिद्धेः, विशेष्यमात्रपरस्य विशिष्टपरेणाविरोधाच्च । न च द्वारतयोपस्थितमैक्यद्वितीयाभावादिकं विशिष्टार्थविरोधीति सत्यपदादेर्मुख्यार्थत्याग इति वाच्यम् । द्वारतयोपस्थितस्यैक्यादेर्मिथ्यात्वे पारमार्थिकभेदाद्यविरोधित्वात्, सत्यत्वे तत एवाद्वैतहानेः । न चाभिन्नमेवैक्यादिकमिति नाद्वैतहानिः । स्वाभिन्नस्य स्वरूपज्ञाने द्वारत्वायोगात् । न च स्वरूपस्यैव कल्पितं धर्मत्वम् । तज्ज्ञानस्य तात्त्विकभेदाद्य-

विरोधित्वात । ‘ अथ कस्मादुच्यते ब्रह्मेति, बृहन्तो ह्यस्मिन् गुणाः ’ इत्यादिश्रुत्या ‘ महद्गुणत्वाद्यमनन्तमाहुः ’ इत्यादिस्मृत्या ब्रह्मानन्तपदयोः सगुणवाचित्वेन निर्वचनात् । किं चैक्यादिवाक्यं यदि संसृष्टार्थकं न स्याद्वाक्यमेव न स्यादाकाङ्क्षायोग्यतासंनिधिमत्त्वाभावात् । येन विना यस्य न स्वार्थान्वयानुभावकत्वं तस्य तेन सहाकाङ्क्षा । एकपदार्थसंसर्गे परपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं हि योग्यता । अव्यवधानेनान्वयप्रतियोग्युपस्थितिर्हि संनिधिः । एतत् त्रयं शाब्दबोधस्य संसर्गाविषयत्वे न संभवति । ननु येन विना यस्य तात्पर्यविषयाननुभावकत्वं तस्य तेनाकाङ्क्षा; तात्पर्यविषयश्च क्वचित्संसृष्टः, क्वचिदखण्डः ; आसत्तिरव्यवधानेन शाब्दबोधानुकूलार्थोपस्थितिमात्रम् ; तात्पर्यविषयाबाध एव योग्यता, अन्वयांशस्य सर्वत्र वैयर्थ्यादिति चेन्न । पदार्थानां प्रागेव ज्ञातत्वेन संसर्ग एव वाक्यतात्पर्यसंभवेनाखण्ड आकाङ्क्षाद्यसंभवात् । न हि प्रत्येकपदैर्निश्चित एवार्थे वाक्यतात्पर्यम् । किं च प्रथमाध्यायतृतीयपादीयाधिकरणानारम्भ एव तव स्यात् । विशिष्याज्ञातो हि विषयः । साधारणधर्मधीजन्यश्च संशयः । मिथ्यासत्यैकप्रकारालम्बिनौ च पूर्वपक्षसिद्धान्तौ । एकप्रकारेण निर्धारणाधीनं च प्रयोजनम् । तच्च पञ्चकं त्वन्मते तत्पादप्रतिपाद्ये निर्विशेषे न संभवति । एतेन ‘ व्यावृत्ताकारेणाज्ञातं ब्रह्म विषयः , अद्वैताद्युपलक्षिताखण्डार्थज्ञानं च निर्धारणम् , तदधीनं प्रयोजनं मुक्तिः , कल्पितप्रकारालम्बिनौ पूर्वपक्षसिद्धान्तौ, संशयोऽपि कल्पितसमानधर्मधीजन्य एवेति नानुपपत्तिः।’ इति निरस्तम् । निर्विशेषे व्यावृत्ताकारस्यालीकत्वात् स्वरूपनिर्धारणस्य सदैव सत्त्वात् कल्पितप्रकारालम्बिसिद्धान्तस्याप्रामाणिकत्वापत्तेः । किं च ‘ब्रह्मविदाप्नोति परम् ।’ इत्यनेनैव स्वरूपस्य ज्ञातत्वेन सत्यादिवाक्ये वैयर्थ्यम्। न चासाधारणं स्वरूपं न ज्ञातम्। स्वरूपद्वैविध्याभावात्। किं च स्वरूपेण ज्ञातस्य विधेयस्योद्देश्यसंसृष्टतयैव बोध्यत्वम् । तच्चाखण्डे न युक्तम्। किं च शुद्धादन्यत्र सत्यत्वाद्यसंभवात् सत्यादिवाक्यस्य लक्षणया अखण्डार्थकत्वे शुद्धे सत्यत्वादेरभानात् पर्यायता दुर्वारैव। न हि विशिष्टे मृषाभूते परिच्छिन्ने सत्यत्वानन्तत्वादिकमस्ति, येन वाच्यार्थविशिष्टमादाय पर्यायत्वनिरासः स्यात् । न चासदादिव्यावृत्तिबोधनेन सार्थक्यम् । व्यावर्तकस्य सत्यत्वादेस्तात्पर्यतोऽर्पणं विना व्यावृत्त्यसिद्धेः । न च स्वरूपेणैव व्यावृत्तिः । आत्मनस्त्वन्मतेऽव्यावृत्तत्वात्। अन्यथा ब्रह्मत्वापत्तेः । उक्तं च सुरेश्वरवार्तिके–‘ अव्यावृताननुगतं वस्तु ब्रह्मत्वमश्नुते । एतच्च दुर्लभं तस्य द्वितीये सति लक्षणम्।। ’ इति । व्यावृत्तिभेदेनाखण्डार्थहानेश्च । किं च सत्यज्ञानादिपदलक्ष्यस्य गङ्गापदलक्ष्यतीरस्यागङ्गात्ववदसत्यत्व-

जडत्वापत्तिः । न च जहदजहल्लक्षणाङ्गीकारान्नोक्तापत्तिः ; यदि तीरादौ नदीत्ववद्ब्रह्मण्यप्यभिधाबलात्सत्यत्वादिकं न प्रतीयेत, तदैवं स्यान्नचैतदस्तीति वाच्यम् । काकेभ्यो दधि रक्ष्यतामित्यत्र पदार्थैकदेशकाकत्वत्यागाद्धि भवति जहदजहल्लक्षणा । तत्र दध्युपघातकत्वेन काकस्य मार्जारादेरिवांशे असत्त्वादिबोध आवश्यकोऽन्यथा लक्षणावैयर्थ्यम् । किं चासदादिव्यावृत्तीनां सत्यत्वे ब्रह्माभिन्नत्वे च ब्रह्मपदेनैव तल्लाभात् शेषवैय्यर्थ्यं, तद्भिन्नत्वे चाद्वैतहानिः । तासां मिथ्यात्वे शुक्तेः शुक्तितो व्यावृत्तेर्मिथ्यात्वे शुक्तित्वस्य शुक्तिसमसत्ताकत्ववदनृतत्वादेर्ब्रह्मणि ब्रह्मसमसत्ताकत्वं स्यात् । किं च सत्यपदेनासद्व्यावृत्तिद्वारा यद्बोधितं तदेव ज्ञानादिव्यावृत्तिद्वारा बोध्यते चेत् पदान्तरं व्यर्थम् । न च तावत्पदैर्विना त्रितयव्यावृत्तं ब्रह्म न सिध्येत् । व्यावृत्तीनां प्रकारतयाभाने वस्तुगत्या त्रितयव्यावृत्तब्रह्मबोधस्यैकपदेनैव संभवात् । यत्तु सत्यादिवाक्ये लक्षणाङ्गीकारान्न पदवैयर्थ्याशङ्केति तन्न । प्रत्येकपदोपस्थिते स्वरूपमात्रे लक्षणावैयर्थ्यात् , अधिकसंसर्गादिभानेऽखण्डार्थकत्वहानेः, वाक्यलक्षणायाः क्वाप्यसत्त्वाच्च । न च गम्भीरायां नद्यां घोष इत्यादौ विनिगमनाविरहात् पदलक्षणासंभवाद्वाक्यलक्षणा । चरमोपस्थितनदीपदस्य लाक्षणिकत्वात् । गम्भीरपदस्य तात्पर्यग्राहकत्वात् । अर्थवादेऽप्येकस्मिन् पदे लक्षणा । पदान्तराणि तात्पर्यग्राहकाणि । 'विषं भुङ्क्ष्व' इत्यादेः, 'गच्छ गच्छसि चेत्कान्त' इत्यादेश्च शब्दविधया प्रामाण्याङ्गीकारे सर्वपदानां भोजनाकर्तव्यत्वे गमनाभावे च लक्षणा । एकस्यैव वा पदान्तराणि तात्पर्यग्राहकाणीति न वाक्ये क्वापि लक्षणा, गौरवात् । किं च शाब्दत्वावच्छिन्नं प्रति शक्तपदज्ञानत्वेनैव हेतुत्वं, न तु वृत्तिमत्पदज्ञानत्वेन, गौरवात् । अतः सर्वपदलाक्षणिकत्वेऽनुभवो न स्यात् । लाक्षणिकपदैरन्वयप्रतियोग्युपस्थितौ कृतायां यदवशिष्टं शाक्तपदं तदेवानुभावकम् । अर्थवादानां लाक्षणिकत्वेऽपि तदेकवाक्यतापन्नं विधिपदमेवानुभावकम् । ' विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः । ' इति न्यायात् । तथा च सत्यादिपदानां लाक्षणिकत्वेऽन्वयानुभवानुपपत्तिरेव । न च लक्षणयैकदेशत्यागेऽपि शक्यस्यैवान्वयानुभवोऽङ्गीक्रियते । शक्यमात्रस्यैव बोधे लक्षणावैयर्थ्यात् । किं च 'तत्त्वमसि' 'सोऽयं देवदत्तः' इत्यादौ धर्मिमात्रस्यावान्तरपदेन प्रत्यक्षेण च सिद्ध्योपदेशवैयर्थ्यात् । इति नाखण्डं ब्रह्मेति समन्वयाध्यायोक्तन्यायैरनन्तगुणैर्ब्रह्मणि मुख्यवृत्त्या सर्वेषां वेदान्तानां समन्वयः सिद्धः ।

इत्यखण्डार्थभङ्गः ॥ २२ ॥

## २३. अवाच्यत्वभङ्गः ।

ननु स्याद्वेदान्तानां शक्त्या ब्रह्मणि समन्वयः, स्याच्चानन्तगुणं ब्रह्म यदि वाच्यं स्यात् । तदेव तु न । ' यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह । ' इत्यादिश्रुत्या तात्पर्येण सत्यादिवाक्यप्रतिपाद्यं ब्रह्म, न तद्वाक्यपदवाच्यम् । तद्वाक्यार्थत्वात् । संमतवत् । सत्यादिपदं न ब्रह्मवाचकं, तत्प्रतिपादकवाक्यैकदेशपदत्वाद्यद्यदर्थवाक्यैकदेशपदं तन्न तद्वाचकं, घटादिपदवदित्याद्यनुमानेन च विरोधादिति चेन्न । श्रुतेः साकल्येनाद्भुतत्वादिना चावाच्यत्वपरत्वात् । वाक्ये शक्तिलक्षणयोरभावेन ब्रह्मणस्तत्प्रतिपाद्यत्वाभावेनाश्रयासिद्धेः । वाक्यार्थत्वस्यासंसर्गरूपे ब्रह्मण्यसिद्धेश्च सत्यादिपदं ब्रह्मवाचकमन्यावाचकत्वे सति साधुपदत्वाद्यदेवं तदेवम्; ब्रह्म किंचित्पदवाच्यं, लक्ष्यत्वात्तीरवदित्याद्यनुमानात् । ' एतमेव ब्रह्मेत्याचक्षते ' ' तदेतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति ' इत्यादिश्रुतेः, ' यदक्षरं वेदविदो वदन्ति ' इत्यादिस्मृतेश्च । सत्यादिपदानां क्वचिच्छक्तिं विना तत्समूहस्य वाक्यत्वानुपपत्तेश्च । निरर्थकशब्दसमूहस्य वाक्यत्वे जरद्गवादिशब्दसमूहस्य वाक्यत्वं लक्षणया ब्रह्मपरत्वं च स्यात् । किं चावाच्यशब्देनोच्यते चेत्तेनैव वाच्यत्वसिद्धिः । तेन नोच्यते चेत्तर्ह्यवाच्यत्वासिद्ध्या सुतरां वाच्यत्वसिद्धिः । न च तेनापि लक्ष्यते । अवाच्यत्वरूपमुख्यार्थाभावेन शक्यसंबन्धरूपलक्षणासंभवात् । भावे वा ब्रह्म नावाच्यम् । किं तु तीरवत् अवाच्यरूपमुख्यार्थसंबन्धिमात्रमिति स्यात् । न चावाच्यरूपमुख्यार्थाभावेऽपि नञ्समभिव्याहृतवाच्यशब्देन वाच्यत्वाभावबोधनद्वारा स्वरूपे लक्षणया पर्यवसानमिति वाच्यम् । वाच्यत्वात्यन्ताभाववैशिष्ट्यस्य शक्त्या बोधने वाच्यत्वसिद्धेः मुख्यार्थं विना लक्षणायाश्चासंभवात् । लक्षणया स्वरूपमात्रपरस्य ' यतो वा ' इत्यादिशब्दस्य ब्रह्मणि वाच्यत्वस्याविरोधित्वात् । न चावान्तरतात्पर्यजन्यवाच्यत्वाभावबोधो वाच्यत्वविरोधी । तद्बोधस्य शक्त्यैव जन्यत्वेन वाच्यत्वसामान्याविरोधित्वात् । मूकोऽहमितिवद्व्याघाताच्च । किं च लक्ष्यपदेनापि लक्ष्यत्वे तीरस्यागङ्गात्ववद्ब्रह्मणोऽलक्ष्यत्वापत्तिः । न च निर्धर्मकत्वादिष्टापत्तिः । वाच्यत्वाभावमात्रेण लक्ष्यत्वव्यवहारः । लक्ष्यत्वाभावमात्रेण वाच्यत्वव्यवहारापत्तेः । तत्रापीष्टापत्तौ शब्दसामान्यवाच्यलक्ष्यबहिर्भूतस्याप्रामाणिकत्वेन ब्रह्मासिद्ध्यापत्तेः । किं च ' अप्राप्य मनसा सह ' इति निषेध्यतया श्रुतमनोवृत्तेरिवान्तःकरणव्याप्ये ब्रह्मणि वाग्वृत्तेरपि सर्वथा निषेधासंभवः । न च शक्तिरेव निषिध्यते । किंचित्पदशक्यत्वं विना लक्षणासंभवात् । न च परमार्थसदादिपदं कस्यचिद्वाचकं पदत्वादित्यत्र पदत्वं यदि सुप्तिङन्तत्वं तदा समास-

पदस्याशक्तत्वेन राजपुरुषादौ व्यभिचारः, यदि शक्तत्वं तदा साध्यावैशिष्ट्यमिति वाच्यम्। असमस्तत्वे सति व्याकरणादिनिष्पन्नत्वरूपसाधुपदत्वस्य हेतुत्वात्। सत्यज्ञानादिवाक्यं वाच्यार्थतात्पर्यवच्छब्दयुक्तं, वाक्यत्वात्, अग्निहोत्रादिवाक्यवत्। 'विषं भुङ्क्ष्व' इत्यादावपि विषभुज्यादिपदानां प्रकृतबोधविषयार्थावाचकत्वेऽपि विषादेर्वाचकत्वान्न व्यभिचारः। किं चावाच्यत्वे लक्ष्यत्वानुपपत्तिः। वाच्यार्थसंबन्धित्वेन ज्ञातस्यैव लक्ष्यत्वात्तज्ज्ञानं च न शब्दभिन्नप्रमाणेन, ब्रह्मण उपनिषन्मात्रगम्यत्वात्। नापि स्वप्रकाशतया, नित्यसिद्धे शब्दवैयर्थ्यात्। अवाच्ये शब्दस्य लक्षकस्यैव वक्तव्यत्वात्। तत्रापि वाच्यसंबन्धित्वेन ज्ञेयत्वेनानवस्था स्यात्। न च ब्रह्मणः स्वप्रकाशतया नित्यसिद्धावप्यावरणाभिभावकवृत्तिजनकत्वेन शास्त्रसार्थक्यं, स्वप्रकाशस्यावरणासंभवात्। न च निमित्ताभावान्न वाचकत्वं, सत्यादिपदानां लक्षकत्वे निमित्ताभावस्तस्मिंश्च लक्षकत्वमित्यन्योन्याश्रयापत्तेः। न च निर्विशेषवाक्येन निमित्ताभावसिद्धिः। निर्विशेषवाक्यस्य स्वरूपमात्रपरत्वे प्रवृत्तिनिमित्ताविरोधात्। निर्विशेषत्वविशिष्टपरत्वेन तस्यैव सत्त्वे निर्विशेषपदवाच्यत्वस्यैव सिद्धेः। न चात्रान्तरतात्पर्यजन्यबोधेन विशेषाभावविषयकेण निमित्ताभावसिद्धिः। निर्विशेषत्वस्यैव विशेषत्वेन विशेषमात्रनिषेधस्य व्याहतत्वात्। अतः सदनन्तगुणालयः सर्वशब्दवाच्यो हरिः सिद्धः।

Indira Gandhi National Centre for the Arts

अवाच्यत्वभङ्गः ॥२३॥

## ४. स्वाभिमतस्वप्रकाशत्वोपपत्तिः।

ननु 'अत्रायं पुरुषः स्वयंज्योतिः' इत्यादिश्रुत्यनुसाराद्ब्रह्मणः चिदविषयत्वे सत्यपरोक्षव्यवहारयोग्यत्वरूपस्वप्रकाशतया स्वतः सिद्धत्वात् किमर्थं वाच्यत्वादीति चेन्न। स्वं प्रति स्वविषयत्वाभावे स्वव्यवहारजननानुपपत्तेः। स्फुरणान्तराङ्गीकारेऽनवस्थापत्तेः। अन्यत्र क्लृप्तस्य तद्व्यवहारे तद्विषयत्वस्य नियामकस्य त्यागानौचित्यात्। प्रमेयत्वं प्रमेयमित्यादौ प्रमेयत्वस्य स्ववृत्तित्ववदभेदेऽपि विषयविषयित्वोपपत्तेः। न च प्रमेयत्वादिकं न केवलान्वयि। ईश्वरज्ञानविषयत्वरूपप्रमेयत्वस्य केवलान्वयित्वाभावे तस्य सार्वज्ञ्यानुपपत्तेः। न च छिदायां अच्छेद्यत्ववच्चितः चिदविषयत्वम्। मिथ्यात्वानुमित्यादेरपि स्वविषयत्वानापत्तेः। एतेन चिदविषयत्वं स्वप्रकाशमिति निरस्तम्। घटादेरपि चिदविषयत्वात्। एतेन 'स्वव्यवहारे स्वातिरिक्तसंविदनपेक्षत्वं स्वावच्छिन्नसंविदनपेक्षत्वं वा तत्।' इति निरस्तम्। स्ववेद्यत्वे-

नोपपन्नत्वात् त्वदिष्टासिद्धेः। अनुभूतिः स्फुरणविषया। अपरोक्षव्यवहारविषयत्वात्। दुःखादिवत्। न च जडत्वमुपाधिः। पक्षेतरत्वात्। न च स्वस्मिन् वृत्तिविरोधः। स्वस्मिन् स्ववेद्यत्वं हि कथं विरुद्धम्। न तावत्स्वजनकेन्द्रियासंनिकृष्टत्वात् स्वाजनकत्वाद्वा, नित्यज्ञानस्यैव स्वप्रकाशत्वाङ्गीकारात्। तत्र नित्यचिद्विषयत्वस्य द्वयं विनैव घटादौ सत्त्वात्। नापि विषयविषयिभावस्य संबन्धत्वेन द्विष्ठत्वात्। अतीतारोपितात्यन्तासतां ज्ञानदर्शनेन तस्योभयानिष्ठत्वात्। न च क्रियाकर्मत्वयोर्विरोधः। विषयविषयिभावातिरिक्तकर्मत्वादेरनङ्गीकारात्। न च कर्तुः कर्मत्वविरोधः। मामहं जानामीत्यनुभवेन 'तदात्मानमेवावेत्' इति श्रुत्या च कर्तुः कर्मत्वाविरोधात्। मिथ्यात्वानुमितेशज्ञानादेः स्वविषयत्वस्य दुर्वारत्वात्। न च मामहं जानामीत्यादौ साक्षिणः कर्तृत्वमहमर्थस्य कर्मत्वं, 'तदात्मानम्' इत्यादौ चाहमर्थस्य कर्तृत्वाच्चितः कर्मत्वमभेदेन द्वयादर्शनादिति वाच्यम्। मामहमित्यत्र कर्तृकर्मतया प्रतीताहमर्थभिन्नसाक्षिणि मानाभावात्। 'तदात्मानम्' इत्यत्राप्यहमर्थसमानाधिकरणतया प्रतीतात्मन्यहमर्थभेदस्य बाधितत्वात्। किं च चिदविषयत्वं स्वप्रकाशत्वं घटेऽप्यस्ति। न च ज्ञानसामान्याविषयत्वम्। ब्रह्मासिद्ध्यापत्तेः। न च स्वतःसिद्धं तत्। स्वत इत्यस्य स्वेनैवेत्यर्थे स्वविषयत्वापत्तेः। प्रमाणं विनेत्यर्थे उपायान्तरानुपन्यासेन तदसिद्ध्यापत्तेः। नृशृङ्गशशशृङ्गादेरपि सिद्ध्यापत्तेः। तद्विषयत्वे स्वप्रकाशत्वहानेश्च। न च तदसत्त्वव्यावृत्तिफलकं प्रमाणं नास्ति। प्रकृते च वृत्तिविषयतामात्रेण तदस्ति। ब्रह्मणो वृत्त्यविषयत्वे तदसत्। व्यावृत्त्यसंभवात्। तद्विषयत्वे चास्वप्रकाशत्वापत्तेः। किं च तद्विषयसंशयं प्रति तद्विषयकनिश्चयस्य विरोधितायाः क्लृप्तत्वेन स्वविषयत्वं विना स्वसंशयविरोधानुपपत्तेः। न च विषयत्वाभावेऽपि स्वनिर्वाहकत्वेन स्वसंशयविरोधित्वाद्युपपत्तिः। स्वनिर्वाहकपदेन निर्वहणक्रियाकर्तृकर्मत्वादेरेवोक्तेः। न च 'स्वयंदासास्तपस्विनः' इत्यादौ दासान्तराभावमात्रेण स्वदासत्वव्यपदेशवत् स्वभिन्नस्वनिर्वाहकानपेक्षत्वमात्रेण स्वनिर्वाहत्वोपचारः। दासान्तराभावे सति स्वदास्यं कुर्वत्येव तपस्विनि तथा व्यवहारेण समाध्यादिषु स्थिते तदव्यवहारेण दृष्टान्तासिद्धेः। 'स्वाध्यायोऽध्येतव्यः' इति विधौ स्वविषयत्वदर्शनाच्च। न च मामहं जानामीत्यादावहमर्थविषयकं ज्ञानं वृत्तिरूपमेव, न तु स्वरूपज्ञानम्। वृत्त्यनुत्पाददशायामहमनहं वेति कदाचित् संशयाद्यापत्तेः। घटिकाद्वयं घटोऽयं घटोऽयमिति पश्यन्नेवाहमासमिति धारावहनोत्तरपरामर्शानुपपत्तेश्च। न हि घटाकाराहमाकारा चेति वृत्तिद्वयं युगपत्प्रागुत्पन्नं, तद्यौगपद्यानङ्गीकाराच्च। 'अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुषः' इत्यादिप्रश्नपूर्वकं चन्द्रमोऽग्निवाचो

ज्योतींष्युक्त्वा ‘ चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरयं पुरुषः ’ इत्यादीनां साधनानामभावे किं ज्ञानसाधनमिति जनकेन पृष्टे याज्ञवल्क्येनोक्तम् । ‘आत्मैवास्य ज्योतिर्भवति ’ इत्यत्रोपक्रमे आत्मशब्दो द्युभ्वाद्यधिकरणन्यायेनेशपरः । ‘ अत्रायं पुरुषः स्वयंज्योतिः’ इत्युपसंहारस्य अत्र सुषुप्त्यादौ ज्ञानसाधनसामान्याभाव अस्य जीवस्यायं परेश एव स्वयंज्योतिर्ज्ञानसाधनमित्यर्थः । ‘वाचैवायं ज्योतिषास्ते ’ इति ज्योतिःशब्दस्य वाचि ज्ञानसाधने प्रयोगात् । त्वदभिमतस्वप्रकाशपरत्वे सदा स्वप्रकाशत्वेन श्रुतौ 'अत्र' इत्यस्य वैयर्थ्यात् । न च जाग्रदवस्थायामादित्यादिज्योतिः-संभवेन दुर्विवेकतया अस्यामवस्थायां सुविवेकतया ‘अत्र’ इति सार्थकम् । स्वप्रकाश-निर्विशेषस्याविवेकाद्यसंभवात् । ‘ अस्य ’ इति षष्ठ्या विषयत्वाभिधानाच्च । स्वविषयत्वरूपस्वप्रकाशज्ञानेन सविशेषाभिन्नस्वप्रकाशश्च जीवः परेशश्च सिद्धः ।

स्वाभिमतस्वप्रकाशत्वोपपत्तिः ॥ २४ ॥

## २५. अहमर्थस्यात्मत्वम् ।

ननु मामहं जानामीत्याद्यनुभवेन स्वविषयत्वरूपस्वप्रकाशत्वं स्यादात्मनो यद्यहमर्थ आत्मा स्यात्, स एव तु न; सुषुप्तौ स्वप्रकाशस्यात्मनः सत्त्वेऽप्यनेवं-भूतस्याहमर्थस्यासत्त्वादिति चेन्न । अहमर्थभिन्नस्वप्रकाशात्मनि मानाभावात् । अहमस्वाप्समित्यहमर्थनिष्ठतया सुषुप्तेः परामर्शात् । न चाहमर्थ इच्छादिगुणविशिष्ट एव गृह्यत इत्यावयोः समम् । सुषुप्तौ च नेच्छादिरिति कथं तदाहमर्थानुभवः । अहं सुखी दुःखीच्छामीति प्रतीतिभिन्नात्ममात्रविषयकप्रतीतेरसत्त्वेनात्मनोऽपीच्छादि-विशिष्टतयैव ग्रहणात् । इच्छादिग्रहं विनात्मग्रहाङ्गीकारे अहमर्थस्यापि तदङ्गीकारे क्षतेरभावात् । सुखत्वेनानुभूतस्याहमर्थस्य सुखमस्वाप्समिति सुखत्वेनैव परामर्शाच्च । न किंचिदवेदिषमित्यज्ञानाश्रयत्वेन सुषुप्तावनुभवादहमर्थ आत्मा । ननु सुषुप्तौ नाहमर्थोऽनुभूतः । न च परामर्शानुपपत्तिः । जागरे समुत्पन्नेऽनुभूयमानेऽहमर्थे परामृश्यमानात्माभेदारोपात् परामर्शोपपत्तेरिति चेन्न । इदं रूप्यमित्यादावारोप्य-रूप्याभिन्नतयेदमर्थस्येवाहमित्यत्राहमर्थाभिन्नतयात्मनोऽप्रतीतेः । अन्यथैतावन्तं कालं सुप्तोऽहमन्यो वेति कदाचित् संशयः स्यान्न त्वहमेवेति निश्चयः । न च सुषुप्ति-कालानुभूतात्मैक्याध्यासान्निश्चयोपपत्तिः । अहमर्थातिरिक्तानुभवस्यालीकत्वात् । एतावन्तं कालं स्वप्नं पश्यन्नासं, जाग्रदासमित्यत्रेवाहमस्वाप्समित्यत्राप्यहमंशे

परामर्शत्वानुभवात् । न च परामृश्यमानात्मैक्यारोपात्तदुपपत्तिः । अपरामर्शे परामर्शत्वारोपस्य क्वाप्यदर्शनात् । सिद्धे अहमर्थस्यात्मान्यत्वे परामृश्यमानात्मैक्यारोपः । सिद्धे च तस्मिन् सुषुप्तावप्रकाशेनाहमर्थस्यात्मान्यत्वसिद्धिरित्यन्योन्याश्रयापत्तेः । 'न विजानात्ययमहमस्मि' इति श्रुतिर्नात्मानं न परांश्चेति सुषुप्तावात्माज्ञानश्रुतिवद्विशेषाज्ञानपरा । न च 'अहरहर्ब्रह्म गच्छन्ति सति संपद्य न विदुः' इत्यात्मवेदनबोधकश्रुतिविरोधेन विशेषाज्ञानपरत्वं युक्तमिति वाच्यम् । एतच्छ्रुतेरीशपरत्वात् । योऽहमस्वाप्सं सोऽहं जागर्मीतिप्रत्यभिज्ञाविरोधस्य सुषुप्तावहमर्थस्याज्ञानेऽपि सत्त्वात् । किं च सुषुप्तावहमर्थाभावेऽहं निर्दुःखः स्यामितीच्छया सुषुप्त्यर्थप्रवृत्त्यनुपपत्तिः । न च कृशोऽहं स्थूलः स्यामितिवत् प्रवृत्त्युपपत्तिः । कार्श्यस्य परंपरासंबन्धेनानारोपितस्यारोपितस्य वाहमर्थे विद्यमानत्वेन प्रवृत्त्युपपत्तावपि सुषुप्तावहमर्थस्य नाशात्तदानींतनसुखादिसंबन्धाभावेन प्रवृत्त्यनुपपत्तेः विवेकिनां मम देहः स्थूलः स्यादितीच्छयैव प्रवृत्तेश्च । न च ममात्मनि दुःखं स्यादितीच्छया कस्यापि सुषुप्तौ प्रवृत्तिः । योऽहं सुप्तः सोऽहं जागर्मि, योऽहं पूर्वेद्युरकार्षं सोऽहमद्य करोमीति प्रत्यभिज्ञानुपपत्तेश्च । कर्तुर्भोक्तुरहमर्थस्य भेदेन कृतहानाकृताभ्यागमप्रसङ्गाच्च । न च सुषुप्तौ कारणात्मना स्थितस्यैवोत्पत्त्यङ्गीकारान्नानुपपत्तिः। कर्तृभोक्तृकारणस्य कर्तृत्वादिशून्यस्य स्थितावपि कृतहानादेरनुद्धारात् । 'अथ हैतत्पुरुषः स्वपिति' इत्यारभ्य 'गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः' इत्यादिश्रुतौ मनआदीनामेवोपरमोक्तेः । न च 'अथातोऽहंकारादेशः' 'अथात आत्मादेशः' इति पृथगुपदेश आत्माहमर्थयोर्भेदे मानम् । आत्मनस्त्वन्मते 'स एवाधस्तात्' इति उपदिष्टेन भूम्नेवाहंकारेणाप्यैक्येऽपि पृथगुपदेशसंभवात् । न च भूमात्मनोर्भिन्नत्वेन प्रत्यक्षसिद्धयोः पृथगुपदेश ऐक्यार्थः, अहंकारात्मनोरभेदस्य प्रत्यक्षसिद्धत्वेन तदुपदेशो भेदार्थ इति वाच्यम् । अहमर्थादन्यस्य आत्मनो भूमाख्यभिन्नत्वेन प्रत्यक्षासिद्धतया तयोरुपदेशो भेदार्थः ; अहमर्थस्य ब्रह्मभिन्नतया प्रत्यक्षसिद्धत्वेन तयोरुपदेश ऐक्यार्थ इत्यापत्तेः । न चाहंकाराद्भिन्नतयात्मनो भूमरूपब्रह्मभिन्नत्वस्य प्रत्यक्षासिद्धत्वे तदभिन्नत्वस्याप्यसिद्धतया तयोः सार्वात्म्योपदेशानुपपत्तिसहकारेणेयं श्रुतिस्तयोरभेदपरेति वाच्यम् ।'स एवेदं सर्वम्, अहमेवेदं सर्वम्, आत्मैवेदं सर्वम्' इत्याद्युपसंहारे 'स एवाधस्तात्, अहमेवाधस्तात्, आत्मैवाधस्तात्' इत्युपक्रमे च 'सर्वं समाप्नोषि ततोऽसि सर्वः।' इत्यादिस्मृत्यनुसारात् सर्वगतत्वस्यैवोक्तेः जडादिना सहैक्यस्य ब्रह्मणि सर्वमानविरुद्धत्वात् । भूमात्मोपदेशास्यामेवैक्यसिद्धौ अहंकारोपदेशवैयर्थ्याच्च । न च ब्रह्मण आपरोक्ष्यायाहंकारैक्योक्तिः।

त्वन्मते प्रत्यगर्थरूपस्यात्मन एवापरोक्षैकरसत्वेन तदैक्येनैवापरोक्षसिद्धेः । न चाहंकारस्यापरोक्ष्यं सुप्रसिद्धम् । देहापरोक्ष्यस्य ततोऽपि सुप्रसिद्धत्वेन तदैक्योपदेशापत्तेः । किं च ' भूमा नारायणाख्यः स्यात् स एवाहंकृतिः स्मृतः । जीवस्थस्त्वनिरुद्धो यः सोऽहंकार इतीरितः ।। अणुरूपोऽपि भगवान्वासुदेवः परो विभुः । आत्मेत्युक्तः स च व्यापी' इत्यादिस्मृत्या भगवद्रूपपरतया व्याख्यातत्वात् । मोक्षधर्मेऽपि ' अनिरुद्धो हि लोकेषु महानात्मा परात्परः । योऽसौ व्यक्तत्वमापन्नो निर्ममे च पितामहम् ॥ सोऽहंकार इति प्रोक्तः सर्वतेजोमयो हि सः । ' इत्युक्तेः । न चैकविषयकोपदेशत्रयं व्यर्थम् । मुमुक्षुज्ञेयैकनिष्ठात्मत्वभूमत्वाद्यनेकधर्मबोधकतया उपदेशत्रयसार्थक्यात् । ' अहंकारश्चाहंकर्तव्यं च ' इति श्रुतौ, ' महाभूतान्यहंकारः ' इति स्मृतौ चाहंकारशब्दो मान्ताव्ययरूपः कारप्रत्ययान्तः 'दम्भाहंकारः ' इत्यादौ देहेऽहंबुद्धौ गर्वे च प्रयोगेण नानार्थः । आत्मवाच्यहंशब्दोऽस्मच्छब्दसिद्धः । न च शब्दद्वयस्याहंकारे शक्तिस्तद्भिन्नेऽनिरुद्धादौ लक्षणा । अहंकारशब्दस्य तुल्यतयानेकत्र प्रयोगादेकत्र शक्तेर्नियन्तुमशक्यत्वात् । अहंशब्दस्याहंकारशब्दवदात्मभिन्ने प्रयोगप्राचुर्याभावात् । न चाहमर्थो नात्माहंधीविषयत्वात्, देहवदिति वाच्यम् । अहमर्थान्तर्गते तद्धीविषये चैतन्ये व्यभिचारात् । न च येन रूपेणाहंधीविषयता तेन रूपेणानात्मत्वं, स्वरूपेणात्मत्वमिति न व्यभिचारः । ' अहमात्मा गुडाकेश ' इत्यात्मत्वेनैवाप्यहंधीविषयत्वात् । स्वरूपेणात्मत्वे मानाभावाच्च । न चाहमर्थ आत्मान्यः, अहंशब्दाभिधेयत्वादहंकारशब्दे विधेयवदिति वाच्यम् । ' अहमात्मा गुडाकेश ' इत्यहंशब्दाभिधेये हरौ व्यभिचारात् । किं च मा न भूवं भूयासमित्यहमर्थस्यानात्मप्रेमास्पदत्वमनुपपन्नम् । न च प्रेमास्पदात्मतादात्म्यारोपेण प्रेमास्पदतोपपत्तिः । ' समारोप्यस्वरूपेण विषयो रूपवान् भवेत् । विषयस्य तु रूपेण समारोप्यं न रूपवत् ।। ' इति वाचस्पत्युक्तेरन्तःकरणगताप्रेमास्पदत्वस्यैवात्मनि प्रतीत्यापत्तेः । ननु किमधिष्ठानगतधर्मस्यारोप्येऽभानमापाद्यते, आरोप्यधर्मस्याधिष्ठाने, भाने वा ; नाद्यः ; यद्धर्मवत्तया ज्ञायमानाधिष्ठानं तस्येदंत्वादेरारोप्यनिष्ठतयाभानात् ; न द्वितीयः ; आत्मैक्याध्यासासमकाल एव प्रेमास्पदत्वसंभवेनारोप्येऽप्यप्रेमास्पदत्वाप्रतीतेः , कुतो विषये तत्प्रतीतिरिति चेन्न । अनिदमि रूप्ये शुक्तिनिष्ठेदंत्वादिभानवदधिष्ठाननिष्ठसाधारणधर्मस्यारोप्ये भानेऽप्यसाधारणधर्मस्य प्रेमास्पदत्वादेर्भानासंभवात् । आरोप्यासाधारणधर्माणां भीषणत्वादीनां रज्ज्वामिवारोप्यासाधारणधर्माणामप्रेमास्पदत्वादीनामेवात्मनि भानापत्तेः । अहमर्थस्याप्रेमास्पदत्वेन कदापि भानाभावेनात्मैक्याध्यासकाल एवेत्युक्तेस्तुच्छत्वाच्च । मोक्षेऽ-

हमर्थाभावे बौद्धमतप्रवेशापत्तेः । प्रेमास्पदाहमर्थस्य त्वन्मतेऽपि नाशात्तदतिरिक्तशून्यस्य तन्मतेऽप्यनाशात् । न चाहमर्थभिन्ने आत्मनि प्रेमधीः कदाचिदस्ति । 'मॉममृतं कृधि' 'ज्योतिरहं विरजा विपाप्मा भूयासम्' इति श्रुत्याहमर्थामृतत्वोक्तेः । अहं मुक्तः स्यामितीच्छाया अपि तद्विषयत्वात् । न चाहं पुष्टः स्यामितीच्छावदुपपत्तिः । मम शरीरं पुष्टं स्यादितिवन्ममात्मा मुक्तः स्यादितीच्छाया अदर्शनात् । न च यद्यपीच्छासमयेऽन्तःकरणाध्याससंभवेनात्ममात्रमुक्तीच्छा नास्ति, तथापि विशिष्टगतमुक्तीच्छाया एव विवक्षितविवेकेन विशेष्यगतमुक्तिविषयत्वपर्यवसानमिति वाच्यम् । अहमर्थभिन्नतयात्मनो भानस्य क्वाप्यदर्शनेनैतत्कल्पनस्याप्रामाणिकत्वात् । इदं रूप्यमित्यादाविव भ्रान्तेर्व्यंशत्वनियमात् । 'अहम्' इत्यत्र व्यंशताया अननुभवात् । अननुभूयमानस्य व्यंशत्वकल्पने 'आत्मा'इत्यत्रापि तत्कल्पनापत्तेः । न चाहं स्फुराम्यहमस्मीति व्यंशता भात्येव । ब्रह्म स्फुरति, आत्मास्तीत्यादावपि तदापत्तेः । अहमर्थो मोक्षान्वयी, तत्साधनकृत्याश्रयत्वात्संमतवदित्यनुमानात् । न च स्वर्गसाधनकृत्याश्रये ऋत्विजि व्यभिचारः । उद्देश्यतासंबन्धेन हि यत्र कृतिस्तत्र फलमित्येव नियमः। ऋत्विजां दक्षिणाया एवोद्देश्यत्वात् । अहमर्थोऽनर्थनिवृत्त्याश्रयः, अनर्थाश्रयत्वात्संमतवदित्यतोऽपि साधुदेहस्यानर्थाश्रयत्वाभावात् न व्यभिचारः। किंतु 'अहमुत्क्रान्तेऽनूत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामि' 'स प्राणमसृजत हन्ताहमिमास्तिस्रो देवताः' इत्यादौ जगत्कारणे सति प्राणमनःसृष्टेः पूर्वमहंतोक्तेः । 'तदात्मानमेवावेदहं ब्रह्मास्मि' इत्यवधारणेन शुद्धात्मनोऽहंतोक्तेः । 'मामेव ये प्रपद्यन्ते' 'मत्तः परतरं नान्यत्' 'मत्तः सर्वं प्रवर्तते' 'अहमात्मा गुडाकेश' 'ते प्राप्नुवन्ति मामेव' 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।' 'मामेकं शरणं व्रज ।' इत्यादिस्मृत्याहमर्थस्य परब्रह्मतोक्तेः ।

मोक्षहेतुकृतेर्योगात्सुखावन्वयतस्तथा ।
अहमात्मेति गीतायामहंत्वं स्थितमात्मनः ॥

**अहमर्थस्यात्मत्वम्॥ २४ ॥**

## २५. कर्तृत्वाध्यासभङ्गः ।

ननु स्यान्मोक्षसाधनकृत्याश्रयत्वेनाहमर्थस्यात्मत्वं, यदि कृत्यादिकमात्मनि, तदेव तु न , कृत्यादेर्बुद्धिधर्मस्यात्मन्यारोपादिति चेन्न । निरुपाधिरयमारोपः सोपाधिर्वा । आद्ये उपाधिनिवृत्तिं विनैव सहकृततत्वज्ञानेन निवृत्त्यापत्तेः । द्वितीये

रक्तं कुसुममिति प्रमावत्कदाचिन्मनः कर्त्रीति प्रमाया, लोहितः स्फटिक इतिवच्चैतन्यं कर्त्रीति भ्रमत्वस्य चापत्तेः। न च कर्तृविशिष्टान्तःकरणस्य चैतन्यात्मनाध्यासान्न तथा ज्ञानं, कुसुमस्य स्फटिकात्मनानध्यासात्तथा धीरिति वाच्यम्। अधिष्ठानात्मनानध्यस्तं जपाकुसुमस्थानीयमुपाधिं विना भीषणत्वादियुक्तसर्पस्य रज्ज्वात्मनेव कर्तृत्वादियुक्तबुद्धेश्चिदात्मना अध्यासे रज्जौ भीषणत्वान्तरस्येवात्मनि कर्तृत्वान्तरस्यानध्यासेन सोपाधिकत्वानुपपत्तेः। न चात्मनि कर्तृत्वान्तरमेवाध्यस्तम्। कदाचित्कर्तृत्वद्वयस्य विविच्य प्रतीत्यापत्तेः। न चात्मान्तःकरणयोरैक्याध्यासान्न तथा धीः। अध्यस्यमानधर्माश्रयस्याभेदारोपे औपाधिकत्वानुपपत्तेः। न च रज्जुसर्पादावध्यस्यमानभीषणत्वादिविशिष्टसर्पापेक्षयाधिकसत्ताकसर्पान्तरस्य संभवेन नायमुपाधिरतो निरुपाधिकत्वम्; अत्र त्वध्यस्यमानान्तःकरणापेक्षया कर्तृत्वादिधर्मविशिष्टमन्यदधिकसत्ताकं नास्त्येवेत्यन्तःकरणमात्रोपाधिरिति वाच्यम्। स्फटिकेऽध्यस्यमानप्रातिभासिकलौहित्यापेक्षयाधिकसत्ताकलौहित्यान्तरस्य सत्त्वेन तस्या निरुपाधिकत्वापत्तेः। न च यत्र धर्मी तादात्म्येनारोपितस्ततोऽधिकसत्ताकोऽतिरिक्तश्चास्ति। स निरुपाधिक आरोपः। लोहितः स्फटिक इत्यत्र न धर्मिणस्तादात्म्येनारोप इति सोपाधिकलोहितोपपत्तिरिति वाच्यम्। मम मनो मम बुद्धिर्ममान्तःकरणमिति समानेन्द्रियजन्यभेदधिया प्रतिबन्धात् समानेन्द्रियजन्याभेदारोपासंभवेन धर्ममात्रस्यैव वक्तव्यत्वेन लौहित्यादेरिव कर्तृत्वादेरुभयत्र प्रतीतेर्दुर्वारत्वात्। सोपाधिकस्थले धर्मारोपेणैवोपपत्त्या धर्म्यारोपस्याप्रामाणिकत्वाच्च। समीपस्थित उपदधाति स्वीयं धर्ममन्यत्रेति ह्युपाधिलक्षणम्। अभेदग्रहदशायामपि अयं भीषणः, सर्पो भीषणः, अहं गौरः, शरीरं गौरमितिवत् मनः कर्तृ, चैतन्यं कर्त्रीति प्रतीत्यापत्तेश्च। ‘कर्ता शास्त्रार्थवत्त्वात्।’ इति नये त्वयापि सांख्यरीत्या बुद्धेः कर्तृत्वे प्राप्ते जीवस्यैवेति सिद्धान्तितत्वाच्च। अविवेकनिबन्धनं जीवनिष्ठत्वं हि सांख्यस्याप्यस्ति! न च बुद्धेरेव कर्तृत्वं, भोक्तृत्वं चैतन्यस्येति प्राप्ते कर्तृत्वभोक्तृत्वयोरैक्याधिकरणनियमेन भोक्तृत्ववत् कर्तृत्वमप्यात्मन्यस्तीति सिद्धान्त इति वाच्यम्। आरोपितकर्तृत्वादेः सांख्येनाप्यात्मन्यङ्गीकारात्! मुक्त्यन्वयिनः शुद्धस्य कदापि नानर्थाश्रयत्वेन प्रतीतिः। भ्रमकालेऽहं भोक्ता प्रमाकाले बुद्धिर्भोक्त्रीति प्रतीतेरिति बन्धमोक्षयोर्वैयधिकरण्यापत्तेः। न च शुद्धोपहितयोः स्वाभाविकभेदाभावेन बन्धमोक्षयोः सामानाधिकरण्योपपत्तिः। उपहितगतानर्थस्य शुद्धगतवत्तद्गतदृश्यत्वमिथ्यात्वादेरपि शुद्धगतत्वापत्तेः। बुद्धेः कर्तृत्वे मोक्षस्यापि तत्रापत्तेः। ‘शास्त्रफलं प्रयोक्तरि’ इति न्यायात्। न च जातेष्टिपितृश्राद्धादौ

व्यभिचारः, कृतिफलयोः सामानाधिकरण्योपपादकोद्देश्यताख्यसंबन्धस्य फलाधिकरणे पुत्रपित्रादौ सत्त्वात् । आरोपितानारोपितसाधारणकर्तृत्वस्य फलं प्रति प्रयोजकत्वे बुद्धिदेहयोर्मोक्षान्वयापत्तेः । किं च ' तन्मनोऽकुरुत ' इत्यादौ मनसः कृतिकर्मत्वस्य, ' शृण्वन्तः श्रोत्रेण विद्वांसो मनसा ' इति करणत्वस्य, ' मन उदक्रामन्मीलित इव अश्नन् पिबन्नास्त इव ' इत्यादिश्रुतौ मनउत्क्रमेऽप्यात्मनः कर्तृत्वस्य, ' परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते ' ' स तत्र पर्येति जक्षन् क्रीडन् रममाणः ' इत्यादौ स्वरूपाविर्भावरूपपरममुक्तावपि कर्तृत्वस्य, ' विज्ञानं यज्ञं तनुते विज्ञानात्मा यो वेदेदं जिघ्राणीति स आत्मानन्दभुक्तथा प्राज्ञः ' इत्यादिश्रुतौ विज्ञाने कर्तृत्वस्य च श्रवणान्न बुद्धिः कर्त्री । विज्ञानपदं ब्रह्मपरं, ' विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुते ॥ ' इति वाक्यशेषात् । न च ' प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥ ' इत्यादिस्मृतिविरोधः । ' तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ ' इत्यनुसारात्केवलस्य स्वतन्त्रस्य कर्तृत्वनिषेधात् । अत एव ' ध्यायतीव लेलायतीव ' इत्यत्रेवशब्दः परतन्त्रप्रभौ प्रभुरिवेति जीवकर्तृत्वे परतन्त्रतामात्रपरः । न च चेतनस्य कर्तृत्वे निर्विकारश्रुतिविरोधः । श्रुतेर्द्रव्यान्तररूपतया परिणामाभावपरत्वात् । न च निष्क्रियत्वश्रुतिविरोधः । ' स्वाभाविकी ज्ञानबलक्रिया च ' इति श्रुत्यनुसारात् प्राकृतक्रियानिषेधपरत्वात् परिस्पन्दरूपक्रियाभावस्येष्टत्वात् । अस्तीत्यादिधात्वर्थरूपक्रियाया ब्रह्मण्यपि सत्त्वाच्च । न च क्रियापदं कृतिपरं, ' रुक्मवर्णं कर्तारमीशम् ' इति श्रुत्या ' कर्ता शास्त्रार्थवत्त्वात् ' इति सूत्रेण चेतने कृतेर्विहितत्वात् । ' कामः संकल्प्य ' इत्यारभ्य ' ह्रीर्धीर्भीः सर्वं मन एव ' इत्यन्ता श्रुतिर्मनःकरणत्वपरा । ' आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः ' इति श्रुतेः । क्षेत्रोत्पन्नधनेन वृक्षोत्पन्नदण्डेन पुरुषस्य धनित्वदण्डित्ववदन्तःकरणोत्पन्नकृतिसुखदुःखादिना पुरुषस्याविद्यासहकृतस्वामित्वसंबन्धेन कर्तृत्वदुःखित्वाद्युपपत्तिः । ईशमुक्तानामविद्याभावान्न दुःखादिभोगः । ईशस्य नित्यज्ञानेच्छाकृत्यादिमत्त्वरूपं कर्तृत्वादिकं सदैवास्ति । न च सदा सृष्ट्याद्यापत्तिः, प्रधानादाविच्छादिसंबन्धसंपादकसृष्टिकालादेः सदा सत्त्वात् । सृष्टिप्रलयकालाभ्यां संबद्धाया एकस्या एवेश्वरेच्छायाः सिसृक्षात्वजिहीर्षात्वसंभवात् । यथा मायिनां वृत्तिश्चिदुपरागार्थेति मते व्यापकस्यापि चैतन्यस्य वृत्तिद्वारक एव घटादिषु संबन्धः, यथा चान्येषां सर्वगतस्यापि गोत्वादेः सास्नादिमत्येव संबन्धो, नान्यत्र, तथा नित्यस्यापीशेच्छादेः सृष्टिकालादिना प्रधानादिषु संबन्धो, न स्वतः ।

मुक्तजीवस्य प्रकृतान्तःकरणादेरभावेऽपि संसारदशायामविद्यावृत्तस्वरूपज्ञानेच्छाकृत्यादेराविर्भावेन स्वाभाविकं कर्तृत्वादिकमस्त्येव । ' स तत्र पर्येति जक्षन् क्रीडन् रममाणः ' 'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति ' इत्यादिश्रुतेः । ' विहारोपदेशात् । ' ' संकल्पादेव तच्छ्रुतेः । ' इत्यादिसूत्राच्च ।

इति कर्तृत्वाध्यासभङ्गः ।। २५ ।।

## २६. देहात्मैक्यारोपभङ्गः ।

नन्वहं गौरोऽहं स्थूल इति स्थौल्यविशिष्टदेहस्याहमर्थेऽभेदारोपवच्चेतनोऽहं करोमीति कृत्यादिविशिष्टाहमर्थस्यापि चेतनेऽभेदारोपःस्यादिति चेन्न । योऽहं बाल्ये पितरावन्वभूवं सोऽहं स्थविरो नप्तॄननुभवामि, योऽहं स्वप्ने व्याघ्रादिदेहः सोऽहमिदानीं मनुष्यदेह इति देहभेदपूर्वकं स्वस्यैक्यानुसंधानादात्मनि देहैक्यारोपासंभवेन दृष्टान्तासिद्धेः । न च प्रत्यभिज्ञारूपं भेदकप्रत्यक्षमिदं, न भेदप्रत्यक्षव्याप्तं, न चैक्यधीविरोधि, नीला बलाकेत्यत्र नीलाद्भेदकस्य बलाकात्वस्य ग्रहेऽपि नीलभेदसाक्षात्काराभावस्य तदभेदसाक्षात्कारस्य च दर्शनादिति वाच्यम् । दोषविशेषाजन्यारोपस्यैव विशेषधीप्रतिबध्यत्वात् । नीलधियो दोषविशेषजन्यत्वेन तदप्रतिबध्यत्वात् । न च प्रकृतेऽपि दोषविशेषजन्य आरोपः । भेदज्ञानेन निवृत्त्यनुपपत्तेः । वस्तुतस्तु यदा यदा भेदकप्रत्यक्षं तदा भेदप्रत्यक्षमिति न कालिकव्याप्त्यङ्गीकारः । किं तु यत्र यत्र भेदकप्रत्यक्षं तत्र भेदप्रत्यक्षमिति दैशिकव्याप्त्यङ्गीकारः। भवति हि बलाकायां दिवा नीलभेदप्रत्यक्षम् । न च देहनाशकाले तद्भेदसिद्धावपि तद्देहकाले तदैक्यारोपसंभवेन मदिष्टसिद्धिरिति वाच्यम् । देहनाशे मृतस्य प्रत्यक्षसामग्र्यभावात् । म्रियमाणस्य जीवद्दशाव्यावृत्तभेदप्रत्यक्षसामग्र्यभावाच्च । मृतं पश्यतामचाक्षुषात्मप्रतियोगिकात्माधिकरणकभेदस्यापरोक्ष्यासंभवात् । ' ब्राह्मणो यजेत ' इत्यादौ देहविशेषविशिष्ट आत्मैव ब्राह्मणशब्दार्थः । साक्षात्प्रयत्नजन्यक्रियाश्रयवत्त्वं वा तद्भोगायतनत्वं वा तत्कर्मार्जितत्वं अविद्यासहकृतसाक्षात्स्वामित्वं वा संबन्धः । न च कर्मार्जितत्वं पुत्रादिदेहसाधारणम् । पुत्रदेहस्य तददृष्टेनैवोत्पत्तेः । सिद्धग्रामादिष्विव पित्रदृष्टेन संबन्धस्य जननात् । अन्यथा ब्रह्मज्ञानात्पितुर्मुक्तौ पुत्रदेहारंभकपितृकर्मक्षयेण पुत्रदेहनाशापत्तेः । श्रुतिस्थं ब्राह्मणपदं लक्षणया देहविशेषाध्यासवत्परं यदि, तदा पुत्रमित्रादिषु विकलेषु सकलेष्वहमेव विकलः सकलो वेति त्वयाध्यासाङ्गीकारेण ब्राह्मणमित्रस्य शूद्रस्याधिकारप्रसङ्गात् ।

शूद्रमित्रस्य ब्राह्मणस्यानधिकारप्रसङ्गाच्च । 'ब्राह्मणो न हन्तव्यः' इत्यादिविधेः सुप्तजीवन्मुक्तविषयकत्वानुपपत्तेश्च । कादाचित्काध्यासस्य नियामकत्वे उत्पन्नज्ञानिन उक्तनिषेधविषयत्वानुपपत्तेः । पातकेन नष्टब्राह्मणस्य तद्विषयत्वापत्तेश्च । न च पातक एव तत्राधिकारप्रयोजकः, पतितब्राह्मणव्यवहारादिति वाच्यम् । शापादिना यवनचाण्डालादितां प्राप्तस्य तथा व्यवहाराभावात् । न च प्रत्यक्षैकप्रामाण्यवादिनां चार्वाकादीनां देह एव आत्मेति कथं प्रवादः । अनुगतविषयकप्रत्यभिज्ञारूपप्रत्यक्षस्य देहात्मनोर्भेदस्य भेदकानां चावगाहिनः सविकल्पस्य चार्वाकादिभिरप्रामाण्याभ्युपगमात् । अत एवैतादृशकुसमयनिरासकतया देहात्मभेदबोधकश्रुतिः सार्था । न च मनुष्यत्वब्राह्मणत्वादेर्देहविशेषविशिष्टात्मवृत्तित्वे चाक्षुषत्वं न स्यात् । केवलात्मनोऽचाक्षुषत्वे देहविशेषविशिष्टस्य विशिष्टनिष्ठधर्मस्य च प्रतीतिबलाचाक्षुषतायाः स्वीकारे क्षतेरभावात् । विशिष्टस्यातिरिक्तत्वेन केवलस्य चक्षुरयोग्यत्वेऽपि देहविशेषविशिष्टस्य तद्योग्यत्वसंभवात् । न चात्मनोऽणुत्वेन चाक्षुषत्वानुपपत्तिः । नव्यतार्किकैरणुद्रव्यानङ्गीकारात् । त्रसरेणोरेव नित्यताङ्गीकाराच्च । देहविशिष्टात्मनिष्ठब्राह्मणत्वादिप्रत्यक्षं प्रति विजातीयचक्षुःसंयोगो हेतुः । न चात्मवृत्तिजातिविषयकत्वेनोक्तधियः संदिग्धतया क्लृप्तैः देहचक्षुःसंयोगैरेव निर्वाहेऽनन्तानां विजातीयसंयोगानां विशिष्टात्मनि कल्पने मानाभाव इति वाच्यम् । त्वां ब्राह्मणं पश्यामि, त्वमपि मां ब्राह्मणं पश्य, तव ब्राह्मणस्य देहे इदं पश्यामीत्यादिव्यवहारैरात्मवृत्तितयैव ब्राह्मणत्वप्रतीतेः । दण्डिनो दण्डोऽयमित्यादेरिव ब्राह्मणस्येदं शरीरमिति व्यवहारस्याप्युपपत्तेः । देहस्यैव ब्राह्मणत्वे तु मृतब्राह्मणदेहस्य प्रमादात्पादादिताडनेन विप्रताडनपापापत्तेः । न चेष्टापत्तिः । शिष्टैस्तत्र शवस्पर्शप्रायश्चित्तातिरिक्तप्रायश्चित्तानाचरणात् । ब्राह्मणत्वस्य देहमात्रनिष्ठत्वे 'ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते ।' इत्यादि स्मृतिविरोधापत्तेः । अस्माकं तु दण्डिनो दण्ड इतिवदुपपत्तेः । मृतब्राह्मणदेहशिरश्छेदादिना ब्रह्महत्याद्यापत्तेः । देहविशेषाध्यासवत्यात्मनि ब्राह्मणत्वादिस्वीकारे चाक्षुषत्वाद्यनुपपत्तेस्तत्रापि तौल्यात् । अतः कर्दमलिप्ते वस्त्रे कृष्णं वस्त्रं, पुत्रे सकले विकले चाहं सकलो विकलश्चेत्यादिवदहं गौरोऽहं स्थूल इत्याद्यौपचारिको व्यवहारः । न चारोपः । भेदधियो विद्यमानत्वादन्यथा मञ्चाः क्रोशन्तीत्यत्रारोपापत्त्यौपचारिकव्यवहारोच्छेदापत्तेः ।

इति देहात्मैक्यारोपभङ्गः ॥ २६ ॥

इति श्रीवनमालिविरचिते श्रुतिसिद्धान्तप्रकाशे प्रथमः परिच्छेदः ॥ १ ॥

# द्वितीयः परिच्छेदः

## १. मिथ्यात्वनिरुक्तिभङ्गः ।

विमतयः कटाक्षेण शक्नुवन्ति न वीक्षितुम् ।
यत्पदं तमहं वन्दे श्रीहयकन्धरं हरिम् ॥

अलौकिकं वस्तु लक्षणमुखेन ज्ञेयं, ब्रह्म चालौकिकं, तज्ज्ञानाय ' यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्ब्रह्मेति ' इत्याद्याः श्रुतयस्तल्लक्षणं वदन्ति । न च तटस्थलक्षणमिदम् । शाखोपस्थाप्यचन्द्रगतप्रकृष्टप्रकाशस्येव विश्वकर्तृत्वाद्युपस्थाप्यधर्मस्य निर्विशेषेऽभावेन तटस्थत्वासंभवात् । वास्तवविश्वोदयादिकर्तृत्वं विना सार्वज्ञ्याद्यसिद्ध्यापत्तेः । अतः सत्याशेषविश्वोदयादिकर्तृत्वं स्वरूपलक्षणं मुमुक्षुज्ञेयम् । ननु स्याद्विश्वकर्तृत्वादिकं स्वरूपलक्षणं, यदि विश्वं सत्यं स्यात्तदेव तु न, तस्य मिथ्यात्वात्; तथा हि, ब्रह्मप्रमान्येन सप्रकारेण वा; अबाध्यत्वे सत्यसद्भिन्नत्वे सति चिदन्यन्मिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्छुक्तिरूप्यवदिति चेन्न । मिथ्यात्वाद्यनिरुक्तेः । ननु सदसत्त्वानधिकरणत्वं मिथ्यात्वम्; तच्च सत्त्वविशिष्टासत्त्वाभावो वा सत्त्वात्यन्ताभावरूपद्वयं वा सत्त्वात्यन्ताभावविशिष्टासत्त्वात्यन्ताभावरूपविशिष्टं वेति चेन्न । सदेकस्वभावे जगति विशिष्टाभावस्येष्टत्वात् । द्वितीये सत्त्वासत्त्वयोरेकाभावेऽपरस्य सत्त्वावश्यकत्वेन व्याघातात् । निर्धर्मकब्रह्मवत्सत्त्वराहित्येऽपि सद्रूपत्वेनामिथ्यात्वोपपत्त्यार्थान्तराच्च । शुक्तिरूप्ये अबाध्यत्वरूपसत्त्वव्यतिरेकस्य सत्त्वे साध्यतावच्छेदकावच्छिन्नबाध्यत्वरूपासत्त्वस्याभावासिद्ध्या साध्यवैकल्याच्च । अत एव न तृतीयः । ननु सत्त्वासत्त्वयोः परस्परविरहरूपत्वानङ्गीकारान्न व्याघातः; परस्परविरहव्याप्यत्वादिकं च न व्याहतिकरं, गोत्वाश्वत्वयोः परस्परविरहव्याप्ययोरुष्ट्रे अभावसत्त्वात्; किं तु क्वचिदुपाधौ सत्त्वेनाप्रतीयमानत्वमसत्त्वं, त्रिकालाबाध्यत्वं सत्त्वं, तयोरभावः साध्य इति चेन्न । असल्लक्षणस्यासङ्गे ब्रह्मण्यतिव्याप्तेः । तस्याप्युक्तासत्त्वाङ्गीकारे लक्षणे सद्भिन्नेत्यस्य वैयर्थ्यापत्तेः । शब्दाभासेन तुच्छस्यापि क्वचिदुपाधौ सत्त्वेन धीसंभवाच्च । उक्तासत्त्वाभावस्य शून्यवादिनापि जगति स्वीकाराच्च । लाघवात्सत्त्वासत्त्वयोः परस्पराभावत्वस्यैवौचित्याच्च । न चैकेनैव सर्वानुगतेन ब्रह्मसत्त्वेन सर्वत्र सदिति ज्ञानोपपत्तौ न ब्रह्मवत्सत्त्वराहित्येऽपि प्रत्येकं सद्रूपत्वकल्पनं युक्तमन्यथानुगतव्यवहारानुपपत्तेरिति वाच्यम् ॥ सत्त्वात्रैविध्यस्य त्वयाप्यङ्गीकारात् । लाघवेन प्रामाणिकपदार्थापलापे प्रातीतिकसत्तयैव

सज्ज्ञानोपपत्तौ सद्रूपब्रह्मणोऽप्यपलापाद्यापत्तेः । घटो रूपी पटो रूपीत्यननुगतेनाप्यनुगतधीदर्शनाच्च । एतेन 'सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वयं साध्यम् ' इति निरस्तम् । निर्धर्मके ब्रह्मण्यतिव्याप्तेश्च । न च सद्रूपं ब्रह्म न तदभावाधिकरणं, प्रपञ्चेऽपि तुल्यत्वात् । न च ब्रह्मणो निर्धर्मकत्वात्सत्त्वासत्त्ववत्तदनधिकरणत्वमपि नास्ति । निर्धर्मकत्वहेतुसत्त्वाभ्यां व्याघातात् । सत्त्वाद्यनधिकरणत्वनिषेधे सदसत्त्वाधिकरणत्वापत्तेः । नापि सार्वत्रिकत्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वम् । निषेधस्य तात्त्विकत्वेऽद्वैतहानेरतात्त्विकत्वे सिद्धसाधनतापत्तेः । न च ब्रह्मस्वरूपो निषेधः । भ्रमकालानिश्चितस्य सापेक्षस्य निषेधस्य भ्रमकालनिश्चितनिरपेक्षनिर्विशेषब्रह्मस्वरूपत्वासंभवात् । ननु व्यावहारिक एवायं निषेधः; न च प्रतियोगिनः पारमार्थिकसत्यत्वापत्तिः; स्वाप्नगजगजाभावयोरुभयोर्जागरे बाधदर्शनात्; तथा प्रपञ्चतदभावयोर्निषेध्यतावच्छेदकस्य दृश्यत्वादेः सत्त्वादुभयोर्निषेध इति चेन्न । स्वाप्नगजस्य बाधेऽपि तदभावस्याबाधात् । स्वप्नद्रष्टात्मादेरबाधाच्च । स्वाप्निकाभावस्य बाधेऽपि स गजो नास्तीति धीनियामकस्याभावान्तरस्य सत्त्ववत्प्रपञ्चो नास्तीति धीनियामकस्याभावस्यावश्यकत्वात् । किं च स्वरूपेण निषेधेऽसत्त्वापत्तेः पारमार्थिकत्वेन निषेधप्रतियोगित्वस्य निर्धर्मके ब्रह्मण्यपि सत्त्वात् । एतेन 'स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वं मृषात्वम्' इति निरस्तम् । ' स एवाधस्तात्स एवोपरिष्टात् ' इति प्रतीयमानोपाधिके असङ्गे असङ्गत्वात् केवलान्वय्यत्यन्ताभावप्रतियोगिनि ब्रह्मण्यतिव्याप्तेः । न च साधिकरणत्वेन ब्रह्मणो मृषात्वेऽपि स्वरूपेण सत्यत्वं, प्रपञ्चेऽपि तुल्यत्वात् । न च प्रपञ्चस्य साधिकरणतयैव भानं, न स्वरूपेण, ब्रह्मणोऽप्यस्तीति कालसंबन्धितयैव भानात् । ननु ज्ञाननिवर्त्यत्वं मिथ्यात्वं, तच्च ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वम्; दण्डादिना घटादेः स्वरूपेण नाशेऽपि सत्कार्यवादाभ्युपगमेन कारणात्मनावस्थितिरस्त्येवेति न दण्डादिना नष्टेऽपि घटादावव्याप्तिरिति चेन्न । शुक्तिरूप्यस्यापि कारणात्मनावस्थानसंभवेन दृष्टान्तासिद्धेः । न च तत्कारणस्याज्ञानस्य नाशात्तस्यापि नाशः । एकाज्ञानपक्षे ब्रह्मज्ञानात्प्राक् शुक्त्यज्ञाननिवृत्तेरप्यसंभवात्त्वयानङ्गीकाराच्च । रूप्यं निवृत्तमित्यप्रतीतेः । शुक्त्यज्ञानं नष्टं, भ्रमो नष्ट, इति शुक्तिवत्सत्यस्यैवाज्ञानादेस्तत्प्रतीतेश्च । स्मृतिनिवर्त्यसंस्कारेऽतिव्याप्तेश्च । न च साक्षात्कारत्वेन ज्ञाननिवर्त्यत्वं तत् । परोक्षप्रमानिवर्त्ये परोक्षभ्रमविषयाव्याप्तेः । जीवन्मुक्तानुवृत्ताज्ञानलेशे चिरसंचिताद्वैतसंस्कारेण निवर्त्येऽव्याप्तेः । नापि सद्भिन्नत्वं मिथ्यात्वं, सत्त्वं च प्रमाणसिद्धत्वं, प्रमाणत्वं च दोषासहकृतज्ञानकरणत्वम् । घटादेरपि क्लृप्तदोषहीनप्रत्यक्षादिसिद्धत्वात् । कल्प्य-

दोषस्य ब्रह्मबोधकवेदेऽपि संभवात्। सर्वप्रमाणगम्ये त्वदभिप्रेते शुद्धेऽतिव्याप्तेश्चेति। यत्तु स्वानधिकरणानधिकरणकात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम्; भवति हि शुक्तिरूप्यादिकं स्वाधिकरणातिरिक्तदेशानधिकरणकस्य स्वाधिष्ठानीभूतस्वात्यन्ताभावात्मकचैतन्यप्रतियोगि; एवं घटादिकमपि चैतन्यरूपाभावप्रतियोगि, चैतन्यस्य निरधिकरणत्वादिति तन्न। घटाद्यभावस्य चक्षुरयोग्यचैतन्यात्मत्वस्वीकारे चाक्षुषत्वानुपपत्तेः। चाक्षुषस्य कृतचैतन्यनामकस्य भूतलादितुल्यस्य मिथ्यात्वेन घटाधिष्ठानत्वासंभवात्, रूप्याधिष्ठानस्य शुक्त्यवच्छिन्नचैतन्यस्य दृश्यस्य मिथ्यात्वेन साधिकरणत्वाच्च। इदं रूप्यं भूतलेऽस्तीति रूप्याधिष्ठानेदमर्थादेः साधिकरणत्वप्रतीतेश्च।

## इति मिथ्यात्वनिरुक्तिभङ्गः ॥ १ ॥

## २. मिथ्यात्वभङ्गः।

मिथ्यात्वस्य मिथ्यात्वे प्रपञ्चः सत्यः स्याद्ब्रह्मवत्। मिथ्यात्वस्य सत्यत्वे तेनैवाद्वैतहानिः। तद्वदेव विश्वस्यापि सत्यत्वोपपत्त्या दृश्यत्वादिकमप्रयोजकं स्यात्। ननु मिथ्यात्वमिथ्यात्वेऽपि न जगत्सत्यत्वापत्तिः; तत्र हि विरुद्धयोर्धर्मयोरेकमिथ्यात्वेऽपरसत्यत्वम्; यत्र मिथ्यात्वावच्छेदकमुभयवृत्ति न भवेत्, यथा वा परस्परविरहरूपयो रजततदभावयोः, यथा वा परस्परविरहव्यापकयो रजतभिन्नत्वरजतत्वयोस्तत्रैव निषेध्यतावच्छेदकभेदनियमात्; प्रकृते तु निषेध्यतावच्छेदकमेकमेव दृश्यत्वादीति चेन्न। लाघवात्परस्परविरहरूपयोः सत्यत्वमिथ्यात्वयो रूप्यतदभावयोरिवैकस्य निषेध्यतावच्छेदकस्यासंभवात्। न च संयोगतदत्यन्ताभावयोरिव सत्यमिथ्यात्वयोः समुच्चयोपपत्तिः। तद्वदत्रावच्छेदकभेदाभावात्। अन्यथोभयोरपि तात्त्विकत्वापत्तेः।

## इति मिथ्यात्वभङ्गः ॥ २ ॥

## ३. दृश्यत्वभङ्गः।

दृश्यत्वमपि न वृत्तिव्याप्यत्वम्। वेदान्तजन्यवृत्तिविषये ब्रह्मणि व्यभिचारात्। अन्यथा वेदान्तवैयर्थ्यापत्तेः। न च शुद्धं न दृश्यं, 'यत्तदद्रेश्यम्' इति श्रुतेः, किं तूपहितमेव, तच्च मिथ्यैव, न हि वृत्तिदशायामनुपहितं तद्भवतीति वाच्यम्। उपहितभाने उपधेयभानावश्यकत्वात्। अज्ञाते धर्मिणि कस्यचिद्धर्मस्य विधान-

निषेधयोरसंभवेन दृश्यत्वनिषेधाय शुद्धस्यापि ज्ञेयत्वाच्च । प्रसिद्धार्थकयत्तच्छब्द-योरयोगाच्च । स्वतः सिद्धेर्निरासाच्छुद्धासिद्ध्यापत्तेश्च । शुद्धं स्वप्रकाशमिति शब्दजन्यविशिष्टवृत्तौ शुद्धाप्रकाशे तस्य स्वप्रकाशत्वासिद्धेः । प्रकाशे सुतरां तदसिद्धेः । न च शुद्धं स्वप्रकाशमित्यस्य लक्षणयाशुद्धत्वमस्वप्रकाशत्वव्यापक-मित्यर्थः । तथा चाशुद्धत्वव्यावृत्त्या शुद्धे स्वप्रकाशत्वं पर्यवस्यति । यथा भेद-निषेधेनाभिन्नत्वम् । अशुद्धत्वव्यावृत्तिसंबन्धितया शुद्धस्य ज्ञानाभावे तत्र स्वप्रकाशत्व-पर्यवसानासंभवात् । न हि व्यापकाभाववत्त्वेनाज्ञाते व्याप्याभावः सिध्यति । किं च विशिष्टभाने विशेष्यविषयकत्वमावश्यकम् । न हि दण्डीति ज्ञानविषयता पुरुषे नास्ति । न च विशेष्यतापन्नं मिथ्यैव । अधिष्ठानस्याधिकसत्ताकत्वनियमेन विशेष्यतापन्नस्य मृषात्वेऽधिष्ठानत्वासंभवात् । न हि विशेष्यतानापन्नं सर्वथा ज्ञानविषयमधिष्ठानं भवति । जगतोऽपि विशेष्यतापन्नत्वादिना मिथ्यात्वं, स्वरूपेण तु सत्यत्वमित्यापत्त्या अद्वैतहानिः स्यात् । शशशृङ्गं तुच्छमिति शाब्दधीविषये तुच्छे त्वन्मते व्यभिचारश्च स्यात् । न च शब्दाजन्यवृत्तिविषयत्वं दृश्यत्वम् । तुच्छशुद्धब्रह्मणोः शब्दाजन्यवृत्तिविषयत्वान्न व्यभिचारः । सत्यस्य शुद्धस्यैव व्याव-हारिकघटाद्यधिष्ठानस्य घटादिगोचरचाक्षुषादिवृत्तिविषयतायाः सत्त्वात् । न ह्यधिष्ठानमविषयीकृत्याध्यस्तं वृत्तिर्विषयीकरोति । 'मनसैवानुद्रष्टव्यम्' 'दृश्यते त्वग्र्यया बुद्ध्या' इति ब्रह्मणोऽपि शब्दाजन्यवृत्तिविषयत्वोक्तेश्च । शब्दैकगम्ये धर्मादौ भागासिद्धेश्च । अत एव 'सप्रकारवृत्तिविषयत्वं दृश्यत्वम् इति' निरस्तम् । नापि चिद्विषयत्वं, तच्च यथाकथंचिच्चित्संबन्धित्वम् । चितः संयोगादिसंबन्धोक्ता-वप्रयोजकत्वादाध्यासिकसंबन्धोक्तावसिद्धेः । नापि स्वव्यवहारे स्वभिन्नचिदपेक्षा-नियतिर्दृश्यत्वं, वृत्तिभिन्नचिदपेक्षाया घटादावसिद्धेः । न च स्फुरणरूपे ब्रह्मणि वृत्तिभिन्नचितः कृत्याभावेऽप्यस्फुरणरूपे घटादौ प्रकाशाय चिद्विषयत्वमावश्यकम् । अज्ञानविरोधिस्फुरणत्वस्य ब्रह्मण्यप्यभावात् । तदविरोधिस्फुरणत्वस्य घटादावपि वक्तुं शक्यत्वात् । न च स्वतो विरोध्यपि वृत्त्यारूढं सदज्ञानविरोधि । स्वाकार-वृत्त्यारूढः सन् घटोऽप्यज्ञानविरोधीति वक्तुं शक्यत्वात् । न च विषयापरोक्षत्वाय चिद्विषयत्वम् । चित्प्रतिफलनं प्रति प्रयोजकतयावश्यकेन वृत्तिगतेन ज्ञानाकरणत्वा-दिना विशिष्टेन ज्ञानेन विषयीकृतत्वेन विषयस्यापरोक्ष्योपपत्तेः । नाप्यस्वप्रका-शत्वं दृश्यत्वम्; तच्चान्यानधीनापरोक्षत्वावच्छिन्नप्रतियोगिताकभेदाश्रयत्वम्; ब्रह्म त्वन्यानधीनापरोक्षं, 'यत्साक्षादपरोक्षाद्ब्रह्म' इति श्रुतेरिति वाच्यम् । अन्यं प्रति ब्रह्मापरोक्षत्वस्य प्रमाणाधीनत्वात् स्वविषयत्वानङ्गीकारेण स्वं प्रत्यपरोक्षत्व-

स्यैवाभानात् । स्वप्रकाशत्वाप्रसिद्ध्या तदभावरूपहेतोरसिद्धेः स्वाविषयस्यापि स्वं प्रत्यपरोक्षत्वे घटादेरपि घटं प्रत्यन्यानधीनापरोक्षत्वस्य वक्तुं शक्यत्वात् । निर्विशेषे ब्रह्मणि स्वरूपभिन्नापरोक्षत्वस्याभावेन व्यभिचाराच्च । नाप्यज्ञाननिवर्तकवृत्तिविषयत्वे सति यच्चिदविषयत्वरूपफलाव्याप्यत्वं स्वप्रकाशत्वं, तद्भिन्नत्वं हेतुः । उक्तवृत्तिविषये चिदविषये च घटादावसिद्धेः ।

इति दृश्यत्वभङ्गः ॥ ३ ॥

## ४. जडत्वहेतुभङ्गः ।

नापि जडत्वं हेतुः । तद्धि नाज्ञानत्वम् । आत्मनि व्यभिचारात् । तथा हि ज्ञानं स्वविषयं परविषयं वा । नाद्यः । त्वयानङ्गीकारात् । नान्त्यः । मोक्षपराभावात् । न चार्थोपलक्षितप्रकाशस्यैव ज्ञानत्वात्तस्य मोक्षेऽप्यनपायः । यदा कदाचिद्विषयसंबन्धान्मोक्षे ज्ञानत्ववद्यदा कदाचिद्दुःखादिसंबन्धात् दुःखित्वाद्यापत्तेः । अभावादिषु सप्रतियोगित्वादेरिव ज्ञाने सविषयत्वस्यापि स्वाभाविकस्य धर्मिसमसत्ताकस्य दर्शनात् । न च सविषयत्वं ज्ञानस्य विषयेण सहाध्यासिकः संबन्धः । स च न स्वाभाविकः । एतद्धेत्वधीनमिथ्यात्वसिद्धेः प्रागाध्यासिकसंबन्धासिद्धेः । अज्ञानादेरिव ज्ञानस्य सविषयतायाः स्वाभाविकत्वात् । भोक्तृभोज्यं विना भुजेरिव ज्ञातृज्ञेयं विना ज्ञानासंभवाच्च । न चानादौ तदनपेक्षा । अनादेः प्रागभावस्य प्रतियोग्यपेक्षया जात्यादेर्व्यक्त्यपेक्षायां अज्ञानस्य विषयाश्रयापेक्षया दर्शनात् । ज्ञानस्य संज्ञेयत्वं हि ज्ञेयोल्लेखित्वम् । तच्चातीतादिविषयकज्ञानस्याप्यक्षतम् । तच्च तवानिष्टम् । उल्लेखस्यैव तव संसारत्वेन मोक्षे तदुल्लेखे तद्विप्लवापत्तेः । किं चात्मरूपं ज्ञानं प्रमा भ्रमो वा । नाद्यः । तद्वेद्यस्याविद्यादेः समत्वापत्तेः । नान्त्यः । भ्रमस्य दोषजन्यत्वनियमेनात्मनस्तदभावात् । उभयभिन्नत्वे ज्ञानमेव न स्यात् । न च तार्किकाभिमतेश्वरज्ञानवद्घटादिनिर्विकल्पकवच्चोभयवैलक्षण्येऽपि ज्ञानत्वोपपत्तिः; ईश्वरज्ञानस्य प्रमात्वे गुणजन्यस्य भ्रमत्वे दोषजन्यत्वापत्तेः (?) ( ईश्वरज्ञानस्य प्रमात्वे गुणजन्यत्वं चेद् भ्रमत्वे दोषजन्यत्वस्य चापत्तेः ), निर्विकल्पकस्य तद्वति तत्प्रकारत्वाभावादिति वाच्यम् । अबाधितार्थकत्वरूपयाथार्थ्यप्रामाण्यस्येश्वरीयज्ञानादावप्यक्षतेः । विशेष्यावृत्तिप्रकारकत्वरूपप्रामाण्यस्येश्वरज्ञाननिर्विकल्पयोरक्षतत्वाच्च । प्रमासामान्ये न गुणजन्यत्वं नियामकम् । किं तु तद्विशेष एव । 'प्रमामात्रे नानुगतो गुणः' इति मणिकृदुक्तेः । किं तु दोषाजन्यत्वमेव हि तन्नि-

यामकम् । न च ज्ञानपदजन्यप्रतीतिविशेष्यभिन्नत्वं हेतुः । वृत्त्यात्मकज्ञाने भागासिद्धेः । लाक्षणिकज्ञानपदजन्यधीविशेष्यत्वस्य देहेन्द्रियादावपि सत्त्वेनासिद्धेः । तत्पदजन्यशाक्तबोधविशेष्यत्वाभावस्य ब्रह्मण्यपि सत्त्वेन व्यभिचारात् । न चानानन्दत्वं हेतुः । वैषयिकानन्दे भागासिद्धेः । न च वैषयिकानन्दोऽपि ब्रह्मानन्दः । क्षीरनीरादिपानजानन्दानां तारतम्येनोपलब्धेर्ब्रह्मत्वासंभवात् । न च दुःखनिष्ठोत्कर्षापकर्षयोरानन्दे उपचारः । दुःखलेशाप्रतीतावप्यानन्दतारतम्यप्रतीतेः ।

## इति जडत्वहेतुभङ्गः ॥ ४ ॥

## ५. परिच्छिन्नत्वहेतुभङ्गः ।

ननु देशतः कालतो वस्तुतः परिच्छिन्नत्वं हेतुः, तच्चात्यन्ताभावप्रतियोगित्वं ध्वंसप्रतियोगित्वमन्योन्याभावप्रतियोगित्वं च यथायथोक्तमिति चेन्न । आद्यान्त्ययोर्ब्रह्मणि व्यभिचारात् । मध्यमस्य ध्वंसकालादौ भागासिद्धेः । न चात्यन्ताभावान्योन्याभावयोः प्रतियोगिसमसत्ताकत्वविशेषणान्न व्यभिचारः, तदभावस्य मिथ्यात्वेन तत्तत्समसत्ताकत्वाभावादिति वाच्यम् । अनृतादौ ब्रह्मात्यन्ताभावान्योन्याभावयोर्मिथ्यात्वे तत्र ब्रह्मसंसर्गस्याभेदस्य च तात्त्विकत्वापत्त्या पारमार्थिकस्यैवाभावस्याङ्गीकार्यत्वात् । संदिग्धानैकान्त्यस्य दुर्वारत्वाच्च । अप्रयोजकत्वाच्च । 'आकाशवत्सर्वगतश्च नित्यः' इति श्रुत्युक्तेर्नित्ये आकाशे ध्वंसप्रतियोगित्वासिद्धेश्च । न च 'आत्मनः आकाशः संभूतः' इति श्रुत्युक्तोत्पत्त्या तन्नाशोऽनुमेयः । भूताकाशस्योत्पत्तिनाशादिसंभवेऽपि अव्याकृताकाशस्य तदसंभवात् । न हि पूर्तिं विनावकाशनाशः संभवति । एतेन 'विमतं मिथ्या विभक्तत्वात्, सन् घटः सन् पट इति घटादिकमननुगतसद्रूपे विभज्यते' इति निरस्तम् । नीलो घटो, नीलः पटः, घटश्चलति, पटश्चलति, असन्नृशृङ्गमसत्खपुष्पमित्यादौ नीलादिषु घटादीनां असति नृशृङ्गादीनामध्यासापत्तेः । अयं सर्पोऽयं सर्प इति रज्जुमालादिष्वननुगतेष्वनुगतस्य सर्पस्यारोपवदननुगतेषु घटादिष्वनुगतसद्रूपस्यारोपापत्तेश्च । खण्डो गौर्मुण्डो गौरित्यादावनुगतगोत्वादौ व्यक्तेरारोपापत्तेश्च । न च सद्रूपब्रह्मभिन्नं गोत्वादिकं नोपेयते । अगवादिव्यावृत्तस्य सकलगवादिविषयव्यवहारस्यानुपपत्तेः । सद्रूपस्य सर्वानुगतत्वेन व्यावृत्तेरसंभवात् । न च तत्तद्व्यक्तिविशिष्टं सत्सामान्यमेव तत्तद्व्यवहारजनकम् । तत्तद्व्यक्तिविशिष्टस्य मिथ्याभूतस्य व्यक्त्यनधिष्ठानत्वेन तत्र व्यक्तेरनध्यासात् । सत्सामान्यव्यक्त्योराध्यासिकातिरिक्तसंबन्धस्य त्वयानङ्गीकारात् ।

एतेन ' घटादिकं सद्रूपे कल्पितं, प्रत्येकं तदनुविद्धत्वेन प्रतीयमानत्वात्, प्रत्येकं चन्द्रानुविद्धजलतरङ्गचन्द्रवत्' इति निरस्तम् । रूपादिविहीनस्य ब्रह्मणश्चाक्षुषत्वायोगाच्च । न च प्रतिनियतेन्द्रियग्राह्येष्वेव रूपाद्यपेक्षा । सद्रूपं तु सर्वेन्द्रियग्राह्यं, यथा मीमांसकमते काल इति न तद्ग्रहे रूपाद्यपेक्षा । चक्षुरादिगृहीतस्य दृश्यस्य मिथ्यात्वेन घटाद्यनधिष्ठानत्वं स्यात् । एतेन "द्रव्यग्रहे रूपाद्यपेक्षा, ब्रह्म तु न द्रव्यम्, 'अस्थूलमनणु' इति परिमाणनिषेधात्" इति निरस्तम् । एतच्छ्रुतेः प्राकृतपरिणामनिषेधपरत्वाच्च । अन्यथा ' अणोरणीयान्महतो महीयान् ' इति श्रुतिविरोधापत्तेः । एतेन ' अध्यस्तद्रव्यत्ववति गुणादौ रूपानपेक्षया चाक्षुषत्वदर्शनेन धर्म्यन्यूनसत्ताकद्रव्यवद्ग्रहे चक्षुषो रूपापेक्षा, ब्रह्मणि च द्रव्यत्वं धर्म्यपेक्षया न्यूनसत्ताकमिति न तद्ग्रहे चक्षुषो रूपापेक्षा ' इति निरस्तम् । स्यादृष्येव नियमो यद्याकाशपरिणामशब्दादीनां द्रव्यत्वेन कदाचिच्चाक्षुषत्वम् । चक्षुर्योग्यानां गुणादीनां द्रव्यत्वेन गुणत्वादिना चक्षुषा ग्रहणे स्वाश्रयसमवेतत्वादिसंबन्धेन रूपस्य हेतुत्वमस्त्येव ।

इति परिच्छिन्नत्वहेतुभङ्गः ॥ ५ ॥

## ६. अंशित्वहेतुभङ्गः ।

नन्वयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अंशित्वात्पटत्वात्पटान्तरवदिति चेन्न । अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न, एतत्तन्त्वारब्धद्रव्यत्वाद्व्यतिरेकेण पटान्तरवदिति प्रतिरोधात् । अयं पट एतत्तन्त्ववृत्तिः, पटत्वात्पटान्तरवदित्याभाससाम्याच्च । न च यत्रैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं तत्रैतत्तन्त्वारब्धत्वाभाव इति व्यतिरेकव्याप्तावेतन्निष्ठप्रागभावाप्रतियोगित्वमुपाधिः । उपाध्यभावेनैतत्तन्तुनिष्ठप्रागभावप्रतियोगित्वेन त्रैकालिकव्याप्यवृत्त्यत्यन्ताभावप्रतियोगित्वसाधने व्याघातात् । सत्प्रतिपक्षे सत्प्रतिपक्षान्तरस्यादोषत्वाच्च । न च साध्याप्रसिद्धिः । एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगि, संसर्गाभावप्रतियोगित्वव्याप्यत्वात्प्रागभावप्रतियोगित्ववदिति सामान्यतस्तत्प्रसिद्धेः । वस्तुतस्त्वभावसाध्यकव्यतिरेकिणि साध्यप्रसिद्धिर्नापेक्षितैव । एतेन 'विमतं ज्ञानव्यतिरेकेणासत्, चिदाभासे सत्येवोपलभ्यमानत्वात्' इति निरस्तम् । ज्ञाने सत्येवोपलभ्यमानत्वस्य ब्रह्मणि व्यभिचारात् । न च ज्ञानं विना ब्रह्मोपलभ्यते । व्याघातात् । चिदाभासशब्देन चैतन्योक्तौ घटादावसिद्धेः ।

इत्यंशित्वहेतुभङ्गः ॥ ६ ॥

## ७. अक्षस्यानुमानबाध्यत्वे बाधकम् ।

सप्रकारकधीबाधार्हत्वं अध्यस्ताधिकदोषप्रयुक्तभानत्वं प्रतिभासमात्रशरीरत्वं चोपाधिः । देहात्मैक्याद्यध्यासस्यापि सप्रकारभेदविषयकज्ञानेन बाधयोग्यत्वान्न तत्र साध्याव्याप्तिः । न च सप्रकारकेति अध्यस्ताधिकेति च विशेषणं व्यर्थम्, तद्भिन्नैवोपाधेः साध्यव्यापकत्वात्, तावन्मात्रस्य तु साधनव्यापकत्वान्नोपाधित्वमिति वाच्यम् । विशिष्टाभावस्यातिरिक्तत्वेन वैयर्थ्याभावादिति दृश्यत्वादिषूपाधयः । सन् घटः सद्दुःखमित्यादिप्रत्यक्षबाधिताश्च दृश्यत्वादयः । सत्त्वं च व्याप्यवृत्तिसर्वदेशीयत्रैकालिकनिषेधाप्रतियोगित्वम् । वियदादेः कालिकसंबन्धेन काले वृत्तेर्न तदभावः, केवलान्वयीति न तत्राव्याप्तिः । ननु चक्षुराद्ययोग्यानेकपदार्थघटितत्वेनैतादृशसत्त्वस्य ग्रहणे चक्षुरादेर्न सामर्थ्यम्; न हि त्रैकालिकसर्वदेशीयव्याप्यवृत्तिनिषेधप्रतियोगित्वं कस्यचित्प्रत्यक्षं, येन तदभावः प्रत्यक्षः स्यादिति चेन्न । स्वदेशकालवृत्तिनिषेधप्रतियोगित्वाभावे गृह्यमाणे,कालत्रयमध्ये वर्तमानकालस्य, सर्वदेशमध्ये प्रकृतदेशस्यापि प्रवेशेन, तत्र निषेधप्रतियोगित्वाभावस्य गृहीतत्वात्तत्संवलितकालत्रयवर्तिसर्वदेशीयनिषेधप्रतियोगित्वरूपमिथ्यात्वानुमानप्रतिरोधसंभवात् । न च स्वदेशकालवृत्तिसकलनिषेधप्रतियोगित्वस्य चक्षुराद्ययोग्यत्वेन तदभावः सुतरां तदयोग्यः, स्वदेशकालवृत्ति यत्किंचिन्निषेधाप्रतियोगित्वं तु मिथ्यात्वाविरोधीति वाच्यम् । योग्याधिकरणे घटत्वावच्छिन्नप्रतियोगिताकाभावस्य योग्यत्वनियमात् । एतदधिकरणवृत्तिघटे घटान्तरेष्विवैतत्कालिकैतदधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वं स्यात्तर्ह्युपलभेतेत्यापादनसंभवेनोक्तनिषेधप्रतियोगित्वाभावस्य घटे योग्यत्वात् । किं च ज्ञानप्रामाण्यं गृह्णन् साक्षी घटादिगतमबाध्यत्वं गृह्णात्येव । न हि विषयाबाधमनन्तर्भाव्य प्रामाण्यग्रहणमस्ति । न च व्यवहारकालाबाध्यत्वमात्रेण प्रवृत्ताविसंवादोपपत्तेस्तद्रूपप्रामाण्यस्य साक्षिग्रहणे न विरोधः । वर्तमानमात्राबाध्यत्वग्रहेण त्रिकालगनिषेधप्रतियोगित्वरूपमिथ्यात्वग्रहस्य प्रतिबन्धसंभवात् ; किं च कालान्तरीयबाधकं यत्कालावच्छेदेनाक्षेण स्वार्थो गृहीतस्तत्कालावच्छेदेन तन्निषेधत्युतान्यकालावच्छेदेन; आद्ये सुस्थो विरोधो, द्वितीये त्वनित्यतैव । न च यदवच्छेदेनाक्षादिना स्वार्थो गृहीतस्तदवच्छेदेनैव निषेधत्यबाध्यत्वरूपप्रामाण्यस्य प्रपञ्चज्ञाने मयानङ्गीकारादिति वाच्यम् । क्लृप्तदूरादिदोषाभावस्य घटाद्यध्यक्षे सत्त्वेन स्वतः प्राप्ताबाधितार्थकत्वरूपप्रामाण्यत्यागे बीजाभावात् । कल्प्यदोषस्य त्वदभिमताद्वैतमानेऽपि संभवात् । नन्विदं रूप्यमित्यत्रानिदमि रूप्येऽधिष्ठानगतेदंताभानवत्सन् घट इत्यत्राप्यधिष्ठान-

भूतं सद्रूपं ब्रह्मैव भासत इति चेन्न। चाक्षुषादिसप्रकारकज्ञानविषयस्य त्वन्मते मिथ्यात्वनियमेन चाक्षुषधीविषयस्य घटाद्यधिष्ठानत्वासंभवात्। अनित्यो घटो नीलो घट इत्यनित्यत्वादेरिव सत्यत्वस्यापि घटनिष्ठत्वाच्च। न च नीलस्य घटसमसत्ताकत्वात् घटात्प्रागसत्त्वाच्च न घटाधिष्ठानत्वं, चाक्षुषस्य ब्रह्मणोऽपि घटसमसत्ताकत्वात्। नीलस्य घटात्प्रागविद्यमानताया: कल्प्यत्वाच्च। किं च घट: सन्नित्यत्र सत्ताजातिस्फुरणनिबन्धनं स्वरूपसत्त्वनिबन्धनं वा कालत्रयाबाध्यत्वनिबन्धनं वा सामानाधिकरण्यम्। न तु ब्रह्मरूपसत्त्वनिबन्धनं, तस्याचाक्षुषत्वात्। न चाभावादिसाधारणसत्प्रतीतौ जातिस्फुरणं न संभवति। क्वचित्साक्षात्क्वचित्परंपरासंबन्धेन तत्प्रतीतेर्जातिविषयत्वात्। न च विजातीयसंबन्धेन समानाकारधियोऽनुपपत्ति:। रक्तं रूपं, रक्त: पटो, रक्तं पुष्पं, रक्त: स्फटिक इत्यत्र संबन्धभेदेऽपि प्रतीतेरेकाकारत्वात्। प्रकारतया भातं प्रतीत्याकारभेदकं, न तु संसर्गतया भातम्। न च स्वरूपसत्त्वपक्षे अननुगतेन कथमनुगतव्यवहार:। चैत्रो दण्डी, मैत्रो दण्डी, रूपी घटो, रूपी पट इतिवदुपपत्ते:। न च त्रिकालाबाध्यत्वनिबन्धनं, तस्याचाक्षुषत्वात्। घटादिव्यावहारिकाधिष्ठानस्यापि शुद्धस्याचाक्षुषत्वात्। तस्य कथंचिच्चाक्षुषत्वे प्रकृतेऽपि तथा वक्तुं शक्यत्वात्। 'सत्यं ज्ञानम्' इत्यत्रापि तथात्वापत्तेश्च। न च न सत्तासंबन्धेन ब्रह्मणि सत्त्वं, किं तु स्वरूपेणैव, घटादावपि स्वरूपेणैव सत्त्वसंभवात्। प्रत्यक्षस्यानुमानादितो जात्यैव प्राबल्यम्। कथमन्यथौष्ण्यप्रत्यक्षेणाग्निशैत्यानुमितिप्रतिबन्ध:। न च त्वाचप्रत्यक्षमुपजीव्यत्वेनैव शैत्यानुमितिप्रतिबन्धकं, न तु जात्या धर्मादिश्चक्षुरादिना प्रसिद्धावपि साध्यस्य त्वाचं विनाप्रसिद्धेरिति वाच्यम्। शब्दादिना साध्यप्रसिद्ध्यनन्तरं प्रवृत्तानुमाने त्वचोऽनुपजीव्यत्वात्। अनुमानाद्यगृहीतग्राहित्वेन तदनिवर्तितदिङ्मोहादिनिवर्तकत्वेन चाक्षुषस्य तत: प्राबल्यम्। न चाक्षागृहीतं धर्माधर्मादिकमनुमानेन गृह्यते इति तदपि प्रबलं स्यात्। धर्मादौ प्रत्यक्षाप्रवृत्ते:। एकत्र समावेशे हि प्राबल्यादिविचार:। न च त्वाचप्रत्यक्षानिवर्तितवंशोरगभ्रमनिवर्तकचक्षुषोऽपि त्वगपेक्षया प्राबल्यं स्यात्ततश्च चित्तनिम्नोन्नतज्ञानस्य चाक्षुषस्य तद्विरोधित्वाचज्ञानाद्बाधो न स्यादिति वाच्यम्। क्वचित्तूलकपिण्डादौ पाषाणत्वादिभ्रमस्य चक्षुषा निवर्तितस्य त्वाचज्ञानेनापि निवृत्तेर्विनिगमकाभावेनान्यतरस्य प्राबल्यासंभवात्। 'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्।' इति तु वैदिकविषयम्। न चाद्वैतमपि वैदिकम्। प्रत्यक्षसिद्धस्वरूपभिन्नाद्वैतस्य त्वयानङ्गीकारात्। न च केवलवेदगम्ये प्रत्यक्षाप्राप्त्या कथं तत्राक्षत: आगमस्य प्राबल्यम्। वेदोक्तकारीर्याद्यनुष्ठानेऽपि क्वचित्प्रत्यक्षेण फलाभावनिश्चयेऽपि नागमस्या-

प्रामाण्यम्। [1]रामकृष्णादौ शास्त्रेण विष्णुत्वनिर्णयोत्तरमेव विष्णुरयं दोषवानिति प्रत्यक्षादिधीः स्यात्। सा त्वस्योपजीव्यागमविरोधादप्रमेत्यर्थे 'प्राबल्यमागमस्यैव' इत्यस्य तात्पर्यात्। 'क्व च प्रत्यक्षतः प्राप्तमनुमानागमबाधितम्।' इति स्मृतेश्च। 'यदाहवनीये जुहोति' इत्यस्मात् 'पदे जुहोति' इत्यस्य विशेषविषयत्वेन प्राबल्यवत्। घटविषयसत्त्वग्राहिणः प्रत्यक्षस्य सामान्यतो द्वैतनिषेधकात्प्राबल्यम्। किं च पञ्चदशरात्रे प्रथमेऽहन्यग्निष्टुन्नामके नामातिदेशेनैकाहाग्निष्टुद्धर्मभूता सुब्रह्मण्याग्नेयी प्राप्ता। तस्या अल्पविषयायाश्चतुर्दशाहस्सु चोदकेन प्राप्तया ऐन्द्या सुब्रह्मण्यया बहुविषयया बाधो, बहुबाधस्यान्याय्यत्वात्तथा द्वैतग्राहिप्रत्यक्षतदुपजीव्यनुमानकर्मकाण्डसगुणोपास्तिवाक्यादिरूपबहुमानाबाधायाद्वैतवाक्यस्य प्रतीतार्थत्याग उचितः। न च दृष्टान्ते बहुविषयबाधोऽत्र बहुभिरिति वैषम्यम्। बहुत्वमात्रस्यैव प्राबल्ये तन्त्रत्वेन प्रमेयगतत्वप्रमाणगतत्वादिवैशिष्ट्यस्यातन्त्रत्वात्। उक्तं ह्याकाशाधिकरणे त्वदीयैः "'आकाश इति होवाच' इति आकाशे निरूढप्रथमानुपसंजातविरोध्याकाशपदानुरोधेन बहून्यपि चरमाणि सर्वकारणत्वज्यायस्त्वानन्तत्वादीनि लिङ्गानि भूताकाशे कथंचिद्योज्यानि" इति प्राप्ते "सर्वकारणत्वादिबहुलिङ्गानुग्रहार्थमेकमाकाशपदं जघन्यवृत्त्या ब्रह्मपरं, 'त्यजेदेकं कुलस्यार्थे' इति न्यायात्" इति प्रमाणगतं बहुत्वं प्राबल्ये तन्त्रम्। किं चोपजीव्यत्वेनाप्यक्षमनुमानादिबाधकम्। यथा घटे विभुत्वानुमाने पक्षग्राह्यध्यक्षं; नरशिरः शुचि, प्राण्यङ्गत्वात्, शङ्खवदित्यादौ साध्यग्राहिजातीयो 'नारं स्पृष्ट्वा सचैलो जलमाविशेत्' इत्याद्यागमः; मनोवैभवानुमाने ज्ञानासमवाय्याधारत्वहेतुग्राहकमनुमानम्। किं वाध्यमपेक्षिताशेषग्राहि प्रत्यक्षं बाधकम्। चक्षुरादेः शब्दाद्यग्राहित्वेऽपि तद्ग्राहिश्रोत्रादिजातीयत्वेनोपजीव्यत्वम्। दृष्टं हि नरशिरःकपालाशुचित्वबोधकागमस्य तच्छुचित्वानुमोपजीव्यशुचित्वागमसजातीयत्वेन तदनुमानात्प्राबल्यम्। न च यत्स्वरूपमुपजीव्यते तन्न बाध्यं, बाध्यते च तात्त्विकाकारः, स नोपजीव्यत इति वाच्यम्। स्वरूपेणैव निषेधप्रतियोगित्वरूपमिथ्यात्वं बोधयतानुमानादिना स्वरूपग्राहकस्य प्रत्यक्षस्याविरोधासंभवात्। पारमार्थिकत्वमात्रनिषेधे प्रत्यक्षगृहीतस्वरूपानिषेधे च पारमार्थिकत्वधर्महीनब्रह्मवत्पारमार्थिकत्वहीनस्यापि प्रपञ्चस्य सद्रूपत्वोपपत्तेः। न च नेदं रूप्यमिति ज्ञाने प्रतियोग्यर्पकतयोपजीव्यमिदं रूप्यमिति तद्बाधकं स्यात्। प्रतियोग्यनर्पकतयोपजीव्यस्यैव

---

1. "इत्यर्थे 'प्राबल्यमागमस्यैव' इत्यस्य तात्पर्यात्। आगमेन रामकृष्णादौ निर्दोषत्वव्याप्यविष्णुत्वं प्रतिपाद्यते। प्रत्यक्षेण तु दोषित्वव्याप्यक्षतरुधिरादिकं गृह्यते। तत्र 'प्राबल्यमागमस्यैव' इत्यस्य प्रवृत्तेश्च।" इति पाठः महिषपुरमातृकायाम्।

लोके प्राबल्यस्य दृष्टत्वेन तादृगुपजीव्यत्वस्य प्राबल्यातन्त्रत्वात् । यत्प्रामाण्यं यत्प्रामाण्याधीनं तत्तस्योपजीव्यं इत्यर्थाद्वा । अस्ति च जीवेशैक्यधीप्रामाण्यमैक्य-प्रतियोग्युपस्थापकप्रामाण्याधीनं तत्तस्योपजीवकम् । नास्ति च निषेधधीप्रामाण्यं प्रतियोगिधीप्रामाण्याधीनमिति न तत्तस्योपजीवकम् । यद्वा यद्विना यस्यानुत्थानं तत्तस्योपजीव्यम् । रूप्यज्ञानमुपजीव्यमपि न प्रबलम् । परीक्षितस्यैवोपजीव्यस्य प्राबल्यात् । परीक्षा च सजातीयविजातीयसंवादविसंवादाभावौ । तौ च भ्रमे न स्तः । प्रकृते च स्तः । सन् घट इति विशेषदर्शनजन्यज्ञानान्तरस्य घटार्थक्रियायाः क्लृप्तदूरादिदोषाभावस्य च सत्त्वात् । न च परीक्षया स्वसमानदेशकालीनविषया-बाध्यत्वं प्रामाण्यस्य व्यवस्थाप्यते, तथा च व्यवहारदशामात्रबाध्यत्वं[1] प्रामाण्ये व्यवस्थितमिति कथमत्यन्ताबाध्यत्वाभावग्राहकानुमानागमयोर्न प्रवृत्तिरिति वाच्यम् । परीक्षिताक्षगृहीतस्य वर्तमानकाले अबाधेन स्वरूपेणैव त्रैकालिकनिषेधबोधकानुमा-नादेः प्रवृत्तेरसंभवात् । कालान्तरबाधस्यानित्यत्वपर्यवसन्नत्वेन विश्वमिथ्यात्वासिद्धेः । किं चाक्षस्याप्रामाण्ये तद्गृहीतयोग्यताप्रामाण्यादेर्मिथ्यात्वापत्त्या तत्तुल्ययोगक्षेम-शब्दार्थस्य मिथ्यात्वापत्तेः । बोध्यवद्विशेष्यकत्वस्य परामर्शनिष्ठस्य मिथ्यात्वे तत्तुल्ययोगक्षेमानुमेयस्यापि मिथ्यात्वापत्तेश्च । न च प्रामाण्यमिथ्यात्वं न तद्विषय-मिथ्यात्वे तन्त्रम्, निर्विकल्पके प्रामाण्यासत्त्वेऽपि विषयमिथ्यात्वाभावात् ; किंतु तदभाववति तत्प्रकारकत्वरूपमप्रामाण्यं, तच्चेह नास्तीति वाच्यम् । विशेष्या-वृत्तिप्रकारकत्वस्याबाधितार्थत्वकस्य च प्रामाण्यस्य मिथ्यात्वेऽर्थमिथ्यात्वावश्यकत्वात् । न च शब्दार्थस्य ब्रह्मणः सर्वबाधावधेर्बाधासंभवेनार्थबाधात्प्रामाण्यबाधः ; किं तु तद्विषयत्वरूपसंबन्धबाधात्तथा; तथा चाबाधितार्थविषयकत्वरूपप्रामाण्यमिथ्यात्वेऽपि नार्थो मिथ्या, विशिष्टस्यैकांशमिथ्यात्वेऽप्यपरांशसत्यत्वात्, यथा दण्डबाधनिबन्धन-दण्डिपुरुषबाधेऽपि पुरुषो न बाधित एवेति वाच्यम् । ब्रह्मणः प्रमाविषयत्वा-भावेऽप्रामाणिकत्वापत्त्यावश्यंभावेन बाधावधित्वासिद्धेः । अन्यथा शशशृङ्गा-दीनामपि बाधावधित्वापत्तेः, मानाभावे दृष्टान्तमात्रेणार्थासिद्धेश्च प्रत्यक्षस्य जात्यो-पजीव्यत्वेन च प्राबल्यम् । प्रत्यक्षस्य लिङ्गबाध्यत्वे वह्न्यौष्ण्यप्रत्यक्षं शैत्यानुमानस्या-त्मस्थायित्वप्रत्यभिज्ञानं च क्षणिकत्वानुमानस्य बाधकं न स्यात् । न च तत्परी-क्षितत्वादनुमानबाधकं, विश्वप्रत्यक्षेऽपि परीक्षायाः सत्त्वात् । किं च पशुत्वेन शशे शृङ्गानुमानं स्यात् । पशुत्वमेव शृङ्गित्वे तन्त्रम्; न तु तद्विशेषो, गौरवात् । एवं

---

१. 'व्यवहारदशामात्राबाध्यत्वं' इति पाठः महिषुरमातृकायाम् ।

पदार्थत्वादिनानन्त्यादिकं सर्वत्र सिध्येदिति व्यावहारिक्यपि व्यवस्था न स्यात् । न ह्यत्र प्रत्यक्षबाधादन्यो दोषोऽस्ति । न चायोग्यशृङ्गसाधने प्रत्यक्षबाधस्यासंभवेन तत्र व्याप्तिग्राहकतर्केष्वाभासत्वं त्वयापि वाच्यम् । शृङ्गस्य योग्यत्वनियमात् । अयोग्यशृङ्गादिनिरूपितसहचारादेः क्वापि पशुत्वादावदर्शनेन तदनुमित्यापादनासंभवात् । योग्यशृङ्गनिरूपितव्याप्त्यादेर्गवादौ पशुत्वे गृहीतत्वेन शशादौ तदनुमित्यापादनसंभवात् ।

## इत्यक्षस्यानुमानबाध्यत्वे बाधकम् ॥ ७ ॥

## ८. अक्षस्यागमबाध्यत्वे बाधकम् ।

यद्यक्षं शब्दबाध्यं स्यात्तदा जैमिनिना 'तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिः' इत्याद्यर्थवादस्य 'अदितिर्द्यौः' इत्यादिमन्त्रस्य च दृष्टविरोधेनाप्रामाण्ये प्राप्ते 'गुणवादस्तु गुणादविप्रतिषेधः स्यात्' इत्यादिना गौणार्थता नोच्येत । 'यजमानः प्रस्तरः' इत्यादेर्गौणार्थता च नोच्येत । त्वया च प्रत्यक्षाविरोधाय तत्त्वंपदयोर्लक्षणा नोच्येत । श्रुतिविरोधे प्रत्यक्षस्यैवाप्रामाण्यसंभवात् । न च व्यवहारदशायामेव परीक्षितप्रत्यक्षविरुद्धग्राहिणो 'धूम एवाग्नेर्दिवा ददृशे' 'अदितिर्द्यौः' 'यजमानः प्रस्तरः' इत्यादेस्तद्विरोधेन मुख्यार्थत्वेऽप्यद्वैतागमस्य तद्विरोधाभावान्नामुख्यार्थत्वम्; प्रत्यक्षादेः परीक्षया हि व्यावहारिकप्रामाण्यमात्रं सिद्धम्; तच्च नाद्वैतागमेन बाध्यते; बाध्यते तु तात्त्विकं प्रामाण्यम्; तन्न परीक्षया सिद्धमिति वाच्यम् । स्वरूपेण त्रैकालिकनिषेधबोधकस्य वर्तमानमात्रसत्त्वग्राहिप्रत्यक्षेण विरोधावश्यकत्वात् । अक्षगृहीतस्यानिषेधे तस्य तात्त्विकत्वापत्त्याद्वैतहानेः । न चाखण्डे तात्पर्यस्य निर्वाहायैवोक्तलक्षणा । न त्वक्षविरोधात् । अखण्डे तात्पर्यस्य निरासात् । यत्तु तत्त्वंपदयोर्नामुख्यार्थकत्वं जहदजहल्लक्षणया शक्यैकदेशपरित्यागेऽपि विशेषांशस्यात्यागादिति तन्न । अशक्यांशस्य ग्रहणे अशक्यार्थपरत्वरूपामुख्यार्थत्वापरिहारात् । न हि 'छत्रिणो यान्ती'ति शब्दः शक्यार्थोऽपि मुख्यार्थः । तदग्रहणे लक्षणावैयर्थ्यात् । न च प्रस्तरादिवाक्यस्यान्यशेषत्वाल्लक्षणया मुख्यार्थत्वं युक्तम् । अनन्यशेषे 'सोमेन यजेत' इत्यादौ वैयधिकरण्येनान्वये उद्देश्यत्वोपादेयत्वानूद्यत्वविधेयत्वगुणत्वप्रधानत्वरूपविरुद्धत्रिकद्वयापत्त्या सामानाधिकरण्येनान्वये सोमलतायागयोर्भेदग्राहकप्रत्यक्षाविरोधाय मत्वर्थलक्षणाश्रयणेन मानान्तरविरोधादेरेव लक्षणाया मुख्यार्थाश्रयणे बीजत्वात् । अवाच्ये ब्रह्मणि सर्ववेदस्य तव लक्षणयामुख्यार्थकत्वात् । यत्तु सर्ववेदस्यावाच्ये ब्रह्मणि लाक्षणिकत्वेऽपि नामुख्यार्थकत्वं,

तव वेदान्तानामपरोक्षजनकत्वप्रयासो व्यर्थः स्यात्परोक्षादपि तन्निवृत्तिसंभवात् । न च नायं सर्प इति वाक्यादिना सविलासाज्ञानानिवृत्तावपि भ्रमगताप्रामाण्यज्ञापनेन भ्रमे प्रामाण्यबुद्धेस्तद्विषयस्य सत्यत्वधियो भ्रमनिवर्तकत्वेनैव भ्रमनिवर्तकत्वव्यपदेशः, भ्रमे प्रामाण्यभ्रमस्य तद्विषये सत्यत्वभ्रमस्य च परोक्षत्वान्नापरोक्षबाधापेक्षेति वाच्यम् । आप्तः प्रत्यक्षतः सर्पाभावं गृह्णातीति जानत एव पुंस उक्तभ्रमद्वयनिवृत्तिसंभवेनाक्षमूलकशब्दादिनैव तन्निवर्तनात् । तदमूलकेन क्वाप्यनिवर्तनाच्च । न ह्यन्धेनात्याप्तेन नायं सर्प इत्युक्तेऽपि रज्ज्वादानादौ निःशङ्कं प्रवर्तते । अन्यथा प्रस्तरादिवाक्यमप्ययजमानधियोऽप्रामाण्यज्ञापनेन तद्धियः प्रामाण्यबुद्धेस्तद्विषयस्य सत्यत्वबुद्धेश्च निवर्तकं स्यात् । अत एव नायं सर्प इत्युक्तेऽपि किमेवं वदसि, अपि पुनः परामृशसीति प्रश्नो दृश्यत इति न केवलानुमानादिकं सर्पाद्यपरोक्षभ्रमनिवर्तकं, न वा तद्भ्रमत्वादिज्ञापकम् । ज्वालैक्यधीस्तु नारोपः किं तूपचार एव । निर्वापारोपणादिना भेदधीसत्त्वात् । किं च शैलाग्रस्थाल्पत्वधीर्दूरादिदोषजन्या दृष्टेति दूरस्थचन्द्राल्पत्वधीरपि दोषहेतुकेति निश्चीयते, एवमाकाशे समीपे नीरूपत्वनिश्चयाद्दूरे रूपित्वधीर्दोषजन्येति प्रागेव निश्चीयते । पीतः शङ्ख इत्यादिप्रत्यक्षं तु प्राथमिकपरीक्षितप्रत्यक्षेण शङ्खो न पीत इत्यर्थाभावनिश्चयात् बाधितमेवाप्रामाण्यज्ञानास्कन्दितमेवोत्पद्यते । एवं सवितृसुषिरादिप्रत्यक्षमपि । तथा च चन्द्राल्पत्वप्रत्यक्षं दूरादिदोषनिश्चयात् पीतः शङ्ख इत्यादिप्रत्यक्षं प्राथमिकार्थाभावनिश्चयादेव बाधितमिति दोषज्ञानविषयबाधज्ञानादिना अप्रामाण्यज्ञानकलङ्कितेन स्वविषयपरिच्छेदपराङ्मुखेनाक्षेणावकाशे दत्तेऽनुमानादिकं प्रवर्तते । न त्वक्षस्य तद्बाधकम् । अप्रामाण्यज्ञानाकलङ्कितं स्वार्थपरिच्छेदकं निःशङ्कप्रवृत्तिजननयोग्यं, यथाग्निरुष्ण एव, प्रस्तरो यजमानभिन्न एव, घटः सन्नेव, दुःखं सदेवेत्यादि नान्यावकाशदं न वान्येन बाध्यम् । न ह्यत्र प्रागेव दूरादिदोषधीर्वार्थाभावनिश्चयो वास्ति । उक्तं हि विवरणे 'यत्राविचारपुरःसरमेव प्रत्यक्षावभासमप्यनुमानादिना बाधितमुच्छिन्नव्यवहारं भवति तत्र तथा भवतु । यत्र पुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्बलाबलचिन्तया बाधनिश्चयस्तत्र नानुमानादिना प्रत्यक्षस्य मिथ्यात्वसिद्धिः । ' इति । किं च जाग्रदादिज्ञानस्य प्रमात्वे स्वप्नदृष्टस्य शुक्तिरूप्यादेश्च बाधासिद्धौ दृष्टान्तासिद्धिः । उक्तं हि बौद्धं प्रति वार्तिके 'प्रतियोगिनि दृष्टे च जाग्रद्बोधे मृषा भवेत् । स्वप्नादिदृष्टिरस्माकं तव भेदोऽपि किंकृतः ॥' इति । न चारोप्यसत्ताधिकसत्ताकविषयत्वेनापेक्षिकप्रमात्वेन न्यूनसत्ताकविषयत्वेन बाधकतेति वाच्यम् । स्वाप्निके शुक्ताविदं रूप्यमिति धियो बाधकेनेदं

रूप्यमिति ज्ञाने त्वन्मते चारोप्याधिकसत्ताकत्वाभावात् । स्वप्ने भातस्य कृत्स्नस्य तव प्रातिभासिकत्वनियमात् । तदभाववति तत्प्रकारकत्वादिरूपाप्रामाण्ये सत्यप्यापेक्षिकप्रमात्वेन बाधकत्वाङ्गीकारे वेदान्तजन्यब्रह्मधियो मिथ्यार्थकत्वेऽपि प्रपञ्चधीबाधकत्वोपपत्त्याधिष्ठानब्रह्मणः सत्त्वासिद्ध्यापत्तेः, वल्मीके स्थाणुत्वभ्रमस्य तदनन्तरं तत्र जातेन पुरुषत्वभ्रमेण निवृत्त्यापत्तेश्च । न चाक्षे भाविबाधकशङ्कासंभवेन तद्दुर्बलम् । शङ्काबीजाभावात् । निष्कारणशङ्काया वेदेऽपि संभवात् । शुक्तिरूप्यादिप्रत्यक्षबाधदर्शनेन प्रत्यक्षमात्रे बाधशङ्काङ्गीकारे शून्यमेवाद्वैतमिति स्वाप्निकश्रुत्यर्थबाधदर्शनेन वेदमात्रे बाधशङ्कायाः, पुंश्चल्या व्यभिचारदर्शनेन मातरि व्यभिचारशङ्कायाश्चापत्तेः ।

## इत्यक्षस्य लिङ्गादिबाध्यत्वे बाधकम् ॥ १० ॥

## ११. जगत्सत्यत्वानुमानानि ।

सत्यत्वानुमानबाधिताश्च दृश्यत्वादयः । तथा हि विमतं परमार्थसत्, असत्त्वाभाववत्त्वे सति प्रातिभासिकत्वाभावात् । ब्रह्मवत् । आरोपितत्वेनोभयसंमतं प्रातिभासिकपदेनोक्तमिति न सिद्धान्ते प्रातिभासिकाप्रसिद्धिर्दोषः । अन्यथा तवापि मिथ्यात्वानुमाने प्रातिभासिकान्यस्य पक्षीकृतत्वाद्दोषसाम्यम् । ब्रह्मण्यसत्प्रातिभासिकव्यावृत्तिरूपं तत्त्वाभावरूपं वा हेतुं प्रति व्यावर्तकतया प्रयोजकत्वेन पृथिवीव्यावृत्तिं प्रति पृथिवीत्वस्येव तद्विरुद्धपरमार्थसत्त्वस्यैव दृष्टत्वेन न काल्पनिकसत्त्वेन हेतूपपत्त्या प्रयोजकता, ज्ञानत्वानन्दत्वादिकं च नासद्व्यावृत्तिप्रयोजकम् । साक्षादसदविरोधित्वात् । न चासद्व्यावृत्तेः प्रातिभासिकरूप्यव्यावहारिकविश्वपरमार्थसद्ब्रह्मसाधारण्येन तत्त्रितयनिष्ठमेकं प्रयोजकं, प्रातिभासिकव्यावृत्तेश्चासद्विश्वब्रह्मसाधारण्यात्तत्त्रितयसाधारणमेकं वाच्यमिति न परमार्थसत्त्वं हेतुप्रयोजकमिति वाच्यम् । असद्व्यावृत्तिविशिष्टप्रातिभासिकव्यावृत्तेर्हेतूकरणात् विशिष्टव्यावृत्तिं प्रति परमार्थसत्त्वस्यैव प्रयोजकताया दृष्टत्वात् । एतेन ‘ त्रितयसाधारणव्यावृत्तिद्वयप्रयोजकसमावेशादेव ब्रह्मण्युभयव्यावृत्त्युपपत्तौ नीलत्वघटत्वरूपावच्छेदकद्वयसमावेशोपपन्ननीलघटत्ववन्न भिन्नप्रयोजककल्पनायां मानमस्ति’ इति निरस्तम् । उभयत्वाश्रययोर्व्यावृत्त्योर्व्यभिचारित्वात् । उभयत्वपर्याप्तिनिवेशस्य परस्परवैशिष्ट्यनिवेशस्य वावश्यकत्वात् । हेतुतावच्छेदकावच्छिन्नं प्रत्येव साध्यस्य प्रयोजकत्वात् । न च नित्यत्वमुपाधिः । असाध्यमात्रस्यानित्यत्वस्य साध्याभावं विनाप्युपपत्त्याप्रयो-

जकत्वात् । प्रमां प्रति साक्षादनिषेध्यत्वेन विषयत्वं च हेतुः । प्रमात्वं च विशेष्यावृत्त्यप्रकारकज्ञानत्वम् । मिथ्यामिथ्यात्वकत्वमपि हेतुः । मिथ्यात्वं च परमार्थसद्भिन्नत्वादिकम् । [1]तेन ज्ञाननिव(र्त)कस्य कं(?) (कल्पकं?) कल्पितत्वेनानवस्थानात् । अतो यावद्विशेषाभावे कल्पकसामान्याभावसिद्धिः । न चानाद्यविद्योपधानवशेन शुद्धमेव कल्पकं, कल्पकत्वं हि कल्पनां प्रत्याश्रयत्वं विषयत्वभासकत्वं वा, तत्सर्वं कल्पनासमसत्ताकत्वेन न शुद्धत्वव्याघातकमिति वाच्यम् । अनाद्यविद्योपहितस्य शुद्धत्वासंभवात् । तदुपधानस्य दोषं विनैवाङ्गीकारे स्वाभाविकत्वापत्त्या त्वन्मते निवृत्त्यनापत्तेः । निरुपाधिकस्य सत्यत्वनियमाच्च । आश्रयत्वादेरसङ्गे ब्रह्मणि स्वतो दोषं विनासंभवाच्च । न चोपहितस्य कल्पकत्वेऽपि नानवस्था, अविद्याध्यासस्याध्यासान्तरानपेक्षत्वात्, स्वपरसाधारणसर्वनिर्वाहकत्वोपपत्तेः, कल्पितप्रतिबिम्बविशिष्टादर्शादेरादर्शान्तरे प्रतिबिम्बकल्पकत्वदर्शनाच्चेति वाच्यम् । येनोपहितं चैतन्यं कल्पकं, तत्प्रत्यात्माश्रयदोषेणोपहितस्य कल्पकत्वासंभवात् । उपहितस्यापि त्वन्मते कल्प्यत्वेन स्वस्यैव कल्पकत्वे चात्माश्रयापत्तेः । उपहितान्तरस्य कल्पकत्वेऽनवस्थापत्तेः । अविद्याध्यासस्याध्यासान्तरानपेक्षत्वेनाध्यस्तत्वापत्त्यासत्यत्वापत्तेः । प्रतिबिम्बस्थले आदिप्रतिबिम्बकल्पकस्य बिम्बस्याकल्पितस्याङ्गीकारेणानवस्थाद्यभावात् । प्रतिबिम्बस्य छायावत्सत्यवस्त्वन्तरत्वाच्च । विमतं नात्मन्यध्यस्तमात्मसाक्षात्कारवत्प्रवृत्तिविषयत्वात् । यदेवं तदेवं, यथा घटसाक्षात्कारवत्प्रवृत्तिविषयः पटो न तत्राध्यस्तः । न चासिद्धिः । ईशजीवन्मुक्तयोरात्मसाक्षात्कारवतोरपि जगद्रक्षणभिक्षाटनादौ प्रवृत्तेः । शङ्खेऽध्यस्तमपि पीतत्वं न शङ्खतत्त्वश्वैत्यसाक्षात्कारवत्प्रवृत्तिविषय इति न व्यभिचारः । न च मुखैक्यसाक्षात्कारवत्प्रवृत्तिविषये मुखेऽध्यस्ते प्रतिबिम्बे व्यभिचारः । ऐक्यविशिष्टमुखसाक्षात्कारेण तदज्ञाननिवृत्तेः । अज्ञानं विनाध्यासासंभवात् । न च तद्व्यतिरेकेणोपलभ्यमानत्वमुपाधिः । सुखादावनध्यस्ते सुखत्वादौ व्यक्तिव्यतिरेकेणोपलभ्यमानत्वाभावेन साध्याव्यापकत्वात् । प्रातीतिकस्याधिष्ठानोपलम्भं विनापि परोक्षोपलम्भसंभवेन पक्षादौ साध्याभावसाधकोपाध्यभावस्यासंभवाच्च । विमतं नेश्वरमायाकल्पितं, तं प्रत्यपरोक्षत्वात् । यथा चैत्रं प्रत्यपरोक्षो घटो न तन्मायाकल्पितः । नापि जीवमायाकल्पितं, तस्मिन्सुप्ते व्यवस्थितत्वात् । न चाद्ये ऐन्द्रजालिकं प्रत्यपरोक्षे तन्माया-

---

१ 'तेन ज्ञाननिवर्त्यत्वादिरूपमिथ्यात्वस्य तुच्छे मिथ्यात्वेऽपि न व्यभिचारः । कल्पकाभावोऽपि हेतुः । न चासिद्धिः । शुद्धं हि चैतन्यं न कल्पकं, निर्दुष्टत्वात् । नोपहितं कल्पकं, कल्पितत्वात् । अतो यावद्विशेषाभावे ' इति पाठः मद्दिषपुरमातृकायाम् ।

कल्पिते व्यभिचारः । स्वमायया मोहं विना मायिकस्यापरोक्ष्यासंभवात् । यथा हि रोगाद्यापरोक्ष्याभावेऽपि गुरूपदेशादिना ज्ञातौषधादिप्रभावो वैद्य इदमिमं रोगमाशु नाशयति, पश्यन्त्विति वदति, तथैन्द्रजालिकोऽस्मान्मन्त्रादित इत्थं लोका भ्राम्यन्तीति ज्ञातमन्त्रादिप्रभावः आपरोक्ष्याभावेऽपीममाम्रं पश्यन्त्विति वदति । न च द्वितीये सिद्धिः । दृष्टिसृष्टिवादस्य निरसिष्यमाणत्वेन स एवायं घटादिरिति प्रत्यभिज्ञया तत्सिद्धेः । आत्मा परमार्थसदन्यः, पदार्थत्वादनात्मवत् । न च कल्पितात्मप्रतियोगिकभेदेनार्थान्तरम् । कल्पितमिथ्यात्वेन मिथ्यात्वानुमानेऽपि सिद्धसाधनतापत्तेः । न च व्यावहारिकपदार्थमादाय सिद्धसाधनेऽतिप्रसङ्गाभावः । मिथ्यार्थमादाय सिद्धसाधनत्वस्य सर्वत्र संभवेन लालायाः वक्त्रासववत्त्वदीयव्यावहारिकादिनामकरणस्याकिंचित्करत्वात् । आत्मा यावत्स्वस्वरूपमनुवर्तमानानात्मवान् तादृशभावानात्मवान् वा स्वज्ञानाबाध्यतादृशानात्मवान् वा । पदार्थत्वात् भावत्वाद्वा, घटादिवत् । स्वपदं समभिव्याहृतपरमिति व्याप्तिग्रहदशायां दृष्टान्तस्वरूपं पक्षधर्मताग्रहदशायां चात्मस्वरूपमेव प्राप्यत इति न साध्याप्रसिद्धिः । सिद्धसाधने आत्मधीर्न स्वविषयविषयकधीबाध्या धीत्वाच्छुक्तिधीवत् । न च विरोध्यविषयकत्वमुपाधिः । ब्रह्मस्वरूपभिन्नविरोध्यविषयकत्वस्य पक्षेऽपि सत्त्वेन स्वरूपस्य भ्रमेऽपि भानत्वेन तन्मात्रज्ञानस्याविरोधित्वेन च साधनव्यापकत्वात् । न चान्धोऽयं रूपज्ञानवानित्यन्धस्य रूपविषयतया कल्पितं यज्ज्ञानं तस्य रूपं नान्धगम्यमिति स्वविषयविषयकप्रत्यक्षबाध्यत्वदर्शनाद्व्यभिचार इति वाच्यम् । अन्धविशेष्यकरूपज्ञानप्रकारकभ्रमस्यान्धविशेष्यकरूपज्ञानाभावप्रकारकज्ञानेनैव निवर्त्यत्वात् । असमानकप्रकारस्यापि विरोधित्वे रूपे अन्धज्ञानविषयत्वाभावज्ञानस्यापि तन्निवर्तकत्वाच्च । न ह्यन्धरूपधियान्धरूपधीर्बाध्यते येन त्वत्प्रलापावकाशः स्यात् । किं चात्माधिष्ठानकभ्रमहेतुर्न स्वकार्यभ्रमाधिष्ठानधीबाध्यः । भ्रमहेतुत्वात् । यदेवं तदेवं, शुक्त्यधिष्ठानकभ्रमहेतुकाचादिवत् । न च व्यावृत्ताकाराधिष्ठानज्ञानानवधित्वं स्वकार्यभ्रमाधिष्ठानानारोपितत्वं चोपाधिरिति वाच्यम् । अखण्डार्थकवेदान्तजन्यनिष्प्रकारकधियो व्यावृत्ताकारत्वासंभवेन साधनव्यापकत्वात् । द्वितीयोपाध्यभावस्य पक्षे संदिग्धत्वात्ततः साध्याभावसिद्धिरूपोपाधिफलासंभवात् । न च दूरादिदोषादुपलादौ यत्र चाकचक्यकल्पना तेन चाकचक्यदोषेण शुक्ताविव रजतकल्पना, तत्र पाषाणधिया रूप्यचाकचक्ययोरुभयोर्बाधाद्व्यभिचार इति वाच्यम् । पाषाणत्वादिधियो रूप्यादिधीविरोधित्वेऽपि चाकचक्यस्य क्वचित्पाषाणेऽपि संभवेन तज्ज्ञानाविरोधित्वात् । प्रातीतिकचाकचक्यादिदोषस्याज्ञातस्यासंभवेन रूप्यादिभ्रमानुपपत्त्या

चाकचक्यादिज्ञानस्यैव दोषान्तरस्य वाज्ञातस्याध्यस्ताधिकसत्ताकस्य हेतुताया अङ्गीकार्यत्वाच्च । ब्रह्म देशकालासंबद्धं नावतिष्ठते पदार्थत्वाद्घटवत् । न च यदा ब्रह्म तदावश्यं देशकालसंबन्ध इति व्याप्तौ सिद्धसाधनं, परममुक्तौ तु न देशकालादिरिति वाच्यम् । अमुक्तिदशायां तौ स्तो, मुक्तिदशायां न स्त इत्यस्य व्याहतत्वात् । 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये ' ' अथ मर्त्योऽमृतो भवति' 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।' 'ज्ञात्वा मां शान्तिमृच्छति।' 'ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा । विशन्ति विप्रप्रवराः सांख्या भागवतैः सह ॥ ' इत्यादिश्रुतिस्मृतिषु मुक्तेः कालसंबन्धस्य, ' यत्र त्वस्य सर्वमात्मैवाभूत् ' ' अत्र सर्व एकीभवन्ति ' इति श्रुतौ देशसंबन्धस्य चोक्तेः । कालासंबन्धे तस्य तुच्छत्वापत्तेश्च । ब्रह्मान्यद्वेदैकगम्यधर्मादिक परमार्थसत् । श्रुतितात्पर्यविषयत्वात् । ब्रह्मवत् । न च पारमार्थिकत्वेन वेदतात्पर्यविषयत्वमुपाधिः । एतदभावस्य पक्षे संदिग्धत्वेन साध्याभावासाधकत्वात् । विमतं परमार्थसत् स्वज्ञानात्पूर्वभावित्वात् ब्रह्मवत् । दृष्टिसृष्टिमतस्य निरसिष्यमाणत्वान्नासिद्धिः । न चानादित्वमुपाधिः । अप्रयोजकत्वात् । न हि परमार्थसत्त्वं विना स्वज्ञानात्पूर्वभावित्ववन्मिथ्यात्वं विनानादित्वाभावोऽनुपपन्नः । अनाद्यविद्यादा उपाध्यभावस्य भागासिद्धेश्च । सामानाधिकरण्येनास्मत्साध्यसिद्धेरुद्देश्यत्वेन तत्रावच्छेदकावच्छेदेनैव त्वदीयोपाध्यभावलिङ्गकसाध्यसिद्धेरुद्देश्यत्वेऽस्मदनुमानप्रतिरोधः स्यात् । सामानाधिकरण्येनानुमितौ सामानाधिकरण्येन बाधबुद्धेरप्रतिबन्धकत्वात् । तथा चानाद्यविद्यादौ भागासिद्धो हेतुः।

इति जगत्सत्यत्वानुमानानि ॥ ११ ॥

## १२. सत्त्वश्रुतेरनुवादकत्वभङ्गः ।

जगत्सत्यत्वागमबाधिता दृश्यत्वादयः । तथा हि ' विश्वं सत्यम् ' ' यच्चिकेत सत्यमित्तन्न मोघम् ' ' याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः । ' इत्यादिश्रुतिभिः, ' असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।' इत्यादिस्मृतिभिः 'नाभाव उपलब्धेः ।' ' वैधर्म्याच्च न स्वप्नादिवत् । ' इत्यादिसूत्रैश्च विश्वस्य सत्यत्वप्रतिपादनात् । ननु 'विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वाम्। अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ।। ' इत्यस्य हे इन्द्राब्रह्मणस्पती, मघवाना मघोनौ धनवन्तौ मखवन्ताविति वा; विश्वं सर्वं कर्म सत्यं सद्भावात् फलस्यावश्यंभावित्वाद्वा, तादृशं कर्म युवोरित् युवयोरेव; युवाभ्यामेवोद्दिश्य सर्व-

कर्माण्यनुष्ठेयानीत्यर्थः; आपो व्यापनशीला देवता वा युवयोर्व्रतं संकल्पं कर्म वा न प्रमिनन्ति न हिंसन्ति; मिञ् हिंसायाम्; नोऽस्माकं हविर्दध्यादिकं अन्नं पुरोडाशादिकम्; अच्छ अभिलक्ष्य वाजिना वेगवताश्वादियुजा युक्तौ सन्तौ जिगातं देवयजनमागच्छतम्; जिगातिर्गतिकर्मा जौहोत्यादिकः; यद्वा हे इन्द्राब्रह्मणस्पती, विश्वं सर्वं सत्यं सत्त्वेन परिदृश्यमानं जगत्; युवयोरित् युवाभ्यामेव सृष्टम्; यद्वा युवयोरेव विश्वं सर्वं स्तोत्रं यथार्थम्; तत्प्रतिपाद्यगुणानां युवयोः सत्त्वात्; आपो व्यापनशीला देवता अबुपलक्षितानि पञ्चभूतानि वां युवयोर्व्रतं जगदुत्पादनाख्यं कर्म न हिंसन्ति; इत्थं महानुभावौ युवां जिगातमित्यर्थः; इति स्तावकमिदं वाक्यं, न तु जगत्सत्यत्वपरमिति । अत्रोच्यते । अबाध्यार्थकस्य सत्यशब्दस्य त्वदुक्तार्थकत्वे मानाभावः। अन्यथा 'तत्सत्यम्' इत्यादेरपि सद्धेतुत्वात्सत्यमित्यर्थापत्तेः। युवयोः संबन्धि विश्वं सत्यमित्सत्यमेव । वां युवयोः जगत्सर्जनादि आपश्चन व्यापनशीला देवताः प्रमिनन्ति जानन्ति । डुमिञ् प्रक्षेपणे, प्रक्षेपणं गतिविशेषः । गत्यर्थास्ते ज्ञानार्थाः । प्रोपसर्गाद्वा ज्ञानार्थः । अस्मदीयं हविरन्नं च प्रति अच्छ सम्यक् जिगातमागच्छतम् । युजेव सखायाविव । चनशब्दस्य ' मम च्चन त्वा युवतिः परा सा मम च्चन त्वा कुष वा जगार । ' इत्यादिषु चनशब्दस्यैकपदत्वेन माधवेन व्याख्यातत्वेनेहापि तथात्वस्यैवौचित्याच्च । ' नेह नानास्ति किंचन । ' इत्यत्र त्वयाप्यङ्गीकृतत्वाच्च । यच्चिकेत कृतवान् तन्न मोघं न मिथ्या । किं तु सत्यमेव । प्रेक्षावत्सृष्टत्वेन देवताप्रमाविषयत्वेन लिङ्गेन सत्यमिति श्रुत्या च जगतः सत्यत्वसिद्धिः । संभवति सार्थक्ये निरर्थकस्तावकत्वं न युक्तम् । न च ' याथा ' इत्यादेरित्यस्य पूर्वसृष्टप्रकारेण जगत्सर्जनमर्थो न तु जगत्सत्यत्वं तत्सर्जनसत्यत्वं वार्थः । यथार्थशब्दसमानार्थकात्तस्मादबाध्यार्थप्रतीतेः । न चाक्षगृहीतग्राहित्वाच्छ्रुतिरनुवादिनी । यथा ' पृथिवीतरभिन्ना,' ' न हिंस्यात्सर्वा भूतानि' इत्यादौ च घटादावेकदेशे प्रत्यक्षेणेतरभेदसिद्धावपि, ब्राह्मणादौ हिंसानिषेधसिद्धावपि न पृथिवीत्वावच्छेदेन भूतत्वावच्छेदेन च तत्सिद्धिस्तथा विश्वैकदेशे घटादौ प्रत्यक्षेण सत्यत्वग्रहणेऽपि विश्वत्वावच्छेदेन तदग्रहान्नानुवादकत्वम् । न च दृष्टान्ते यथा पृथिवीत्वं भूतत्वं चैकोऽनुगतो धर्म इति तदवच्छेदेन विधेयस्याप्राप्तत्वेन तत्राननुवादकत्वं युक्तम्; इह तु विश्वत्वं नैकम्; विश्वशब्देन सर्वनाम्ना घटपटादीनां तेन तेन रूपेणोपस्थापनात्; प्रत्यक्षेणापि तेनैव रूपेण सत्त्वग्रहणादनुवादकत्वमेवेति वाच्यम् । नव्यमते सर्वनाम्नो बुद्धिस्थवति शक्तिः । बुद्धिस्थत्वं शक्यतावच्छेदकावच्छेदकम् । तमानयेत्यत्र बुद्धिस्थवन्तमानयेत्येव बोधः । कदाचिच्छक्यतावच्छेदकघटत्वादौ

बुद्धिस्थत्वस्य मोषे घटमानयेत्यपि बोधः । शक्यतावच्छेदकतावच्छेदकं बुद्धिस्थत्वं शक्त्यनुगमकं यथाकाशपदशक्तेः कत्वादिकमवच्छेदकम् । तदवच्छेदकतावच्छेदकं कत्वादिकम् । तदेव शक्त्यनुगमकम् । नानाशक्त्यपेक्षया लाघवात्तद्वत् । श्रुत्या धीस्थवस्त्वेनाक्षेण घटत्वादिना बोधनान्नानुवादकता श्रुतेः । ‘ ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः। सत्याद्भूतानि जातानि सत्यं भूतमयं जगत् ॥’ इत्याश्वमेधिके प्रपञ्चस्य जगत्त्वादिना सत्यत्वोक्तेः । किं चाक्षं वर्तमानतया घटादिसत्त्वं गृह्णाति, श्रुतिस्तु कालोदासीनतया बोधयन्ती त्रैकालिकमेव सत्त्वं गृह्णातीति नानुवादिनी श्रुतिः । किं चाक्षं प्रमाणं चेत्तेनैव मिथ्यात्वमानबाधविश्वसत्त्वसिद्धी स्याताम् । अप्रमाणं चेन्न स्यादेव श्रुतेरनुवादकत्वम् । न चाक्षाप्रामाण्येऽपि तद्गृहीतग्राहित्वेनैवास्त्वनुवादकत्वं, अप्रमाणमात्रगृहीतग्राहित्वेन श्रुतेरप्रामाण्यापत्तेः । अन्यथा ‘तत्सत्यम्’ इत्यादिब्रह्मसत्त्वश्रुतिरपि प्रत्यक्षेण विश्वाधिष्ठानत्वलिङ्गेन च प्राप्तं सत्त्वं ‘ असद्वा इदमग्र ’ इत्यादिनिषेधायानुवदतीति स्यात् । घटः सन्नित्यादिप्रत्यक्षस्य ब्रह्मसत्त्वविषयतायास्त्वयाङ्गीकारात् । न च प्रत्यक्षं घटत्वादि सामानाधिकरण्येन, श्रुतिर्ब्रह्मत्वं सामानाधिकरण्येन गृह्णातीति नानुवादिनी ब्रह्मसत्त्वश्रुतिरिति वाच्यम् । अखण्डार्थकवेदान्तैरतिरिक्तब्रह्मत्वादेरबोधनात्स्वरूपसत्त्वस्यैव बोधनाच्च । ‘ अदुःखमसुखं समम् ’ इति निषेधाय सुषुप्त्यादौ प्रत्यक्षेण गृहीतब्रह्मानन्दानुवादिन्यानन्दश्रुतिः स्यात् । न च वैषयिकसुखमेव ‘ असुखम् ’ इत्यनेन निषिध्यते । ‘ नेह नाना ’ इत्यादिना स्वतन्त्रसत्त्वस्य जगति निषेधेनैव श्रुतिद्वयाविरोधोपपत्तेः । न च निष्प्रपञ्चतायाः सुषुप्तौ पुरुषार्थत्वदर्शनेन तत्परं वाक्यं फलवत्; ‘ फलवत्सन्निधौ अफलं तदङ्गम् ’ इति न्यायेन सप्रपञ्चवाक्यं तदनुसारेण नेयमिति वाच्यम् । मूर्च्छायां निष्प्रपञ्चताया अपुरुषार्थत्वदर्शनात् । न च मूर्च्छायां न स्वरूपसुखस्फुरणम् । तर्हि सुखस्यैव पुरुषार्थत्वेन निष्प्रपञ्चत्वस्याकिंचित्करत्वात् । ‘ पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ।’ इत्यादिश्रुत्या, ‘ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ ’ इत्यादिस्मृत्या च स्वभिन्नसगुणज्ञानादेव मोक्षोक्तेः । किं च गृहीतग्राहित्वं हि नानुवादकत्वे तन्त्रम् । किं तु गृहीतमात्रग्राहित्वमिति प्रत्यक्षाप्राप्तातीन्द्रियसत्त्वांशेऽनुवादकत्वाभावेन तत्सत्त्वस्य मिथ्यात्वश्रुत्यापहारासंभवात् । श्रुतिविहितस्य श्रुत्या निषेधे विकल्पापत्तेः । न च वस्तुनि विकल्पासंभवेन सत्त्वश्रुतेर्निषेध्यसमर्पणद्वारा निषेधवाक्यशेषतोचिता । षोडशिग्रहणवाक्यस्यापि तदग्रहणवाक्यशेषतापत्तेः । ग्रहणं व्यावहारिकमग्रहणं तात्त्विकमिति गत्यापत्तेश्च । अतोऽतीन्द्रियसाधारणपारमार्थिक-

सत्त्वपरा सत्त्वश्रुतिः, मृषात्वश्रुतिस्तु स्वतन्त्रद्वैतनिषेधपरेति समसत्ताकविषयदानेनैव गतिर्वाच्या । वस्तुतस्तु मिथ्यात्वश्रुतेर्लक्षणया अखण्डचिन्मात्रपरत्वान्न सत्त्वश्रुतिविरोधः। न चावान्तरतात्पर्येण द्वितीयाभावसिद्धिः । द्वितीयाभावस्यैव तात्त्विकापत्तेः। किं च यदि प्रत्यक्षं दुर्बलत्वाद्वर्तमानमात्रग्राहित्वाच्च न मिथ्यात्वश्रुत्यर्थापहारक्षमं, तर्हि सत्त्वश्रुत्यर्थापहारक्षममपि न स्यादिति कथमनुवादिका सत्त्वश्रुतिः । न च सतो ब्रह्मणो नाभावः, न शून्यत्वं, प्रमाणात्सत्त्वेनोपलब्धेस्तथा च किंचित्परमार्थसत् शून्यत्रादिनापि स्वीकार्यमन्यथा बाधस्य निरवधित्वप्रसङ्गादिति सूत्रार्थ इति वाच्यम् । प्रमाणेन सत्त्वेन गृहीतस्य त्वया मिथ्यात्वाङ्गीकारात् । क्वचिदुपाधौ सत्त्वेनाप्रतीयमानत्वमिति स्वयंकृतस्यासल्लक्षणस्य ब्रह्मणि त्वयाङ्गीकाराच्च । सत्ताद्वैविध्यस्य बाह्येनाप्यङ्गीकाराच्च। 'द्वे सत्त्वे समुपाश्रित्य बुद्धानां धर्मदेशना। लोके संवृत्तिसत्त्वं स्यात्सत्त्वं च परमार्थतः ॥ सांवृतं व्यवहार्यं स्यान्निवृत्तौ पारमार्थिकम्।' इति बौद्धोक्तेः । अतो न व्यावहारिकमात्रेण स्वप्नवैलक्षण्योक्तिर्युक्ता । न च ज्ञानभिन्नविषयाभावं वदतो विज्ञानवादिनो वा मतं 'नाभाव' इत्यादिना दूष्यते; ज्ञानभिन्नार्थाभावो न, घटस्य ज्ञानमिति ततो भिन्नतयोपलब्धेः; विमता धीर्न ज्ञानभिन्नावलम्बिनी धीत्वात्स्वप्नधीवदित्यनुमाने बाध्यत्वस्योपाधित्वप्रदर्शनाय स्वप्नवैधर्म्योक्तिरिति वाच्यम् । ज्ञानभिन्नमात्रस्य बाध्यत्वमङ्गीकुर्वतो विज्ञानवादिनो मते साधनव्यापकत्वात् । त्वन्मतेऽपि ब्रह्मणः प्रमाणागम्यत्वादन्यस्य बाध्यत्वाच्च साधनव्यापकत्वात् । अतः सत्यविविधविचित्रजगत्स्रष्टा सत्यानन्तगुणो हरिः सिद्धः ।

इति सत्त्वश्रुतेरनुवादकत्वभङ्गः ॥ १२ ॥

## १३. असतः साधकत्वभङ्गः ।

अर्थक्रियाहेतुत्वान्यथानुपपत्तिरपि जगत्सत्यत्वे मानम् । न च सत्त्वेन ज्ञातत्वमेव साधकत्वे तन्त्रम् । वह्नित्वेनाज्ञाते वह्नौ दाहकत्वदर्शनात् । तत्त्वेन ज्ञाते गुञ्जापुञ्जादौ दाहकत्वादर्शनाच्च । किं च क्लृप्तदोषरहितया यादृश्या धिया तव ब्रह्मणि सत्त्वसिद्धिस्तादृश्या क्लृप्तदूरादिदोषहीनेन्द्रियजन्यया मम जगति सत्यत्वसिद्धिरस्तु । क्लृप्तदोषबाधादेः प्रत्यक्षेऽभावात् । कल्प्यस्य श्रुतावपि संभवाच्च । न च तत्त्वेनेश्वरीयज्ञानविषयता या वह्नावस्तीति तस्य दाहकत्वमिति वाच्यम् । गुञ्जापुञ्जारोपितवह्नेर्दाहकत्वस्य ब्राह्मणत्वेन ज्ञातशूद्रस्य वेदाधिकारस्य चापत्तेः । न च ब्रह्मज्ञानेतराबाध्यत्वरूपव्यावहारिकत्वमेव तन्त्रम् । ब्रह्मण्यारोपितक्षणिकत्वादेरपि

तदितरज्ञानाबाध्यस्य साधकत्वापत्तेः। अज्ञानादिसाधके परमार्थसति साक्षिणि साधकत्वदर्शनेन लाघवात्परमार्थसत्त्वेनैव साधकत्वौचित्याच्च। न चाज्ञानोपहितमेवाज्ञानसाक्षि, आत्माश्रयादिदोषेण ज्ञानानुपहितस्यैवाज्ञानादिसाक्षित्वादधिष्ठानत्वाच्च। किं च येन मानेन तव जगतो व्यावहारिकत्वं तेनैवास्माकं तात्त्विकत्वं स्यात्। ननु सच्छिन्ने प्रतिबिम्बे बिम्बसाधकतास्ति, तस्य बिम्बात्मनासत्त्वेऽपि प्रतिबिम्बाकारेण सत्त्वात्; स्वाप्नार्थस्यापि शुभादिसूचकत्वम्; यद्यपि तद्दर्शनमेव साधकं तथा दर्शनस्यातिप्रसक्तत्वेन विषयोऽप्यपेक्षत एवेति चेन्न। बिम्बाभाववदवृत्तित्वरूपव्याप्तिज्ञानस्य परमार्थसतो बिम्बानुमितिहेतुत्वात्। सतो ज्ञानस्य साधकत्वे विषयस्योपलक्षणत्वात्। एवं स्फटिकलौहित्यज्ञानमेवोपाधिसान्निध्यसाधकम्। तच्च सदेव। न च तादात्म्येन रेखारोपितवर्णानामर्थसाधकत्वं दृष्टम्। रेखास्मारितवर्णानामेवार्थसाधकत्वात्। न चाशैशवमयं ककारोऽयं गकार इत्यनुभवादभेदेनैव स्मरणम्। विवेकिनामपि तथा वाक्यव्यवहारदर्शनेनारोपासंभवात्। किं तु पदस्यार्थ इव वर्णानां रेखासु संकेत एव। न च वर्णारोपितानां ह्रस्वत्वदीर्घत्वादीनां ध्वनिगतानां नगो नाग इत्यादावर्थविशेषप्रत्यायकत्वं दृष्टम्। वर्णेष्वनारोपितध्वनिसाहित्यस्य तदभिव्यक्तत्वरूपदैर्घ्यस्य वा प्रत्यायकत्वात्। न च ध्वन्यस्फुरणेऽपि दीर्घो वर्ण इति व्यवहारादारोप एवायम्। ध्वन्यस्फुरणे दीर्घादिव्यवहारस्यालीकत्वात्। वस्तुतस्तु दीर्घत्वादिज्ञानमेवार्थविशेषज्ञाने हेतुः। तच्च सदेव। केषांचिदनित्या नाना ह्रस्वदीर्घाः ककाराः। सिद्धान्ते तु नित्या एव नाना ककाराः। विषशङ्काभयमुत्पाद्य धातुव्याकुलतामुत्पाद्य मरणहेतुर्न तु शङ्कितं विषमपि। सवितृसुषिरज्ञानमेवारिष्टादिहेतुर्नत्वर्थोऽपि। ज्ञानं सदेव। न चार्थानवच्छिन्नज्ञानस्य हेतुत्वेऽतिप्रसङ्गादवच्छिन्नमेव ज्ञानं हेतुरित्यर्थोऽपि हेतुरिति वाच्यम्। अर्थावच्छिन्नस्य हेतुत्वेऽप्यवच्छेदकस्य अर्थस्य 'कुरूणां क्षेत्रे वसति' इतिवत् ताटस्थ्येनाहेतुत्वोपपत्तेः। घटावच्छिन्नस्य तदत्यन्ताभावतद्ध्वंसादेर्घटदेशकालभिन्नदेशकालादित्वेऽप्यवच्छेदकस्य घटस्य तदभाववत्। घटेच्छाब्रह्मज्ञानयोर्घटज्ञानवेदान्तसाध्यत्वेऽपि घटब्रह्मणोस्तदभाववत्। घटप्रागभावस्य घटं प्रति जनकत्वेऽपि घटस्याजनकत्ववत्। विशेषादर्शनस्य भ्रमं प्रति हेतुत्वेऽपि विशेषदर्शनस्य तदभाववत्। विहिताकरणस्य प्रत्यवायजनकत्वेऽपि विहितकरणस्य तदभाववत्। स्वर्गकामनाया यागजनकत्वेऽपि स्वर्गस्य तदभाववत्। अतीतादिधियो दुःखादिहेतुत्वेऽप्यतीतादेस्तदभाववत्। चिकीर्षितघटबुद्धेर्घटहेतुत्वेऽपि घटस्य तदभाववत्। ब्रह्माज्ञानस्य जगत्परिणामकारणत्वेऽपि ब्रह्मणस्तदभाववच्च। न च मिथ्यार्थे ज्ञानान्तरात्त्वज्ञानव्या-

वर्तकतास्तीत्यसतो हेतुत्वम् । न हि व्यावृत्तिधीहेतुत्वं व्यावर्तकत्वम् । किं तु व्यावृत्तिधीहेतुधीविषयत्वं, सत्यपि दण्डे तदज्ञाने व्यावृत्त्यज्ञानात् । न चावच्छेदकस्य मिथ्यात्वेऽवच्छिन्नस्यापि मिथ्यात्वमिति ज्ञानमपि मिथ्यैव । अवच्छेदकस्य शशशृङ्गादेस्तुच्छत्वेऽपि तदभावस्य ज्ञानस्य चातुच्छत्वात् ब्रह्मण्यनृतभेदादेरनृतत्वाभावाच्च । ननु विशेषणत्वे संभवत्युपलक्षणत्वमन्याय्यमन्यथा 'दण्डी प्रैषानन्वाह' 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति ' इत्यादावपि वेदे दण्डलौहित्यादेरुपलक्षणत्वापत्त्या तदभावेऽप्यनुष्ठानप्रसङ्गः; ' सर्वादीनि सर्वनामानि । ' इत्यत्र सर्वशब्दस्य सर्वनामसंज्ञा न स्यात्; ' जन्माद्यस्य यतः । ' इत्यत्र जन्म ब्रह्मणो लक्षणं न स्यात्; विशेषणार्थत्वेन तद्गुणसंविज्ञानबहुव्रीहिसंभवेऽप्युपलक्षणार्थत्वेनातद्गुणसंविज्ञानस्वीकारप्रसङ्गादिति चेन्न । दण्डलौहित्यभिन्नस्य कृत्स्नस्य प्राप्तत्वेन तयोरुपलक्षणत्वे विधिवैयर्थ्यापत्तेः । ' सर्वादीनि' इत्यत्र 'हलि सर्वेषाम्' इति पाणिनिप्रयोगस्य विशेषणत्वे बीजत्वात् । ' जन्मादि ' इत्यत्र ' यतो वा इमानि भूतानि जायन्ते ' इत्यादिश्रुतेरेव जन्मनो विशेषणत्वे बीजत्वात् । न चोत्कृष्टकलधौतज्ञानादुत्कृष्टसुखमुत्कृष्टसर्पादिज्ञानाच्चोत्कृष्टं भयादिकं दृश्यते; विषयस्याहेतुत्वे उत्कर्षासंभव इति वाच्यम् । भाविपुत्रादिज्ञानात्सुखस्योत्कृष्टतज्ज्ञानाच्चोत्कृष्टसुखस्यातीततज्ज्ञानाच्चोत्कृष्टादिदुःखस्य च जन्मदर्शनाद्विषयस्योपलक्षणत्वात् । न हि भाव्यनागतादिविषयोऽनिर्वाच्योऽपि कार्यप्राक्कालेऽस्ति । न च दण्डतन्त्वादिसाधारणं नैकं कारणत्वं यत्रावच्छेदकं सत्त्वं स्यात्; किं तु कार्यतावच्छेदकं घटत्वादिकं कारणतावच्छेदकं दण्डत्वादीति वाच्यम् । कारणतानिविष्टव्यापकतायाः सत्त्वघटितत्वात् कार्यसमानाधिकरणप्रतियोगिव्यधिकरणात्यन्ताभावाप्रतियोगित्वादिरूपव्यापकस्य केवलान्वय्यत्यन्ताभावप्रतियोगिन्यसति असंभवात् । न च कार्याधिकरणे दण्डाभावो न व्यधिकरण इति प्रतियोगिव्यधिकरणाभावाप्रतियोगित्वं तत्राक्षतम् । मिथ्यावादिमतेऽभावमात्रस्यैव केवलान्वयित्वेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः । कारणतावच्छेदकतावच्छिन्नकारणतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकव्याप्यवृत्तिकार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं वा व्यापकत्वम् । तच्चोक्ताभावप्रतियोगित्वरूपमिथ्यात्वविरोध्येव । किं च सर्पज्ञानमसर्पज्ञानाद्धर्म्यन्तरमनपेक्ष्य स्वतो व्यावृत्तं, तज्जनकविलक्षणजन्यत्वाज्जन्यविलक्षणजनकत्वाद्वा । यवाङ्कुरात्कलमाङ्कुरवत् यवबीजात् कलमबीजवत् । न च घटसंयोगः पटसंयोगान्न जात्या भिद्यते, तद्वृत्तिजात्यनधिकरणत्वात्; किं तु घटरूपोपाधिनैवेति धर्म्यन्तरसंबन्धमपेक्ष्यैव विलक्षणे घटसंयोगत्वावच्छिन्ने साध्याभाववति उक्तहेतुसत्त्वाद्व्यभिचार इति वाच्यम् । हेतोः संदिग्धा-

सिद्धत्वात् । तादृशजात्यनधिकरणत्वेऽपि कार्यतायाः कारणतायाश्चावच्छेदकधर्मस्यावश्यकत्वेन तत एव व्यावृत्तिसिद्धेः । एकघटस्य संयोगानां व्यावृत्त्यसिद्ध्यापत्तेश्च । शिलोद्धरणकृतितो माषोद्धरणकृतेरिव विषयमनपेक्ष्यैव व्यावृत्त्यौचित्याच्च । न हि कृतिकालेऽनिर्वाच्योऽपि विषयोऽस्ति । किं च तव मते तत्तद्वृत्तेस्तत्तदाकारत्वेन चैतन्यस्य तत्तत्प्रतिबिम्बितत्वेन तत्तदभिव्यक्तत्वेन वा, मम तु तत्तज्ज्ञानस्य तत्तदीयस्वभावत्वेन तत्तद्व्यवहारजननशक्तत्वेन वा स्वत एव वैलक्षण्यसिद्धेः । न च विषय एवाकारसमर्पकः, स्वभावव्यवहारौ परिचायकौ । तुच्छस्यातीतादेश्च विषयस्याकारसमर्पकत्वासंभवेन स्वभावादेरेव व्यावृत्तिप्रयोजकत्वौचित्यात् ।

इत्यसतः साधकत्वभङ्गः ॥ १३ ॥

## १४. दृग्दृश्ययोः संबन्धानुपपत्तिभङ्गः ।

ननु सर्वस्य दृश्यस्य दृगध्यस्तत्वात्सत्ययोस्त्वाध्यासिकसंबन्धासंभवादन्यतरस्य मिथ्यात्वं, दृशो मिथ्यात्वाभावाद्दृश्यस्य मिथ्यात्वमिति चेन्न । सर्वस्यापि दृश्यस्य ब्रह्मात्मकदृगध्यस्तत्वेऽपि कस्यचित्कदाचित्कंचित्प्रति प्रकाशाय त्वयापि तत्तत्संनिकृष्टेन्द्रियजन्यवृत्तिद्वारकसंबन्धस्यानावृतदृशि स्वीकारात्तस्य च सत्येऽप्यर्थे वृत्तिद्वारा संभवेनाध्यासिकसंबन्धव्यसनस्य निष्प्रयोजनत्वात् । न हि तव विज्ञानवादिनामिव तत्तज्ज्ञाने तत्तदर्थाध्यासस्वीकारः। शुद्धदृशस्त्वदृशः स्वतो भेदाभावात् । उपाधिविशिष्टाया भेदेऽपि घटादिवत्तस्या मिथ्यात्वेनाधिष्ठानत्वायोगात् । न च वृत्तेः पूर्वमाध्यासिकसंबन्धे विद्यमानेऽपि न प्रकाशः, वृत्त्या भग्नावरणचित एव प्रकाशकत्वादिति वाच्यम् । चरमसाक्षात्कारात्प्राक् शुद्धस्यानभिव्यक्तत्वात् अभिव्यक्तस्य च घटाद्यवच्छिन्नस्य मिथ्यात्वादात्माश्रयापत्त्यानधिष्ठानत्वात् । न च शुद्धविषयकमूलाज्ञानानिवृत्तावपि घटाकारवृत्त्या तूलाज्ञाननिवृत्त्या घटप्रकाशोपपत्तिः । घटाकारवृत्त्या विषयीकृतस्य चैतन्यस्य सत्यत्वे तत्र दृश्यत्वस्य व्यभिचारापत्तेः । मिथ्यात्वेऽध्यस्ताधिकसत्ताकत्वाभावेनाधिष्ठानत्वासंभवात् । क्षुद्राज्ञाननिवृत्तावपि महाज्ञानावृतस्य प्रकाशकत्वासंभवाच्च । किं च चितो दोषाजन्यत्वेन प्रमात्वे तद्विषयस्य सत्यत्वापत्त्या सत्यं प्रत्यधिष्ठानत्वायोगात् । अप्रमात्वे दोषजन्यत्वापत्त्या सुतरामधिष्ठानत्वायोगाच्च । न च दोषाजन्यत्वं न प्रमात्वप्रयोजकम्, चितः सर्वत्र दोषाजन्यत्वात्; किं तु दोषाजन्यवृत्त्यवच्छिन्नत्वम्; प्रकृते तदभावान्न विषयसत्यतेति वाच्यम् । दोषजन्यवृत्त्यवच्छिन्ने मृषाभूते घटाद्यध्यासासंभवेन तस्य घटाद्यप्रकाशकत्वात् । न च

ज्ञानज्ञेययोः कलससंयोगसमवायादिसंबन्धासंभवादाध्यासिकः संबन्धः स्वीकार्यः । ध्वंसादेरतीतादिना मिथ्यात्वलक्षणान्तर्गतस्यात्यन्ताभावस्य प्रतियोगिना, शक्तेः शक्येन, अज्ञानस्याज्ञेयेन, इच्छाया इष्यमाणेन, व्यवहारस्य व्यवहर्तव्येन, वाक्यस्यार्थेन, वृत्तिरूपज्ञानस्य ज्ञेयेन, ज्ञानज्ञेययोः संबन्धो नेति त्वद्वाक्योक्तसंबन्धाभावस्य वाक्येनाध्यासिकसंबन्धाभावेऽपि संबन्धान्तरवज्ज्ञानज्ञेययोरपि संबन्धान्तरसंभवात् । न च मिथ्याजगदन्तर्गतत्वादुक्तसंभवा अपि मिथ्या । जगन्मिथ्यात्वसिद्ध्या संबन्धमिथ्यात्वसिद्धिः, संबन्धमिथ्यात्वसिद्धौ जगतस्तत्सिद्धिरित्यन्योन्याश्रयात् । चरमवृत्तौ ब्रह्मणोऽध्यासाभावेन ज्ञाने ज्ञेयाध्यासनियमाभावात् । न च तत्र ज्ञानमेव ज्ञेयेऽध्यस्तम् । ज्ञानज्ञेययोरन्यतरस्मिन्नन्यतराध्यासनियमात् । ब्रह्मण्यध्यस्तधियो ब्रह्मधीत्वे घटधियोऽपि तत्राध्यस्ताया ब्रह्मधीत्वापत्त्या तत एव मोक्षापत्तेः । न चाध्यासविशेषः शुद्धब्रह्मविषयताप्रयोजको घटादिबुद्धौ नास्तीति वाच्यम् । करणविषययोः संबन्धविशेषस्यैव ज्ञानज्ञेययोः विषयतानियामकत्वेन ज्ञानज्ञेयसंबन्धस्य विषयतासमानयोगक्षेमस्य विषयत्वानियामकत्वात् । किं च चरमज्ञानस्यान्तःकरणावच्छिन्न एवाध्यासो न तु शुद्धचिति । अहं जानामीति प्रतीतेः शुद्धं जानातीत्यप्रतीतेश्च । परोक्षज्ञाने स्मृतौ प्रातीतिकज्ञाने च विषयाध्यासाभावेन ज्ञानज्ञेययोराध्यासिकसंबन्धनियमभङ्गाच्च । प्रातीतिकज्ञानस्य त्वया मिथ्यात्वाङ्गीकारात् । न च नित्यपरोक्षस्थले स्मृतिस्थले च वृत्तावनध्यासेऽप्यधिष्ठानविषयकवृत्त्यभिव्यक्तचैतन्य एवाध्यास इति न काप्यनुपपत्तिः । अभिव्यक्तचैतन्यस्य परोक्षस्थले ज्ञानत्वाभावात् । ज्ञानभिन्ने ज्ञेयाध्यासे मानाभावात्त्वयानङ्गीकाराच्च । ज्ञानज्ञेययोराध्यासिकसंबन्धाभावेऽपि विषयप्रकाशे आध्यासिकसंबन्धस्यातन्त्रत्वापाताच्च । परोक्ष इवापरोक्षज्ञानेऽपि विषयानध्यासापाताच्च । परोक्षस्थलेऽभिव्यक्तापरोक्षैकरसचैतन्यस्य ज्ञानत्वे विषयापरोक्ष्यापाताच्च । रूप्यादिकमिदमंशावच्छिन्नेऽध्यस्तं भास्यते चाविद्यावृत्तिप्रतिबिम्बितेनेति विषयिणि ज्ञाने विषयाध्यासाभावाच्च । रूप्यादेः स्वज्ञानेऽध्यासे रूप्ये ज्ञानस्याज्ञाने भ्रमोत्पत्तिस्तज्ज्ञाने तन्निवृत्तिरित्यापत्तेश्च । अधिष्ठानतत्त्वज्ञानज्ञानाभ्यामध्यासजन्मनिवृत्त्योर्नियतत्वात् । न चेदमंशावच्छिन्नं चैतन्यं रूप्याधिष्ठानं, तच्च दैवाद्रूप्याकारवृत्त्यवच्छिन्नमपि नैतावता भ्रमाधिष्ठानत्वे तदपेक्षा; तस्य भ्रमविरोधिशुक्त्याद्याकारेणाज्ञानं भ्रमहेतुः; तेनाकारेण ज्ञानं भ्रमविरोधीति वाच्यम् । उपाधिभेदेनोपहितभेदावश्यकत्वेनेदमंशावच्छिन्नभिन्ने रूप्याकाराविद्यावृत्त्यवच्छिन्ने रूप्यज्ञाने रूप्याध्यासासिद्धेः । किं च वृत्त्युदयात्प्रागाध्यासिकसंबन्धस्य सत्त्वेऽपि विषयप्रकाशाभावादन्वयव्यतिरेकाभ्यां वृत्तिरेव ज्ञानं, तत्राध्यासिकसंबन्धासंभवादन्य

एव सत्यः संबन्धो वाच्यः । न च वृत्त्युदयात्प्रागज्ञानार्थसिद्ध्यर्थं वृत्तिभिन्नज्ञानमवश्यमभ्युपेयमन्यथा मानाभावेन तस्य तुच्छतुल्यतया संनिकर्षतज्जन्यज्ञानहेतुत्वेन प्राक्सत्त्वकल्पना प्रामाणिकी न स्यादिति वाच्यम् । तत्पुरुषस्य तज्ज्ञाने तं प्रति तस्याज्ञातत्वासंभवात् । सामान्यतस्तु नित्यसर्वज्ञेश्वरज्ञानस्यैव मानत्वात् । उत्तरकालीनानुमानस्यापि तत्र मानत्वाच्च । 'घटोऽयमित्यसा उक्तिराभासस्य प्रसादतः । विज्ञातो घट इत्युक्तिर्ब्रह्मानुभवतो भवेत् ॥' इति वदता परेण वृत्तिप्रतिबिम्बितघटानधिष्ठानचित एव घटानुभवत्वोक्तेः । न च वृत्तिप्रतिबिम्बितस्य घटाधिष्ठानचित एव घटानुभवत्वोक्तेः । न च वृत्तिप्रतिबिम्बितस्य घटाधिष्ठानचैतन्येन सह भेदाभावादुपपत्तिः । शुद्धचैतन्याद्व्यावहारिकघटाद्यधिष्ठानाद्वृत्तिप्रतिबिम्बितस्य भेदाभावे तद्दृश्यत्वादिना शुद्धस्यापि दृश्यत्वाद्यापत्तेः । किं चाध्यासिकसंबन्धो नामाध्यस्तः संबन्धो वा, अध्यस्तत्वमेव वा । आद्ये संबन्धस्य मिथ्यात्वे संबन्धिनो दृश इवामिथ्यात्वोपपत्तेः । द्वितीये ज्ञानस्याप्यध्यस्तत्वेन तत्रेतराध्यासानुपपत्तेः । न च वृत्त्यवच्छिन्नं ज्ञानं, तत्रावच्छेदिकाया वृत्तेर्जडाया अध्यस्तत्वेऽप्यवच्छेद्यस्य चैतन्यस्यानध्यस्तत्वेन तत्र दृश्याध्यासोपपत्तिः । वृत्त्यवच्छिन्नस्य मिथ्यात्वेन तत्र व्यावहारिकघटाद्यध्यासासंभवात् । तस्य सत्यत्वे दृश्यत्वादेस्तत्र व्यभिचारापत्तेः । न च संबन्धस्य संबन्धिभ्यां भिन्नत्वेऽनवस्थापत्तिरभिन्नत्वे संबन्धत्वहानिः । एतद्दोषस्याध्यासिकसंबन्धेऽपि साम्यात् । न च तस्य मायिकत्वेन मायायाश्चाघटघटनापटीयस्त्वेन सर्वानुपपत्तिस्तत्र भूषणमेव । तर्ह्यविद्याया एवाविद्याद्यधिष्ठानत्वापत्तेः । घटादिभ्यो घटादेर्मृदादेश्चोत्पत्त्यापत्तेः । व्यावहारिकमर्यादायास्त्वद्गुरुणा सौगतेनापि स्वीकार्यत्वाच्च । ममाप्यचिन्त्यातर्क्याघटनापटीयस्येश्वरशक्त्यैव सत्यसंबन्धोपपत्तेः । यादृशविषयत्वं तव वृत्तिं प्रति शुद्धे ब्रह्मणि तादृशविषयत्वमेव वृत्तिं प्रति घटादिष्वस्तु । न च वृत्तौ ब्रह्मानध्यासेऽपि वृत्तेरेव तत्राध्यासः । घटादिषु ज्ञानस्याध्यासापत्तेः । किं च दूरस्थासंयुक्तवृक्षयोः संयुक्ततया गृह्यमाणयोः संयोगस्य मिथ्यात्वेऽपि तयोरमिथ्यात्वप्रकृतेऽपि संबन्धस्य मिथ्यात्वेऽपि संबन्धिनोरमिथ्यात्वोपपत्तेः । किं च संबन्धस्य निरुक्त्यभावेन मिथ्यात्वाङ्गीकारे ब्रह्मण आनन्दत्वज्ञानत्वसत्यत्वस्वप्रकाशत्वादीनां खण्डनोक्तरीत्या दुर्वचत्वेन ब्रह्म तत्त्वतो नानन्दादिरूपम् । त्वयैव 'कीदृक्तत्प्रत्यगिति चेत्तादृगीदृगिति द्वयम् । यत्र न प्रसरत्येतत्प्रत्यगित्यवधारय ॥' इति ब्रह्मणोऽपि दुर्वचत्वमुक्तमिति तस्यासत्त्वं स्यात् । न चानन्दत्वादिधर्मवत्तया दुर्निरूपत्वेऽपि दुःखप्रत्यनीकत्वाद्युपलक्षितस्वरूपसत्त्वेन सुनिरूपम् । तत्र दुःखादिप्रत्यनीकत्वसत्त्वादीनां त्वयानङ्गीकारात् । दुर्निरूप-

त्वाच्च । तस्मादिक्षुक्षीरमाधुर्यादिवद्दुर्वचमपि विषयत्वं सखण्डमखण्डं वा सत्यमेव, ज्ञानज्ञेययोः संबन्धः प्रमाणबलादङ्गीकार्य इति । उक्तं च सुरेश्वरेणापि—' इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् । तथापि न तदाख्यातुं सरस्वत्यापि शक्यते ॥ '

## इति दृग्दृश्ययोः संबन्धानुपपत्तिभङ्गः ॥ १४ ॥

## १५. प्रतिकर्मव्यवस्थाभङ्गः ।

यत्तु सर्वगतं जीवचैतन्यमावृतमनावृतं च, आद्यपक्षे वृत्त्याभिव्यक्तचैतन्यं विषयप्रकाशकं, द्वितीये स्वतोऽसङ्गस्य वृत्त्या विषयसंबन्धः संपाद्यते; अन्तःकरणावच्छिन्नो जीव इति पक्षे घटप्रकाशकाधिष्ठानचैतन्येन सह जीवस्याभेदः संपाद्यतेऽधिष्ठानप्रकाशितेऽहं जानामीति प्रतीतेरिति, तन्न । अन्तःकरणवृत्तिभिन्नघटादिज्ञाने मानाभावात् । ब्रह्माकारचरमवृत्तिस्थलेऽपि ज्ञानद्वयापत्तेश्च । न च घटं जानामीत्यनुभूयमानसकर्मकवृत्तितोऽन्याकर्मिका संवित् घटप्रकाशरूपा घटः प्रकाशत इत्याकारेति वाच्यम् । करोति यतते गच्छति चलतीत्यादावेकार्थत्वेऽपि यथा हि सकर्मकत्वाकर्मकत्वे स्वभाववशादेव तथात्राप्येकार्थकत्वेऽपि जानातिप्रकाशत्योः सकर्मकत्वाकर्मकत्वे स्तः । न चानुकूलो यत्नः कृञर्थः यतेस्तु यत्नमात्रम्; एवं गमेरुत्तरसंयोगानुकूलः स्पन्दश्चलेश्च स्पन्दमात्रमित्यत्र भेदनिबन्धनमेव सकर्मकत्वादिकमिति वाच्यम् । लाघवाद्यत्नत्वादेरेव शक्यतावच्छेदकत्वेनानुकूलत्वादेः संसर्गतया भानात् । अविवक्षाविरहविशिष्टत्वे सति कर्मसाकाङ्क्षत्वमेव हि सकर्मकत्वम् । अतः सकर्मकस्यापि वहतेः कर्माविवक्षया नदी वहतीत्यत्राकर्मकत्वेऽपि न सकर्मकत्वहानिः । अतीतः प्रकाशते शास्त्रार्थो धर्मादिः प्रकाशते शुद्धा चित्प्रकाशत इत्यादौ चिद्रूपज्ञानाभावेऽपि प्रकाशव्यवहाराच्च । न ह्यत्र वृत्तिप्रतिबिम्बितचिदस्ति । अतीतादेरपरोक्षैकरसचिद्विषयत्वे आपरोक्ष्यापत्तेः । शुद्धचितस्तद्विषयत्वे मिथ्यात्वापत्तेश्च । किं च वृत्तेर्बहिर्निर्गमोऽपि तव व्यर्थः । न च विषयसंश्लेषार्थं सः, नेत्रान्निर्गच्छद्ध्रुवाद्याकारवृत्त्यैव स्वसंश्लिष्टनेत्रस्थकज्जलादेः ध्रुवनेत्रमध्यवर्तिनः परमाण्वादेश्चापरोक्ष्यापातात् । न च कज्जलादिसंश्लेषेऽपि तदाकारत्वाभावान्न तत्प्रकाशः । आवश्यकतदाकारत्वेनैवोपपत्त्या संश्लेषस्याकिंचित्करत्वात् । परोक्षस्थले वृत्तिनिर्गमाभावेऽपि प्रकाशादिवदपरोक्षस्थलेऽपि तथोपपत्तेः । न च प्रकाशस्य दीपालोकादेः विषयसंश्लिष्टस्यैव व्यवहारहेतुत्वम् । परोक्षस्थले बहिरनिर्गतस्यैव ज्ञानस्य व्यवहारजननात् । न च तत्राज्ञानं न निवर्तते । न जानामीति

प्रतीत्यापत्तेः। स्मृत्याद्यनुपपत्तेश्च। अज्ञाने सत्यपि व्यवहारोपपत्तावपरोक्ष्ये तन्निवृत्त्यभावापत्तेः। किं च वृत्तिप्रतिबिम्बितं चैतन्यं तदभिव्यक्तघटाद्यधिष्ठानचैतन्यं वा ज्ञानम्। नाद्यः। आध्यासिकसंबन्धस्यातन्त्रतापातात्। न द्वितीयः। आवश्यकेन विषयसंलग्नवृत्तिप्रतिबिम्बितचैतन्येनैव तदज्ञाननिवृत्तिवत्तत्प्रकाशोपपत्तौ विषयाधिष्ठानचैतन्याभिव्यक्तिकल्पनाया निरर्थकत्वात्। घटाद्यधिष्ठानस्य चाक्षुषवृत्तिविषयीकृतस्य मिथ्यात्वेऽधिष्ठानत्वानुपपत्तेः। सत्यत्वे तत्र दृश्यत्वादेर्व्यभिचारापत्तेः। किं च जीवचैतन्यं ब्रह्मचैतन्यं वा विषयदृक्। नाद्यः। विशिष्टे कल्पितेऽध्यासायोगात्। न द्वितीयः। तस्यासंसारावृतत्वेन जगदान्ध्यापत्तेः। न च मूलाविद्यानिवृत्त्यभावेन सर्वत आवरणाभिभवाभावेऽपि घटाद्यवच्छेदेन तदभिभवेनान्ध्याभावोपपत्तिः। अभिव्यक्तस्य घटाद्यवच्छिन्नस्य घटाद्यनधिष्ठानत्वात्। शुद्धस्फुरणाङ्गीकारे वेदान्तवैयर्थ्यापत्तेः। न च वेदान्तजन्यज्ञानस्य चाक्षुषादिघटादिज्ञानादनधिकविषयकत्वेऽप्युपाध्यभानार्थं तदावश्यकम्। ज्ञानेन स्वविरोधिनिवृत्तावधिकाभानस्यानपेक्षणात्। न हि दण्डिपुरुषज्ञानं पुरुषाज्ञानं न निवर्तयति। विषयप्रकाशकमधिष्ठानचैतन्यं अन्तःकरणावच्छिन्नो जीवस्तयोरभेदाभिव्यक्त्यर्थं वृत्तिरिति न युक्तम्; अन्तःकरणाद्युपाधिभङ्गं विनोपहिताभेदासंभवात्। घटादितादात्म्यतया भासमाने त्वदभिमताधिष्ठानचैतन्ये जीवाभेदाभिव्यक्तिस्वीकारे अहं घट इति प्रतीत्यापत्तेश्च। वृत्तिरावरणभङ्गार्थमित्यप्ययुक्तम्। विवर्ताधिष्ठानस्य चिन्मात्रस्याज्ञानादिसाक्षित्वेन सदा प्रकाशनात्। अन्यस्याज्ञानकल्पितत्वेनावरणाभावात्। न चाज्ञानादिसाक्षित्वेन प्रकाशेऽप्यशनायाद्यतीतत्वादिना प्रकाशाभावादावरणमावश्यकम्। अज्ञानादिसाक्षित्वाशनायाद्यतीतत्वादेः प्रकाशाप्रकाशोपपादकस्य धर्मस्य निर्विशेषेऽसत्त्वात्। वृत्तिश्चिदुपरागार्थमित्यप्यशुद्धम्। घटादिषु स्वतः संबन्धाभाववद्वृत्तावपि स्वतः संबन्धासंभवात्। किं चाज्ञानोपादेयभूतया वृत्त्या स्वोपादानाज्ञानाभिभवो न युक्तः। न च वृश्चिकादिना गोमयादेरभिभवो दृष्टः। स्वनिमित्तकारणगोमयस्याद्यवस्थाया अभिभवात्। किं तु शुद्धचितः सर्वव्यावहारिकप्रपञ्चाधिष्ठानभूताया श्चाक्षुषादिवृत्त्याभिव्यक्तिस्वीकारे सर्वं सर्वस्य भायात्। न च घटाद्यवच्छेदेनैव चितोऽभिव्यक्तिरिति न सर्वप्रकाशापत्तिः। घटाद्यवच्छेदेनाभिव्यक्तस्य विशिष्टस्य घटाद्यनधिष्ठानत्वात्। न च चैत्रावरणशक्तेरेवाज्ञानगतायाश्चैत्रार्जितया वृत्त्या नाशात्स पश्यति, मैत्रस्तु न पश्यति; तं प्रत्यावरणशक्तेरनाशात्। शक्तयस्तु द्रष्टृविषयाभ्यां भिन्ना एव। शक्तीनां ज्ञानत्वे नानाज्ञानापातात्। तद्भिन्नत्वे ज्ञानेन साक्षान्निवृत्त्यनुपपत्तेः। रूप्यादेरज्ञानोपादानकत्वानुपपत्तेश्च। न

चैकाज्ञानपक्षे शुक्तिरूप्यादेः स्वकारणे विलय एव शुक्त्यादिज्ञानेन संपाद्यते, न तु नाशः; ज्ञानाज्ञानयोरेव साक्षाद्विरोधादिति वाच्यम्। ज्ञाननिवर्त्यत्वं मिथ्यात्वमित्यत्र दृष्टान्तासिद्धेः। अतो रूप्यादिनिवृत्त्यर्थं शुक्तिज्ञानेनाज्ञाननिवृत्तिरावश्यकीत्येकाज्ञानमते शुक्तिज्ञानादेव मोक्षः स्यात्। न चास्त्वनेकाज्ञानपक्षः। एकया वृत्त्या सर्वज्ञाननाशे शुक्त्यादेः सदा प्रकाशापत्तेः। एकस्यैवाज्ञानस्य नाशे वृत्तिकालेऽप्यप्रकाशापत्तेः। एकावरणनिवृत्तावप्यावरणान्तरसत्त्वात्। न च यथा तवैकज्ञानमेकमेव प्रागभावं नाशयति प्रागभावान्तरनिबन्धनमज्ञातत्वादिव्यवहारं प्रतिबध्नाति, तथा ममाप्येकं ज्ञानमेकमेवाज्ञानं नाशयत्यज्ञानान्तरनिबन्धनं व्यवहारं प्रतिबध्नातीति वाच्यम्। अज्ञानवत्प्रागभावस्यावरकत्वाभावेनाज्ञानस्य यवनिकादावावरकत्वेन दृष्टान्तवैषम्यात्। प्रागभावकाले ज्ञानाभावादेवाप्रकाशोपपत्तेः।

**इति प्रतिकर्मव्यवस्थाभङ्गः ॥ १५ ॥**

## १६. मिथ्यात्वानुमाने प्रतिकूलतर्काः।

प्रतिकूलतर्कप्रतिहताश्च दृश्यत्वादयः। तथा हि। विश्वं यदि कल्पितं स्यात्तर्हि साधिष्ठानं स्यात्। न चैवं, सामान्यतो ज्ञातत्वे सत्यज्ञातविशेषवत्त्वस्याधिष्ठानत्वप्रयोजकस्य निर्विशेषे निःसामान्ये ब्रह्मण्यसंभवात्। ननु स्वरूपेण ज्ञातत्वे सति विशेषेणाज्ञातत्वस्याधिष्ठानत्वप्रयोजकत्वेनाज्ञातविशेषवत्त्वमप्रयोजकम्। पुरुषो न वेति संशयधर्मिणः स्थाणोरप्यन्यत्र ज्ञातस्थाणुत्वरूपविशेषवत्त्वात्। तत्राज्ञातविशेषवत्त्वमपि न प्रयोजकम्। विशेषवत्त्वेनाज्ञातत्वमेव लाघवात्प्रयोजकम्। अतः स्वप्रकाशत्वेन ज्ञानात्पूर्णानन्दत्वादिना चाज्ञानादधिष्ठानत्वमुपपन्नमिति चेन्न। स्वरूपेण ज्ञातस्य निर्विशेषस्य विशेषेणाज्ञातत्वासंभवात्। स्वरूपतो ज्ञातस्य धर्मविषयकमेव ह्यज्ञानम्। स्थाणुत्वादेः व्यक्त्यन्तरे ज्ञातत्वेऽपि भ्रमविशेष्यव्यक्तिनिष्ठत्वेनाज्ञातत्वात्स्थाणौ पुरुषत्वारोपोपपत्तेः। स्वरूपभिन्नस्वप्रकाशत्वादेस्तव ब्रह्मण्यसत्त्वाच्च। न च सत्त्वादिकं कल्पितव्यक्तिभेदेन सामान्यं, पूर्णानन्दत्वादिर्विशेषः। अज्ञानकल्पितस्याज्ञानतत्त्वज्ञानयोरविषयत्वात्। बाधकज्ञानेन विषयीकर्तव्यस्य ज्ञातधर्मस्यैवाधिष्ठानत्वे तन्त्रत्वाच्च। स्वप्रकाशत्वाद्यारोपं प्रति स्वप्रकाशत्वाद्यन्तरस्य प्रयोजकत्वेऽनवस्थापत्तेश्च। पूर्वपूर्वाज्ञानकल्पितं ब्रह्मोत्तरोत्तराज्ञानाश्रयो विषयश्चेति ब्रह्मणोऽपि कल्पितत्वानित्यत्वाद्यापत्तेश्च। किं चाधिष्ठानतिरोधानं विना नाध्यासः। निर्विशेषस्य तिरोधाने त्वध्यस्ताविद्याद्वैः

प्रकाशानुपपत्तिः । न च पूर्णानन्दत्वेनाज्ञानं, स्वरूपेण ज्ञानम् । अज्ञानाकल्पित-पूर्णानन्दत्वादेस्तत्रासत्त्वात् । न च भ्रमविरोधिज्ञानाभाव एवाधिष्ठानत्वे तन्त्रम् । तदभावावगाहिनस्तदभावव्याप्यावगाहिनो ज्ञानस्य तदभावावच्छेदकधर्मदर्शनादेश्च व्यावृत्ताकारस्यैव भ्रमविरोधित्वात् । न हि बाधकधीविषयो भ्रमकालेऽज्ञातो धर्मो ब्रह्मणि तवास्ति । तत्रासद्विशेषज्ञानाभावस्य बाधकालेऽपि सत्त्वात् । किं च विश्वं यदि कल्पितं स्यात्तदा सप्रधानं स्यात् । न चैवं, तस्मान्न कल्पितम् । ननु प्रधानं सजातीयमस्त्येव; पूर्वप्रपञ्चसजातीयस्यैवोत्तरप्रपञ्चस्याध्यासात्; अध्यासो हि स्वकारणतया संसारमपेक्षते; न तु संस्कारविषयस्य सत्यत्वमनुप्रयोगात्; न हि प्रागजन्य एव संस्कारोऽध्यासहेतुरिति चेन्न । अनाद्यविद्यादेरध्यस्तत्वासंभवेन तात्त्विकत्वापत्तेः । तदध्यासस्य प्रधानादि विनैवाङ्गीकारे ब्रह्मणोऽपि प्रवाहानाद्या-रोपापत्तेः । न च विश्वारोपाधिष्ठानतया ब्रह्मणः सत्यत्वम् । आरोपेऽधिष्ठानाज्ञानं हि हेतुर्न तु तदपि येन तत्सत्त्वमपेक्ष्येत । न चाधिष्ठानस्य ज्ञानद्वारा भ्रमाहेतुत्वेऽ-प्यज्ञानद्वारा भ्रमहेतुत्वेन सत्यत्वसिद्धिः; भ्रमोपादानाज्ञानविषयो ह्यधिष्ठानम्; अज्ञानेन तु स्वाकल्पितं सत्यमेव विषयीक्रियत इति वाच्यम् । स्वकल्पितस्य स्वेन विषयीकरणासंभवेऽपि पूर्वपूर्वाज्ञानकल्पितस्य ब्रह्मण उत्तरोत्तराज्ञानेन विषयीकरण-संभवात् । किं च चैत्रेण मैत्रे संस्काराध्यासे मैत्रभ्रमादर्शनाज्जगद्भ्रमहेतुसंस्कारस्या-धिष्ठानसमसत्ताकत्वं दुर्वारम् । न च स्वेनाध्यस्तं स्वारोपे हेतुः । भ्रमात्पूर्वं स्वस्य कार्यानुमेयसंस्काराध्यासासंभवात् । न च संस्कारोऽज्ञातो व्यावहारिकः स्वेनारोपितः स्वाध्यासहेतुरस्त्येवेति वाच्यम् । अज्ञातस्याध्यस्तत्वे मानाभावेन पारमार्थिकत्वापत्तेः । किं च स्मर्यमाणारोपे सादृश्यधीरपि हेतुः । प्रकृते तु निर्गुणस्याधिष्ठानस्य प्रधान-सादृश्याभावात्कथमध्यासः । न च कल्पितधर्मेण सादृश्यम् । निर्धर्मके ब्रह्मणि तस्या-ध्यासाधीनत्वेनान्योन्याश्रयाद्यापत्तेः । अनाद्यविद्यारोपे तदनपेक्षत्वे तत्र ज्ञानाज्ञान-द्वाराधिष्ठानस्यानपेक्षापत्त्या तस्यासत्त्वापत्तेः । न च पीतः शङ्ख इति सादृश्यज्ञानं विनापि भ्रमो दृष्टः । द्रव्यत्वादिना तत्रापि सादृश्यधीसत्त्वात् । न च प्रधानमात्र-वृत्तितया प्रागवगतमध्यासकाल एवाधिष्ठानवृत्तितया गृहीतं यत्तदेव सादृश्यं विपर्ययहेतुः; न तु प्रागेव प्रधानाधिष्ठानोभयवृत्तितया गृहीतं, तस्य सांशयिकत्वात्; द्रव्यत्वं तूभयवृत्तितया प्रागेवावगतमिति वाच्यम् । चाकचक्यादेः शुक्तिरूप्ययो-र्वृत्तितयारोपात्प्रागेवावगमेऽपि शुक्तौ रूप्यत्वाद्यारोपस्य दर्शनात् । आरोप्य-विरोधको ह्यन्तरोपस्थित्यभावेन सांशयिकत्वासंभवात् । न च सादृश्यज्ञानं संस्कारो-द्बोधकतया न भ्रमहेतुः; सादृश्याभावेऽपि अदृष्टादिनाप्युद्बोधः संभवतीति वाच्यम् ।

फलानुमेयस्यादृष्टस्याज्ञातस्यारोपात्प्राक्सत्त्वे मानाभावात् । अनाद्यविद्याध्यासस्य दोषानपेक्षत्वे अप्रामाण्यस्वतस्त्वापत्तेश्च । दोषानपेक्षावदधिष्ठानस्याप्यनपेक्षापत्तेश्च । न च जनकत्वेन तदनपेक्षत्वेऽप्यध्यासमात्रस्य साश्रयत्वदर्शनादाश्रयतया तदपेक्षेति वाच्यम् । अध्यासमात्रस्य दोषजन्यत्वदर्शनादविद्याध्यासस्यानादित्वासंभवात् । अविद्यादिविषयकधियो भ्रमत्वाङ्गीकारे बाधकप्रमासामानाधिकरण्यं स्यात् । न चेष्टापत्तिः । अवृत्तेः स्वरूपचितस्तदसंभवात् । देहेन्द्रियादि विना चाध्यासस्यादृष्टत्वेन त्वदीयानाद्यध्यासकल्पनायां मानाभावाच्च । शुक्तिरूप्यादिस्थले सर्वत्र दोषसंप्रयोगसंस्कारादीनामधिष्ठानसमसत्ताकत्वस्याध्यस्ताधिकसत्ताकत्वस्य च दर्शनात्कथमारोपितं जगत् । बाधकधियो बाधासंभवात्कथं मिथ्यात्वम् । न च विश्वबाधकज्ञानेन स्वेनैव कतकरजोन्यायेन स्वस्यापि बाधः । कतकरजसः कर्दमस्य चाधस्तादवस्थानेन कस्यापि नाशाभावाद्दृष्टान्तासिद्धेः । न च गुहायां न शब्द इति शब्दः स्वमपि निषेधति । गुहायां स्वाभावबोधनेऽपि स्वाधिकरणे गगनादौ स्वनिषेधबोधनस्य व्याहतत्वात् । नाश्यनाशकभावे एतस्यानुदाहरणत्वाच्च । किं च बन्धस्य ब्रह्मण्यध्यस्तत्वे तन्निदिध्यासनसाध्यतत्साक्षात्कारनिवर्त्यत्वं श्रवणादिसापेक्षब्रह्मज्ञाननिवर्त्यत्वं च न स्यात् । न हि देवतानिदिध्यासनतत्साक्षात्कारनिवर्त्यं दुरितं तत्राध्यस्तम् । न चाधिष्ठानब्रह्मज्ञानमेव निवर्तकं, श्रवणादिनियमादृष्टं च न मुक्तौ हेतुः; किं तु ब्रह्मापरोक्ष्यमेवेति वाच्यम् । अधिष्ठानब्रह्मापरोक्ष्यस्य नियमागृहीतैः स्वेनैव विचारितैर्वेदान्तै त्रैवर्णिकस्यापि दशमस्त्वमसीति लौकिकेनैव संभवात् श्रवणादिनियमवैयर्थ्यापत्तेः । यथा ह्यवघातनियमो वैतुष्यान्योत्पत्त्यपूर्व एवोपयुज्यते, तथापरोक्ष्यान्याविद्यानिवृत्तावेव श्रवणादिनियम उपयुज्यते । अन्यथा श्रवणादिनियमादृष्टसाध्ये साक्षात्कारे श्रवणनिरपेक्षस्योपायान्तरस्याप्रसक्त्या तत्प्रसक्त्यधीननियमविध्ययोगात् । ननु क्रत्वर्थनियमापूर्वस्य परमापूर्वसाधनत्वेऽपि पुरुषार्थहिरण्यधारणादिनियमादृष्टस्य तदभाववच्छ्रवणादिनियमापूर्वस्य श्रवणादिसाध्यसाक्षात्कारान्यफलाभावेऽपि तेनैव फलवत्त्वोपपत्तिः । 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते । ' इति स्मृत्या कर्मपदवाच्यापूर्वमात्रस्य ज्ञाने समाप्तिर्दर्शिता । अविद्यानिवृत्तिरूपा मुक्तिर्ज्ञानादेव । संभावनादिनिवृत्तावदृष्टांशोपयोगः । सामान्याकारेण च प्रसक्तस्य साधनान्तरस्य निवृत्तिः । सर्वत्र नियमविधेः फलं विशेषरूपेण त्वपूर्वविधित्वमेव । तथा हि ' व्रीहीनवहन्ति ' इत्यादावपूर्वसाधनीभूतव्रीहिवैतुष्येऽवघातभिन्नसाधनाप्रसक्तावपि व्रीहिवैतुष्यमात्रे प्रसक्तस्य दलनादेर्निवृत्तिर्विशिष्य कार्यकारणभावबोधनात् । तथा निर्विशेषब्रह्मात्माभेदसाक्षात्कारप्रतिबन्धनिवृत्तौ श्रवणादिभिः सह

साधनान्तराप्रसक्तावप्यात्मज्ञानप्रतिबन्धनिवृत्तौ सांख्यादिशास्त्रस्यापि प्रसक्तिस्तन्निवृत्तिफलको नियमविधिरिति चेन्न। हिरण्यधारणादेर्नियमविधित्वे नियमादृष्टस्य क्रियाफलातिरिक्तफलस्यावश्यकत्वादन्यथा विधानवैयर्थ्यापत्तेः। पुरुषार्थस्य प्राङ्मुखभोजननियमादेः क्रियाफलभिन्नफलस्य घण्टाघोषत्वात्। उक्तं हि 'चतुर्थे द्रव्यार्जनोद्देशेन प्रतिग्रहादिनियमस्थले प्रतिग्रहादितोऽन्योपायेन द्रव्यार्जने प्रत्यवायजनकत्वं, तत्पुरुषार्थनियममात्रे तुल्यम्।' इति। भ्रातृव्यदुर्वर्णता हिरण्यधारणस्यैव फलं, न नियमादृष्टस्यासति हि नियमे भ्रातृव्यदुर्वर्णतोत्पादकेन दुरितमुत्पाद्येताto दुरितोत्पत्तिप्रतिबन्धो नियमफलमिति कल्प्यते। वस्तुतस्तु हिरण्यधारणविधिरपूर्वविधिरेव। सत्यपि हिरण्यधारणादौ दूरस्थभ्रातृव्ये दुर्वर्णतानुत्पत्तेः। निकटस्थस्यापि कस्यचित्तदनुत्पत्तेश्च। स्वतः परोक्षस्यापि ब्रह्मणः स्वधर्मानुष्ठानादिना शोधितेन नियमादृष्टसहकृतश्रवणादिवासितेन मनसापरोक्ष्यमिति स्वीकुर्वतामस्माकं स्मृत्यर्थोपपत्तावपि तत्र दशमस्त्वमसीति लौकिकवाक्यादप्यापरोक्ष्यमङ्गीकुर्वतस्तदर्थानुपपत्तेः ज्ञानेन स्वप्रागभावनिवृत्ताविवाज्ञाननिवृत्तावप्यसंभावनादिनिवृत्त्यनपेक्षणाच्च। लौकिकापूर्वीयव्रीहिवैतुष्यादिष्वनुगतव्रीहित्ववैतुष्यादिवच्छुद्धविशिष्टानुगतधर्मस्याभावाच्च। येन रूपेण श्रवणादिप्राप्तिस्तेनैव रूपेणोपायान्तरप्राप्तावेव हि नियमविधिः। किं च यदि विश्वं कल्पितं स्यात्तदा 'जन्माद्यस्य यतः।' इति सूत्रे 'यतो वा इमानि भूतानि' इत्यादौ श्रुतौ च जन्माद्युक्तिः, 'ईक्षतेर्नाशब्दम्।' इति सूत्रे 'तदैक्षत' इत्यादिश्रुतौ चेश्वरस्येक्षापूर्वककर्तृत्वोक्तिः, 'लोकवत्तु लीलाकैवल्यम्।' इति सूत्रे 'आप्तकामस्य का स्पृहा' इत्यादिश्रुतौ च प्रयोजनाभावेऽपि लीलया सृष्ट्युक्तिः, 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्।' इति सूत्रे 'पुण्येन पुण्यलोकं नयति' इत्यादिश्रुतौ च कर्मसापेक्षत्वेनावैषम्योक्तिः, 'तेजोऽतस्तथा ह्याह।' इति सूत्रे 'वायोरग्निः' इत्यादिश्रुतौ च तेजआदेर्वाय्वादिजन्यत्वोक्तिः, 'विपर्ययेण तु क्रमोऽत उपपद्यते च।' इति सूत्रे 'पृथिव्यप्सु प्रलीयते' इत्यादिश्रुतौ च पृथिव्यादीनामबादौ लयोक्तिरित्याद्ययुक्तं स्यात्। न हि कल्पिते तत्तद्विरोधशङ्का तन्निराकरणं च युक्तम्। तर्कहतत्वस्य मिथ्यात्वोपपादकत्वात्। न च प्रपञ्चस्य कल्पितत्वेऽपि व्यावहारिकसत्त्वाङ्गीकारेण विरोधशङ्कापरिहारादिसंभवः। स्वरूपेण त्रैकालिकनिषेधप्रतियोगिनोऽसत्कल्पस्य व्यावहारिकमिति नामकरणेऽपि विरोधस्य तत्परिहारस्य च तत्रासंभवात्। न चैन्द्रजालिकस्येक्षापूर्वककर्तृत्वं दृष्टम्। प्रतारकस्यैन्द्रजालिकस्य तथा कर्तृत्वं हि त्वयैवैन्द्रजालिके न दृष्टम्। न च मायाविन ईश्वरस्य स्वप्रतिबिम्बभूतजीवभ्रमपितृत्वेन सर्वविरोधनिरासः। सपरिकरस्येशस्य

Indira Gandhi National

जीवेनाध्यस्तत्वेन भ्रमपितृत्वासंभवात् । न चाविद्योपाधिकस्यानादेरीशस्यान्तःकरणोपाधिकजीवकल्पितत्वमसंभवि । जीवस्याप्यनादित्वात् । न च जीवेन तादृशभ्रमपितृत्वादिधर्मविशिष्टस्येशस्य कल्पनानुपपत्तिः । वेदैकगम्यानन्तगुणानां कस्यापि ज्ञानाभावेन विशेषतस्तद्धर्मविशिष्टतयारोपानुपपत्तेः । ईश्वरकल्पकजीवस्य प्रपञ्चकल्पनायाः सुतरां संभवेन जीवकारणतां निषिद्ध्येशकारणबोधकेन समन्वयाध्यायेन विरोधापत्तेश्च । स्वेनान्येन चाकल्पित एव ह्यैन्द्रजालिकः स्वाकल्पितानेव भ्रमयति । 'तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ।' इत्यादिविरोधापत्तेश्च । आकाशादिभ्यो वाय्वाद्युत्पत्तिरिति भ्रान्तेः कुत्रापि नियमेनासंभवेन श्रुतेस्तदालम्बनासंभवात् । मायामोहं विना मायिकस्य दर्शनासंभवात् । मायामोहितस्य भ्रान्तस्येशत्वासंभवात् । न चाध्यस्तमध्यस्तत्वेन जानातीति न भ्रान्तः । अध्यस्तत्वेन जानतः पालकत्वाद्यसंभवात् । अतः सत्यस्यैव जगतः कर्ता सत्यस्याविद्यादिबन्धस्य निवर्तको हरिरिति सिद्धम् ।

इति मिथ्यात्वानुमाने प्रतिकूलतर्काः ॥ १६ ॥

## १७. ज्ञाननिवर्त्यत्वान्यथानुपपत्तिभङ्गः ।

ननु 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥' इति ज्ञाननिवर्त्यत्वान्यथानुपपत्तिर्मिथ्यात्वे मानमिति चेन्न । 'एवं ज्ञातो भगवाननादिः पुरुषोत्तमः । प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसंक्षयः ॥' इत्याद्यनुसाराद्भगवदपरोक्षहेतुकतत्प्रसादादेव मोक्षोक्तेः । न च शुक्तिज्ञाननिवर्त्यरूप्यस्येवाधिष्ठानज्ञानत्वेन ब्रह्मज्ञाननिवर्त्यस्य बन्धस्य मिथ्यात्वोपपत्तिः । जगन्मिथ्यात्वसिद्धेः प्राग्भ्रमविषयत्वरूपाधिष्ठानत्वस्यैवासिद्धेः भ्रमागृहीततत्त्वस्य ज्ञानं सप्रकारकं हि भ्रमादिनिवर्तकं दृष्टं, तच्च तवासंभवि । [1]न च यत्र धर्मान्तरं विशेषणतयोपलक्षणतया वा भासते, तत्र स्यात्सप्रकारकत्वं, प्रकृते स्वरूपस्यैवोपलक्षणतया व्यावर्तकत्वान्न सप्रकारता स्वस्य स्वस्मिन्नप्रकारत्वादिति वाच्यम् । प्रकारत्वेन भातस्य व्यावर्तकताया नाममात्रत्वात्स्वरूपमात्रस्य भ्रमेऽपि भानादुपलक्ष्यत्वानुपपत्तेश्च । यत्तु यथाकाशपदाच्छब्दाश्रयत्वोपलक्षितधर्मिमात्रविषयकं निर्विकल्पं ज्ञानं जायते,

---

१. 'न च यत्र विशेषणतया धर्मान्तरोपलक्षणतया वा भासमानो धर्मो व्यावर्तकस्तत्र सप्रकारत्वं, यत्र तु स्वयमाभासमानः सन् स्वरूपस्यैवोपलक्षणं तत्र निष्प्रकारकतैवेति वाच्यम् ।' इति पाठः म्हैसूरमातृकायाम् ।

तद्वदत्रापि द्वितीयाभावाद्युपलक्षितब्रह्मज्ञानं द्वैतनिवर्तकमपरोक्षं वेदान्तैर्जायत इति तन्न । धर्मिमात्रज्ञानस्य भावाभावादिज्ञानाविरोधित्वात् आकाङ्क्षादेः संसर्गघटितत्वस्योक्तत्वादाकाशादिपदान्निर्विकल्पकज्ञानासंभवाच्च । बाधकधियो भ्रमतद्धेतुज्ञानदोषाध्यस्तद्रष्ट्रादीनामबाधकत्वं हि दृष्टमिति कथं ब्रह्मज्ञानमविद्यादिबाधकम् । ननु स्वप्ने द्रष्टारं दुष्टकरणवन्तं कल्पयित्वा तस्य भ्रमं कल्पयति, तत्र जागरज्ञानेन सर्वेषां निवृत्तिः; जागरेऽपि मनुष्यप्रतिकृतौ चैतन्यं कल्पयित्वा तत्समीपवर्तिन्यादर्श एवादर्शत्वं कल्पयित्वा स्वप्रतिबिम्बमयं पश्यतीति कल्पयति, तदा नायं चेतनो न चायमादर्श इति प्रमया सर्वनिवृत्तिर्दृष्टेति चेन्न । स्वप्ने कल्पितानां दोषद्रष्ट्रादीनां भ्रमाहेतुत्वात् । भ्रमहेतूनां निद्रादिदोषसंस्कारादीनां जाग्रज्ज्ञानेनाबाधाच्च । मनुष्यप्रतिकृत्यादौ चैतन्यारोपहेतूनां कल्पकनिष्ठानां बाधकज्ञानेनाबाधात् । तेन बाधितानां कल्पितादर्शादीनां प्रतिबिम्बादिभ्रमाहेतुत्वाच्च । किं च सेतुदर्शनादिना ब्रह्महत्याया इव ब्रह्मज्ञानेन सत्यस्यैव बन्धस्य निवृत्त्युपपत्तेः । ननु सेतुदर्शनमात्रं न दुरितनिवर्तकं, तत्र म्लेच्छानामपि दुरितनाशप्रसङ्गात्, किं तु दूरगमनच्छत्रपादुकादिवर्जनादिनियमविशिष्टमिति चेन्न । ब्रह्मज्ञानस्याज्ञानाद्यधिष्ठानत्वेन सदा सत्त्वात् । स्वलिखितविचारितवेदान्तैरन्त्यजादेरपि ज्ञानसंभवाच्च । श्रवणादिनियमादृष्टविशिष्टस्यैव ब्रह्मज्ञानस्याज्ञानादिनिवर्तकतया वाच्यत्वात् । न च श्रवणादिनियमोऽसंभावनादिनिवृत्तावुपक्षीणः । दूरगमनादिनियमोऽपि ह्यश्रद्धादिनिवृत्तावुपक्षीणः । सुहृद्दर्शनेन सत्यस्य दुःखस्य निवृत्तेरानुभविकत्वाच्च । न च 'सेतुं दृष्ट्वा ब्रह्महत्यां व्यपोहति' इति सेतोश्चाक्षुषज्ञानमेव पापनिवर्तकम् । 'दृष्ट्वैव तं मुच्यते' इति श्रुतेरीशेरपरोक्षज्ञानमात्रपरत्वात्सत्यस्यैव बन्धस्येशज्ञाननिवृत्तिः ।

इति ज्ञाननिवृत्त्यन्यथानुपपत्तिभङ्गः ॥ १७ ॥

## १८. 'एकमेव' इति श्रुत्यर्थः ।

'सलिल एको द्रष्टाद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।' इत्याद्यनेकसलिलादिबोधकपदसंवलितमद्वैतपदं समाभ्यधिकशून्यब्रह्मपरम् । न च सलिलपदं न सप्तम्यन्तं, किं तु प्रथमान्तं, सलिलवत्स्वच्छं ब्रह्मेत्यर्थकम् । प्रथमान्तत्वे नपुंसकत्वापत्तेः । छान्दसत्वकल्पने मानाभावात् । ननु 'एकमेवाद्वितीयम्' इत्यादिवाक्यं सजातीयविजातीय-

स्वगतभेदनिषेधपरं, चैतन्यभेदः सजातीयभेदः, जडभेदो विजातीयभेदः, धर्मभेदः स्वगतभेद इति चेन्न । विशेषणसंगतैवकारेण शङ्खः पाण्डुर एवेतिवदेकपदार्थस्य मुख्यत्वादेर्ब्रह्मण्ययोगव्यवच्छेदबोधनात् । न हि पार्थ एव धनुर्धर इतिवदत्र विशेष्य-संगत एवकारो येनान्ययोगव्यवच्छेदो बोध्येत । अद्वितीयपदेनासहायत्वबोधनात् । ' असिद्वितीयोऽनुससार पाण्डवम् ' इति प्रयोगात् । 'असिद्वितीयोऽसिसहायः ' इति महाभाष्योक्तेश्च । द्वितीयशब्दः सहायवाची । तथा चाद्वितीयमसहाय-मित्यर्थः । ' अनेकमन्यपदार्थे । ' इति सूत्रे महाभाष्ये ' असिद्वितीयोऽनुससार पाण्डवम् ' ' संकर्षणद्वितीयस्य बलं कृष्णस्य वर्धताम् । ' इत्यादौ ' अर्धतृतीया इत्यादिवत् द्विवचनं प्राप्नोति । ' इति चोदयित्वा ' नैष दोषः । अयं तीयान्तः शब्दः पूरणे वर्तते । अस्ति च सहायवाची । तद्यः सहायवाची तस्येदं ग्रहणम् । असिद्वितीयोऽसिसहाय इति गम्यते । ' इत्यादिना ग्रन्थेन द्वितीयशब्दस्य सहायार्थत्वं स्पष्टं ज्ञायते । ' प्रयतपरिग्रहद्वितीयः ' इति महाकविप्रयोगश्च । कुशासनादे-र्द्वितीयस्य सत्त्वेऽपि परिग्रहस्य द्वितीयत्वोक्त्या तस्य सहायार्थता गम्यते । यद्वा ' अस्य गोर्द्वितीयोऽन्वेष्टव्यः इत्युक्ते गौरेव द्वितीयोऽन्विष्यते नाश्वो न गर्दभः । ' इति महाभाष्यानुसारात्समानजातीयपरं द्वितीयपदम् । तथा च समानद्वितीयशून्यं ब्रह्मेत्यर्थात् । एवमेकशब्दस्यापि नानार्थकत्वेनाविरुद्धार्थमादायोपपत्तौ न मिथ्यात्व-परत्वम् । 'एके मुख्यान्यकेवलाः' इत्यमरोक्तेः । 'एकशब्दोऽयं अन्यप्रधानासहाय-संख्याप्रथमसमानवाची ।' इति ' एको गोत्रे ।' इति सूत्रे कैयटोक्तेश्च । ' ष्णान्ता षट् ।' इति सूत्रे 'एकशब्दोऽयं बह्वर्थः, अस्ति संख्यार्थोऽस्त्यसहायवाची, अस्त्य-न्यार्थः । ' इति महाभाष्योक्तेश्च । तथा च समाधिकशून्ये असहाये च ब्रह्मणि एवकारेणान्यत्वप्राधान्यादेरेकशब्दार्थस्यायोगो व्यवच्छिद्यत इति श्रुत्यर्थः । ' सदेव सोम्येदमग्र आसीत् ' इत्यस्येदं सद्ब्रह्माग्रे सृष्टेः प्राक् केवलमासीदेव, न किंचिद-कार्षीदित्यर्थः । यद्वा इदमेव ब्रह्मैव सदासीत्स्वरूपतः स्वभावतोऽविकृततयासीत् । मुक्तानां रमादीनां बाह्यविहारं विहायानन्तब्रह्माण्डसमावेशार्हभगवदुदरे विहारात् । बद्धजीवजडयोर्लीनत्वात् । 'सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।' इत्यादि-स्मृतेः । 'तम आसीत्तमसा गूढमग्रे प्रकेतम् ' इत्यादिश्रुतेश्च । 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचिन्मिषत् ' इति श्रुत्यन्तरेऽन्यस्य मिषत्त्वेन स्फुरत्त्वेनैव हि निषेधः । परेषां त्वद्वितीयपदेनैव द्वितीयमात्रनिषेधसिद्ध्या पदान्तरवैयर्थ्यम् । नास्ति नासीन्न भविष्यदिति ब्रह्मान्यस्य कालत्रये निषेधं वदतामग्रपदवैयर्थ्यं च । 'सदेव'इति विशेषणसंगतैवकारेणायोगव्यवच्छेदबोधनात् । किं च श्रुत्या स्वविहित-

द्वितीयाभावस्य निषेधे स्वव्याघातोऽनिषेधे तेनैवाद्वैतहानिः। न चाभावो द्वितीयो नाद्वैतविरोधी । अभावत्वाधेयत्वाधारत्वादिभिर्वैरविनाभूतेनाभावेनातिशयेनाद्वैतविघटनात् भावपरत्वेन द्वितीयपदस्य संकोचे सकलमानाविरोधाय स्वतन्त्रद्वैतपरतयैव संकोचौचित्यात् । अभावरूपप्रवृत्तिनिवृत्तिसंभवेन वेदान्तानां सखण्डार्थकतापत्तेश्च । यत्त्ववान्तरतात्पर्येण द्वितीयाभावसिद्धिर्महातात्पर्येण चाखण्डसिद्धिरिति, तन्न । द्वितीयाभावस्य सत्यत्वेऽद्वैतहानेर्मृषात्वे द्वैतसत्यत्वोपपत्तेः । द्वितीयाभावविशिष्टतया ज्ञाते ब्रह्मणि विशेष्यमात्रे संदेहाद्यभावेन तत्र तात्पर्यादिकल्पनस्याप्रामाणिकत्वादन्यथा शब्दमात्रस्य तात्पर्यद्वयं स्वीकृत्याखण्डार्थकतापत्तेः ।

इति 'एकमेव' इति श्रुत्यर्थः ॥ १८ ॥

## १९. ' नेह नाना ' इति श्रुत्यर्थः ।

' नेह नानास्ति किंचन। ' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।' इति श्रुतिरपि न जगन्मिथ्यात्वपरा । तस्याः भावप्रधाननिर्देशेन ब्रह्मगतभेदनिषेधपरत्वात् । 'यदेवेह तदमुत्र यदमुत्र तदन्विह । ' इति पूर्ववाक्ये ब्रह्माभेदस्यैवोक्तेश्च । न च ब्रह्मगतभेदाप्रसक्तिः । जगज्जन्मादिहेतौ ब्रह्मणि विचित्रकार्यभेदेनान्तर्यामिणि च नियम्यानन्त्येन स्थानभेदे च तत्प्रसक्तेः संभवात् । 'इह' इति विशेषणान्न नानात्वनिषेधः । इमौ स्निग्धौ, अस्मिन् ग्रामे न विरोध इत्यादाविवेदंशब्दोपात्तस्य ब्रह्मण एव धर्मित्वेन प्रतियोगित्वेन च संबन्धसंभवे तदनुपात्तस्य धर्मित्वेन प्रतियोगित्वेन वा संबन्धायोगात् । विधेयोद्देश्ययोर्नानात्वनिषेधतदाधारब्रह्मणोर्निषेध्यनिषेधयोर्नानात्वतदभावयोश्च भेदावश्यकत्वाच्च । काठके ' तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन ।' इति पूर्वत्र, ' मध्य आत्मनि तिष्ठति । ' ' यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति ' इत्युत्तरत्र च भेदप्रमितेश्च । एतद्वाक्यस्य मिथ्यात्वपरत्वे बृहदारण्यके ' यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ।' इति पूर्वेण ' य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः एष सर्वेश्वरः एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' इत्युत्तरेण, काठके च 'ईशानो भूतभव्यस्य' इति पूर्वेण 'ईशानो भूतभव्यस्य' इत्युत्तरेण च वाक्येन विरोधः स्यात् । यत्तु 'नाना विष्णुं मोक्षदो नान्यदेवः' इत्यादिप्रयोगेषु पार्थक्यार्थस्य नानाशब्दस्य निपातत्वेन स्वार्थिकनाञ्प्रत्ययान्तनञ्स्वरूपत्वेन च तत्र 'किंचन' इति नानार्थस्याभेदोऽव्युत्पन्नः; न हि

विष्णुं किंचन देव इति प्रयुञ्जत इति तत्तुच्छम्। एतादृशप्रयोगे विनापर्यायनानाशब्दस्य पार्थक्यार्थकत्वाभावात्। न च विनाशब्दोऽपि पार्थक्यार्थः। 'धूमवति महानसादौ वह्निं विनात्र धूम इति व्यवहाराभावात्। किं त्वभाववानेव बोध्यते। विना साध्याभाववति यो भावो वृत्तिस्तद्विरहः।' इति दीधितिकृता 'अविनाभावो व्याप्तिः' इति मणिवाक्यस्य व्याख्यातत्वात्। तथा च मोक्षोपधायकत्वसंबन्धेन विष्णुभाववति तादात्म्येन संबन्धेन मोक्षदस्य संसर्गेण मोक्षदत्वस्य च नञा निषेधात् नानाशब्दस्य विनाशब्दसमानार्थकत्वे चेह प्रपञ्चे किंचन किमपि नियम्यत्वसंबन्धेन ब्रह्माभाववति तादात्म्यसंबन्धेन संबन्धि नास्तीत्यर्थात्। यत्तु 'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति ॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति। एवं मुनेर्विजानत आत्मा भवति' इति वाक्ये ब्रह्मधर्मस्य दृश्यमात्रस्य दृष्टया तन्मात्रावाप्तिरित्यनेन दृश्यमात्रं निन्दित्वा जलक्षिप्तजलदृष्टान्तेन ब्रह्मैक्यज्ञानेनात्मनो ब्रह्मैक्यावाप्त्युक्तेरिति तत्तुच्छम्। धर्मपदस्य दृश्यमात्रपरत्वे त्वद्दुराशातिरिक्तबीजाभावात्। यावद्द्रव्यभाविनो ज्ञानानन्दादीन् ब्रह्मधर्मान् पृथग् यावद्द्रव्यभावित्वेनानित्यत्वेन पश्यंस्तानेव विधावति अनित्यमेव फलं प्राप्नोति। नित्यज्ञानानन्दानन्तगुणविशिष्टतया ब्रह्म विजानतो मुनेरात्मा कीटभृङ्गन्यायेनाविर्भूतज्ञानानन्दगुणवत्त्वेन ब्रह्मसदृशो भवतीत्यर्थात्। जले क्षिप्तजलैक्याभावात्। तिलराशौ क्षिप्तदेवदत्तीयतिलानां विविच्यानुपलब्धावपि यथा नैक्यं, तथा जले क्षिप्तजलस्यैक्याभावात्। अन्यथा वृद्ध्याद्यनुपपत्तेः। न चेह ब्रह्मणि नाना भिन्नं किंचन नास्तीत्यर्थः। स्वाधिकरणनिष्ठतया अवृत्तितया चोपपत्त्या जगतो ब्रह्मण्यभावेऽपि मिथ्यात्वासिद्धेः। भिन्नाभावस्य ब्रह्मभिन्नत्वे भिन्नमात्रनिषेधस्य व्याहतत्वाच्च। ब्रह्माभिन्नत्वे तस्य नित्यसिद्धत्वेन तज्ज्ञानस्य द्वैताविरोधित्वेन चोपदेशवैयर्थ्यापत्तेः। यत्त्विह जीवोपाधौ यदेव अमुत्रेश्वरोपाधावपि तदेवेति तत्तुच्छम्। 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।' 'य आत्मनि तिष्ठन्' 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः।' 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।' इति श्रुतिस्मृतिभ्यां जीवेशयोरेकत्र स्थितिप्रतिपादनेन तदुपाध्योरिहामुत्रशब्दावाच्यत्वात्। यदेवेहास्मिँल्लोके ब्रह्म तदेवामुत्र श्रीवैकुण्ठे, लोकभेदेनाभेदाभावादित्यर्थः। यत्त्विह ब्रह्मणि नाना विना किमपि नास्ति किं त्वविनाभूतमस्तीत्युक्तम्। 'पृथग्विनान्तरेणर्ते हिरुङ्नाना च वर्जनम्।' इत्यमरोक्त्या वर्जनं हि विनाशब्दार्थः। तच्च नञर्थस्यात्यन्ताभावस्य भेदस्य वाधिकरणसंबन्धो वह्निं विना धूम इत्यादौ वह्न्यत्यन्ताभाववत्संबन्धः। नीलं विना तेज इत्यादौ नीलभिन्नतादात्म्यं

तेजसि प्रतीयते । नानाशब्दस्य तु भिन्नसंबन्ध एवार्थस्तत्रापि भेदांशमात्रं शक्यम् । अधिकरणसंबन्धस्तु संसर्गतया भासते । अन्यथा नञ्पदस्य तत्र शक्त्यभावेन नानाञ्प्रत्यययोश्च स्वार्थिकत्वेन नानापदार्थविषया तल्लाभासंभवात् । ' नाना विष्णुं मोक्षदो न ' इत्यादावपि मोक्षदो विष्णुभिन्नो नेत्यर्थ इति तत्तुच्छम् । 'विनञ्भ्यां नानाञौ नसह । ' इति सूत्रेण नसहेत्यर्थकाभ्यां विनञ्भ्यां नानाञोर्विधानात् प्रकृतिभूतनञर्थेन नसहेति प्रत्ययार्थो विशेषणीयः । ' यथा च द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः, नसह सहैवेति, तथा च नानाशब्दः सहेत्यर्थः स्यात् ' इति चोदयित्वा ' लोकप्रसिद्धानामिह साधुत्वान्वाख्यानात् । लोके च नानाशब्दस्य पृथग्भावाभिधायकत्वात् । नसहेति नप्रत्ययार्थविशेषणमेतत् । ' इत्यादिना भाष्यग्रन्थेन विनञ्शब्दयोर्नसहेत्येकार्थकत्वेन नाप्रत्ययस्य नाञ्प्रत्ययस्य चानिर्दिष्टार्थकत्वेन स्वार्थिकत्वादिनानाविनाशब्दयोरेकार्थकत्वोक्तेः। वर्जनार्थकत्वेऽपि ब्रह्म नाना नियम्यत्वसंबन्धेन ब्रह्म वर्जितम् । ब्रह्माभाववत्किंचिदपीह जगति नास्तीत्यर्थे क्षत्यभावात् । नानाशब्दस्योक्तसंबन्धेन ब्रह्माभाववत्संबन्धार्थकत्वेन विनाशब्दसमानार्थकत्वोपपत्तौ नानाशब्दस्य भिन्नसंबन्ध एवार्थ इत्यत्र भेदकल्पनस्य निर्मूलत्वात् । 'न तदस्ति विना यत्स्यान्मया भूतं चराचरम् । ' इति स्मृत्या श्रुतेर्व्याख्यातत्वाच्च । केचित्तु जगति किंचिदपि नाना भिन्नं न, क्षणिकवादप्राप्तो भेदो निषिध्यत इत्यर्थ इत्याहुः । अन्ये तु स्वीयशरीरभूतजडाजडविशेषणविशिष्टं ब्रह्म द्वितीयरहितमिति एकमेवाद्वितीयं ब्रह्म ' नेह नाना ' इत्यादिश्रुतेरर्थ इत्याहुः ।

इति ' नेह नाना ' इति श्रुत्यर्थः ॥ १९ ॥

## २०. ' यत्र त्वस्य ' इति श्रुत्यर्थः ।

नापि ' यत्र त्वस्य सर्वमात्मैवाभूत्तदा केन कं पश्येत् ' इति श्रुतिर्मृषात्वे मानम् । अत्र हि ' स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवैवं वा, अर इदं महद्भूतमनन्तपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति' इत्यादिना सैन्धवखिल्यस्य समुद्र इव विज्ञानघनस्य जीवस्य ब्रह्मणि स्थितिर्मोक्ष इति स्वमतमुक्तम् । न च सैन्धवखिल्यकण्डिकायां समुद्रपदं नास्ति; तत्कथं समुद्र इति व्याख्येति वाच्यम् । सैन्धवखिल्यकण्डिकाव्यवहितपूर्वकण्डिकायां 'स यथा सर्वासामपां समुद्र एकायनम्' इत्युक्तस्यानुषङ्गेणान्वयात् । न जलराशिरत्र समुद्रः खातो वरुणो वा; पूर्वत्र 'स यथा सर्वासामपां समुद्र एकायनम्' इत्युक्तेः । न ह्याप एवापामयनम् ।

न चेश्वरस्थानीयाभ्यां खातवरुणाभ्यां सैन्धवखिल्यस्याभेदः। उक्तं च ' समुद्रजलस्थानीया मुक्ता बहव एकस्वभावाः वरुणवदपां खातवद्वा अनन्तपारो भगवान् ' इति। एवं श्रुतिः स्वमतमुक्त्वा 'अविनाशी वारेऽयमात्मानुच्छित्तिधर्मा ' इति वाक्ये 'अविनाशी' इत्यनेनात्मनाशो मोक्ष इति बौद्धमतं, 'अनुच्छित्तिधर्मा' इत्यनेन विशेषगुणोच्छेदो मोक्ष इति वैशेषिकमतं च निरस्याद्वितीयचिन्मात्रावशेषो मोक्ष इति बौद्धैकदेशमते अनिष्टं प्रसञ्जयितुं 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यादिना प्रसङ्गाङ्गव्यतिरेकव्याप्तिमुक्त्वा ' यत्र त्वस्य ' इत्यादिना यत्र येषां मते त्वात्ममात्रावशेषः, तत् तर्हि केन कं पश्येत्, न केनापि किंचित्। तथा चेष्टस्य रूपादेरीश्वरस्य चाज्ञानादन्धादेरिवातिदुःखं मोक्षे स्यादित्यनिष्टप्रसङ्गोऽत्राभिप्रेतः। अन्यथा वाक्यशेषे ' सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद ' इति सर्वाधारत्वोक्तिः, ' स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् ' इति, ' स यथार्द्रैन्धनाग्नेरभ्याहितात्पृथग्धूमाः ' इति च भिन्नानां समसत्ताकानां च दुन्दुभितच्छब्दाग्निधूमादीनां दृष्टान्तानामुक्तिश्चायुक्ता स्यात्। न हि दुन्दुभ्यादौ तच्छब्दादिरध्यस्तः। यत्तु यत्र तत्त्वदर्शनकाले सर्वाभेदोपलक्षित आत्मा एवाभूत् आत्मान्यन्नाभूदित्यर्थः, यद्वा बाधायां सामानाधिकरण्यमिति तत्तुच्छम्। कालस्यैव भिन्नत्वेन प्रतीतेः सर्वाभेदस्य बाधितत्वात्। अन्याभावस्य यत्पूर्वं सर्वं प्रतीतं तन्नास्ति, किं त्वात्मैवेति बाधायां सामानाधिकरण्यस्य चाशब्दत्वात्। ' यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति ' इति श्रुत्या तु प्राकृतनामरूपादिविमुक्तजीवस्येश्वरप्राप्तेरेवोक्तेः। तिलराशौ क्षिप्ततिलानामिव नदीजलानां समुद्रजलेनाभेदासंभवात्। न च भवतां ' द्वैतमिव ' इत्यत्रेवशब्दो व्यर्थः। तस्याल्पार्थकत्वात्। 'इवोपमायामल्पत्वे च ' इति कोशात्। यत्तु ' नान्यः प्रतिबलो बली तवार्जुन भविष्यति। अन्यत्र भीष्मात् ' इत्यादावन्यत्रेत्यव्ययं प्रथमान्तं दृष्टमिति ' योऽन्यत्रात्मनः सर्वं वेद ' इत्यत्रापि द्वितीयान्तं स्यान्न सप्तम्यन्तमिति तत्तुच्छम्। अन्यस्मिन्नित्यन्यत्रेति पदनिष्पत्तेः। भवदादियोगे ह्यन्यत्रापि भवति। ततो भवानित्यादौ। न च भीष्मशब्दो भवदादिः। अन्यत्रेत्यस्य प्रथमान्तत्वेऽन्य इत्यनेनान्वितेन पञ्चम्यन्तेन भीष्मादित्यनेनान्वयानुपपत्तेः। भीष्मादन्यस्तव प्रतिबलो नास्ति। अतो भीष्मादन्यत्र त्वया प्रयासो न कार्य इत्यर्थः। यत्तु यथा दुन्दुभेरग्रहणे सति तदीयसामान्यशब्दविशेषशब्दाग्रहणं, तथा सद्रूपब्रह्माग्रहणे प्रपञ्चाग्रहणमिति तत्र तदध्यस्तम्; यथार्द्रैन्धनविशिष्टाग्न्युपादानको धूमस्तादृशाग्निं विना न तिष्ठति, तथा सद्रूपब्रह्म विनाद्वैतं न तिष्ठतीति

तत्तदुपादानकमिति तत्तुच्छम् । व्यक्तिग्रहणं विना जातेरग्रहणेऽपि व्यक्तौ जात्यध्यासाभावात् । ' स यथा दुन्दुभेर्हन्यमानस्य बाह्यांच्छब्दान् शक्नुयाद्ग्रहणाय, दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ' इति श्रुतेर्यथा लोके दण्डादिना ताड्यमानस्य भेर्यादेर्ग्रहणे तदीयसामान्यान् निकृष्टान् तारमन्द्रादिरूपान् बाह्यान् शब्दान् ग्रहीतुं शक्तो न भवति, दुन्दुभेस्तु ग्रहणेन आहननमाघातः आहननविशिष्टस्य वा दुन्दुभेर्ग्रहणे सति शब्दसामान्यविशिष्टदुन्दुभिग्रहणे सति वा तद्गता विशेषा गृहीता भवन्तीत्यर्थात् । शब्दसमसत्ताकस्य दुन्दुभेस्तदधिष्ठानत्वासंभवात् । तज्ज्ञानेन शब्दबाधापत्तेश्च पार्थिवधूमस्य तैजसवह्न्युपादानकत्वासंभवात् । तं विना तस्य स्थित्यसंभवाच्च । न उच्छित्तिर्येषां ते अनुच्छित्तयो धर्माः यस्य सोऽनुच्छित्तिधर्मेत्यर्थः । न त्वनुच्छित्तिर्धर्मो यस्येत्यर्थः । ' अविनाशी ' इत्यनेन पौनरुक्त्यापत्तेः । नोच्छित्तिर्धर्मो यस्येति त्रिपदबहुव्रीहावनिच्प्रत्ययासंभवात् । नोच्छित्तिरनुच्छित्तिर्धर्मो यस्येति विग्रहे ब्रह्मणः सधर्मकत्वापत्तेः ।

इति ' यत्र त्वस्य ' इति श्रुत्यर्थः ॥ २० ॥

Indira Gandhi National Centre for the Arts

## २१. ' यद्द्वैतं न पश्यति ' इति श्रुत्यर्थः ।

नापि ' यद्द्वैतं न पश्यति पश्यन्नेतन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तत् द्वितीयमस्ति । ततोऽन्यद्विभक्तं यत्पश्येत् ' इति श्रुतिस्तत्र मानम् । पूर्वत्र हि 'ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठन्ति शुक्लस्य पिङ्गलस्य हरितस्य पूर्णाः ' इति नाडीस्थभगवन्मूर्तीनां रूपभेदोक्त्या भेदः प्राप्तः, तथा ' तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपम् ' इति षष्ठ्या रूपरूपिभेदश्च । तन्निराकर्तुं भगवद्रूपाणामभेद उच्यते । ' हृदयं ब्रह्म ' इति श्रुत्या ' तस्यैतदेव निरुक्तं हृदयम् ' इत्यादिश्रुत्या च ब्रह्मणि प्रसिद्धेन हृदयनिमित्तकेन ' हृदयस्य भवति ' इति पूर्वत्र हृदयशब्देन निर्दिष्टं ब्रह्म यत्स्वमूर्तिगुणादिकं द्वैतं स्वस्माद्भिन्नं न पश्यति तद्द्वितीयं भिन्नं नास्ति द्वितीयत्वेन नास्ति । कुतः । पश्यन् सर्वज्ञ एव सन्नीश्वरो न तत्पश्यति । न हि द्रष्टुरीश्वरस्य दृष्टेर्विपरिलोपो बाधो विद्यते । नित्यत्वात् । यत जीवजडादिकं स्वस्माद्विभक्तं पश्येत्तत्ततोऽन्यदिति श्रुत्यर्थात् । यच्छब्दस्य 'न तु तत्' इति व्यवहिततच्छब्दान्वयस्तु यत्तदोः साकाङ्क्षत्वादाकाङ्क्षायाश्च संनिधानाद्बलीयस्त्वाद्युक्तः । ' यस्य येनार्थसंबन्धो दूरस्थेनापि तेन सः । अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ॥ ' इति

वार्त्तिकोक्तेः । अन्यथा यद्विभक्तं तन्नास्तीत्येतावता पूर्णत्वेन शेषवैयर्थ्यम् । कथं च त्वत्पक्षे नित्ये चैतन्यमात्रे ' न हि द्रष्टुर्दृष्टेर्विपरिलोपो न हि घ्रातुर्घ्रातेर्विपरिलोपो न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपः ' इत्यादिनोक्तं दृष्टित्वघ्रातित्वस्पृष्टित्वादिकं द्रष्ट्रादिसंबन्धश्च । किं च पूर्वत्र ' यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिवृत्य श्रान्तः संहृत्य पक्षौ सल्लयायैव ध्रियते एवमेवायं पुरुषः ' इति ' तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरं, एवमेवायं पुरुषः ' इति भिन्नसत्यनीडश्येनस्त्रीपुरुषदृष्टान्तोक्तिः ' प्राज्ञेनात्मना संपरिष्वक्तः ' इति जीवेशभेदोक्तिश्चायुक्ता स्यात् । यत्तु द्वितीयत्वेन यत्पश्यतीत्यस्यासिद्धत्वेन तदनुवादेन निषेधासंभव इति तत्तुच्छम् । स्वमूर्त्यादिभेदाभावस्य ' नेह नाना ' इत्यादिना सिद्ध्या सद्भेददर्शनाभावस्य नित्यसार्वज्ञ्ये नित्यसिद्धस्य 'यन्न पश्यति' इत्यनेनानुवादात् । न च ' न तु द्वितीयमस्ति ' इत्यस्यैव पूर्णत्वेन 'यद्द्वैतं न पश्यति' इति व्यर्थम् । द्वितीयसामान्यनिषेधस्य पूर्वोत्तरवाक्यैर्मानान्तरैश्च विरुद्धत्वात् । यद्द्वैतदर्शनं सर्वज्ञस्य नास्ति तद्द्वैतं नास्तीत्यर्थसंपादकत्वेन सार्थक्यात् । न च हृदयशब्देन ' एतत्सर्वं मनः ' ' कामा येऽस्य हृदि स्थिताः ' इत्यादिपर्यालोचनया ताटस्थ्यलक्षणया हृदयस्थमनस उक्तेर्ब्रह्मोक्त्यसंभवः । ' हृदयमारुणय ' ( ? हृदयं ब्रह्मेत्यारुणेयः । ) इत्यस्योपासनापरत्वेऽपि ' ब्रह्म हैव ते ' इति वाक्यशेषेण ते उदरहृदये ब्रह्मेतिव्याख्यानेन हृदयशब्दस्य ब्रह्मणि रूढेः । ' स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयम् ' इति छान्दोग्येऽपि हृदयमिति निरुक्तं नाम । बृहदारण्यके च ' एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वं तदेतत् त्र्यक्षरं हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद, द इत्येकमक्षरं ददात्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ' इत्यादिना हृदयशब्दस्य ब्रह्मणि रूढयुक्तेः । हरति ददाति यातीति हृदयमिति योगस्यापि सूचितत्वाच्च । न च ' पश्यन्नेतन्न पश्यति ' इति हेतुरसिद्धः; न हीशः स्वभिन्नत्वेन स्वमूर्त्यादि न पश्यतीति मानान्तरेण निश्चितमिति वाच्यम् । नित्यसार्वज्ञ्यादिना तत्सिद्धेः ।

इति ' यद्द्वैतं न पश्यति ' इति श्रुत्यर्थः ॥ २१ ॥

## २२. ' वाचारम्भणम् ' इति श्रुत्यर्थः ।

नापि ' वाचारम्भणं विकारो नामधेयम् ' इति श्रुतिस्तत्र मानम् । वाचारम्भणशब्दस्य मिथ्यात्वे योगरूढयोरभावात् । वाचारब्धकाव्यादेर्मिथ्यात्वासंप्रतिपत्तेः । वागालम्बनमात्रमिति व्याख्याने श्रुतिकल्पनात् । त्वया 'नामधेयम्' इत्यस्यापि नाममात्रं

ह्येतत्'इति व्याख्यातत्वेन पौनरुक्त्याच्च। मृत्तिकेत्यर्थविवक्षायामितिशब्दवैयर्थ्याच्च। पदार्थविपर्यासे ह्यत्रेतिशब्दः। स च शब्दप्रकरणे प्रसक्तं शब्दपदार्थकत्वं निवार्यार्थपदार्थकत्वं व्यवस्थापयति। यथा 'न वेति विभाषा।' इति। अर्थप्रकरणे तु शब्दार्थकत्वम्। यथा गौरित्ययमाहेति। उक्तं हि महाभाष्ये "'न वेति विभाषा' इत्यत्र इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति। तद्यथा गौरित्ययमाहेति गोशब्दादितिकरणः प्रयुज्यमानः गोशब्दं स्वस्मात् पदार्थात् प्रच्यावयति सोऽस्मात् प्रच्युतः शब्दपदार्थकः संपद्यते।" इति। अत्र चार्थप्रकरणादेवार्थपदार्थकत्वे सिद्धे किमितिशब्देनातोऽर्थपदार्थकत्वं प्रच्याव्य शब्दपदार्थकत्वं मृत्तिकाशब्दस्य व्यवस्थाप्यते इतिकरणेन। न चात्रेतिशब्दः प्रकारार्थः। प्रकारस्य जगदनुपादानत्वात्। तस्मात् वाचा वागिन्द्रियमात्रेणारम्भणमुत्पादनं यस्य सांकेतिकशब्दस्य भाषाशब्दस्य तन्नामधेयं विकारः। कर्मणि घञ्। विकृतं संस्कृतापभ्रंशरूपेण विक्रियमाणत्वान्मृत्तिकेत्यादिसंस्कृतनामधेयं तु सत्यं नित्यम्। 'नास्य जरयैतज्जीर्यते न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरम्।' इत्येतच्छ्रुतावेव (? त्रिव) सत्यशब्दप्रयोगात्। सादृश्यादेकविज्ञानेन सर्वविज्ञानमित्यत्र मृत्पिण्डादिदृष्टान्ताः। प्रधानज्ञानेनाप्रधानज्ञाने संस्कृतापभ्रंशदृष्टान्ताः। भाषाशब्दज्ञानाद्यत्फलं तच्चाधिकं च सार्वत्रिकव्यवहारादिकं संस्कृतज्ञानाद्भवतीति तज्ज्ञो विद्वानित्युच्यते। तदर्थं 'यथा सौम्य' इत्यनुषञ्जनीयम्। उपादानत्वाभिप्रायत्वेन मृदा ज्ञातया मृण्मयं विज्ञातं स्यादित्येतावता पूर्णत्वेन मृत्पिण्डादिवाक्यत्रये प्रत्येकं श्रुतानां एकशब्दसर्वशब्दपिण्डशब्दानां वैयर्थ्यं स्यात्। न हि सर्वमृण्मयादिकं एकमृत्पिण्डादिविकारः। नखनिकृन्तनस्यान्त्यावयवित्वेनोपादानत्वासंभवाच्च। मृत्त्वे निश्चितेऽपि घटादौ संशयादिदर्शनाच्च। मुमुक्षुज्ञेयशुद्धस्य त्वन्मतेऽनुपादानत्वाच्च। अनाद्यविद्यादीन् प्रत्यनुपादानत्वेन ब्रह्मज्ञानेन तज्ज्ञानासंभवेन सर्वविज्ञानप्रतिज्ञाहानेश्च न विवर्ते दृष्टान्तः। मृण्मयादेर्मृत्पिण्डादौ लोहस्य नखनिकृन्तने चानध्यासात्। शुक्तितत्त्वज्ञानाद्रूप्यनाशवत् ब्रह्मज्ञानात्सर्वस्य नाशापत्त्या सर्वविज्ञानासंभवाच्च। मृत्तत्त्वज्ञाने घटाद्यनिवृत्तेश्च। यत्तूक्तं वाचस्पतिना 'शुक्तौ ज्ञातायां रूप्यतत्त्वं ज्ञातं भवति, सा हि तस्य तत्त्वं, एवं ब्रह्मज्ञानात्सर्वं तत्त्वतो ज्ञातं भवति।' इति, तन्न। एवं हि ब्रह्मज्ञानेन ब्रह्मैव ज्ञातं भवतीत्यर्थः स्यात्। तच्चायुक्तं, स्वस्य स्वाहेतुत्वात्। 'येनाश्रुतं श्रुतं भवति' इत्यादिश्रुतिगताश्रुतादिपदायोगाच्च। यत्तु 'अश्रुतं श्रुतं भवति' इत्यस्य श्रुतव्यतिरिक्तमन्यन्नास्तीत्यर्थः; तथा चैकं सर्वाधिष्ठानमिति प्रतिज्ञातम्; यथा मृत्पिण्डभिन्नस्तद्विकारो नास्ति तथाश्रुतं ब्रह्मभिन्नं

नास्तीत्यर्थः; मृत्पिण्डपदं च मुख्यार्थकैकपदयोगात् भूमिरूपपिण्डार्थकम्; मृण्मयपदं च भूमिविकारमात्रार्थकम्; तथा च भूमिविकारः सर्वो यथा भूमिं विना नास्तीत्यर्थः; मृत्तिका भूमिरिति गृह्यमाणं यत्तदेव सत्यम्, मृत्तिकास्वरूपस्य सत्यत्वाभावात्; तदवच्छिन्नसद्रूपस्य च दृष्टान्तत्वधीदशायां मृदो विविच्याज्ञानाद्भूमित्वेन ज्ञायमानत्वेन सद्रूपलाभार्थमितिशब्दः, ' मनो ब्रह्म ' इत्यादौ ज्ञायमानत्वस्येतिशब्दार्थत्वात्; आद्यर्थो वा इतिशब्दः; तथा च भूमिविकारस्वरूपविचारदशायां विकारस्य मिथ्यात्वं, भूमिः सत्या; तत्स्वरूपविचारे सापि मिथ्या, तद्धेतुपञ्चीकृतभूतान्येव सत्यानि; तत्स्वरूपविचारे तेषामपि मिथ्यात्वम्; तत्कारणमेव ' मृत्तिकेत्येव सत्यम् ' इत्यत्र हेतुः ' वाचारम्भणं विकारो नामधेयम् ' इति; असमवायिकारणजन्यत्वमुत्पत्तिर्वाचा वाङ्मात्रं विचारासहम्; एवं नाशोऽपि विचारासहः; निर्विकारं ब्रह्मैव सत्यम्; भामत्युक्तिरपि अनारोपितरूपस्यैव तत्त्वरूपत्वेन असाधारणस्वरूपधर्मयोरिवाधिष्ठानस्यापि तत्त्वरूपत्वात्; 'तत्त्वब्रह्ममार्गे सम्यक्संपन्नः ' इति श्रुतौ ' युञ्जानः प्रथमं मनस्तत्त्वाय ' इति श्रुतौ च ' भगवन्नाहमात्मवित्त्वं तत्त्ववित् ' इति श्रुतौ ' तत्त्वं परात्मनि वाद्यभेदे स्वरूपे च ' इति हैमकोशे च तत्त्वपदस्य ब्रह्मणि प्रसिद्धेरिति तन्न। श्रुत्यक्षरस्य देवानां प्रियेणास्पृष्टत्वात् । मृत्पिण्डभिन्नघटाद्यवस्थाभावे जलाहरणाद्यनापत्तेः । मृत्त्वज्ञानेऽपि घटाद्यनिवृत्तेश्च । मृदादितत्त्वज्ञानेऽपि विद्यमानस्य घटादेः प्रातीतिकत्वासंभवात् । व्यावहारिकस्य च मिथ्याभूता मृत्तदवच्छिन्नचैतन्यं चानधिष्ठानमधिष्ठानस्याधिकसत्ताकत्वनियमात् । विचारासहत्वमात्रेण मिथ्यात्वे ब्रह्मणो ज्ञानानन्दस्वरूपत्वादेरपि विचारासहत्वान्मिथ्यात्वापत्तेः। 'पञ्चविंशति तत्त्वानि'इत्यादिवत्प्रधानादिसाधारणतया ब्रह्मणस्तत्त्वपदवाच्यत्वेऽपि घटत्वादिज्ञानेनेतरव्यावृत्ततया घटादिज्ञानवदधिष्ठानज्ञानेनाध्यस्तस्य तथा ज्ञानाभावेनाधिष्ठानस्याध्यस्ततत्त्वरूपत्वासंभवात् । यत्तु वाचापदेन वागिन्द्रियमात्रं लक्ष्यमन्यथा व्याकरणानिष्पाद्यत्वालाभेनापभ्रंशलाभानुपपत्तेः, मन्मते वाङ्मात्रलक्षणा त्वाजानिकी ( ? त्वाज्ञानिकी ) अर्थासत्त्वविवक्षायां वागादिशब्दप्रयोगादिति तत्तुच्छम् । सर्ववाक्यानां सावधारणस्वभावेनैव व्याकरणनैरपेक्ष्यलाभेन लक्षणाभावात्। अन्यथा शब्दमात्रस्य वागिन्द्रियारभ्यत्वेन 'वाचा' इति वैयर्थ्यापत्तेः । अर्थासत्त्वे वागादिप्रयोगस्य त्वयैवानुभूतत्वात् । यत्तु ' को भवानिति निर्देशो वाचारम्भो ह्यनर्थकः । शिबिकादारुसंघातो वचनात्स्थितिसंस्थितः ।। अन्विष्यतां नृपश्रेष्ठ तद्भेदः शिबिका त्वया । ( त्वया ) छत्रशलाकानां पृथग्भावो विमृग्यताम् ।। ' इति स्मृतावर्थासत्त्वे वाचारम्भशब्दप्रयोग इति तत्तुच्छम् । देहानां

प्राकृतत्वेनैक्यात्को भवानिति निर्देशो देहविषयकः प्रश्नो निरर्थकः निर्धारणरूपार्थशून्यः; 'वाचारम्भः' इत्यनेन लेखादिना प्रश्नो व्यावृत्त इति हि तदर्थः। यत्त्वेकज्ञानात्तत्सदृशं तदधीनं च सर्वं ज्ञायत इत्यनियतम्; न हि गोराजादेर्ज्ञाने नियमेन गवयप्रजादिज्ञानमिति तत्तुच्छम् । गोगवययोः सादृश्यज्ञाने गोज्ञानेन गवयज्ञानसंभवात्, प्रजादर्शनफलस्य राजदर्शनेन संभवात् । मृत्पिण्डघटाद्योः कार्यकारणभावाग्रहे मृत्पिण्डमात्रज्ञानेन घटादिज्ञानादर्शनाच्च । यत्तु संस्कृतज्ञानस्यापभ्रंशज्ञानकार्यकारित्वं कथं दृष्टान्तः; न हि शुद्धस्य सगुणस्य वा ब्रह्मणो ज्ञानं घटादिज्ञानकार्यकारि, येन तत्ते तत्र दार्ष्टान्तिकं स्यात्; तथा स्वीकारेऽपि 'येनाश्रुतं श्रुतम्' इत्याद्यमुख्यार्थकं स्यादिति तत्तुच्छम् । ब्रह्मज्ञानेन घटादिज्ञानस्य त्वयैव प्रलपितत्वात् । किं तु ज्ञातव्यानां देवादीनां ज्ञानाद्यत्फलं तत्तधिकं च ब्रह्मज्ञानाद्भवतीत्यर्थस्यास्माभिरुक्तत्वात् येन ब्रह्मश्रवणादिना अश्रुतस्यापि देवादेः श्रवणादिफलं भवतीत्यर्थः । 'यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥' इति स्मृत्या ब्रह्मज्ञानस्य सर्वदेवादिज्ञानफलदत्वोक्तेश्च । न च सर्वसुखानां ब्रह्मसुखान्तर्भावः स्मृत्या बोध्यते । जीवनिष्ठसुखानामसङ्गब्रह्मरूपसुखेनाभेदासंभवात् । यत्तु दार्ष्टान्तिके सर्वोपासनाफलाभिन्नफलकत्वं, दृष्टान्ते तु सर्वापभ्रंशादिकार्यजातीयकार्यकारित्वमिति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमिति तत्तुच्छम् । सर्वोपासनानां यद्यत्कार्यतावच्छेदकं तदवच्छिन्नस्यैव ब्रह्मोपासनया जायमानत्वात् । न ह्यन्योपासनयोत्पन्नस्य फलस्यैव पुनः ब्रह्मोपासनयोत्पत्तिः । तत्तदपभ्रंशज्ञानकार्यतावच्छेदकावच्छिन्नस्य संस्कृतज्ञानेन जननात् ।

इति 'वाचारम्भणम्' इति श्रुत्यर्थः ॥ २२ ॥

## २३. 'इदं सर्वं यदयमात्मा' इति श्रुयर्थः ।

नापि 'इदं सर्वं यदयमात्मा' इति श्रुतिस्तत्र मानम् । इदं सर्वं जगद्यस्मिन् सोऽयमात्मा परमात्मेति तदर्थः । किं च चिज्जडयोरैक्यासंभवेन 'सर्वेषु भूतेष्वेतम्' इति श्रुतेः सर्वजलं लवणमितिवत्सर्वव्याप्त्या वा 'स हि सर्वस्य कर्ता' इति श्रुतेरायुर्वै घृतं, 'ब्राह्मणोऽस्य मुखम्' इति तन्निमित्तत्वेन वा 'यस्मिन्द्यौः पृथिवी' इत्यादिश्रुतेः 'राजा राष्ट्रं' 'ब्राह्मणो वै सर्वा देवताः' इतिवत्सर्वाधारत्वेन वा 'न ऋते त्वत् क्रियते किंचन' इति श्रुतेः 'यजमानः प्रस्तरः' इतिवत्तत्सिद्ध्या वा 'आदित्यो यूपः' इतिवत्सारूप्येण वा सामानाधि-

करण्योपपत्तौ सर्वप्रमाणबाधितायाः यः पुरुषः स स्थाणुरितिवद्यत् सर्वत्वेन प्रतीतं तदात्मन्यध्यस्तमिति पदद्वयलक्षणाया अयोगात् । ‘ पुरुष एवेदं सर्वं व्याप्तमाकरीषात् ’ इति श्रुतौ, ‘ असतश्च सतश्चैव सर्वस्य प्रभवाप्ययः । सर्वस्य च सदा ज्ञानात्सर्वमेनं प्रचक्षते ।। पुरुष एवेदं सर्वं भूतं भव्यं भवच्च यत् । इत्युच्यते तदीयत्वान्न तु सर्वस्वरूपतः ।। ’ इति भारते, ‘ सर्वं समाप्नोषि ततोऽसि सर्वः । ’ इति गीतायां च सम्यक् व्याख्यातत्वाच्च । अन्यथा ‘ इदं सर्वम् ’ इत्यस्य ‘ सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद ’ इति पूर्वेण ‘ स यथा दुन्दुभेः ’ इत्याद्युत्तरेण, ‘ पुरुष एवेदं सर्वम् ’ इत्यस्य ‘ स भूमिं विश्वतो वृत्वा ’ इति पूर्वेण ‘ उतामृतत्वस्येशानः ’ इत्युत्तरेण, ‘ब्रह्मैवेदं सर्वम् ’ इत्यस्य ‘अस्यां पृथिव्यां तेजोमयोऽमृतमयः स यश्चायमप्सु तेजोमयोऽमृतमयः ’ इत्यादिना पूर्वेण, ‘ सर्वं खल्विदं ब्रह्म ’ इत्यस्य ‘ ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ’ इत्यादिनोत्तरेण, ‘ सर्वाणि भूतान्यात्मैव ’ इत्यस्य ‘ सर्वभूतेषु चात्मानम् ’ इत्यादिना पूर्वेण ‘ याथातथ्यतोऽर्थान् व्यदधात् ’ इत्याद्युत्तरेण विरोधः स्यात् ।

## इति ‘ इदं सर्वं यदयमात्मा ’ इति श्रुत्यर्थः ।। २३ ।।

Indira Gandhi National

## २४. ‘ तमेव ’ इत्यादिश्रुत्यर्थः ।

यत्तु ‘ तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय । ’ इति श्रुत्यान्याविषयकं ज्ञानं मुक्तिहेतुरिति तत्तुच्छम् । तच्छब्देन पूर्वप्रक्रान्तसहस्रशीर्षत्वादिविशिष्टस्यैव परामर्शात् । यथा ‘ रसनं रसमेव गृह्णाति ’ इत्यत्र धर्मभूतगुणान्तरविषयत्वस्यैव हि व्यावृत्तिः, रसभिन्नरसत्वादेर्ग्रहणात्, तथा धर्म्यन्तरजीवजडविषयत्वमेव व्यावर्त्यते, न तद्गतधर्मः । ‘ यस्मात्परं नापरमस्ति ’ इति श्रुतेः । यस्मात्परं न, अपरं त्वस्ति तच्च किंचिदल्पमित्यर्थः, ‘ पुरुषान्न परं किंचित् ’ ‘ पादोऽस्य विश्वा भूतानि ’ इत्यादिश्रुतेः । ‘ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय । ’ ‘ वासुदेवात्परं नास्ति ’ इत्यादिस्मृतेश्च । नञनुषङ्गस्याकल्प्यत्वाच्च । ‘ तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरम् ’ इति वाक्यशेषाच्च । विश्वस्यैवाभावे हि किं तेन पूर्णं कस्माच्च तदुत्तरं स्यात् । ‘ इन्द्रो मायाभिः पुरुरूप ईयते ’ इत्यनयेश्वरस्य विचित्रशक्तिभिर्मत्स्याद्यनेकरूपवत्त्वमेवोच्यते । न त्वज्ञानेन घटादिरूपवत्त्वम् । ‘ रूपं रूपं प्रतिरूपो बभूव ’ इति पूर्वोक्तानां जीवान् प्रत्यन्तर्यामिणो भगवतो रूपाणामेवेह रूपशब्देन प्रत्यभिज्ञानात् । ‘मायां तु प्रकृतिं विद्यान्मा-

यिनं तु महेश्वरम् । ' इत्यस्य मायया संनिरुद्ध इति पूर्वोक्ता या माया सा प्रकृतिः त्रिगुणात्मकं प्रधानमित्यर्थः । न तु प्रकृतिर्जगदुपादानं, सा माया मिथ्येति । पूर्वनिर्दिष्टमायाशब्दार्थस्य बुभुत्सितत्वात् । प्राथम्येन मायाया एवोद्देश्यत्वाच्च ।

इति ' तमेव ' इत्यादिश्रुत्यर्थः ॥ २४ ॥

## २५. जगदसत्त्वादिस्मृत्यर्थः ।

क्वचिज्जगतोऽसत्त्वोक्तिरसाधुत्वात् । 'सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।' इति स्मृतेः । अस्वातन्त्र्याद्वा । 'सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे । अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि भारत ॥' इति भारतोक्तेः । अवस्तुपारमार्थिकत्वोपपत्तिः परिणामित्वात् । विनाशित्वाच्च । ' यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै । परिणामादिसंभूतं तद्वस्तु नृप तच्च किम् ॥ अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते ।' इति श्रीवैष्णवोक्तेः । मिथ्यात्वोक्तिर्वृथात्वात् । 'मिथ्यैव व्यवसायस्ते' इत्यादिवत् । सदोषत्वाद्वा । 'मिथ्योपपदात्कृञोऽभ्यासः । ' इति सूत्रे वृत्तौ 'पदं मिथ्याकारं यतः' इत्युदाहृत्य ' स्वरादिदुष्टमसकृदुच्चारयति ' इत्युक्तत्वात । अविद्यमानत्वोक्तिस्तु जीवसंबन्धित्वेन विद्यमानत्वात् । ' अविद्यमानं जीवस्य प्रतिभाति तदीयवत् । ' इति स्कान्दोक्तेः । स्वप्नादिसाम्योक्तिरस्त्वनित्यत्वादेः । ' अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः । स्वा (स्व ?) प्नादिसाम्यं जगतो न तु बोधनिवर्त्यता ॥ ' इति वचनात् । मायामयोक्तिस्तु प्राकृतत्वात् ।

इति जगदसत्त्वादिस्मृत्यर्थः ॥ २५ ॥

## २६. ' प्राणा वै ' इत्यादिश्रुत्यर्थः ।

नापि ' प्राणा वै सत्यं, तेषामेष सत्यम् ' इति श्रुत्युक्तसत्ताभेदान्यथानुपपत्तिस्तत्र मानम् । जातिगुणादिहीनस्य त्वदभिमतब्रह्मणो निर्धारणासंभवात् । राजराजः देवदेवः मन्मथमन्मथः, 'पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् । ' इत्यादौ राजत्वदेवत्वादीनामिव प्राणादिसत्यत्वस्य ज्ञानाबाध्यत्वे सत्येव पराधीनत्वरूपापकृष्टत्वमात्रेण तदुपपत्तेः । नापि 'सत्यं ज्ञानम्' इत्यादौ ब्रह्मणः सत्यत्वलक्षणोक्त्यन्यथानुपपत्तिर्मानम् । छान्दोग्ये ' तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति । तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तद्यत्सत्तदमृतम्, अथ यत् ति तन्मर्त्यम्,

अथ यदयं तेनोभे यच्छति ' इति मुक्तामुक्तनियन्तृत्वं सत्यत्वमित्युक्तेः । ' विमुक्तश्च विमुच्यते ' इति श्रुत्या सज्जनस्यासत्सङ्गात् दुर्जनस्य ताम्रद्रवत्वादिवत्सत्यत्वेऽपि ' सज्जनः सज्जनो जातः ' इतिवत्संसारस्य सत्यत्वेऽप्यस्वाभाविकत्वमुच्यते ।

इति ' प्राणा वै ' इत्यादिश्रुत्यर्थः ॥ २६ ॥

## २७. दृष्टिसृष्टिभङ्गः ।

नापि दृष्टिसृष्ट्यन्यथानुपपत्तिर्मिथ्यात्वे मानम् । 'जीवो ब्रह्म विशुद्धा चिद्विभागस्त्वनयोर्द्वयोः । अविद्या तच्चितोर्योगः षडस्माकमनादयः ।। ' इति वचनेन बौद्धं प्रति प्रत्यभिज्ञादिना विश्वस्य स्थायित्वप्रतिपादकेन च सूत्रभाष्यविवरणादिग्रन्थेन च विरोधापत्तेः भिन्नैव दृष्टिसृष्टिः । प्रपञ्चभिन्न एव तदङ्गीकारौचित्यात् । किं च प्रतीतिमात्रशरीरत्वेन नियतकारणाजन्यत्वे श्रुतिषु स्वर्गाद्यर्थं ज्योतिष्टोमादिविधेर्ब्रह्मसाक्षात्कारार्थं श्रवणादिविधेराकाशादेर्वाय्वादिहेतुत्वस्य चोक्तिरयुक्ता स्यात् । तृप्त्यर्थं भोजने परबोधनाय शब्दादौ च प्रवृत्त्ययोगेन स्वक्रियाव्याघातश्च स्यात् । न च स्वाप्नकारणभावादिवदुपपत्तिः । शून्यमेवाद्वैतमिति स्वाप्निकश्रुत्युक्तशून्याद्वैतस्येव मोक्षस्यापि मिथ्यात्वापत्तेः । श्रुतिबोध्यशुद्धचितोऽपि स्वाप्निकवन्मिथ्यात्वापत्तेश्च । अधिष्ठानस्यापि शुक्तीदमंशस्य रूप्यवदिदं रूप्यमिति ज्ञानात्प्रागसत्त्वेन संप्रयोगादिहेतुत्रयजन्यत्वस्याध्यासतटस्थलक्षणस्य सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभास इति स्वरूपलक्षणस्यायोगाच्च । न चेदमंशावच्छिन्नचैतन्येन सत्येन रूप्यस्याभेदावभासोऽस्तीति न स्वरूपलक्षणक्षतिः । इदमंशावच्छिन्नस्य सत्यत्वे तत्र दृश्यत्वादेर्व्यभिचारापत्तेः । इदं रूप्यमितिधीकाले शुक्तित्वादेरभावेनाध्यासस्य तदज्ञानकार्यत्वादिमतहानेश्च । इदं रूप्यं नेदं रूप्यमिति धियोर्भिन्नविषयत्वेन बाध्यबाधकभावानुपपत्तेश्च । न च सारूप्यात्स्वाप्नबाध्यबाधकयोरिवोपपत्तिः । स्वप्नेऽपि दृष्टिसृष्टेरसंप्रतिपन्नत्वात् । एतन्मते साधारणानुगतधर्मासंभवेन सारूप्यासंभवाच्च । सुप्तं प्रत्यदृष्टसंस्कारादेरभावेन पुनरुद्बोधायोगाच्च । अज्ञातस्यापि संस्कारादेः कारणात्मनावस्थानाङ्गीकारे अर्धजरतीन्यायस्यानुचितत्वेन दृष्टिसृष्टिमतस्यैवानादरणीयत्वात् । सोऽयं देवदत्त इति दृष्टान्तेन तत्त्वमस्यादिवाक्ये जहदजहल्लक्षणयैक्यपरत्वोक्तिरयुक्ता स्यात् । तद्देशकालसंबन्धिपिण्डस्यैतद्देशकालसंबन्धाभावेनैक्यासंभवात् । न च सोऽयमित्यनेनात्माभेद एव विषयीक्रियते । आत्माभेदस्य साध्यत्वेन दृष्टान्तत्वासंभवात् । शुद्धचितो देशाद्यसंबन्धित्वाच्च । अचाक्षुषत्वाच्च ।

' ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ध्रुवं विश्वमिदं जगत् ' इति श्रुतिविरोधाच्च । न चाकल्पसंतानाविच्छेदपरा श्रुतिः । अनेन हि सूक्तेन संग्रामायोद्यतो राजा पुरोधसा संनाहनीयः । न हि यथा गङ्गाप्रवाहो दीपकलिका च ध्रुवा तथा त्वं ध्रुवो भवेत्यादिना संनाहनं भवति । न चैव ' अस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरन्ति ' इति सुप्तोत्थिताज्जीवात्प्राणादिसृष्टिं प्रतिपादयन्ती प्रमाणम् । ' यत्रैष एतत्सुप्तोऽभूत् ' इति यच्छब्देन सुप्ताधारत्वेनोक्तस्य ब्रह्मणः एव ' अस्मादात्मनः ' इत्यनेन परामर्शात्तत्कर्तृकैव प्राणादिसृष्टिर्न तु सुप्तोत्थितजीवकर्तृका । अन्यथाग्न्यूर्णनाभ्यादेस्तन्तुविस्फुलिङ्गादिजननोक्तिरत्रापि वाक्ये सर्वलोकसृष्ट्युक्तिश्चालीकार्था स्यात् । न हि दृष्टिसृष्टिपक्षे ऊर्णनाभ्यादेस्तन्त्वादिजनकत्वं सर्वलोकसृष्टिर्वास्ति । न च ' यत्रैषः ' इति प्रश्नवाक्ये 'यत्र'इति नाधारप्रश्नः किं तु कालप्रश्नः; अन्यथा 'क्वैष तदाभूत् ' इति पुनर्देशप्रश्नानुपपत्तेरिति वाच्यम् । तथापि 'क्व' इति आधारप्रश्नस्यैव ह्युत्तरं ' य एषोऽन्तर्हृदय आकाशः ' इति । तत एव च सृष्टिः । वस्तुतस्तु ' यत्र ' इत्याधारप्रश्न एव । यत्राधारे सुप्तोऽभूत् स किंप्रकारक आधार इति यत्रक्वशब्दयोरेकार्थत्वात् । दृष्टिसृष्टिमते श्रुतितत्प्रामाण्यतद्बोधितप्राणादिसृष्ट्यादेरलीकत्वाच्च । सुषुप्तौ देहेन्द्रियादीनामसत्त्वेन सुप्तोत्थानस्य देहेन्द्रियप्राणादेः सृष्टेरसंभवाच्च । न चैतन्मतेऽज्ञातसृष्टिः संभवति । न वा सुषुप्तौ तत उत्थानाव्यवहितोत्तरक्षणे वा तज्ज्ञानमस्ति । भक्षितान्नस्य तव पृष्ठतः पतनापत्त्या तृप्त्यनुपपत्तेः । वृश्चिकादिदंशेन तव पृष्ठादौ पीडा न स्यात् । अमृतधिया भक्षितविषान्मरणं न स्यात् । किं च स्थायिब्रह्मबोधकस्यापि दृष्टिसृष्टित्वेन तदसिद्ध्यापत्त्या विज्ञानवादाविशेषः स्यात् । जीवादेर्जगत्कारणत्वं निराकृत्येशस्य तद्धेतुतां व्यवस्थापयतः समन्वयाध्यायस्य प्रातिकूल्यं तत्स्फुटमेवेति । सत्यस्य जगतः प्रधानमुपादानं, हरिः कर्ता, कालजीवादृष्टादिकं निमित्तम् । ईश्वरो नित्यनिरवद्यो नित्यसार्वज्ञ्याद्यनन्तकल्याणगुणः । जीवोऽपि ज्ञानानन्दस्वरूपोऽनाद्यविद्यया परेशाधीनयावृतपूर्णानन्दो देहादावहं ममेत्यभिमन्यमानः संसरति, परेशप्रसादान्निवृत्ताविद्यः आविर्भूतपूर्णानन्दो मुक्तो भवति । जीवस्वरूपस्य सुखरूपस्य सदा भानेऽपि तन्निष्ठपूर्णत्वं जीवं प्रतीशस्वरूपं चाविद्ययाव्रियत इति सिद्धम् ।

## इति दृष्टिसृष्टिभङ्गः ॥ २७ ॥

## २८. अज्ञानाश्रयत्वभङ्गः ।

परस्या विद्याश्रयो दुर्वचः । न च शुद्धं तदाश्रयः । तस्य प्रकाशरूपत्वात् । तयोश्च तमःप्रकाशवद्विरुद्धस्वभावत्वात् । न च शुद्धं नाज्ञानविरोधि, किं तु वृत्तिप्रतिबिम्बितं, तच्च नाज्ञानाश्रयः । अज्ञानाविरोधिनो घटादिवत् ज्ञानत्वानुपपत्तेः । न च स्वतस्तृणतूलादिभासकस्य सौरालोकस्य सूर्यकान्तावच्छेदेन स्वभास्यदाहकत्ववत्स्वतोऽविद्यादिभासकस्यापि चैतन्यस्य वृत्त्यवच्छेदेन तद्दाहकत्वमिति वाच्यम् । सौरालोकसंबन्धात्सूर्यकान्तादावुत्पन्नस्याग्नेरेव दाहकत्वेन दृष्टान्तासिद्धेः । सौरालोकसंबन्धं विना मणेरदाहकत्वेन दाहे तदन्वयव्यतिरेकयोरिव चित्संबन्धं विना वृत्तेरज्ञानाविरोधित्वासत्त्वात्तत्रान्वयव्यतिरेकयोरसत्त्वात् । वृत्तेरेव तत्सत्त्वाच्च । स्वतोऽज्ञानाविरोधिनो ज्ञानस्वभावानुपपत्तेश्च । अहमज्ञ इति धर्मिग्राहकेणाहमर्थनिष्ठतयैवाज्ञानसिद्धेश्च । न च स्थौल्याश्रयदेहैक्याध्यासादहं स्थूल इतिवदज्ञानाश्रयचिदैक्याध्यासात् दग्धृत्वायसोरेकाग्निसंबन्धादयो दहतीतिवदज्ञानाहंकारयोरेकचिदध्यासाद्वा अहमज्ञ इति धीर्भ्रान्तिरिति वाच्यम् । अज्ञानाकल्पितस्याहमर्थस्य जीवस्यैवाज्ञानाश्रयत्वेन तथा प्रतीत्युपपत्त्या त्वदीयकुसृष्टौ मानाभावात् । न च 'मायां तु प्रकृतिं विद्यान्मायिनं च महेश्वरम् ।' इति श्रुतिस्तत्र मानम् । अज्ञानित्वमहेश्वरत्वयोर्विरुद्धत्वात् । मायाशब्दस्य प्रधानपरत्वस्योक्तत्वाच्च । किं च शुद्धस्याज्ञानाश्रयत्वे निरवद्यत्वादिश्रुतिविरोधः । न चोपाधेः प्रतिबिम्बपक्षपातित्वात् प्रतिबिम्बे जीव एवाज्ञानकार्यं, न ब्रह्मणीत्यज्ञानकार्यमेव श्रुत्या निषिध्यते, नाज्ञानमिति वाच्यम् । 'निरनिष्टो निरवद्यः शोकं मोहमत्येति' इति कार्यस्य पृथङ्निषेधात् । तत्पक्षपातित्वस्यापि दुर्वचत्वाच्च । एतेनातिशयेन तत्र कार्यकरत्वमेव तत्पक्षपातित्वं स्थौल्याद्यवभासरूपकार्यकरत्वेन दर्पणादेः प्रतिबिम्बपक्षपातित्ववत् कर्तृत्वभोक्तृत्वादिसंसाररूपकार्यकरत्वेनाविद्यायामपि प्रतिबिम्बपक्षपातित्वोपपत्तिरिति निरस्तम् । अज्ञानतत्कार्यभ्रान्तितत्त्वज्ञानादीनां सामानाधिकरण्यनियमाच्च । भोक्तृत्वादिबन्धस्य मोक्षसामानाधिकरण्यनियमाच्च । न हि प्रतिबिम्बस्य मोक्षः । अतो मोक्षान्वयिन एव भोक्तृत्वादिकं युक्तम् । किं च 'तुरीयं सर्वदृक्सदा' इति श्रुत्युक्तस्य शुद्धनिष्ठसार्वज्ञ्यस्यानुपपत्तिः । न च सर्वेषां दृग्रूपचैतन्यमित्युच्यते, न तु सर्वज्ञम् । 'सर्व' इति वैयर्थ्यात् । चैतन्यस्य सर्वानुस्यूतत्वेन 'तुरीयम्' इति वैयर्थ्याच्च । न चास्तु जीवोऽविद्याश्रयः । तस्याविद्यावच्छिन्नस्य तत्प्रतिबिम्बितस्य वा विद्याधीनत्वेनान्योन्याश्रयात् । न चान्योन्याश्रय उत्पत्तौ ज्ञप्तौ स्थितौ वा, नाद्यः, उभयोरनादित्वात्, न द्वितीयः, अज्ञानस्य चिद्भास्यत्वेऽपि चितः स्वप्रकाशत्वेन

तदभास्यत्वात्, नान्त्यः, असिद्धेरिति वाच्यम् । स्थितावन्योन्याश्रयात् परस्परसापेक्षस्थितिकत्वाभावेऽन्योन्याधीनत्वस्यैवाभावापत्तेः । न च समानकालीनयोरप्यवच्छेद्यावच्छेदकभावमात्रेण तदुपपत्तिः, घटतदवच्छिन्नाकाशयोरिवेति वाच्यम् । तदाकाशस्य घटाधीनत्वेऽपि घटस्य तदाकाशाधीनत्वाभावेन दृष्टान्तासिद्धेः । न च चैतन्यमपि नाज्ञानाधीनम् । अज्ञानानधीनचैतन्यस्य शुद्धत्वेन जीवत्वाभावाज्जीवाज्ञानमतहानेः ।

## इत्यज्ञानाश्रयत्वभङ्गः ॥ २८ ॥

## २९. परमतेऽविद्याविषयत्वभङ्गः ।

अज्ञानविषयोऽपि दुर्वचः । न च शुद्धमेव तद्विषयोऽन्यस्याज्ञानकल्प्यत्वात् । स्वप्रकाशे सदा भासमाने आवरणकृत्याभावात् । न च शुद्धस्य प्रकाशमानत्वेऽपि पूर्णाद्याकारेणाप्रकाशायावरणकल्पनम् । निर्विशेषे आकारस्यासत्त्वात् । किं च दीपावरकघटादिवच्चैतन्यावरकाविद्या चैतन्यस्यान्यसंबन्धं प्रतिबध्नात्वन्यं प्रतिचैतन्यमाच्छादयतु न तु चैतन्यं प्रत्येव चैतन्यरूपप्रकाशविरोधिनी । न हि घटावृतो दीपो न प्रकाशते तमःसंबन्धापातात् । न च कल्पितभेदं जीवं प्रति शुद्धचैतन्यमाव्रियते । आवरणं विना भेदकल्पनस्यैवासंभवात् । न चावरणभेदयोरनादित्वान्न पूर्वोत्तरभावः । समकालिकयोरप्यन्योन्यापेक्षस्थितिकत्वाभ्युपगमेऽसिद्ध्यापत्तेः । अन्यथाविद्या स्वाश्रया स्वविषया च स्यात् । किं चालोके तम इव प्रकाशे अज्ञानावरणमसंभवि । न च वृत्त्यारूढमेव चैतन्यमज्ञानविरोधि, दुःखाद्याकारवृत्तेरभावेनाज्ञानावरणापत्तेः । तत्र हि साक्षी एवाज्ञानविरोधी । न च सिद्धान्तेऽपि स्वप्रकाशे जीवे कथमावरणम् । सिद्धान्ते ह्यतस्मिंस्तद्धीहेतोरविद्याया ईश्वरप्रसादादेव निवृत्त्यङ्गीकारात्परेण त्वदृष्टविधया ज्ञाननिवर्त्यत्वानङ्गीकाराच्च । यत्तु साक्षिणि यदज्ञानविरोधित्वमनुभूयते तन्नाज्ञाननिवर्तकत्वनिबन्धनम्; किं तु स्वविषयदुःखादौ यावत्सत्त्वं प्रकाशादज्ञानाप्रसक्तिनिबन्धनमिति, तन्न । साक्षिणोऽज्ञानानिवर्तकत्वेऽज्ञानाप्रसक्तेरेवासंभवात् । न च मामहं न जानामीति प्रकाशाभानेऽज्ञानमनुभूयते । दुःखं न जानामीत्यादाविव ज्ञानाभावपरत्वात् । न च धर्मिप्रतियोगिनोर्ज्ञानाज्ञानाभ्यां ज्ञानाभावज्ञानासंभवः, ज्ञानविरोधित्वेनाज्ञानज्ञानस्यापि धर्मिप्रतियोगिज्ञानसापेक्षत्वेन व्याघातसाम्यात् । न चाज्ञानविषयघटादेरज्ञानविरोधिनो ज्ञानस्य च ज्ञानं साक्षिरूपम्; तच्च नाज्ञानविरोधीति

वाच्यम् । धर्मिप्रतियोगिनो ज्ञानस्य ज्ञानाभावाविरोधिनः संभवेन क्षत्यभावात् । न च न जानामीति ज्ञानसामान्याभाव एव प्रतीयते । तत्रापि ज्ञानसामान्यविरोधित्वेनैवाज्ञानप्रतीतेः । अतः सामान्यतो ज्ञानं विशेषतो ज्ञानाभाव इति स्वीकार्यम् । किं च त्वन्मते घटादिवृत्तिसामान्यस्य चिद्विषयकत्वेन सुतरामज्ञानासंभवः । विशिष्टज्ञानेन विशेष्याज्ञानस्यापि निवृत्तिसंभवात् । न हि दण्डी चैत्र इति वृत्त्या चैत्राज्ञानं न निवर्तते । न च श्रवणादिजन्यज्ञानमज्ञाननिवर्तकम् । भ्रमविषयानधिकविषयत्वे श्रवणादिवैयर्थ्यात् । अदृष्टविधया निवर्तकत्वापत्त्याज्ञानादेः सत्यत्वापत्तेश्च । अतोऽनादिभावरूपा परेशाधीना जीवपूर्णानन्देश्वरयोः प्रकाशं जीवं प्रति विघटयन्तीश्वरप्रसादनिवर्त्या परमार्थसत्यप्रत्यक्षाविद्या नित्यनिरवद्यसर्वज्ञसर्वेश्वरात्सत्यानन्तगुणालयात्स्वतन्त्राद्वस्तुतः कालत्रयभिन्ने जीवे स्वीकार्या ।

### इति परमतेऽविद्याविषयत्वभङ्गः ॥ २९ ॥

## ३०. अनिर्वाच्यत्वे प्रमाणभङ्गः ।

नन्वनिर्वाच्यैवाविद्या, तत्त्वं च सद्विलक्षणत्वे सत्यसद्विलक्षणत्वे सति सदसद्विलक्षणत्वं, सत्त्वासत्त्वाभ्यां विचारासहत्वे सति सदसत्त्वेन विचारासहत्वं वेति चेन्न । लाघवात्परस्परविरहरूपयोरेकत्र निषेधस्य व्याहतत्वात् । न चातात्त्विको निषेधसमुच्चयो न विरुद्धः । तादृशविधिसमुच्चयस्यैवापत्तेः । विचारासहत्वमात्रेण मिथ्यात्वे ब्रह्मणः सच्चिदानन्दादिरूपताया दुर्निरूपत्वेन मिथ्यात्वापत्तेः । इक्षुरसादिमाधुर्यस्य दुर्निरूपत्वेऽपि मिथ्यात्वासिद्धेश्च । न च सत्त्वादिना दुर्निरूपत्वं मिथ्यात्वे बीजम् । न तु दुर्निरूपत्वमात्रम् । निर्धर्मकब्रह्मणोऽपि सत्त्वादिना दुर्निरूपत्वात् । अनिर्वाच्ये वस्तुनि मानाभावाच्च । न च मिथ्यैव शुक्तौ रूप्यमभादिति प्रत्यक्षं मानम् । एतावन्तं कालमसदेव रूप्यमभादित्यसत्त्वस्यैव तत्रानुभवात् । न चानिर्वाच्यत्वस्यैकदेशसत्त्वाभावविषयत्वेनासद्बुद्ध्युपपत्तिः । असद्भेदमादाय सदेव रूप्यमभादित्यादिप्रतिपत्तेश्च । 'सत्यं ज्ञानम्' इत्यस्यासद्भेदविषयत्वापत्त्या ब्रह्मणः सद्रूपत्वासिद्ध्यापत्तेश्च । ननु विमतं सत्त्वरहितत्वे सत्यसत्त्वरहितत्वे सति सत्त्वासत्त्वरहितं, बाध्यत्वात्, दोषप्रयुक्तभानत्वाद्वा, यन्नैवं तन्नैवं, यथा ब्रह्मेति चेन्न । सत्त्वासत्त्वयोः परस्परविरहरूपयोरभावस्यैकत्र व्याहतत्वात् । ब्रह्मवत्सत्त्वराहित्येऽपि सद्रूपत्वेनानिर्वाच्यत्वाभावोपपत्त्यार्थान्तराच्च । विमतं सदसदात्मकं बाध्यत्वाद्यतिरेकेण ब्रह्मवदित्याभाससाम्यात् । विमतमसत्सत्त्वानधिकरणत्वात्, शशशृङ्गवदिति प्रतिरोधाच्च । साध्याप्रसिद्धेश्च । न च सत्त्वासत्त्वे समानाधिकरणात्यन्ताभावप्रतियोगिनी, धर्म-

त्वाद्रूपरसवत्; सत्त्वमसत्त्वानधिकरणानिष्ठं, असत्त्वं वा सत्त्वानधिकरणानिष्ठं, धर्मत्वात्, रूपादिवदिति सामान्यतः साध्यप्रसिद्धिरिति वाच्यम् । सत्त्वासत्त्वे समानाधिकरणात्यन्ताभावप्रतियोगिनी न, परस्परात्यन्ताभावत्वात्, घटत्वाघटत्ववत्; असत्त्वं सत्त्वानधिकरणानिष्ठं न, तत्प्रतिषेधरूपत्वात् संमतवदिति प्रतिरोधात् । एवं सत्त्वे पक्षीकृत्य प्रयोक्तव्यम् । घटत्वाघटत्वे समानाधिकरणात्यन्ताभावप्रतियोगिनी, धर्मत्वाद्रूपरसवत्; कल्पितत्वमकल्पितत्वानधिकरणानिष्ठं, धर्मत्वात्, रूपरसवदित्याद्याभाससाम्याच्च । सद्विलक्षणत्वासद्विलक्षणत्वकल्पितत्वाकल्पितत्वदृश्यत्वादृश्यत्वदुर्निरूपत्वादुर्निरूपत्वादौ प्रथमस्य द्वितीयतृतीययोर्यथाक्रममसद्वैलक्षण्यसद्वैलक्षण्ये च त्रिष्वपि ज्ञेयत्वव्यवहार्यत्वादौ व्यभिचाराच्च । न च घटत्वाघटत्वाद्यभावोऽप्येकत्र मम साध्य इति नाभाससाम्यव्यभिचारादिदोषः । कल्पितत्वाकल्पितत्वादीनामभावमेकत्र स्वीकुर्वाणो हि क्षपणक इव व्याघातेनैव निरस्तः । ननु प्रपञ्चनिष्ठव्यतिरेकप्रतियोगित्वं सत्त्वासत्त्वोभयवृत्ति, प्रपञ्चनिष्ठव्यतिरेकप्रतियोगिमात्रवृत्तित्वात्, व्यवहार्यत्ववत्; सदसत्त्वोभयवृत्तित्वं प्रपञ्चनिष्ठव्यतिरेकिप्रतियोगित्ववृत्ति, सत्त्वासत्त्वोभयवृत्त्यशेषवृत्तित्वात्, भेदप्रतियोगित्ववदिति चेन्न । आद्ये प्रपञ्चनिष्ठव्यतिरेकप्रतियोगित्वं सत्त्वासत्त्वोभयवृत्ति न, व्यतिरेकिधर्मत्वाद्रसादिवदिति प्रतिरोधात् । द्वितीयेऽपि कल्पितत्वाकल्पितत्वचेतनत्वाचेतनत्वशून्यत्वाशून्यत्वदृश्यत्वादृश्यत्वाद्युभयवृत्तित्वं प्रपञ्चनिष्ठव्यतिरेकप्रतियोगित्ववृत्ति, कल्पितत्वाकल्पितत्वाद्युभयवृत्त्यशेषवृत्तित्वाद्भेदप्रतियोगित्वादिवदित्याभाससाम्यात् । ननु विमतं रूप्यादि सच्चेन्न बाध्येत, असच्चेन्न प्रतीयेत; बाध्यते प्रतीयते चातः सदसद्विलक्षणत्वादनिर्वाच्यम्; सत्त्वं च प्रामाणिकत्वं, प्रमाणत्वं च तत्त्वावेदकत्वं, तच्च लक्षणया शुद्धब्रह्मबोधकवेदान्त एवेति चेन्न । स्वतः प्रकाशमाने ब्रह्मणि चिन्मात्रे वैयर्थ्येन प्रमाणाप्रवृत्त्या प्रामाणिकत्वाबाध्यत्वयोर्व्याप्त्यसिद्धेः । प्रत्युत ब्रह्मभिन्न एव प्रामाणिकत्वस्य सत्त्वेन तस्य बाध्यत्वेन सह व्याप्तेश्च । न च ब्रह्मणः स्वप्रकाशत्वेऽपि व्यवहारप्रतिबन्धकाज्ञाननिवृत्त्यर्थं प्रमाणप्रवृत्तिः सफला । स्वप्रकाशे व्यवहारप्रतिबन्धकाज्ञानासंभवात् । प्रत्यक्षस्याप्रमाणत्वे हि तद्बाधनिबन्धनं शुक्तिरूप्यादेरप्रामाणिकत्वं न स्यात् । न च बाध्यान्यूनसत्ताकविषयकत्वं बाधकत्वे तन्त्रम्; न तु तत्त्वावेदकत्वमिति वाच्यम् । बाध्यत्वाविशेषेण शुक्ते रूप्यतोऽधिकसत्ताकत्वसंकेतस्याप्रामाणिकत्वेन विनिगमनाविरहेण समसत्ताकविषयधियोर्नियमेनैकेनापरस्य बाधानुपपत्तेः । न चाबाध्यत्वं सत्त्वम्, अबाध्यं चेन्न बाध्येतेत्यापाद्यापादकयोरभेदापत्तेश्च । न चाबाध्यत्वं त्रैकालिकनिषेधाप्रतियोगित्वं, तेन च विपरीतप्रमाविषयत्वाभावो व्यवहारो वापाद्यत इति नापाद्यापादकयो रद

इति वाच्यम्। त्वन्मते रूप्याभावशुक्त्यादेर्मिथ्यात्वेन तद्धियः प्रमात्वासिद्ध्या रूप्ये विपरीतप्रमाविषयत्वासिद्धेः। ब्रह्मणि प्रपञ्चाभावधियोऽस्मन्मते प्रमात्वासिद्ध्या तत्रापि विपरीतप्रमाविषयत्वासिद्धेश्च। व्यवहाररूपापाद्यव्यतिरेकस्य जगत्यसिद्धेः अबाध्यत्वेन घटादेर्व्यवह्रियमाणत्वात्। किं च न बाध्येतेत्यत्र बाधः किं ज्ञानेन निवृत्तिः, त्रैकालिक-निषेधो वा। नाद्यः। ज्ञाननिवर्त्यत्वस्य सत्त्वेनैव व्याप्तेरुक्तत्वात्। शुक्तिरूप्यादेर्ज्ञान-निवर्त्यत्वासिद्ध्येष्टापत्तेश्च। न द्वितीयः। पारमार्थिकत्वेनोक्तनिषेधप्रतियोगित्वस्य 'स एवाधस्तात्स एवोपरिष्टात्' इति प्रतीतोपाधिके ब्रह्मण्यपि सत्त्वेन सत्त्वस्य बाधेनैव व्याप्तेः। स्वरूपेणोक्तनिषेधप्रतियोगित्वस्य प्रपञ्चे त्वद्रीत्या शुक्तिरूप्ये चाभावेनापाद्यव्यतिरेकानिर्णयेन तर्कस्यासंभवात्। 'असच्चेत्' इत्यत्रासत्त्वं किं निरुपाख्यत्वं पदवृत्त्यविषयत्वरूपं निस्स्वरूपत्वं वा। नाद्यः। पदवृत्त्यविषये वाक्यार्थे प्रतीत्यभावाभावेन व्यभिचारात्। न च वाक्यार्थरूपपदवृत्तिविषयत्वस्य सत्त्वेन तद-विषयत्वाभावान्न व्यभिचारः। निरुपाख्यपदवृत्त्यविषयादिपदवृत्तिविषयताया निरु-पाख्येऽपि संभवात्। न द्वितीयः। पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगि-त्वस्य 'स एवाधस्तात्' इत्यादिप्रतीतोपाधिके निर्धर्मके ब्रह्मण्यपि सत्त्वेन स्वरूपेणै-वोक्तनिषेधप्रतियोगित्वं मिथ्यात्वं हि वाच्यम्। तथा च शुक्तिरूप्यादेर्निस्स्वरूपत्वं दुर्वारम्। 'न प्रतीयेत' इत्यत्र प्रतीतिसामान्याभावापादनं न युक्तम्। असन्नृशृङ्ग-मित्यादिवाक्यादसतोऽपि प्रतीतेः। अन्यथासद्वैलक्षण्यज्ञानस्यासत्प्रतीतिनिरासस्य चायोगात्। असतोऽसत्त्वेनाप्रतीतावसद्व्यवहारानुपपत्तेश्च। न चासत्प्रती-त्यभावेऽप्यसन्नृशृङ्गमिति विकल्पमात्रेण सर्वोपपत्तिः। विकल्पस्य ज्ञानान्यत्वे ततः संस्कारस्मृत्याद्यनुपपत्तेः। ज्ञानरूपवृत्ताविव विकल्पेऽप्यनुपपत्तेस्तुल्यत्वेन विकल्पा-ङ्गीकारज्ञानानङ्गीकारादिवैषम्यस्य निर्युक्तिकत्वात्। न च विकल्पस्य ज्ञानत्वे तदन्यज्ञानविषयत्वाभाव आपाद्यः। विकल्पविषयत्ववत्तदन्यज्ञानविषयत्वसंभवेनापादन-स्याप्रयोजकत्वात्। न च सत्त्वेन प्रतीत्यभाव एवापाद्यः। सत्त्वेन प्रमाभावापाद-नस्येष्टत्वात्। न ह्यसतः सत्त्वेन प्रमा केनचिदुच्यते। न च तादृक् भ्रान्ति-विरहः प्रतीतिसामान्याभावो वापाद्यः। येन पुंसा शशे शृङ्गाभावो नावगतः, तस्य गोशृङ्गमस्तीति वाक्यादिव शशशृङ्गमस्तीति वाक्यादपि भ्रान्तिदर्शनात्। न हि घढधपादिशब्दवदत्र पदार्थानुपस्थापकत्वं, न वा कुण्डमजाजिन-मित्यादिवदन्वयाबोधकत्वम्। अयोग्यताज्ञानाभावस्य योग्यताभ्रमस्य वा आकाङ्क्षा-दिसामग्रीसध्रीचीनस्य सत्त्वात्। अन्यथा प्रवृत्त्याद्यनुपपत्तेः। न च शशशृङ्गमस्ती-त्यत्र शशे शृङ्गस्य शृङ्गे शशीयत्वस्य वारोपेणानिर्वाच्यविषयत्वम्। असच्छशशृङ्ग-

मितिवाक्यस्य श्रवणानन्तरं विकल्पविषयाखण्डशशशृङ्गादिकमनिर्वाच्यानात्मकं निस्स्वरूपं हि स्वीकार्यम् । गवि शशशृङ्गमस्तीत्यत्राप्यखण्डशशशृङ्गप्रतीतेः । प्रमात्वाप्रमात्वाभ्यामेव त्वदुक्तप्रतीत्योर्वैलक्षण्यात् । यत्तु शशशृङ्गादिपदान्यपार्थकानीति तार्किका आहुस्तन्न । अनन्वयानिश्चयदशायां प्रवृत्तिपर्यन्तानुभवविरोधापत्तेः। नन्वयानिश्चयदशायामपि नाखण्डशशशृङ्गादिबोधकत्वम्; किं तु सन्मात्रगोचरव्यधिकरणप्रकारकज्ञानं वा सदुपरागेणासद्गोचरज्ञानं वा, केवलासद्भाने सामग्रीविरहात्; उक्तं हि बौद्धाधिकारे 'संगतिग्रहणाभावाच्छशशृङ्गादिपदानामबोधकता' इति चेन्न । व्यधिकरणज्ञानस्याप्यसत्संसर्गविषयकत्वेन सन्मात्रगोचरत्वासिद्धेः । सामग्र्यां सत्यां सदुपरागेणेव स्वातन्त्र्येणापि भानसंभवात् । शशशृङ्गपदस्य यौगिकत्वेन पृथक्संगत्यनपेक्षणाच्च । न चावयवशक्तिप्राधान्येन बोधनेऽखण्डासद्बोधनानुपपत्तिः; अवयवानां स्वशक्त्यपुरस्कारेण प्रत्यायकत्वादिति वाच्यम् । शशशृङ्गयोः संसर्गस्यासतो बोधनात् । अन्यथा शशशृङ्गमसत्, शशशृङ्गं नास्तीत्यादिवाक्यानामप्यबोधकतापत्तेः । न चैषां शशे शृङ्गं नास्तीत्यर्थः । गवि शशशृङ्गं नास्तीत्यस्यानुपपत्तेः । न चापरोक्षज्ञानाभावो वा सत्त्वेनापरोक्षाभावो वाबाधः । स्वरूपेणैव त्रैकालिकनिषेधप्रतियोगिनो रूप्यादेरत्यन्तासत एवापरोक्षत्वेन विपर्ययापर्यवसानात् । न चेन्द्रियसंनिकर्षादिरूपायाः प्रत्यक्षसामान्यसामग्र्यां असत्यभावात्कथं तत्प्रत्यक्षम् । ज्ञानसमशरीरे प्रातीतिकेऽपि संनिकर्षाभावात् । न मन्मते ज्ञातैकसति रूप्यादौ साक्ष्यपरोक्षे अज्ञाननाशकान्तर्वृत्तिप्रयोजकसंनिकर्षानुपयोगः । चाक्षुषवृत्तिं विना साक्षिणा तद्ग्रहणासंभवादन्यथान्धस्यापि शुक्तिरूप्यज्ञानापत्तेः । न चासद्रूपस्यापरोक्ष्ये नृशृङ्गादेरपि तत्तदापत्तिः, विशेषाभावात्; सविशेषत्वे चासत्त्वव्याकोप इति वाच्यम् । असतः सतो निस्स्वरूपत्वादिनेव नृशृङ्गशशशृङ्गादीनामपि परस्परनृशृङ्गशशशृङ्गशब्दैरेव परोक्षप्रतीतिव्यवहारविषयत्वादेर्विशेषस्यासत्त्वाविरोधिनो बुद्धिसिद्धस्य संभवात् । न च सर्वसामर्थ्यहीनस्यासतः सता ज्ञानेन कथं संबन्धो, विषयत्वस्य तत्र वक्तुमशक्यत्वात्; भाति प्रतीयत इत्यादिकर्तृत्वकर्मत्वादिविरोधाच्चेति वाच्यम् । अतीतादेः स्मृत्यनुमित्यादिविषयत्वादिवदुपपत्तेः । न च तत्र प्रतीत्यादेरेव विषयत्वम् । न त्वतीतादेर्विषयत्वम् । प्रकृतेऽपि तुल्यत्वात् । न च शशशब्दस्य नरि भ्रमदशायां नृशृङ्गशब्देनेव शशशृङ्गशब्देनापि नृशृङ्गस्य प्रतीयमानत्वेन नृशृङ्गादिशब्दैरेव प्रतीयमानत्वादेरपि परस्परं विशेषो वक्तुमशक्य इति वाच्यम् । शशशृङ्गशब्देन प्रतीयमानस्याज्ञातसत्ताशून्यस्य नृशृङ्गत्वासंभवात् । किं चानिदंरूप्ये प्रातिभासिके यदिदंत्वं व्याव-

हारिकसत्त्वं च तद्द्वयं न तावत्सत् । अद्वैतव्याकोपात् । नाप्यनिर्वाच्यम् । तथा सति तस्यासद्वैलक्षण्यार्थं प्रातिभासिकत्वाय सत्त्वेन प्रतीत्या भाव्यम् । एवं च तदपि सत्त्वमनिर्वाच्यं चेत्तस्यापि सत्त्वेन प्रतीत्या भाव्यमित्यनवस्था । तथा च तयोरसत्त्वं वाच्यम् । टीकायां च 'इदंत्वसत्त्वयोः सत्त्वायोगादनिर्वाच्यत्वे तत्त्वेन प्रतीतौ प्रवृत्त्ययोगात्सत्त्वेन भाने च तस्मिन्नपि सत्त्वादिविकल्पप्रसरेणानवस्थानादिदं-त्वव्यावहारिकत्वयोरसत्त्वम् ।' इत्युक्तम् । न च त्वत्पक्षेऽप्यसति रूप्ये यत्सत्त्वं प्रतीयते, तस्य सत्त्वायोगादसत्त्वे च तथैव च प्रतीतौ प्रवृत्त्यनुपपत्तिः, सत्त्वेन प्रतीतावनवस्था च स्यादिति वाच्यम् । सत्त्वे सत्त्वासत्त्वयोरौदासीन्येऽप्यसतः सत्त्वेन प्रतीत्या प्रवृत्त्यु-पपत्तेरसत्त्वस्य सत्त्वेनाप्रतीतावप्यसत्त्वसिद्धेश्च । न चासति निषेधप्रतियोगित्वासंभवेन रूप्यादेरनिर्वाच्यत्वम् । अविद्यमानघटादौ ध्वंसादिप्रतियोगित्ववदसत्यत्यन्ताभावप्रति-योगित्वसंभवात् । न चातीतो घटोऽस्तीति विद्यमान एव घटे ध्वंसप्रतियोगित्वं, भाविध्वंसप्रतियोगित्वाभिप्रायेणैव तथा व्यवहारात् । तदजानतां तथा व्यवहाराभावाच्च । स्वरूपेणैव त्रैकालिकनिषेधप्रतियोगिनोऽनिर्वाच्यस्यापि तदनुपपत्तेस्तुल्यत्वात् । न च यत्किंचित्कालाबाध्यत्वमनिर्वाच्येऽस्ति । किंचित्कालसत्यस्य ह्यनित्यत्व-मेव स्यात् । न च शशशृङ्गास्तित्वस्यायोग्यत्वेनापादयितुमशक्यत्वात् कथं तदभावः प्रत्यक्षः । शृङ्गमात्रस्य योग्यत्वनियमेनापादनसंभवात् । न च शृङ्गत्वस्य योग्यत्व-व्याप्यत्वेऽपि शशशृङ्गास्तित्वं न तद्व्याप्तम् । योग्यनिष्ठस्य शशीयत्वस्यापि योग्य-त्वात् । शब्देनैव तदभावसिद्ध्या प्रत्यक्षाभावेऽपि क्षत्यभावाच्च । न च 'नास-दासीन्नो सदासीत्' इत्यादिश्रुतयोऽनिर्वाच्यत्वे मानम् । सदसच्छब्दयोः पञ्चभूत-परत्वात् । 'न सन्नासदुच्यते' इत्यादौ भूते प्रयोगात् । 'यदन्यद्वायोरन्तरिक्षाच्चै-तत्सद्वायुरन्तरिक्षं चासत्' इति श्रुतेश्च । अन्यथा 'नासदासीत्' इत्यत्राप्रसक्त-प्रतिषेधापत्तिः स्यात् । न च 'नो सदासीत्' इत्यनेन सद्भिन्नत्वे उक्तेऽसत्त्व-प्रसक्तिः । 'तदानीम्' इति वैयर्थ्यापत्तेः । न च 'नासीद्रजो व्योम' इति रजो-निषेधादावेव 'तदानीम्' इत्यस्य अन्वयः । 'नो सदासीत्' इत्यनेनैव रजःप्रभृति-निषेधसिद्धौ पृथक्तन्निषेधवैयर्थ्यात् । न च 'नो सदासीत्' इत्यत्र सच्छब्दस्य परमार्थ-सत्परत्वेन व्यावहारिके सतो रजःप्रभृतेर्निषेधस्य न ततः प्राप्तिः । रजःप्रभृतीनां स्वरूपेण तमसश्च पारमार्थिकत्वेन निषेध इति कुचोद्ये त्वदुराशाया एव बीजत्वात् । 'आनीदवातं स्वधया तदेकम्' इति वाक्यशेषाद्ब्रह्मणोऽप्यनिर्वाच्यत्वापत्तेश्च । न च ब्रह्मासत्त्वं श्रुत्यन्तरविरुद्धम । 'विश्वं सत्यम्' 'सत्याद्भूतानि जातानि सत्यं भूतमयं जगत् ।' इति श्रुतिस्मृत्योः प्रधानादिसत्यत्वेऽपि सत्त्वात् ।

इत्यनिर्वाच्यत्वे प्रमाणभङ्गः ॥ ३० ॥

## ३१. आविद्यके रूप्योत्पत्तिभङ्गः ।

अतो सदेव शुक्तिरूप्यमङ्गीकार्यम् । असदेव रूप्यमत्राभादसद्रूप्यात्मना शुक्तिरभादित्यनुभवो हि तत्र मानम् । विमतमसत्सत्त्वानधिकरणत्वात्, शशशृङ्गवत्; विमता अप्रमा असद्विषयिणी, सत्त्वानधिकरणविषयत्वात्, सन्मात्राविषयकत्वे सति सविषयकत्वाद्वा, नृशृङ्गमसदित्यादिवाक्यजन्यपरोक्षवदित्याद्यनुमानं मानम् । न च प्रथमे शब्दैकगम्यत्वं, द्वितीयतृतीययोः परोक्षत्वमुपाधिः । शशशृङ्गं जानामीत्यनुव्यवसायविषयत्वेन शशशृङ्गादेः शब्दैकगम्यत्वाभावेन साध्याव्यापकत्वात् । [1]अतद्विषयकानुव्यवसाये द्वितीयोपाधेरपि साध्याव्यापकत्वात्, साक्षादिति विशेषणेऽप्रयोजकत्वाच्च । न चासत्ख्यात्यङ्गीकारे बौद्धमतप्रवेशः । ख्यातिविषयमात्रस्यासत्त्वे हि तन्मतप्रवेशः । अस्मन्मते तु सतोऽसतश्च ख्यातिविषयत्वात् । असज्ज्ञानाङ्गीकारमात्रेण तन्मतप्रवेशेऽनिर्वाच्येऽसद्वैलक्षण्यज्ञानार्थं त्वयाप्यसज्ज्ञानावश्यकत्वेन तद्दोषापत्तेः । जरत्तार्किकैरप्यसत्संसर्गभानानङ्गीकाराच्च । न च नृशृङ्गादिशब्देन विकल्प एव मयाङ्गीक्रियते, न ज्ञानम् । शुक्तिरूप्यादिविषयको विकल्प एव जायते, न ज्ञानमित्यस्मदङ्गीकारेऽपि क्षतेरभावात् । न हि शब्दादेव विकल्पो जायते, नान्यस्मादित्यत्र मानमस्ति । ज्ञानमात्रस्यैव विकल्प इति नामकरणसंभवाच्च । अतः सदेव शुक्त्यादि असद्रूप्याद्यात्मना भातीत्यभिनवान्यथाख्यातिः । यत्त्वज्ञानोपादानकं तत्त्वधीनाश्यं रूप्यमिति, तन्न । रूप्यं नष्टमुत्पन्नं चेति धीप्रसङ्गात् । न चोत्पादविनाशधीर्भ्रान्तिदशायामापाद्यते बाधसमये वा; नाद्यः; पूर्वोत्पन्नाविनष्टशुक्त्यभिन्नतया ग्रहस्यैव प्रतिबन्धकत्वात् ; न द्वितीयः; अत्यन्ताभावग्रहस्यैव प्रतियोगिग्रह इव तदुत्पादविनाशग्रहेऽपि प्रतिबन्धकत्वादिति वाच्यम् । कदाप्यप्रतीतायां प्रातीतिकोत्पत्तौ मानाभावात् । त्रयाणां सत्त्वेऽत्यन्ताभावबुद्धेरेवासंभवाच्च । कालिकव्याप्यवृत्त्यत्यन्ताभावाधिकरणे उत्पत्त्यादेर्व्याहतत्वाच्च । न च पारमार्थिकत्वेनैव तन्निषेधात् न स्वरूपेणेत्युत्पत्त्याद्युपपत्तिः । पारमर्थिकत्वस्यापि पारमार्थिकत्वेनैव तन्निषेधेऽनवस्थापत्तेः । स्वरूपेण निषेधे तदुत्पत्त्याद्यसंभवात् । प्रातीतिकस्यापि तस्योत्पत्तेरभावे रूप्यादेरपित्तदभावापत्तेः । निर्धर्मके ब्रह्मण्यतिव्याप्तेश्च । रूप्यस्याज्ञानोपादेयत्वे मृद्घट इतिवदज्ञातं रूप्यमिति धीः स्यात् । उपादेयस्योपादानानुविद्धतया भाननियमात् । न च भवतामपि प्रकृत्यनुविद्धतया घटादेर्भानं स्यात् । मृद्घट इति मृत्त्वेन तद्भानात् । न च ममापि तुल्यम् । प्रकृतित्वरूपावस्थाया अज्ञातसत्ताकत्वेन घटादाववस्थानेऽपि प्रातीतिकरूप्याद्युपादानस्य प्रातीतिकस्याज्ञानस्याज्ञात-

---

१. ' अतद्विषयकानुव्यवसाये ' इति पाठः मद्विषपुरमातृकायाम् ।

सत्ताकत्वासंभवात्। किं चाधिष्ठानतत्त्वज्ञानेनाज्ञाननिवृत्तावपि प्रतिबिम्बादिस्थले वृक्षाधोऽग्रत्वादिभ्रमो दृश्यते। न च सोपाधिके प्रतिबिम्बभ्रमोपादानाज्ञानमुपाधिनिवृत्तिसचिवज्ञानेन निवर्तते, न केवलेनेति वाच्यम्। स्वप्रागभावनिवृत्ताविवाज्ञाननिवृत्तावपि ज्ञानस्येतरानपेक्षणात् ज्ञातैकसत्त्वेन प्रतीत्यापत्तेश्च।

इत्याविद्यके रूप्योत्पत्तिभङ्गः ॥ ३१ ॥

## ३२. भ्रमस्य द्यात्मकत्वभङ्गः।

यच्चाधिष्ठानांशेऽन्तःकरणवृत्तिरध्यस्तांशे अविद्यावृत्तिरिति ज्ञानद्वयात्मकः सर्वोऽध्यास इति तन्न। इदमंशस्याप्यध्यस्तत्वेनेदमिति द्यात्मकं, इदं रूप्यमिति त्र्यात्मकं, स्वप्ने इदं रूप्यमिति चतुरात्मकं स्यात्। न चेदंत्वस्याध्यस्तत्वेऽपीदमिति न द्यात्मकम्, इदंत्वाधिष्ठानस्य स्वप्रकाशत्वात्; अन्तःकरणवृत्तिसापेक्षाधिष्ठानप्रकाश एवाध्यासे मया द्यात्मकत्वमुपेयते, न तु सर्वत्राध्यास इति वाच्यम्। अधिष्ठानस्य स्वप्रकाशत्वेऽप्यध्यस्तभानाय वृत्तेरावश्यकत्वादन्यथा घटपटादिभानं सर्वस्य सर्वदा स्यात्। किं च रूप्यज्ञानस्याविद्यावृत्तित्वेन प्रातिभासिकतया प्रतिभासावश्यंभावेनाध्यस्तविषयज्ञानस्य चाध्यस्तत्वनियमेनाविद्यावृत्तेरप्यविद्यावृत्तिप्रतिबिम्बितचैतन्यवेद्यत्वम्। एवं तस्यापि तस्यापीत्यनवस्थापत्तेः। न चाविद्यावृत्तिप्रातिभासिके चैतन्ये अविद्यावृत्तिः स्वत एवोपाधिरिति न वृत्त्यन्तरापेक्षा, आत्माश्रयापत्तेः। वृत्तिभेदे ज्ञानैक्यानुभवविरोधाच्च। न चाध्यस्तेन भेदेन विषययोरैक्यापन्नत्वाज्ज्ञानयोरैक्यमुपचर्यते। धारावाहिकज्ञानेष्वैक्याध्यासापत्तेः। विषयैक्यस्य ज्ञानैक्यहेतुतायां मानाभावाच्च। न च यथेदमंशावच्छिन्नचैतन्यगताविद्यापरिणामत्वाद्रूप्यमिदंत्वेन भाति तथेदमाकारान्तःकरणवृत्त्यवच्छिन्नचैतन्यगताविद्यापरिणामत्वेन रूप्यज्ञानमिदंज्ञानत्वेन भातीति वाच्यम्। बाधकाद्विषययोरिव ज्ञानयोरपि भेदधीप्रसङ्गात्। न हि बाधं विनारोपेऽन्यन्मानमस्ति। इदंवृत्तेर्ज्ञातैकसत्त्वेन तदवच्छिन्नचैतन्यगताज्ञानाभावेनाविद्यावृत्तेरसंभवाच्च। न चावृत्तिर्न ज्ञानमिति ज्ञानैक्यधीः। ततः संस्कारस्मृतिसुखदुःखेच्छाप्रवृत्तीनां ज्ञानकार्याणामनुपपत्तेः। न च वृत्तिभेदेऽपीदंरूप्ययोरिदमंशावच्छिन्नचैतन्यप्रकाश्यत्वेन फलैक्यात् ज्ञानैक्यधीः। परोक्षभ्रमेऽपरोक्षैकरसचैतन्यरूपफलैक्याभावात्।

तन्निबन्धनैक्यज्ञानानुपपत्तेः । त्वन्मते यथाक्रममिदंरूप्याकारान्तःकरणवृत्त्यविद्यावृत्तिप्रतिबिम्बिताभ्यां वा तदभिव्यक्ताभ्यां वेदमंशावच्छिन्नतदनवच्छिन्नाभ्यामिदमंशरूप्याधिष्ठानचैतन्याभ्यां वा वेद्यत्वेन इदमंशानवच्छिन्नात्तदवच्छिन्नस्य भेदात् । अनवच्छिन्नशुद्धचितः सार्वसाधारण्यात् । न चेदमंशे तदवच्छिन्नचैतन्यमुपादानम् । आत्माश्रयापत्तेः । न वा रूप्य इदमंशानवच्छिन्नमुपादानम् । इदं रूप्यमितिप्रतीत्यनुपपत्तेः । न चाविद्यावृत्तिर्नाज्ञाननाशिका; किं त्वन्तःकरणवृत्तिरिदमाकारा; तथा च तदभिव्यक्तचैतन्यमेव रूप्यमप्यभिव्यनक्तीति फलैक्यमिति वाच्यम् । इदमाकारवृत्त्यभिव्यक्तचैतन्येनैव रूप्यप्रकाशेऽविद्यावृत्त्यङ्गीकारस्याप्रामाणिकत्वापत्तेः ।

इति भ्रमस्य द्व्यात्मकत्वभङ्गः ॥ ३२ ॥

## ३३. सत्तात्रैविध्यभङ्गः ।

यच्च ब्रह्म परमार्थसत्, घटादिकं व्यावहारिकं, शुक्तिरूप्यं प्रातीतिकं सदिति त्रिभागस्तन्न । प्रतिभासिकादप्यपकृष्टस्य स्वाप्नरूप्यस्य व्यावहारिकादप्युत्कृष्टाया अविद्यानिवृत्तेः सत्त्वात् । जागरे अधिष्ठानतावच्छेदकेदमंशस्याधिकसत्ताकत्वदर्शनेन स्वप्नेऽपि तदौचित्यात् । न च स्वप्ने नेदमोऽधिष्ठानतावच्छेदकं, अविद्यावच्छिन्नमेव हि तत्राधिष्ठानम् । इदमोऽधिष्ठानतानवच्छेदकत्वे इदं रूप्यमिति प्रतीत्यनुपपत्तेः । किं च विभागस्तात्त्विकश्चेदद्वैतहानिर्नो चेत् त्रैविध्यानुपपत्तिः । न च व्यावहारिकोऽयं विभागः । तात्त्विकस्य ब्रह्मणोऽतात्त्विकाच्छुक्तिरूप्याद्विभागस्यातात्त्विकत्वेऽविभागस्य तात्त्विकत्वापत्तेः । यत्तु सप्रकारकनिष्प्रकारकज्ञानबाध्यत्वाबाध्यत्वाभ्यां शुद्धब्रह्मधीबाध्यत्वतदन्यबाध्यत्वाभ्यां वा महावाक्यजन्यधीबाध्यत्वतदन्यधीबाध्यत्वाभ्यां वा स्वबाधकाबाध्यधीबाध्यत्वतदन्यधीबाध्यत्वाभ्यां वा व्यावहारिकप्रातीतिकयोर्भेद इति तन्न । त्वदभिमतप्रातीतिकस्य देहात्मैक्यादेर्महावाक्यजन्यनिष्प्रकारकशुद्धब्रह्मधीनिवर्त्यत्वेनाव्याप्तेरतिव्याप्तेश्च । स्वबाधकेनैव ब्रह्मज्ञानेन तन्निवृत्तेश्च । निष्प्रकारकज्ञानस्य बाधकतायाः स्वबाधकतायाश्चालीकत्वात् । ब्रह्मण्यारोपितक्षणिकत्वादेरुक्तब्रह्मज्ञानेनैव बाधाच्च । ब्रह्मज्ञानाव्यवहितभ्रमविषये प्रातीतिके प्रातीतिकलक्षणाव्याप्तेर्व्यावहारिकलक्षणातिव्याप्तेश्च । न च करणसङ्गिदोषजन्यत्वतदभावाभ्यां भेदः । शुक्तिनिष्ठचाकचक्यादिदोषस्य करणानिष्ठत्वात् । करणनिष्ठत्वकल्पनाया उभयत्र तुल्यत्वात् ।

इति सत्तात्रैविध्यभङ्गः ॥ ३३ ॥

उपाधिबाधप्रतिपक्षयुक्तो विपक्षबाधोज्झितसाध्यहीनः ।
दृश्यत्वहेतुर्जगतो ह्यतथ्यतां न साधयेद्वै जडता तथान्यत् ॥ १ ॥

श्रीविष्णोरुदयान्नाशात्तेनैवं पालनात्तथा ।
कार्यकारणरूपं हि विश्वं सत्यमिति स्थितम् ॥ २ ॥

न दृश्यन्ते न पाल्यन्ते नोत्पाद्यन्ते हि मायिकाः ।
मायासंमोहहीनेन नाश्यन्ते न कथंचन ॥ ३ ॥

श्रुतिशिखरसिद्धस्य सर्वज्ञस्याज्ञतां वदेत् ।
तत्पालितस्य मिथ्यात्वं कोऽन्यो बौद्धं विनाधमः ॥ ४ ॥

श्रीविष्णोः सदनन्तभूतिनिचयं वेदान्तगीर्भिर्नुतं
योऽकाण्डे प्रलपत्यतथ्यमिति [1]यच्छिष्यो जिनस्याधमः ।
वैरं संदधदासुरोऽखिलसमे वक्तुं च तस्योत्तरं
को विद्वाननुरौति किं मृगपतिः फेरो रुतं क्वापि वा ॥ ५ ॥

Indira Gandhi National Centre for the Arts

वन्दे श्रीहयकन्धरं श्रुतिशिखागीतप्रभुत्वं हरिं
योगीन्द्रैर्हृदि भाविताङ्घ्रियुगलं ह्यानन्ददेहं समम् ।
हेषाभिः परिकम्पयन्तमसुरांश्चानन्दयन्तं सुरान्
स्वाङ्घ्री चिन्तयते गिरोऽमलतरा विश्राणयन्तं मुदा ॥ ६ ॥

सिद्धैः सहस्रधा ध्वंसो ध्वान्ताद्वैतस्य सर्वथा ।
सिद्धान्तानां प्रकाशेन तर्कोपबृंहितश्रुतेः ॥
जाता तस्य द्वितीयस्य परिच्छेदस्य पूर्णता ॥ ७ ॥

इति श्रीवनमालिविरचिते श्रुतिसिद्धान्तप्रकाशे द्वितीयः परिच्छेदः ॥ २ ॥

---

१. ' यद्बुद्धस्य शिष्योऽधमः । ' इति पाठः महिषपुरमातृकायाम् ।

# तृतीयः परिच्छेदः

श्रीमुकुन्दप्रसादाद्धि विघ्नवृन्दनिवारकात् ।
कुयोगिनोऽप्यनायासाद्यत्प्रसादात्तरन्ति हि ।।
दुस्तरं भवपाथोधिं तं वन्दे श्रीहयाननम् ।। १ ।।

समन्वयाविरोधाभ्यां सिद्धोऽनन्तगुणान्वयः ।
हरिस्तत्प्राप्तये चात्र कथ्यन्ते साधनान्यथ ।। २ ।।

## १. विवरणोक्तनियमविधित्वभङ्गः ।

अथ स्वधर्मानुष्ठानादिना जातजिज्ञासः शमदमादिसंपन्नो मुमुक्षुरिहामुत्रविषयभोगे विरक्तो हरिभक्तो गुरुं प्राप्य श्रवणमनननिदिध्यासनानि कृत्वा हरिमपरोक्षीकृत्य तत्प्रसादेन मुक्तो भवति । परोक्षस्यापि हरेः श्रवणादिवासितेन मनसा तत्प्रसादादेवापरोक्ष्यं भवति । 'आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य :' इति श्रुतेः । ननु 'यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥' इति श्रुतौ ब्रह्मण उपास्यत्वप्रतिषेधात्कथं त्वस्य ध्येयत्वमिति चेन्न । यत् श्रवणदर्शनादिजनितमानसवासनामयस्य वस्तुनो मनसावलोकनं, तद्धि तस्य ध्यानम् । यथा प्रतिमायां क्रियमाणार्चा तत्स्थतया चिन्त्यमानस्य देवस्य भवति न तु प्रतिमामात्रस्यैवेति श्रुत्युक्तं ध्यानमपि बिम्बभूतस्य ब्रह्मण एव, न तु ब्रह्म श्रुत्वा मनसा निर्मितवस्तुनः । अतो न श्रवणमनननिदिध्यासनानां भिन्नविषयत्वम् । इदं श्रवणजनितमानसवासनामयं वस्तु यदुपासते अवलोकते तद्ब्रह्म न, किं तु यच्छ्रुत्वा तत्सदृशं वस्तु मनसा कल्प्यते तदेव ब्रह्म त्वं विद्धीति श्रुत्यर्थः । विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहो निदिध्यासनापरपर्यायो ध्यानम् । तच्च प्रतिबिम्बांशे मानसापरोक्ष्यम्, बिम्बांशे स्मरणम् । 'यन्मनसा' इत्यादि श्रुत्या ध्यानकालिकमानसापरोक्षवृत्त्यविषयत्वम् । 'मनसैवानुद्रष्टव्यम्' इत्यनया च ध्यानपरिपाके सतीश्वरप्रसादेन मानसापरोक्षवृत्तिविषयत्वं बोध्यते । ननु 'यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम् ।।' 'अवचनेनैव प्रोवाच, स ह तूष्णीं बभूव' इति श्रुत्या ब्रह्मणोऽज्ञेयत्वमुक्तमिति कथं तज्ज्ञानान्मुक्तिरिति चेन्न । यथा श्रुतामतादीनां युगपदेकस्मिन् व्याहतत्वात् । अवचनहेतुकवचनस्यालीकत्वाच्च । यस्य विषयभोगादिकममतं तस्य तन्मतं, स ब्रह्म न वेद विषयान्विजानतां ब्रह्माविज्ञातम् । अवचनेनैवार्था-

न्तरबोधकवचनभिन्नवचनेनैवेतरव्यापारराहित्येनेति यावत्, ब्रह्म प्रोवाच स तत्काले तूष्णीं इतरार्थबोधकवचने निवृत्तव्यापारो बभूव, 'तमेवैकमात्मानं जानथ अन्या वाचो विमुञ्चथ' इति श्रुतेरिति हि श्रुत्यर्थः। 'दृश्यते त्वग्र्यया बुद्ध्या' 'मनसैवानुद्रष्टव्यम्' 'यन्मनसा न मनुते' इति श्रुतिद्वयस्य वासितावासितमनोऽभिप्रायत्वात्। 'मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्।' इत्यादिस्मृतेश्च। तत्र सिद्धार्थोक्तिरूपेण गुरूपदेशेनानेकशाखास्थवाक्यार्थग्रहणमात्रं श्रवणम्। तच्चाज्ञानमात्रविरोधि, न तु मननमिव संशयादिविरोधि। मननरूपन्यायावतारे धर्म्यर्पकतयाङ्गं मननं त्वयमेव वाक्यार्थो युक्तो, नान्य इति निर्णयहेतुयुक्त्यनुसंधानम्। तत्र समन्वयाध्यायोक्ता उपक्रमादियुक्तयो वाक्यार्थतत्त्वनिर्णायका, युक्तिसमयपादाभ्यामुक्तास्तु युक्तयस्तत्त्वनिर्णायका इत्युभयविधयुक्त्यनुसंधानमपि मननान्तर्गतं विजातीयप्रत्ययानन्तरितं ध्यानं निदिध्यासनम्। तत्र श्रवणादिविधिर्मानान्तराप्राप्तफलकोऽपूर्वविधिः। श्रवणादेरपरोक्षधीसाधनताया अन्यतोऽप्राप्तत्वात्। न च गान्धर्वशास्त्रविचारे षड्जादिसाक्षात्कारे हेतुता दृष्टेति वाच्यम्। षड्जादीनामुपदेशं विनैव प्रत्यक्षत्वात्। तन्निष्ठजातेः पद्मरागत्वादेरिवोपदेशसहकृतेन्द्रियगम्यत्वेऽपि तद्भिन्नप्रत्यक्षे उपदेशानपेक्षणात्। चाक्षुषादिप्रत्यक्षे आलोकादिसंयोगचक्षुःप्रणिधानादेरिव श्रावणप्रत्यक्षे शब्दनिष्ठषड्जत्वादिधर्मविचारस्य हेतुत्वेऽप्यात्मप्रत्यक्षे सामग्र्या विचारस्यानिविष्टत्वात्। अन्यथा धर्मविचारेण धर्मादेरप्यापरोक्ष्यापत्तेः। न चापरोक्षार्थकशास्त्रविचारादापरोक्ष्यम्, आत्मा च षड्जादिवदपरोक्षः। आत्मपदेन जीवोक्तौ तस्य सदापरोक्षत्वेनोपदेशवैयर्थ्यात्। ईशोक्तौ च तस्य धर्मवत्परोक्षत्वेन विचारेणापरोक्ष्यासंभवात्। संदिग्धत्वसप्रयोजनत्वयोरेव सर्वत्र विचार्यत्वे तन्त्रत्वात्। शतशो विचारेऽपि तद्योग्यसर्वनिध्यादीनामापरोक्ष्यादर्शनाच्च। न च निध्याद्यापरोक्ष्ये हेतोः संनिकर्षस्याभावान्न तत्संनिकर्षाभावाच्चाक्षुषाद्यापरोक्ष्याभावेऽपि शब्दापरोक्ष्ये संनिकर्षाहेतुत्वेन निध्यादेस्तदापत्तेः। अतः श्रवणादिरपूर्वविधिरिति तज्जन्यादृष्टयुक्तेन मनसा परोक्षस्यापि हरेरापरोक्ष्यमिति सिद्धम्। परमते नियमविधिर्न संभवति। निर्विशेषात्मनि मानान्तराप्राप्तेः। न च यथापूर्वीयेषु व्रीहिविशेषेषु नखविदलनादेरप्राप्तावपि व्रीहिसामान्ये तत्प्राप्त्या 'व्रीहीनवहन्ति' इति नियमविधिस्तथात्मसामान्ये मानान्तरप्राप्त्यैव निर्विशेषे तत्प्राप्त्या नियमविधिरिति वाच्यम्। 'व्रीहीनवहन्ति' इत्यत्र व्रीहिपदं ह्यपूर्वीयद्रव्यपरम्, न तु व्रीहिमात्रपरम्। अन्यथा परेष्ववघात औपदेशिको न स्यात्; नीवारेषु वा व्रीहित्वाभावेनातिदेशो न स्यादिति नवमे स्थापितत्वात्। अन्यथा वैतुष्यमात्रेऽवघातनियमे द्रव्यार्जने याजनाद्युपनियम-

वत्तस्य पुरुषार्थप्रसङ्गेन लौकिकेष्वपि व्रीहिषु विदलने प्रत्यवायात् । निर्विशेषसविशेषरूपविशिष्टद्वयानुगतविशेषाभावात्तद्द्वारा वेदान्तवेद्ये चिन्मात्रे मानान्तराप्राप्तेश्च । यत्तु यथा मन्त्रार्थज्ञानस्य कल्पसूत्रात्मीयग्रहणकवाक्यादिनापि प्राप्तत्वेन पक्षेऽप्राप्तमन्त्रसाध्यत्वं नियम्यते, मन्त्रैरेव मन्त्रार्थस्मृतिः कार्येति, तथा वेदान्तमूलकस्त्रीशूद्रादिसाधारणपुराणादिप्राप्त्या पक्षेऽप्राप्तवेदान्तश्रवणादिनियमविधिरिति तन्न । 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।' इत्यादिस्मृतिविरोधापत्तेः । न ह्यविचारितेनोपबृंहणं संभवति । न च वेदान्ततात्पर्यनिर्णयाय तद्विचारापरोक्षतायामपि ब्रह्मज्ञाने तद्विचारापेक्षास्ति । विवरणरूपतयैव हि स्मृत्या वेदतात्पर्यं निर्णीयते । विवरणविव्रियमाणयोः समानार्थकत्वादितः सुतरां ब्रह्मनिर्णयः । विप्रकीर्णनानाशाखार्थसंग्रहादिरूपेणेतिहासादिना तत्त्वनिश्चयदर्शनाच्च । सति च तस्मिन् विविदिषाद्वारा तदर्थायान्तःकरणशुद्धेरनपेक्षणात् । आपरोक्ष्यस्य च दशमस्त्वमसीति लौकिकवाक्यादिव विषयस्वभावादेव सिद्ध्या वेदजन्यब्रह्मज्ञाने इतिहासादिजन्यादधिकस्यापरोक्ष्यस्यानुभवेन तस्य नियमादृष्टासाध्यत्वात् । ज्ञानस्य च प्रागभावनिवर्तन इवाज्ञाननिवृत्तावदृष्टनिरपेक्षत्वात् । अन्यस्य च नियमादृष्टसाध्यस्याभावात् । अत एव शूद्रप्रणीतात्मप्रबन्धादिप्राप्तिनिमित्तकाप्राप्तांशपूरणार्थो नियमविधिरिति निरस्तम् । पण्डितस्य तदप्राप्तेः मन्दस्य निषेधमुल्लङ्घ्य प्रवृत्तस्य विधिना निवर्तयितुमशक्यत्वात् । दशमस्त्वमसीति वाक्यादिव ततोऽपि ब्रह्मापरोक्ष्यसंभवाच्च ।

इति विवरणोक्तनियमविधित्वभङ्गः ॥ १ ॥

## २. परमते श्रवणादिविधिभङ्गः ।

यत्तु शक्तितात्पर्यावधारणं श्रवणमिति तन्न । सर्वशब्दावाच्ये ब्रह्मणि शक्त्यसंभवात् । संशयधर्मिणो निर्णीतत्वेन विशेषस्य तत्राभावेनावधारणीयाभावाच्च । ज्ञानरूपेऽवधारणे विधेस्त्वद्रीत्यासंभवाच्च । न चावधारणं मनोवृत्त्यन्तरम् । यत्र यत्र ज्ञाने विधिः प्रतीयते तत्र सर्वत्र ज्ञानभिन्नमनोवृत्तिरिति वक्तुं शक्यत्वेन ज्ञाने विधिर्नास्तीत्युक्तेर्निष्फलत्वापत्तेः । तात्पर्यरूपे विषय उपक्रमादिरूपे च प्रमाणे सति ज्ञायमानस्य ज्ञानबहिर्भावानुपपत्तेश्च । तद्बहिर्भूतवाग्धेनूपासनादौ प्रमाणवस्तुपरतन्त्रत्वादर्शनाच्च ।

इति परमते श्रवणादिविधिभङ्गः ॥ २ ॥

## ३. शब्दापरोक्षत्वभङ्गः ।

ननु प्रतिवाक्यमस्यायमर्थ इति सिद्धार्थोक्तिरूपगुरूपदेशे अनेकशाखास्थवाक्यार्थज्ञाने वेदान्तरूपवाक्यार्थविचारस्य सामान्यतः साधनत्वेन प्राप्तत्वान्न श्रवणे अपूर्वविधिरिति चेन्न । यथा हि घटादावितरभेदे सिद्धेऽपि पृथिवीत्वावच्छिन्ने तदसिद्ध्या पृथिवीतरेभ्यो भिद्यत इत्यत्र न सिद्धसाधनम्, यथा च स्थानप्रकरणोक्तरीत्या राजसूयान्तर्गतेष्टिपशुसोमेषु प्रातिस्विकरूपेण चोदकेनेतिकर्तव्यताप्राप्तावपि राजसूयरूपे तदप्राप्तिः, तथा वेदविचारत्वावच्छिन्ने ब्रह्मधीहेतुतया अप्राप्तेरपूर्वविधित्वोपपत्तिः । न हि कर्मकाण्डादिना ब्रह्मकाण्डेऽप्यवान्तरकारणादिवाक्येन स्वरवर्णपदादिना चापाततो ब्रह्मधीरस्ति । तेन च सामान्यतः प्राप्तसाध्यसाधनभावमनादृत्य विशेषोपाधिना अप्राप्तसाधनताप्राप्तयेऽपूर्वविध्यङ्गीकारे ज्योतिष्टोमादिवाक्यविचारेऽपि तेन रूपेण तद्वाक्यार्थज्ञानं प्रत्यप्राप्तसाधनासिद्धयेऽपूर्वविध्यन्तरकल्पनापत्तिरिति निरस्तम् । कर्मकाण्डाकाशादिपदैर्ज्योतिष्टोमादिवाक्यगतवर्णैरुदात्तादिस्वरैश्च सामान्यतोऽपि ब्रह्मज्ञानाप्राप्तः निदिध्यासनस्याव्यक्तस्वभावब्रह्मसाक्षात्कारहेतुनान्यतः प्राप्तेऽपि 'निदिध्यासितव्यः' इत्यपूर्वविधिः । तथाज्ञातेऽयुक्ते च निदिध्यासनासंभवेन श्रवणमननयोर्निदिध्यासने लिङ्गादेव प्राप्तावपि नियतविषयकनिदिध्यासविषयगुणान्यगुणेषु लिङ्गेन तयोरप्राप्तेस्तद्विधिरप्यपूर्वविधिः । एवं च श्रवणमननयोर्निदिध्यासितव्यगुणांशेऽदृष्टद्वारेण निदिध्यासनाङ्गत्वम् । यद्वा गुरुप्रसादपूर्वकत्वरहितस्वप्रयत्नमात्रसाध्यव्याख्यार्थग्रहणादिप्राप्तिनिमित्तकः 'श्रोतव्यः' इत्यादिर्नियमोऽस्तु । 'आचार्यवान् पुरुषो वेद' इति श्रुतेः । यद्वा दुःशास्त्ररूपोपायान्तरप्राप्तिनिमित्तको नियमोऽस्तु । पाशुपतावागमविचारस्य ब्रह्मप्रमाहेतुत्वभावेऽपि जगत्कारणज्ञानहेतुतायाः प्राप्तेः । यद्वा विचारसाध्यविशेष्यांशज्ञानेऽनुमानादेः प्राप्त्या नियमोऽस्तु । न च यदाकारे ज्ञाने विचारो हेतुस्तदाकारज्ञाने उपायान्तरप्राप्तिर्नियमे तन्त्रम् । इदं तत्त्वत एव पराम्रष्टव्यमित्यादावेकस्मिन् विशेष्ये उपायान्तरप्राप्त्या नियमदर्शनात् । न ह्येकस्मिन्नेवाकारे तात्त्विकत्वातात्त्विकत्वयोः प्राप्तिरस्ति । परमते तु विशेष्यस्यैवौपनिषदत्वात्तत्रैवोपायान्तराप्राप्तिरिति वैषम्यम् । संभवति च शब्दयुक्तिजन्यज्ञानवाचिभ्यां श्रोतव्यमन्तव्यपदाभ्यां दुरागमरूपशब्दाभासतदनुग्राहकन्यायाभासजन्यधीः व्यावर्तनमिति स्वमते श्रवणादिविध्युपपत्तिः । नन्वनिच्छतोऽपि दुर्गन्धादिधीदर्शनान्न ज्ञानं तन्त्रम्; किं तु वस्तुप्रमाणाधीनमिति न विधेयम्; लिङ्गादयः श्रूयमाणा अपि शिलातलप्रयुक्तक्षुरतैक्ष्ण्यवत्कुण्ठीभवन्तीति चेन्न । 'पत्न्यवेक्षितमाज्यं

भवति ' ' विदुषा कर्म कर्तव्यम् ' 'तस्मात् पश्येत् नित्यशः ' इत्यादिना तद्विधानात् । न च तत्र तद्धेत्विन्द्रियसंप्रयोग एव विधेयः । अनिच्छतोऽपि दुर्गन्धादिज्ञानवत् संप्रयोगस्यापि दर्शनात् । एकश्रोत्रगतानेकगकारेषु बुभुत्साप्रयत्नाभ्याममभीष्टगकारज्ञानदर्शनाच्च । न चानभिमतविषयवैमुख्यस्यैव बुभुत्साप्रयत्नसाध्यतया ज्ञानं प्रति तयोर्न प्रयोजकत्वम् । अनभिमतविषये वैमुख्ये सत्यप्यभिमतविषयसांमुख्यं विना ज्ञानाभावस्यानुभवसिद्धत्वात् । 'यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति ' इति विद्याया अङ्गत्वश्रवणादविहितस्याङ्गत्वासंभवात् । किं च यथा दुर्गन्धादिज्ञानस्येच्छाविषयत्वाभावेऽपि ब्रह्मज्ञानस्य तद्विषयत्वम्, यथा च ज्ञानान्तरस्य नियमादृष्टासाध्यत्वेऽपि ब्रह्मज्ञानस्य तत्साध्यत्वम्, यथा वा पर्वतादिज्ञानस्य नयनोन्मीलने सति प्रयत्नान्तरनिरपेक्षत्वेऽपि ध्रुवारुन्धत्यादिज्ञाने तत्सापेक्षत्वम्, तथातिसूक्ष्मब्रह्मज्ञानस्येच्छाप्रयत्नसाध्यत्वसंभवात् । शास्त्रार्थज्ञानस्य नियमेन पुंतन्त्रत्वदर्शनात् । ब्रह्मणश्च शास्त्रार्थत्वात् । तत्त्वज्ञानमपि पुंतन्त्रम् । प्रशस्ताप्रशस्तज्ञानयोर्विधिनिषेधदर्शनाच्च । सर्वत्र ज्ञानविधेस्तत्साधनविषयकत्वकल्पना । उपासनाविधेर्यागादिकर्मविधेश्च तत्साधनमनोधारणादिविषयकत्वापत्तेः । ' विज्ञाय प्रज्ञाय कुर्वीत ' इत्यादिज्ञाने विधिसत्त्वाच्च । त्वया विधेयत्वेनाङ्गीकृतस्य ध्यानस्य ज्ञानभिन्नत्वे तद्विषये जानामीत्यनुभवस्य संस्कारस्मृत्यादेः ' तदभिध्यानाद्विश्वमायानिवृत्तिः ' इत्यविद्यानिवृत्तेश्च ततोऽसंभवापत्तेः । तच्च विधीयमानज्ञानं शाब्दं वा तदभ्यासो वा तत्त्वमनपेक्षारोपितविषयताया ध्यानं वा आपरोक्ष्यफलकं ज्ञानान्तरं वा । न चाद्ये कर्मकाण्ड इव गृहीतसंगतेः स्वतःसिद्धत्वेन कृत्यसाध्यतया विध्यविषयत्वम् । कर्मकाण्डेऽप्यायातजन्यस्य स्वतःसिद्धत्वेऽपि विमर्शजन्यस्य कृतिसाध्यत्वात् । अन्यथाध्ययनविधेरुत्तरक्रतुविधेर्वा तदाक्षेपकत्वानुपपत्तेः । न च द्वितीये मोक्षायापरोक्षाय वाच्ये मोक्षस्य नैयोगिकत्वे स्वर्गादिवदनित्यत्वं स्यात् इति वाच्यम् । अविद्याध्वंसस्य नैयोगिकत्वेऽपि ध्वंसत्वाच्छ्रुतिबलाच्च नित्यत्वोपपत्तेः । न च भवन्मते नाविद्याध्वंसो मोक्षः, किं तु लोकावाप्तिरन्यस्य च स्वर्गादिवदनित्यत्वसंभवः । स्वस्वरूपाविर्भावस्याविद्याध्वंसपर्यवसन्नस्यास्मन्मते मोक्षत्वात् । न चाभ्यास आपरोक्ष्ये हेतुर्दृष्टविधया अदृष्टविधया वा; नाद्यः; परोक्षाभ्यासेन तदापरोक्ष्यादर्शनात्; न द्वितीयः; ज्ञानस्य प्रमाणमात्राधीनत्वादिति वाच्यम् । प्रोषितपुत्राद्यापरोक्ष्याभ्यासेन तदापरोक्ष्यदर्शनात् । न च तद्वदेवाप्रमात्वं स्यात् । तद्वद्विषयबाधाभावात् । ध्यानादिना प्रसन्नदेवतासाक्षात्कारदर्शनेन ध्यानसंस्कृतेनादृष्टगृहीतेन मनसापरोक्षोपपत्तेश्च । न च चतुर्थे शब्दस्य ब्रह्मणि प्रामाण्यं न

स्यात् । ज्ञानाद्यविधायकानां सत्यज्ञानादिवाक्यानां ब्रह्मणि प्रमाणत्वादिति ज्ञाने विध्युपपत्तिः । ननु न परोक्षज्ञानाभ्याससंस्कृतमनसा ब्रह्मापरोक्ष्यं, किं तु 'तत्त्वमसि' इत्यादिवाक्यादेव; 'तद्धास्य विजज्ञौ' 'तमसः पारं दर्शयति' 'वेदान्तविज्ञानसुनिश्चितार्थाः' इत्यादा उपदेशादेवापरोक्षत्वोक्तेश्च; विमतं शाब्दज्ञानमपरोक्षमात्रविषयकं, ज्ञानत्वात्सुखादिज्ञानवत्; आपरोक्ष्यत्वं वेदान्तवाक्यजन्यज्ञानवृत्ति, आपरोक्ष्यज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानत्ववदित्यनुमानाच्चेति चेन्न । 'विजज्ञौ' इत्यादेः परोक्षज्ञानेनाप्युपपत्तेः । 'पारं दर्शयति' इत्यादेर्ग्रामोपदेष्टरि ग्रामं दर्शयतीत्यादिवदुपपत्तेः । 'मनसैवानुद्रष्टव्यम्' इत्यादिश्रुतिविरोधाच्च । सुशब्दस्याप्रामाण्यशङ्कानिरासकत्वेन बलादापरोक्ष्यजनकत्वाप्राप्तेश्च । न च निश्चितपदेनैव तद्व्यावृत्तिः । तस्य संशयव्यावर्तकत्वेऽप्यप्रामाण्यव्यावर्तकत्वासंभवात् । विमतं नापरोक्षं, शब्दजन्यज्ञानत्वाज्ज्योतिष्टोमवाक्यजन्यज्ञानवत्; शब्दो नापरोक्षधीहेतुः, शब्दत्वात्, ज्योतिष्टोमादिशब्दवत्; अपरोक्षत्वं न शब्दजन्यधीवृत्ति, अपरोक्षमात्रवृत्तित्वात्, चाक्षुषत्वादिवदिति प्रतिरोधाच्च । न च दशमस्त्वमसीत्यादिशब्दजन्यापरोक्ष्ये व्यभिचारः । तस्यापि पक्षतुल्यत्वात् । धर्म्यंशे अपरोक्षत्वेऽपि दशमत्वांशे परोक्षेणापरोक्षभ्रमनिवृत्तिर्न स्यात् । धर्मवांस्त्वमसीत्यादिवत्तत्संभवात् । इन्द्रियान्तरजन्येनोपदेशसहकृतेनापरोक्षेण तन्निवृत्त्युपपत्तेश्च । वेदान्तजन्यस्य धर्मादिज्ञानस्यापरोक्ष्यापत्तेश्च । न चापरोक्षार्थशब्दस्यापरोक्षत्वनियमः । शब्दस्यापरोक्षज्ञानजनकत्वस्वभावे ह्यन्यविषयकापरोक्ष्यजनकतापि स्यात् । विषयापरोक्ष्यस्य तन्निमितत्वे जीवेशाभेदबोधकानुमानादप्यापरोक्ष्यापत्तेः । एतेन यं शाब्दबोधमादाय यस्य बोद्धृत्वं, तदभिन्नार्थावगाहित्वनिमित्तं तत्तदर्थस्य साक्षात्त्वमिति निरस्तम् । परमधर्मवांस्त्वमसीत्यादिशब्दादप्यापरोक्ष्यापत्तेः । न च 'तं त्वौपनिषदं पुरुषं पृच्छामि' इत्यादौ 'तत्र साधुः' इति तदन्यासाध्यत्वे सति तत्साध्यत्वरूपा साध्व्यर्थकताधिकत्वेनापरोक्षजनकत्वं शब्दस्येति वाच्यम् । परोक्षज्ञानविषयत्वेनाप्यौपनिषदत्वापत्तिः । धर्मादेर्योगिप्रत्यक्षगम्यत्वात् । न च 'यन्मनसा न मनुते' इति मनसः करणत्वनिषेधाच्छ्रुतिरेव ब्रह्मापरोक्ष्यहेतुः । 'यतो वाचो निवर्तन्ते' इति शब्दस्यापि तन्निषेधात् । न च शक्त्या अबोधकत्वपरं तत् । 'मनसैवानुद्रष्टव्यम्' इति श्रुत्यनुसारात् 'न मनुते' इत्यस्यापक्वमनोविषयत्वात् । 'मनः षष्ठानीन्द्रियाणि' इति मनस इन्द्रियत्वसिद्धेरिन्द्रियाणामपरोक्षधीजनकत्वं हि चक्षुरादिषु क्लृप्तं, शब्दस्यापरोक्षजनकत्वं तु न क्वापि क्लृप्तमिति तत्कल्पनेऽतिगौरवम् ।

इति शब्दापरोक्षत्वभङ्गः ॥ ३ ॥

## ४. जिज्ञासासूत्रस्य मननविधिमूलत्वम् ।

तदेवमुपनिषदेकजन्यपरोक्षज्ञानविषयस्य हरेरापरोक्ष्ये निदिध्यासनं हेतुः, श्रवणमनने तदङ्गे । न ह्यज्ञातस्यायुक्तस्य निदिध्यासनं संभवति । यत्तु श्रवणमङ्गि, प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात्; मनननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणसंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्यैकद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलोपकार्यङ्गे इति, तन्न । श्रवणं हि विचाररूपं न शाब्दज्ञाने करणम् । वेदेन धर्म इव ब्रह्मणि प्रमीयमाणविचारस्यानुमानादौ तर्कस्येव शब्दरूपे तज्ज्ञानरूपे वा करणे इतिकर्तव्यतामात्रत्वात् । न च शब्दशक्तितात्पर्यावधारणं विचारः, अवधृतशक्तितात्पर्यकश्च शब्दः करणमिति विचारस्य करणकोटिप्रवेशेन नेतिकर्तव्यतात्वमिति वाच्यम् । आकाङ्क्षादिसहितशब्दज्ञानस्यैव करणत्वसंभवे तात्पर्यभ्रमनिरासोपक्षीणतयोक्ततात्पर्यज्ञानस्य करणकोट्यप्रवेशात् । अन्यथा मननादेरपि तत्प्रवेशापत्तेः । न चाकाङ्क्षादिधियोऽपि निराकाङ्क्षादिभ्रमनिरासकत्वेनोपक्षीणत्वेनाकाङ्क्षादिकमपि करणकोटिनिविष्टं न स्यादिति वाच्यम् । आकाङ्क्षादिज्ञानं विना कुत्रापि शाब्दबोधो नास्तीत्यन्वयव्यतिरेकाभ्यामाकाङ्क्षादेः करणकोटिप्रवेशोपपत्तेः । तात्पर्यज्ञानस्य नानार्थस्य स्थले क्वचिदुपयोगेऽप्यन्योन्याश्रयदोषेण करणाप्रवेशात् । न च सामान्यतोऽर्थाविगमेन तात्पर्यग्रहसंभवः, त्वदभिमतनिर्विशेषे सामान्यविशेषयोरभावात् । न च सर्वत्र तात्पर्यज्ञानस्याजनकत्वेऽपि यत्र तात्पर्यसंशयविपर्ययोत्तरशाब्दधीस्तत्र तात्पर्यज्ञानस्य हेतुताग्राह्यसंशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनस्येवेति वाच्यम् । निर्विशेषे संशयविपर्ययाद्यसंभवात् । न च तात्पर्यधियो यागेऽवघातादेरिव शब्दे संनिपत्योपकारकतया करणकोटिप्रविष्टत्वेनाङ्गित्वम् । संनिपत्योपकारकत्वेऽपि हि न फलोपकारकमनननिदिध्यासने प्रत्यङ्गित्वम् । अन्यथा प्रयाजादिकं प्रत्यवघातादेरङ्गित्वापत्तेः । न च विशिष्टत्वेन यागप्रविशिष्टतयाङ्गित्वे इष्टापत्तिः, असाधारण्येन शेषिता त्वसाधारणफलोपकारकत्वेन सापि श्रवणस्य संभावितैव असंभावनानिवृत्तिरूपासाधारणोपकारजनकत्वादिति वाच्यम् । श्रवणस्याङ्गित्ववदघातत्वेनावघातस्य प्रयाजादिशेषित्वस्यापाद्यत्वात् । प्रयाजादिजन्योपकारस्य यथा याग एवोपयोगो, न त्ववघाते तथा मननजन्यासंभावनानिवृत्त्यादेः शब्दे एव ह्युपयोगो, न तु श्रवणे । न च करणीभूतशब्दहेतुत्वात् श्रवणस्य करणत्वेनाङ्गित्वम्, मनननिदिध्यासनयोस्तु सहकारिभूतचित्तगतातिशयहेतुत्वाद् फलोपकार्यङ्गतेति वाच्यम् । करणीभूतसोमयागे शब्दस्थानीयेऽतिशयाधायककरणान्तर्गतं तात्पर्यावधारणस्थानीयमभिषवादिकं प्रति शब्दसहका-

रिचित्तस्थानीयदीक्षणीयाङ्गस्य मननादिस्थानीयस्य प्रयाजादेरङ्गत्वापत्तेः। किं च लोके परोक्षधीजनकत्वं शब्दस्य क्लृप्तम्। तथा च शब्दातिशयाधायकस्य श्रवणस्य साक्षात्कारफलजनकमननाद्यङ्गित्वमनुपपन्नम्। मननस्य युक्त्यनुसंधानरूपस्यायुक्तत्वशङ्कानिवर्तकतैव दृष्टा। न तु चित्तैकाग्र्यहेतुत्वम्, तत्कल्पने दृष्टहान्यापत्तेः। मननविधेस्तत्राप्यपूर्वविधित्वापत्तेः। 'मतिर्यावद्युक्तता' इति स्मृतिविरोधाच्च। एतेन तादृक्शङ्कायां सत्यां नानाकोटौ चित्तप्रवणताया-स्तात्पर्यमिति निरस्तम्। विपरीतशङ्कानिवृत्तौ प्रवणताया अर्थसिद्धत्वात्। रूप्यसंस्कारानुवृत्तावपि शुक्तिसाक्षात्कारदर्शनेन विपरीतभावनया ज्ञानप्रतिबन्धकत्वासिद्ध्या तन्निवृत्तेर्ज्ञानहेतुत्वासिद्धेश्च। न चैवं शुक्तिरिति ज्ञानानन्तरं तद्रजततया ज्ञानमिति स्मृतेर्ज्ञानगोचरसंस्कारसत्त्वेऽपि तद्रूप्यमित्यस्मरणेन विपरीतसंस्कारनिवृत्तिस्तत्राप्यस्तीति वाच्यम्। रूप्यसंस्कारसत्त्वेऽपि शुक्तिसाक्षात्कारप्रपञ्चसंस्कारसत्त्वेऽपि ब्रह्मसाक्षात्कारसंभवेन निदिध्यासनसंस्कारनिवृत्तिद्वारा ब्रह्मसाक्षात्कारहेतुरित्यत्र त्वदुक्तेर्व्यधिकरणात्। अश्रुतस्यामतस्य निदिध्यासनासंभवात् सामर्थ्यरूपलिङ्गेन 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' इत्यादिवाक्येन च निदिध्यासनस्य फलसंबन्धात्। प्रकरणेन च श्रवणादेर्हि निदिध्यासनाङ्गत्वम्। न च 'द्रष्टव्यः श्रोतव्यः' इति पाठसांनिध्याच्छ्रवणे फलसंबन्धः। पाठस्य लिङ्गाद्यपेक्षया दुर्बलत्वात्। न च निदिध्यासनरूपभावनाप्रकर्षजन्यत्वे साक्षात्कारस्य स्त्रीसाक्षात्कारवदप्रमात्वापत्तिः। मूलप्रमाणदार्ढ्येन विषयबाधेन च प्रामाण्योपपत्तेः। अतः श्रवणं मननाङ्गनिदिध्यासनसहकृतेन मनसैव हरेरपरोक्ष्यमिति श्रवणमननयोर्निदिध्यासनाङ्गत्वोपपत्तिः। 'अथातो ब्रह्मजिज्ञासा।' इति सूत्रं मननविधिमूलकम्। तत्सूत्रोक्तविचारस्य तत्त्वनिर्णायकन्यायानुसंधानरूपत्वात्। अन्यथा न्यायग्रथनात्मकशास्त्रारम्भसिद्धये तत्कर्तव्यतोक्तिरयुक्ता स्यात्। न तु (?) श्रवणविधिमूलकजिज्ञासासूत्रस्य श्रवणविधिसमानविषयत्वाभावेन तन्मूलकत्वासंभवात्। किं च युक्तायुक्तत्वसंशयादेः संशयपूर्वपक्षसिद्धान्तैर्मीमांसाशास्त्रप्रथितात् संशयादिनिवर्तकात् न्यायजातादन्येनानिवृत्तेः। तादृशन्यायग्रथनात्मकमीमांसाशास्त्राद्ब्रह्मोपयुक्तविचारकर्तव्यताप्रतिपादकादिसूत्रं मननविधिमूलकमेव। न च तात्पर्यविषययुक्तायुक्तत्वादिसंशयादिनिवर्तकविचारापेक्षया तात्पर्यनिर्णायकश्रवणाक्षिप्तलिङ्गविचारस्याभ्यर्हिततया तदाक्षेपकश्रवणविधिमूलकत्वं युक्तमिति वाच्यम्। तात्पर्यनिर्णायकलिङ्गविचारापेक्षया लिङ्गितात्पर्ययुक्तत्वादिशङ्कादिनिवर्तकविचारस्यैवाभ्यर्हितत्वात्। यत्तु

समन्वयाध्यायोक्ततात्पर्यनिश्चायकोपक्रमादियुक्त्यनुसंधानं श्रवणम्, द्वितीयाध्यायोक्तयुक्त्यनुसंधानं मननमिति, तन्न । आदौ यच्छ्रद्धया सिद्धं पश्चान्न्यायेन युक्त्यनपेक्षश्रद्धामात्रेण प्रतिवाक्यमयमस्य वाक्यस्यार्थ इति गुरुमुखाद्वेदार्थग्रहणं श्रवणं पश्चान्न्यायानुसंधानं मननमिति भेदसंभवे युक्तिष्वेव श्रवणमननभेदकल्पनानौचित्यात् । ' मन्तव्यश्चोपपत्तिभिः ' ' मतिर्यावदयुक्तता ' इत्यादिस्मृतेः ।

इति जिज्ञासासूत्रस्य मननविधिमूलत्वम् ॥ ४ ॥

इति श्रीवनमालिविरचिते श्रुतिसिद्धान्तप्रकाशे तृतीयः परिच्छेदः ॥३॥

Indira Gandhi National Centre for the Arts

# चतुर्थः परिच्छेदः

मुक्तसंघा हि नन्दन्ति छायां यत्पादयोः श्रिताः ।
तं वन्दे श्रीहयग्रीवं श्रीसेवितपदाम्बुजम् ॥ १ ॥

उक्तसाधनसंपन्नैर्हरिप्रसादभागिभिः ।
प्राप्यते यत्फलं श्रेष्ठं तदिह वर्ण्यते स्फुटम् ॥ २ ॥

कर्मक्षयः समुत्क्रान्तिरर्चिरादिगतिस्तथा ।
पूर्णानन्दानुभूतिश्चेति मुक्तिः स्याच्चतुर्विधा ॥ ३ ॥

हरिप्रसादयुक्तस्य स्यादेकस्य क्रमादियम् ।
तारतम्येन सा हि स्यात् स्वरूपाणां तथात्वतः ॥ ४ ॥

## १. मुक्तानां तारतम्यसिद्धिः ।

भगवदपरोक्षहेतुकतत्प्रसादाज्जीवं प्रति ब्रह्मच्छादिकायाः कर्मरूपाविद्याय, अनाद्यविद्यायाश्च निवृत्तिरथ देहादुत्क्रमणम्, ततोऽर्चिरादिमार्गेण लोकविशेषस्थं हरिरूपविशेषं प्राप्य लिङ्गदेहजीवपूर्णानन्दाच्छादिकाविद्यानाशपूर्वकं स्वपूर्णानन्दाविर्भावरूपां मुक्तिं प्राप्नोति । तदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशौ 'तद्व्यपदेशात् ।' इति सूत्रात्तस्य ब्रह्मणोऽधिगमे ज्ञाने सति उत्तरस्य भाविनोऽघस्य पापस्याश्लेषोऽसंबन्धः पूर्वस्य कृतस्य विनाशः । 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवंविदि पापं कर्म न श्लिष्यते' 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हैवास्य सर्वे पाप्मनः प्रदूयन्ते' 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।' इति श्रुत्या 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन ।' इति स्मृत्या च ज्ञानात्कर्मक्षयव्यपदेशात् । 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।' इत्यादि श्रुतिस्तु प्रारब्धकर्माभिप्राया । 'तासां मूर्धानमभिनिस्सृतैका तयोर्ध्वमायन्नमृतत्वमेति' 'स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानवाप्त्वामृतः समभवत्' इति श्रुत्या 'ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥' इति स्मृत्या चोत्क्रमणोक्तेः । 'यो वेद निहितं गुहायां परमे व्योमन्' 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति श्रुतेः । न च सोऽवान्तरमोक्षः । 'अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः' इत्यादिना स्वस्वरूपाविर्भावरूपपरममोक्षोक्तेः । 'न तस्य प्राणा उत्क्रामन्ति'

इति श्रुत्या मुक्तसंबन्धिप्राणानामनुत्क्रमणमुक्तम् । न तु जीवस्यानुत्क्रमणम् । जन्माभावात् प्राणोत्क्रमणरूपं मरणं तस्य न भवतीति भावः । ‘ योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ति ’ इति वाक्यस्य पुनस्तस्मात्प्राणोत्क्रमणं न भवतीत्यर्थः । ‘ न जायते म्रियते वा विपश्चित् ’ इति श्रुतेः । न च जीवनित्यताया अज्ञानावारणवात् निवृत्ताविद्यानां ध्वस्तलिङ्गदेहानां जलेन तडागवत्स्फुरत्कशरावादीनामिव हरिप्रसादेन स्वयोग्यतानुसाराराविर्भूतानन्देन पूर्णानां सालोक्यसारूप्यसामीप्यसायुज्यभेदाच्चतुर्विधा मुक्तिः । तत्र केषांचिदेका केषांचिद्द्वे केषांचित्तिस्रः केषांचिच्चतस्रः । यथा तल्लोकस्थशुकशारिकादीनाम्, यथा तत्सारूप्यं प्राप्नुवतां द्वारपालानाम् यथा च गरुडादीनाम्, यथा च विग्रहविशेषे लयं प्राप्य नीडात्पक्षिवद्बहिर्गतानां सालोक्यादिकं प्राप्नुवतां नन्दसुनन्दादीनामिति विवेकः । ऐच्छिक एव तेषां विग्रहः । ‘ संकल्पादेव तच्छ्रुतेः ।’ इति सूत्रात् । ‘ यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति ’ इत्यादिश्रुतेश्च । न च सायुज्यमैक्यमिति शक्यम् । सह युनक्तीति सयुक्, सयुजो भावः सायुज्यमिति व्युत्पत्त्या संबन्धविशेषस्यैव सायुज्यपदार्थत्वात् । ‘ अप पुनर्मृत्युं जयति ब्रह्मणः सायुज्यं गच्छति ’ इत्यादिश्रुतेरपि संबन्धपरत्वात् । ‘ यद्देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छति ’ ‘ पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छति ’ ‘ अग्नेर्वायोरादित्यस्य सायुज्यं गच्छति ’ इत्यादिश्रुतिषु सायुज्यशब्दस्य संबन्धविशेषे प्रसिद्धेः । न त्वत्र सायुज्यशब्दस्यैक्यपरत्वशङ्कापि । मुक्तेः प्राक् परेणापि जीवानामभेदानङ्गीकारात् । एकत्वैक्यं प्राप्तानामन्यत्र गमनासंभवाच्च । अत एव ‘ अन्तरं विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ’ इति श्रुतिरपि व्याख्याता । एकत्र वृक्षे लीनानां पक्षिणां वृक्षादिभेददर्शनाच्च । ‘ पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ’ इत्यादिश्रुत्या भेदज्ञानस्यैव मोचकत्वोक्तेर्मोक्षेऽपि भेद आवश्यकः । ‘ यथाक्रतुरस्मिंल्लोके पुरुषो भवतीति तथेतः प्रेत्य भवति ’ इत्युपायफलयोरेकाकारतायाः श्रुत्युक्तत्वात् । ‘ जगद्व्यापारवर्जम् ’ इति सूत्रेण मुक्तानामीश्वरत्वनिषेधाच्च । न ह्यभेदे तन्निषेधो युज्यते । ‘ ये च मुक्ता भवन्तीह नरा भरतसत्तम । तेषां लक्षणमेतद्धि श्वेतद्वीपनिवासिनाम् ॥ तत्र नारायणपरा मानवाश्चन्द्रवर्चसः । अनिन्द्रिया अनाहारा अनिष्पन्दाः सुगन्धिनः ॥ एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः । तत्र ते पुरुषाः सर्वे पञ्चेन्द्रियविवर्जिताः ॥ प्रतिबुद्धाश्च ते सर्वे भक्ताश्च पुरुषोत्तम । अर्चयन्ति सदा देवं तैः सार्धं रमते च सः ॥ न च तत्राधिकः कश्चित्सर्वे ते समतेजसः ।

कृताञ्जलिपुटा हृष्टा नम इत्येव वादिनः ॥' इति भारते मुक्तानां प्राकृतविग्रहाभावेऽपि दिव्यविग्रह उक्तः । विग्रहोऽपीच्छाधीन एव न त्वावश्यकः । 'अशरीरो वा तदा भवति' इति श्रुतेः । अशरीरत्वेऽपि स्वरूपेणैव तेषामानन्दानुभवरूपो भोगः । 'चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ।' इति सूत्रात् । चितिमात्रेण स्वरूपेण केषांचिन्मुक्तानां भोगः । चिन्मात्रात्मकं हि मुक्तानां स्वरूपमित्यर्थकात् 'सर्वं ह वा एतत्परित्यज्य चिन्मात्र एवैष भवति चिन्मात्र एवावतिष्ठते । तामेतां मुक्तिरित्याचक्षते' इत्यादिश्रुतेश्च । सा च मुक्तिस्तारतम्येन भवति । जीवस्वरूपाणां तारतम्ययुक्तत्वात् । न च 'निरञ्जनः परमं साम्यमुपैति' इति श्रुतिविरोधः । सातिशयत्वेन मुक्तेः स्वर्गादिवदनित्यत्वम्, अधिकदर्शनात् दुःखद्वेषेर्ष्यादिकं च स्यादिति वाच्यम् । निर्दुःखत्वपूर्णत्वादिनैव साम्योक्तेः । 'जगद्व्यापारवर्जम् ।' इति सूत्रेणेश्वरवैलक्षण्यस्य जीवेषूक्तेश्च । जन्यस्यैव सातिशयस्य भावस्य नाशो दृष्टः । तारतम्ययुक्तस्य प्रागविद्ययाच्छादितस्य जीवानन्दस्याविद्यानिवृत्तौ स्वप्रकाशतयावस्थानं मुक्तिः । 'न जायते म्रियते वा विपश्चित्' इत्यादिश्रुत्या जीवोत्पत्तिनिषेधात् । गुर्वाद्याधिक्यदर्शनस्य सुखहेतुताया एव दृष्टत्वेन स्वोत्तमदर्शनस्य दुःखाद्यहेतुत्वात् । दुःखादिहेत्वविद्याविद्यकयोर्नाशाच्च । विभुत्वाणुत्वशेषत्वशेषित्वस्वातन्त्र्यपारतन्त्र्यजगत्कर्तृत्वादिना जीवेशयोस्तारतम्यम् । जीवात्प्रतिशेषिणो लक्ष्मीतत्त्वात् तान्प्रति नियामकात् विष्वक्सेनादितश्चेतरेषामपकृष्टत्वाज्जीवानां परस्परं तारतम्यम् । 'सैषानन्दस्य मीमांसा भवति । ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य ।' इत्यादितैत्तिरीयश्रुत्या 'अथ ये शतं देवानामानन्दाः स एक आजानजानां देवानामानन्दः यश्च श्रोत्रियोऽवृजिनोऽकामहतः' इत्यादिवाजसनेयश्रुत्या 'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः' इत्याद्यैतरेयश्रुत्या 'नृपाद्या शतधृत्यन्ता मुक्तिका उत्तरोत्तरम् । सर्वैर्गुणैः शतगुणा मोदन्ते' इत्यादिश्रुत्या च 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥' इत्यादिस्मृत्या च मुक्तानां तारतम्यसिद्धिः ।

इति मुक्तानां तारतम्यसिद्धिः ॥ १ ॥

## २. परमते जीवन्मुक्तिभङ्गः ।

मुक्तजीवभोगः ईश्वरभोगान्निकृष्टः । जीवभोगत्वात् । संसारिभोगवत् । एवं जीवज्ञानं पक्षीकृत्य प्रयोग उह्यः । ईश्वरानन्दो जीवानन्दादुत्कृष्टः । तन्नि-

यामकानन्दत्वात्। ईश्वरो जीवस्वभावानन्दादित उत्कृष्टस्वभावानन्दादिमान्। तत्प्रेप्सुत्वे सति तत्र शक्तत्वादेवमस्मदादिभोगः मुक्तचतुर्मुखभोगादपकृष्टः, अस्मदादिभोगत्वात्संसारस्थास्मदादिभोगवदित्यनुमानानि च मानम्। न च मुक्तौ जीवेश्वरत्वासिद्ध्याश्रयासिद्धिसाध्याप्रसिद्धिस्वरूपासिद्ध्यादिदोषाः। 'तैस्सार्धं रमते च सः' इत्याद्युक्तभारतवचनेन जीवेशत्वादेः सिद्धेः। 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इत्यादिश्रुत्या प्राप्यप्रापकभावेन तत्सिद्धेश्च। न च 'सैषानन्दस्य' इत्यादिश्रुतिरौपाधिकानन्दपरा। औपाधिकानन्दस्यामीमांस्यत्वात्। उपाधेरश्रवणाच्च। स्वरूपसुखानां प्रत्येकमेकत्वेनाणुत्वेन च संख्यापरिमाणकृतवैषम्याभावेऽपि जलसुधापानजन्यसुखयोरिव मधुरमधुरत्वादिवच्च स्वरूपकृतवैषम्यं मुक्तौ युक्तम्। जन्ये वैषयिकसुखे तारतम्यस्य साधनतारतम्यानपेक्षणात्। किं चोत्तरोत्तरं शतगुणानन्दप्रकाशवाक्येषु प्रतिवाक्यं मुक्तावमकामहतशब्दप्रयोगात्। मानुषानन्दवदकामहतमुक्तानन्देऽपि तारतम्यं सिद्धम्। न च 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति सर्वेषां लौकिकानन्दान्तर्भावोऽनेन वाक्येनोक्तः। लौकिकानन्दस्यानित्यस्य नित्यस्वरूपानन्दान्तर्भावासंभवात्। सर्वभूतानां परमानन्दस्वरूपेश्वराधीनत्वस्यैव वाक्येन बोधनाच्च। 'सोऽश्नुते सर्वान् कामान्' इत्यनेनापि स्वयोग्यसर्वकामाप्तिरेवोच्यते। किं चैकस्य श्रोत्रियस्य सर्वत्र परामर्शे मानुषादिभ्यः साधारणशतगुणितमनुष्यगन्धर्वाद्यनेकानन्दानामेकस्मिन् विरोधात्। भिन्नस्य परामर्शे ह्यकामहतत्वादेरेकरूपतया श्रुतस्याव्यवस्थापकत्वादानन्दव्यवस्था न स्यात्। यदि व्यवस्थार्थं तत्र तत्र तत्पदाकामः तदितरपदकामश्च विवक्ष्यते, तदा श्रुतकल्पनाबाधः स्यात्। न हीन्द्रादिपदे राजपदे वा निष्कामस्य भिक्षुकस्येन्द्राद्यानन्दानुभवोऽस्ति। तस्मात् श्रुत्या पूर्ववाक्येनामुक्तानां तारतम्यमुक्त्वा 'श्रोत्रियस्य च' इत्यादिना चोत्तरवाक्येन मुक्तस्य तदुच्यते। न च सर्वेषु वाक्येष्वकामहतस्यैकत्वेऽपि तदानन्दे सर्वानन्दानामन्तर्भावः, स एव तस्मिन्नानन्दे वक्तव्ये परामृश्यते, तत इन्द्रादिसाम्येन तस्य सर्वत्राभिधानोपपत्तिरिति वाच्यम्। मुक्तानन्दे सर्वेषाममुक्तानन्दानामन्तर्भावे मानाभावात्। मुक्तसुखं परस्परतारतम्यवत्, साधनवत्त्वात्संमतवत्। न चासिद्धिः। 'भक्तिः सिद्धेर्गरीयसी' इति स्मृत्या अल्पभक्तिसाध्यमुक्त्यपेक्षया अधिकमुक्तिहेतुभक्तेरप्याधिक्यस्योक्तेः। 'अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥' इत्यत्रापिशब्देन 'स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।' इत्यत्र कैमुत्येन च साधनतारतम्येन साध्येऽपि तत्सिद्धेः। न च साधनतारतम्यं न फलतारतम्ये

प्रयोजकम्, दण्डतारतम्येऽपि घटे तददर्शनात्। दृष्टस्थले तददर्शनेऽप्यदृष्टघटितसाधनस्थले साधनन्यूनत्वे आधिक्ये च फले तदावश्यकत्वात्। अन्यथा शतगोदानैकगोदानयोः सहस्राश्वमेधैकाश्वमेधयोश्च तुल्यफलकत्वापत्तेः। 'अधिकं तव विज्ञानमधिका च गतिस्तव।' इति मोक्षधर्मे साधनतारतम्येन साध्ये तदुक्तेः। 'साधनस्योत्तमत्वेन साध्यं चोत्तममाप्नुयुः। ब्रह्मादयः क्रमेणैव यथानन्दश्रुतौ श्रुताः॥' इति ब्राह्मोक्तेः। न चान्यथाभावं विहायाविर्भूतनिजरूपेणावस्थानं मुक्तिः, स्वरूपाणां चैकाकारत्वात्कथं तारतम्यमिति वाच्यम्। 'यो यद्रूपः' 'निसर्गो ह्येष भवति' इत्यादिश्रुत्या, 'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।' 'राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥' 'त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा। सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥' 'श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः।' इत्यादिस्मृत्या च चतुर्मुखादेरितरेभ्य उत्कर्षस्य दृष्टेन वागन्तुकेन हेतुना साध्यत्वे तत्रापि हेत्वन्तरान्वेषणेऽनवस्थापत्त्यानादियोग्यत्वापरपर्यायः स्वभावो हेतुर्वाच्य इत्यादियुक्त्या तारतम्यस्य स्वभावत्वात्। 'तद्यथा पेशस्करी पेशसो मात्रामुपादायान्यं नवतरं रूपं तनुते एवमेवायमात्मेदं शरीरं निहत्य विद्यां गमयित्वान्यं नवतरं कल्याणं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वान्येषां भूतानाम्' इति श्रुतौ लिङ्गदेहाविद्यानिवृत्तेरूर्ध्वमपि पितृत्वाद्युक्तेश्चेति मुक्तौ तारतम्योपपत्तिः। ब्रह्मापरोक्षज्ञानिनोऽपि स्वयोग्यपरमानन्दहेतुपरमकाष्ठाया अन्यभक्त्यभावेन तत्साध्यस्य मोचकस्येश्वरप्रसादस्य जीवे संबन्धाभावेन प्रारब्धकर्मणा संसारानुवृत्त्या जीवन्मुक्तिः। भक्तेः सत्त्वे तु प्रसादस्यापि भावेन निःशेषदुःखादिनिवृत्तिविशिष्टा स्वतो नीचोच्चभावापन्नस्वरूपानन्दाविर्भावरूपा मुक्तिर्युक्तेति। परमते तु जीवन्मुक्तिर्न युक्ता। अज्ञाननिवृत्तौ तदुपादेयस्य देहादेरवस्थानासंभवात्। एतेन निवृत्तसर्पविभ्रमस्यापि संस्काराद्भयकम्पानुवृत्तिवत् दण्डसंयोगनाशेऽपि चक्रभ्रमणवच्च संस्कारानुवृत्तेरविद्यानिवृत्तावपि तत्कार्यानुवृत्तिसंभव इति निरस्तम्। उपादाननाशे उपादेयस्थितेः काप्यदर्शनात्। न च विनश्यदवस्थस्य समवायिहेतुं विना स्थितिर्दृष्टा। समवायिहेतुनाशे क्षणं कार्यावस्थितिरिति मतस्याप्रामाणिकत्वात्। द्वितीयादिक्षणावस्थानस्य काप्यदर्शनाच्च। न ह्यविद्यालेशानुवृत्तिः स्वीक्रियते। पूर्वज्ञानानिवृत्तस्यानधिकविषयकोत्तरज्ञानेन निवृत्त्यसंभवात्। ज्ञानानिवर्त्यस्य सत्यत्वापत्तेश्च। ज्ञानेन स्वप्रागभावनिवृत्ताविवाज्ञाननिवृत्तौ प्रतिबन्धकाभावादेः

सहकारिणोऽनपेक्षणाच्च । एतेनानेकशक्तिमदविद्यायाः प्रपञ्चे पारमार्थिकत्वादिभ्रमहेतुशक्तेः प्रपञ्चे अर्थक्रियासमर्थत्वसंपादकशक्तेश्च प्रारब्धकर्मसमकालीनेन तत्त्वसाक्षात्कारेण निवृत्तावप्यपरोक्षप्रतिभासयोग्यार्थावभासजनिकायाः शक्तेरनुवृत्तिः, तद्वत्यविद्यापि तिष्ठत्येवेत्यपि निरस्तम् । पूर्वज्ञानेनानिवृत्तस्यानधिकविषयकेणोत्तरज्ञानेन निवृत्तेरसंभवात् । अविद्यानिवृत्तावपि जीवन्मुक्तिस्वीकारे विदेहमुक्तावप्यविद्यानुवृत्तिप्रसङ्गाच्च । न च 'तस्याभिध्यानाद्योजनात्तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः' इति श्रुतिस्तत्र मानम् । 'भूयः' इत्यस्य 'योजनात्' इत्यनेनान्वयात् । लेशानुवृत्तावस्याः श्रुतेरमानत्वात् । न च विशेषणान्वयापेक्षया विशेषान्वयोऽभ्यर्हितः । सकृन्निवृत्तस्य निवृत्त्ययोगेन तदन्वये बाधात् । न च 'अन्ते' इति व्यर्थम्, परमात्मनो ध्यानात्, भूय इन्द्रियवृत्तीनां योजनात्, ध्यानपरिपाकरूपत्वे सति तत्त्वसाक्षात्कारोत्थभगवत्प्रसादाद्विश्वमायानिवृत्तिरित्यर्थोपपत्तेः । लेशस्थितौ कर्मानुवृत्तिस्तदनुवृत्तौ च ज्ञानप्रतिबन्धेन लेशस्थितिरित्यन्योन्याश्रयात् । न चैककालीनत्वेन स्थित्यादौ नान्योन्याश्रयः । अपेक्षायामेवान्योन्याश्रयदोषात् । यत्तु 'तस्य तावदेव चिरम्' इत्यादिश्रुत्या अस्योत्पन्नात्मसाक्षात्कारस्य प्रारब्धकर्मक्षयमात्रमपेक्षणीयं वैकल्यसंपत्त्यर्थमिति प्रतिपादनेनेश्वरप्रसादो नापेक्ष्यत इति तन्न । 'बन्धको भवपाशेन भवपाशाच्च मोचकः ।' 'मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ।' इत्यादिमानादीश्वरप्रसादादस्य मोचकत्वसिद्धेः । न च 'दृष्ट्वैव तं मुच्यते' इत्यादिश्रुतिविरोधात्स्मृतिरन्यथा नेया । अयोग्यव्यवच्छेदपरत्वेन श्रुतेर्व्याख्यातत्वात् ।

इति परमते जीवन्मुक्तिभङ्गः ॥ २ ॥

## ३. परमतेऽविद्यानिवृत्तिभङ्गः ।

परमतेऽविद्यानिवृत्तिरूपा मुक्तिरनुपपन्ना । तथा हि । सा किमात्मरूपा तद्भिन्ना वा । नाद्यः । असाध्यत्वापत्तेः । द्वितीयेऽपि किं सती मृषा वा । आद्येऽद्वैतहानिः । द्वितीयेऽविद्यादेः सत्यत्वापत्तिः । न च चरमवृत्त्युपलक्षितात्मरूपाज्ञानहानिः, तथा चोपलक्षणसाध्यतयैव साध्यते इति वाच्यम् । काकाद्युपस्थाप्यात् तृणत्वादेरिव वृत्त्युपस्थाप्यधर्मस्य ब्रह्मणि त्वयानङ्गीकारेण तस्योपलक्षणत्वासंभवात् । वृत्त्युपलक्षितस्य पश्चादिव वृत्तेः प्रागपि सत्त्वेनाज्ञानकालेऽपि मोक्षापत्तेः । न च पूर्वमसिद्धोपलक्षणम् । एवं हि वृत्तावेव साध्यत्वं पर्यवसन्नम् । तच्चायुक्तमात्माश्रयापत्तेः । सिद्धस्यापि पाकादेरिच्छाकृतिविशेषो-

पलक्षितस्येष्टत्वकृतिसाध्यत्वापत्तेश्च । किं चोपलक्षणापाये उपलम्यस्य मोक्षस्याप्यपायः स्यात् । न च पाकापायेऽपि पाचकत्वापायो न दृष्टः । पाचकत्वं हि यदि पाककर्तृत्वं तदा 'पचति' इत्येतत्प्रयोगो भूतपूर्वन्यायेनौपचारिकः । यदि तु पाककर्तृतावच्छेदकावच्छिन्नत्वं तत्कर्तृत्वात्यन्ताभावानधिकरणत्वं वा तद्द्वयमपि पश्चादप्यस्ति । न चैवं मुक्तावात्मभिन्नयोग्यत्वादिकं तवास्ति । चिन्मात्रं तु प्रागप्यस्तीत्यसाध्यत्वमेव स्यात् । पाकोपलक्षितत्ववद्वृत्त्युपलक्षितत्वस्याधिक्ये सविशेषत्वापत्तिः । न चोपलक्षणस्यासाध्यत्वेऽप्युपलक्षणगतसाध्यत्वेनोपलक्षितसाध्यत्वोपपत्तिर्घटाकाशोत्पत्तिवदिति वाच्यम् । वृत्तेः सुखदुःखाभावान्यतरभिन्नायाः स्वतः पुरुषार्थत्वाभावेन तदर्थं प्रवृत्तेरनुपपत्तेः । यत्त्वविद्यानिवृत्तिस्तद्विरोधिवृत्तिरेव, यावत्कार्योत्पत्तिविरोधि कार्यमेव हि ध्वंस इति मन्मतमिति तन्न । वृत्तौ नष्टायां विरोधिकार्यान्तरानुदये द्वैतस्योज्जीवनापत्तेः । तदुदये हि तेनैवाद्वैतहानिः । न च चरमवृत्तिध्वंसोऽधिकरणात्मा प्रागुक्तदोषात्सापेक्षनिरपेक्षयोरागन्तुकानागन्तुकयोश्चाभेदासंभवाच्च । किं च वृत्त्युपलक्षित आत्मा जीवन्मुक्तावप्यस्तीति तदापि मोक्षापत्तिः । न च चरमवृत्त्युपलक्षित आत्मा मोक्षः । जीवन्मुक्तिप्रयोजकवृत्त्यपेक्षया परममुक्तिप्रयोजकवृत्तावानन्दाभिव्यक्तिगतविशेषाभावे चरमक्षणेन चरमश्वासेन वोपलक्षित आत्मा मुक्तिरित्यविनिगमनापत्तेः । न च प्रारब्धकर्मप्रयुक्तविक्षेपाविक्षेपाभ्यामभिव्यक्तिविशेषोऽङ्गीक्रियते । निर्विशेषे भाताभातविभागाभावेन तज्ज्ञाने विषयप्रयुक्तविशेषस्यालीकत्वात् । अविद्यानिवृत्तिर्मुक्तिरिति पक्षे मोक्षेऽनुभूयमानकृतिसाध्यत्वादेर्निरासात् । यत्तु पुरुषार्थस्यानन्दप्रकाशस्यासाध्यत्वेऽपि तत्तिरोधायकाज्ञाननिवर्तकवृत्तेः साध्यत्वमात्रेण साध्यत्वोपपत्तिः कण्ठगतमण्यादौ तथा दर्शनादिति तन्न । निर्विशेषस्य तिरोधाने जगदान्ध्यापत्तेः ।

इति परमतेऽविद्यानिवृत्तिभङ्गः ॥ ३ ॥

## ४. परमतेऽविद्यानिवर्तकत्वभङ्गः ।

परमतेऽविद्यानिवर्तकमप्यसंभवि । न च वृत्तिप्रतिबिम्बितचैतन्येन चित्प्रतिबिम्बधारिण्या वा तन्निवर्त्यते । ब्रह्मविषयिण्यां चरमवृत्तौ त्वया ब्रह्मविषयकचित्प्रतिबिम्बनानङ्गीकारात् । आपाततो वेदान्तजन्याया जीवन्मुक्तिप्रयोजिकायाश्च वृत्तेः परममुक्तिहेतुवृत्तौ विषयचित्प्रतिफलनाभ्यां विशेषाभावेनापातजन्यवृत्तित एव परममोक्षापत्तेश्च । चाक्षुषादिवृत्तेरपि तव ब्रह्मविषयकत्वचित्प्रतिबिम्बग्राहि-

त्वयोः सत्वेन ततोऽपि मोक्षापत्तेः। निवर्तकतायां नियमोपगृहीतवेदान्तश्रवणादिजन्यत्वनिवेशे तु द्वेषनिवर्त्येच्छावद्बन्धस्य सत्यत्वापत्तेः। अज्ञानोपादेयवृत्त्याज्ञाननिवृत्तेरसंभवाच्च। न हि तन्त्वादिनाशस्य पटादिनाशेन निवृत्तिर्दृष्टा युक्ता वा। किं च निवर्तकं ज्ञानं न शुद्धविषयकम्, तस्यादृश्यत्वात्। नापि विशिष्टविषयकम्, तस्याध्यस्तविषयकत्वेन भ्रमत्वात्। न चोपहितविषयत्वेऽप्युपाधेरविषयत्वादभ्रमत्वोपपत्तिः। उपाधिविषयतां विनोपहितविषयकत्वासंभवात्। अन्यज्ञानस्यापि नाशकत्वं न संभवति। न च तन्तुनाशस्य पटनाशप्रयोजकत्वदर्शनेन स्वोपादानाविद्यानाशस्यैव तन्नाशकत्वं तन्तुपटयोर्युगपदेवाग्निना नाशेन क्रमिकनाशदर्शनस्य त्वदीयस्य त्वादृशान्यस्य चाप्रामाणिकत्वात्। यत्त्वविद्यानिवृत्तेर्वृत्तिरूपतया न निवर्तकखण्डनावकाशः, वृत्तिनिवृत्तेरात्मरूपतया न तज्जनकखण्डनावकाश इति तन्न। अविद्यानिवृत्तेर्वृत्तिरूपाया वेदान्तजन्यत्वेनाविद्याया ज्ञाननिवर्त्यत्वाभावेन सत्यत्वापत्तेः। अनित्याया वृत्तेर्निवृत्तेर्नित्यात्मरूपत्वासंभवाच्च। अतः सत्यस्यैव बन्धस्यापरोक्षीकृतेशप्रसादादेव निवृत्तिः।

इति परमतेऽविद्यानिवर्तकत्वभङ्गः ॥ ४ ॥

Indira Gandhi National
Centre for the Arts

## ५. चिदभिन्नसुखरूपतायाः पुमर्थत्वभङ्गः।

अहं सुखी स्यामितीच्छाभावेन सुखित्वमेव पुरुषार्थः, न तु सुखरूपत्वम्। पुरुषार्थस्येच्छानियम्यत्वात्। अन्यथा बौद्धमतसिद्धात्मनाशादिरपि पुमर्थः। न एच साक्षात्क्रियमाणसुखमेव पुमर्थः। संबन्धस्त्वनित्यत्वपारतन्त्र्यादिवदवर्जनीयसंनिधिः। ईश्वरादेरस्मदादिसुखं हि पुमर्थः स्यात्। न च हेयतया अज्ञातत्वमपि तत्र प्रयोजकमीश्वरादिनास्मदादिसुखस्य हेयतया ज्ञातत्वादिति वाच्यम्। सुखं हि स्वरूपत एव दुःखवन्न हेयम्। किं तु स्वाधिकसुखकारणविघट्टकत्वेन स्वाधिकदुःखप्रयोजकत्वेन वा ज्ञातम्। ईश्वरे जन्यस्य सुखस्य दुःखस्य चासंभावितत्वेन तस्य तद्धेयत्वज्ञाने मानाभावात्। स्वसंबन्धित्वादेव हेयत्वसंभवेन स्वसंबन्धितयैव साक्षात्क्रियमाणसुखस्य पुमर्थत्वोपपत्तेः। अत एव निषिद्धसुखं संबन्धितयाधिकदुःखादिप्रयोजकतया च ज्ञातमेव हेयम्। मोक्षे तव साक्षात्क्रियमाणसुखत्वाभावाच्च। न हि मोक्षे स्वरूपविषयिणी वृत्तिरस्ति, न वा स्वस्य स्वविषयता तवास्ति। किं चाहमर्थस्यैवाहं मुक्तः स्यामितीच्छानुभूयते। तस्य च तव मोक्षे नाशात्कथं मोक्षः पुमर्थः। न च विशेष्यांशो मोक्षेऽप्यस्ति। विशिष्टगतेच्छादेर्विशेष्यगत-

त्वाङ्गीकारे विशिष्टगतदृश्यत्वमिथ्यात्वादेर्विशेष्यगतत्वापत्तेः। किं च सुखस्य दुःखाभावमात्रत्वे वैशेषिकमोक्षवदपुमर्थत्वापत्तिः। भिन्नत्वे सद्वितीयतापत्तिः। आत्मनः सुखमात्रत्वे सुखप्रकाशाभावे न पुमर्थत्वं स्यादुभयात्मकत्वे चाखण्डार्थत्वहानिः। अर्थभेदाभावे सुखप्रकाशपदयोः पर्यायता च स्यात्। न चाविद्याकल्पितदुःखजडानात्मकत्वरूपव्यावर्त्यभेदेन तदुपपत्तिः। अविद्याकल्पितस्य वेदनाबोधनात्। तद्बोधितस्याविद्याकल्पितत्वासंभवाच्च।

## इति चिदभिन्नसुखरूपतायाः पुमर्थत्वभङ्गः ॥ ५ ॥

अल्पज्ञाज्जीवतो भिन्नो वस्तुतः सर्वविद्धरिः।
विश्वोदयादिकर्ता हि स्वतन्त्रः सर्वनियामकः ॥ १ ॥
वाच्यः सर्वश्रुतीनां हि सत्यानन्तगुणालयः।
गुणानन्त्येन हि ज्ञातो मुक्तिदो नान्यथा क्वचित् ॥ २ ॥
सत्यमशेषविश्वं स्यादक्षानुमानशब्दतः।
अर्थक्रियादिकं न स्यात्ततोऽन्यथा भृशं क्वचित् ॥ ३ ॥
नेश्वरः सर्ववित्सिध्येदपरोक्षो भवेद्विभुः।
अनादिवास्तवं बन्धं स भिनत्ति प्रसादतः ॥ ४ ॥
हरिप्रसादतो ध्वंसोऽविद्यालिङ्गशरीरयोः।
आविर्भावो निजस्य स्यात् पूर्णानन्द (स्वरूपतः ?) ॥ ५ ॥
तारतम्यतया स स्यात् स्वरूपाणां तथात्वतः।
स्वयोग्यत्वेन पूर्णत्वादीर्ष्यादिकं न युज्यते ॥ ६ ॥
— — — ⌣जतः श्रिया सुरगणान् मुक्ता ⌣वृ स्वेच्छया।
यो मुक्तिं स्मृतमात्र एव ददते (?) धर्मार्थकामांस्तथा ॥
वेदान्ते विहितैर्गुणैः सदमितैर्नित्यैः स्वतन्त्रोऽस्ति यः
स श्रीमद्धयकन्धरोऽवतु सदा भक्तप्रियो नो हरिः ॥ ७ ॥
वेदान्तैः प्रतिपादितं मुनिवरैर्ध्येयं हरेर्वैभवं
योऽकाण्डे प्रलपत्यतथ्यमिति यद्बौद्धाधमो माधवे।
वैरं संदधदासुरोऽखिलसमे वक्तुं च तस्योत्तरं
विद्वान् कोऽर्हति रौति किं मृगपतिर्गोमायुशब्दानुगः ॥ ९ ॥
भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबन्धुर्द्विजातेः
दत्वा भूतीः पराः स्वाः धृतकर इति मा देहि मां पद्मया यः।

द्रौपद्याः शाकलेशात् त्रिभुवनमपुषद्यज्वनां दुष्प्रसाद्यः
सिद्धान्तानां प्रकाशाद्धि मम यदुवरः कारितात् प्रीयतां सः॥१०॥
भगवतोऽङ्घ्रिकञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्वैभवं वाचामघराशेश्च शोधनम् ॥ ११ ॥
श्रीगोविन्दविहारभूषितमुखो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रियुगे पुरे मुनिभरद्वाजान्वया ये द्विजाः।
श्रीसन्नाहमुचो वसन्ति वनमाली तत्कुलेऽभूद्बुधः
ग्रन्थे हि श्रुतिसंग्रहे ननु परिच्छेदोऽन्तिमस्तत्कृते ॥ १२ ॥
सिद्धेः सहस्रधा ध्वंसो ध्वान्ताद्वैतस्य सर्वथा।
सिद्धान्तानां प्रकाशेन सदा वयं तु सूरयः ( संतोषं यन्तु सूरयः ? )
॥ १३ ॥
यदत्रास्ति समीचीनमस्ति वा— —— —— ।
ततो गुणादिकं मे नैवेशाधीनस्य सर्वदा ॥ १४ ॥

**इति श्रीवनमालिविरचिते श्रुतिसिद्धान्तप्रकाशे चतुर्थः परिच्छेदः ॥ ४ ॥**

Indira Gandhi National Centre for the Arts

॥ श्रीकृष्णार्पणमस्तु ॥

# प्रथमं परिशिष्टम्

## श्रुतिसिद्धान्तदीपिका-श्रुतिसिद्धान्तप्रकाशगतोद्धृतवाक्यानां सूची सूचीप्रयुक्तसंक्षेपाणां विवरणम् ।

मां. उ.-माण्डूक्योपनिषत्
गौ. का.-गौडपादीयकारिकाः
श्वे. उ.-श्वेताश्वतरोपनिषत्
क. उ.-कठोपनिषत्
ब्र. सू.-ब्रह्मसूत्राणि
बृ. उ.-बृहदारण्यकोपनिषत्
मुं. उ.-मुण्डकोपनिषत्
तै. उ.-तैत्तिरीयोपनिषत्
छां. उ.-छान्दोग्योपनिषत्
पा.-पाणिनिप्रणीता अष्टाध्यायी
भ. गी.-भगवद्गीता
श. ब्रा.-शतपथब्राह्मणम्
नृ. उ. उ.-नृसिंहोत्तरतापिन्युपनिषत्
मै. उ.-मैत्रायण्युपनिषत्
प्र. उ.-प्रश्नोपनिषत्
ऐ. उ.-ऐतरेयोपनिषत्
मै. सं.-मैत्रायणीसंहिता
आप. श्रौ. सू.-आपस्तम्बश्रौतसूत्रम्
महाना. उ.-महानारायणोपनिषत्
नृ. पू. उ.-नृसिंहपूर्वतापिन्युपनिषत्
तै. ब्रा.-तैत्तिरीयब्राह्मणम्
ऐ. आ.-ऐतरेयारण्यकम्
ब्र. सू. शां. भा.-ब्रह्मसूत्रशाङ्करभाष्यम्
के. उ.-केनोपनिषत्
ई. उ.-ईशावास्योपनिषत्
मी. सू.-जैमिनीयपूर्वमीमांसासूत्राणि
तै. सं.-तैत्तिरीयसंहिता
तै. आ.-तैत्तिरीयारण्यकम्
शत. ब्रा.-शतपथब्राह्मणम्
सुबालोप.-सुबालोपनिषत्

## श्रुतिसिद्धान्तदीपिकाग्रन्थस्थोद्धृतवाक्यानामकारादिक्रमेण सूची


| उद्धृतवाक्यम् | मूलग्रन्थः स्थलनिर्देशश्च | पृष्ठाङ्कः |
|---|---|---|
| अग्नेर्वायोरादित्यस्य | — — | ५० |
| अजामेकाम् | श्वेताश्वतरोपनिषत् ४.५ | ३३ |
| अणुर्ह्येष आत्मा | गौपवनश्रुतिः ५७७ | २७ |
| अणोरणीयान् | कठोपनिषत् २.२० | २२ |
| अतिरात्रे षोडशिनम् | तै. सं. का. ७ प्र.४ अ.१० | ४० |
| अथ कस्मादुच्यते | अथर्वशिरःश्रुतिः ५३३ | २ |
| अथ य इहात्मानम् | छांदोग्योपनिषत् ८.१.६ | ५० |
| अनाद्यविद्यया | माण्डूक्योपनिषत् (गौ.का.)१.१६ | ३१ |
| अनाशी परमार्थः | विष्णुपुराणम् २.१४.२४ | १८ |
| अनिरुद्धो हि लोकेषु | महाभारतम् ? | ३२ |
| अनित्यत्वविकारित्व | — — | ४१ |
| अनेकमन्यपदार्थे | पा. २.२.२४ | ११ |
| अन्यश्च परमो | भागवतम् ? | २१ |
| अप पुनर्मृत्युं जयति | श. ब्रा. १०.६.१.४ | ५० |
| अविद्यमानं जीवस्य | स्कन्दपुराणम् ? | ४१ |
| अविद्यायां वर्तमानाः | मुण्डकोपनिषत् १.२.८ | ३० |
| असङ्गो ह्ययं पुरुषः | बृहदारण्यकोपनिषत् ४.३.१५-१६ | २८ |
| अस्माच्छरीरात् | छान्दोग्योपनिषत् ८.३.४ | ४७ |
| अस्मान्मायी सृजते | श्वे. उ. ४.९ | ४ |
| अहमात्मा गुडाकेश | भ. गी. १०.२० | ३२ |
| आत्मनि चैवं | ब्र. सू. २.१.२८ | ३३ |
| आर्तं वाभिदीक्षन्ते | ताण्ड्यब्राह्मणम् १.३१९ | १३ |
| आर्तो जिज्ञासुरर्थार्थी | भ. गी. ७.१६ | १३ |
| आश्रयत्वविषयत्वभागिनी | संक्षेपशारीरकम् १.३१९ | १७ |
| इति गुह्यतमम् | भ. गी. १५.२० | ९ |
| इदं ज्ञानमुपाश्रित्य | भ. गी. १४.२ | ३०,४७ |
| इदं सर्वं यदयमात्मा | बृ. उ. २.४.६.४-५-७ | १८ |
| ईश्वरः सर्वभूतानाम् | भ. गी. १८.६१ | २९ |
| उत्पत्तिस्थितिसंहाराः | स्कन्दपुराणम् ? | ६ |

| | | |
|---|---|---|
| उपदेक्ष्यन्ति ते | भ. गी. ४·३४ | ३१, ५१ |
| उपमा सूर्यकादिवत् | ब्र. सू. ३·२·१८ | २९ |
| उत्तमः पुरुषस्त्वन्यः | भ. गी. १५·१७ | ९ |
| ऊर्ध्वमेकः स्थितः | मैत्रा. उ. ६·३० | ४८ |
| ऊर्ध्वोत्तरमृषिभ्यस्तु | – – | ४९ |
| एकं समस्तं यदिहास्ति | भागवतम् ? | २० |
| एके मुख्यान्यकेवलाः | अमरकोशः | ११ |
| एकोऽहं बहु स्याम् | छान्दोग्योपनिषत् ६·२·३ | २५ |
| एवमेकमिदं विद्धि | भागवतम् ? | २० |
| एवं विज्ञातो भगवान् | ,, | ३ |
| एष आदित्ये हिरण्मयः | छां· उ· १·६·६ | २२ |
| एष देवपथो | छां· उ· ४·१५·६ | ४९ |
| एष नित्यो महिमा | बृ· उ· ४·४·२३ | ७ |
| एषोऽणुरात्मा | मुण्ड. उ. ३·१·९ | २६ |
| करणे ल्युट् | पा. ३·३·११५–११७ | १९ |
| कर्ता शास्त्रार्थवत्त्वात् | ब्र. सू. २·३·३३ | ६ |
| कुतः कुत्र क्व गन्तासि | – – | २० |
| क्षीयन्ते चास्य कर्माणि | मुण्ड. उ. २·२·८ | ४७, ५१ |
| क्षेत्रज्ञं चापि माम् | भ. गी. १३·३ | ३२ |
| क्षेत्रज्ञः करणी तत्र | – – | २१ |
| खण्डो गौः मुण्डो गौः | पा. १.२,६४, वार्तिक ५० | ३९ |
| गौणश्चेन्नात्मशब्दात् | ब्र. सू. १·१.६ | २३ |
| ज्ञानस्वरूपमखिलम् | विष्णुपुराणम् १·१२·३९ | १८ |
| ज्ञानस्वरूपो भगवान् | ,, ,, | १९ |
| जक्षन् क्रीडन् | छां. उ. ८·१२·१३ | २७, २९ |
| जगद्व्यापारवर्जम् | ब्र. सू. ४.४·१७ | २९ |
| जीवः संकर्षणः प्रोक्तः | महाभारतम् ? | ३१ |
| जीवेशावाभासेन | नृसिंहोत्तरतापिन्युपनिषत् ९·५ | ३३ |
| ज्ञाज्ञौ | श्वे. उ. १·९ | ८ |
| ज्ञात्वा मां शान्तिमृच्छति | भ. गी. ५·२९ | ६ |


Indira Gandhi National Centre for the Arts

| | | |
|---|---|---|
| ज्योतींषि विष्णुः | विष्णुपुराणम् २. १२. ३८ | ३९ |
| ततो मां तत्त्वतो | भ. गी. १८·५५ | ६ |
| तत्र चान्द्रमसम् | भ. गी. ८·२५ | २७ |
| तत्र प्रयाता गच्छन्ति | भ. गी. ८·२४ | २७, ४७ |
| तत्र यः परमात्मा | – – | २१ |
| तदात्मानमेवावेदहम् | बृ. उ. १·४·१० | ३२ |
| तदैक्षत | छां. उ. ६.२.३ | १० |
| तद्यो यो देवानाम् | बृ. उ. १·४·१० | ३० |
| तद्वदेव स्थितम् | कूर्मपुराणम् ? | ४१ |
| तद्विजिज्ञासस्व | तै. उ. ३·१ | २ |
| तद्भावभावनापन्नः | – – | २१ |
| ततो हि शैलाब्धिधरादि | विष्णुपुराणम् ? | १९ |
| तदनुप्रविश्य सच्च | तै. उ. २·६ | २५ |
| तम आसीत् | ऋ. १०·१२९·३ | ४ |
| तमसः परस्तात् | श्वे. उ. ३·८ | २२ |
| तमुत्क्रामन्तं प्राणो | बृ. उ. ४·४·२ | २३ |
| तमेकमेवात्मानं जानथ | मु. उ. २·२·५ | २३ |
| तमेव भान्तम् | कठोपनिषत् ५·१५ | २,४४ |
| तमेवं विद्वान् | तै. आ. ३·१·३ | २१ |
| तमेव विदित्वा | श्वे. उ. ३·८·६·१५ | ६,८ |
| तरति शोकम् | छां. उ. ७·१·३ | ३५ |
| तस्मादपि विनिर्मुक्ता | महाभारतम् ? | २७ |
| तस्मिन् प्रसन्ने | भागवतम् ? | ३ |
| तासां मूर्धानमभिनिःसृतैका | कठोपनिषत् ६·१६ | ४८ |
| तेनेदं पूर्णम् | श्वे. उ. ३·९ | १८ |
| तेनैतन्नाभिनन्दन्ति | महाभारतम् ? | ९ |
| ते प्राप्नुवन्ति मामेव | भ. गी. १२·४ | १०,३२ |
| तेषामहं समुद्धर्ता | भ. गी. १२·७ | ३२ |
| दिव्यं ददामि | भ. गी. ११·१८ | ५,२३ |
| द्वितीयाद्वै भयम् | बृ. उ. १·४·२ | १३ |


Indira Gandhi National Centre for the Arts

| | | |
|---|---|---|
| देवर्षिभूताप्तनृणाम् | भागवतम् ? | १८ |
| दैवी ह्येषा गुणमयी | भ. गी. ७·१४ | ३३ |
| दृष्ट्वैव तं मुच्यते | श्वे. उ. ? | ३,३५ |
| द्विपरार्धात्मकः कालः | — — | २५ |
| द्व सत्त्वे समुपाश्रित्य | माध्यमिकशास्त्र-प्रसन्नपदा—२४ | ४० |
| ध्यानं चैवात्मनो भूप | भागवतम् ? | २० |
| न च मां तानि कर्माणि | भ. गी. ९·९ | ७ |
| न जायते म्रियते | कठोपनिषत् २·१८ | ४८ |
| न तत्र सूर्यो | ,, ५·१५ | ४४ |
| न तस्य प्राणा | बृ. उ. ४·४·६ | ४८ |
| न त्वत्समोऽस्त्यभ्यधिकः | भ. गी. ११·४३ | ११ |
| न त्वहं तेषु | भ. गी. ७·१२ | २८ |
| न मां कर्माणि | भ. गी. ४·१४ | २८,३३ |
| न वेति विभाषा | पा. १·१·४४ | १४ |
| नाना विष्णुं मोक्षदो | अमरकोश-क्षीरस्वामीटीका | १० |
| नाभाव उपलब्धेः | ब्र. सू. २·२·२८ | ३९ |
| नाभुक्तं क्षीयते कर्म | — — | ५१ |
| नाहं प्रकाशः | भ. गी. ७·२५ | ३३ |
| नासत्पुरुषमाश्रयेत् | — — | ४० |
| निमित्तमात्रमेवासौ | भागवतम् ? | २५ |
| निरञ्जनः परमम् | मुं. उ. ३·१·३ | २०,४७ |
| नेह नाना | बृ. ४·४·१९, कठ. उ. ४,११ | १० |
| नैवाहस्तस्य | — — | २५ |
| परं ज्योतिरुपसंपद्य | छां. उ. ८·३·४ | ४७ |
| परमात्मा च सर्वेषाम् | विष्णुपुराणम् | ५ |
| परमात्मात्मनोर्योगः | ,, | २० |
| परमार्थस्त्वमेवैको | ,, १·४·३८ | १८ |
| परिमुच्यन्ति सर्वे | मुं. उ. ३·२·६ | ३० |
| परीक्ष्य लोकान् | मुं. उ. १·२·१२ | २ |
| परो ज्ञानमयोऽसद्भिर् | — — | २० |

| | | |
|---|---|---|
| पुमान्न देवो न नरो | — — | २० |
| पुरत्रये क्रीडति | कैवल्योपनिषत् १·१४ | ३१ |
| पुरिशयं पुरुषमीक्षते | प्र. उ. ५५ | २४ |
| पुरुष एवेदं सर्वम् | श्वे. उ. ३·१५ | १८ |
| पुरुषं कृष्णदन्तं पश्यति | ऐ. आ. ३·२·४ | ४१ |
| प्रकृतिर्या मया ख्याता | विष्णुपुराणम् ? | ४ |
| प्रद्युम्नाश्चापि | ,, | २७ |
| प्रधानं पुरुषं चापि | ,, | २४ |
| प्रयतपरिग्रहद्वितीयः | रघुवंशम् १·९५ | ११ |
| प्रियो हि ज्ञानिनो | भ. गी. ७·१७ | ३,५ |
| बहवो ज्ञानतपसा पूता | भ. गी. ४·१० | ३० |
| बहूनामनुग्रहो | — — | ४० |
| बालाग्रशतभागस्य | श्वे. उ. ५·९ | २७ |
| बृह बृहि वृद्धौ | धातुपाठः ७३५–७३६ | २ |
| बृहत्त्वाद्बृंहणत्वाद्ब्रह्म | — — | २ |
| ब्रह्मणा सह ते सर्वे | महाभारतम् ? | २१ |
| ब्रह्म सत्यं तपः सत्यम् | महाभारतम् ? | ३९ |
| ब्रह्मविद् ब्रह्मैव भवति | मुं. उ. ३·२·९ | १८ |
| ब्राह्मणो वै सर्वा देवता | — — | १८ |
| ब्राह्मणोऽस्य मुखम् | ऋ. १०·९०·१२ | १८ |
| भगवद्विग्रहो न नित्यो | गौडाधमः ( मधुसूदनः ? ) | २२ |
| भक्त्या त्वनन्यया | भ. गी. ११·५४ | ३२ |
| मत्प्रसादादवाप्नोति | भ. गी. १८·५६ | २ |
| मत्स्थानि सर्वभूतानि | भ. गी. ९·४ | ३ |
| मत्तः परतरं नान्यत् | भ. गी. ७·७ | १८, ३२ |
| मन उदक्रामन् | ऐ. आ. २·१·४ | २७ |
| मन्मना भव | भ. गी. ९·३४,१८·६५ | ३२ |
| मनसैवानुद्रष्टव्यम् | बृ. उ. ४·४·१९ | ५, ३७ |
| मयाध्यक्षेण प्रकृतिः | भ. गी. ९·१० | २५ |
| मया प्रसन्नेन | भ. गी. ११·४७ | ५ |

| | | |
|---|---|---|
| मयि सर्वमिदं प्रोतम् | भ. गी. ७·१७ | ३२ |
| महाभूतान्यहंकारः | भ. गी. १३·६ | ३२ |
| मामेव ये प्रपद्यन्ते | भ. गी. ७·१४ | ३, ३२ |
| मायां तु प्रकृतिम् | श्वे. उ. ४·३० | ४१ |
| मिथ्यैष व्यवसायस्ते | भ. गी. १८·५९ | ४१ |
| मृत्तिकेत्येव सत्यम् | छां. उ. ६·१·४ | १३ |
| य आत्मनि तिष्ठन् | बृ. उ. | २९ |
| यततामपि सिद्धानाम् | भ. गी. ७·३ | ४८ |
| यतो वाचो निवर्तन्ते | तै. उ. २·४·२·९ | २३ |
| यत्तदद्रेश्यम् | मुं. उ. १·१·६ | ३६ |
| यत्तु कालान्तरेणापि | विष्णुपुराणम् ? | ४० |
| यत्र त्वस्य | बृ. उ. ४·५·१५ | १२ |
| यत्साक्षादपरोक्षाद्ब्रह्म | बृ. उ. ३·४·१ | २ |
| यथा नद्यः स्यन्दमानाः | मुं. उ. ३·२·८ | १७ |
| यदा तु मन्यते | — — | ९ |
| यदा तु शुद्धम् | विष्णुपुराणम् ? | १९ |
| यदादित्यगतं तेजः | भ. गी. १५·१२ | ४४ |
| यदा समस्तदेहेषु | — — | १९ |
| यदि पितृलोककामो | छां. उ. ८·२·१ | ५० |
| यदुदरमन्तरं कुरुते | तै. उ. २·७ | १३ |
| यदेतद्दृश्यते | विष्णुपुराणम् ? | १८ |
| यद्देवानां महिमानम् | महानारायणोपनिषत् २५·१ | ५० |
| यद्यन्योऽस्ति परः | महाभारतम् ? | १९ |
| यन्मनसा न मनुते | के. उ. १·६·१ | ५ |
| यमेवैष वृणुते | मुं. उ. १·२·३, क. उ. २·२८ | ३ |
| यस्तिष्ठति आत्मा जीवो | बृ. उ. ३·७·२२ | ८ |
| यस्मात्परं नापरमस्ति | श्वे. उ. ३·९ | १८ |
| यस्मिन् द्यौः | मुं. उ. २·२·५ | १८ |
| यस्य देवे परा भक्तिः | श्वे. उ. ६·२३ | २ |
| यावानर्थ उदपाने | भ. गी. २·४६ | १४ |


Indira Gandhi National Centre for the Arts

| | | |
|---|---|---|
| ये च मुक्ता भवन्ति | भागवतम् ? | ३०,५० |
| ये तु ज्ञानविदः | ,, | १९ |
| येन मामुपयान्ति ते | भ. गी. १०·१० | ३२ |
| ये हि निष्कलुषा | – – | ४९ |
| यो मामेवमसंमूढो | भ. गी. १५·१९ | ९ |
| योऽकामो निष्काम | बृ. उ. ४·४·६ | ४८ |
| योऽन्यां देवतामुपास्ते | बृ. उ. १·४·१० | १८ |
| यो मद्भक्तः स मे प्रियः | भ. गी. १२·१४,१६ | १२ |
| योगं मे परमम् | – – | ४९ |
| यो वेद निहितम् | तै. उ. २·१·१ | २१ |
| विचित्रशक्तिः पुरुषः पुराणः | – – | २३ |
| विज्ञानसारथिर्यस्तु | कठोपनिषद् ३·९ | ४८ |
| विज्ञानं प्रापके प्राप्ये | – – | २१ |
| विज्ञानमानन्दं ब्रह्म | बृ. उ. ३·९·३४ | २६ |
| विज्ञानमेकं निजकर्मभेद– | विष्णुपुराणम् २·१२·४३,४४ | १९ |
| विद्वान् पुण्यपापे | मुं. उ. ३·१·३ | ९ |
| विभेदजनकेऽज्ञाने | विष्णुपुराण ६·७·९६ | २१ |
| विस्तारः सर्वभूतस्य | – – | १९ |
| विहारोपदेशात् | ब्र. सू. २·३·३४ | २७ |
| वेदान्तविज्ञानसुनिश्चितार्थाः | मुं. उ. ३·२·६ | ३० |
| वेदैश्च सर्वैरहमेव | भ. गी. १५·१५ | २३,२४ |
| वैधर्म्याच्च न स्वप्नादिवत् | ब्र. सू. २·२·२९ | १९ |
| व्रीहिभिर्यजेत | आप. श्रौ. ६·३१·१३ | ४ |
| व्यक्ते च प्रकृतौ लीने | – – | २५ |
| शान्तो दान्तस्तितिक्षुरुपरतः | बृ. उ. ४·४·२३ | २ |
| शारीरश्चोभयेऽपि हि | ब्र. सू. १·२·२० | ९ |
| स एनान् ब्रह्म | छां. उ. ४·१५·५ | २७ |
| स एवं विद्वान् | ऐ. उ. २·१·६ | ४८ |
| स ऐक्षत | बृ. उ. १·२·५ | १९ |
| सच्छब्दः साधुवाचकः | विष्णुपुराणम् ? | ४० |

| | | |
|---|---|---|
| सति संपद्य न विदुः | छां. उ. ६.९.२ | ३० |
| सत्त्वं तु द्विविधं प्रोक्तम् | बौद्धग्रन्थः | ४० |
| सत्त्वं स्वातन्त्र्यमुद्दिष्टम् | महाभारतम् ? | ४० |
| सत्त्वादयो न सन्तीशे | महाभारतम् ? | ७,२० |
| सदेव सोम्येदमग्रे | छां. उ. ६.२.१ | १० |
| सदैकरूपरूपाय | भागवतम् ? | २० |
| सद्भावे साधुभावे च | भ. गी. १७.२६ | ४० |
| समोऽहं सर्वभूतेषु | भ. गी. ९.२९ | ४ |
| स विशेषणे हि | — — | ११ |
| सर्गेऽपि नोपजायन्ते | भ. गी. १४.२ | १० |
| सर्वधर्मान् परित्यज्य | भ. गी. १८.६६ | ३२ |
| सर्वप्रत्ययवेद्ये परे | अद्वैतवेदान्तग्रन्थः | २ |
| सर्वं समाप्नोषि | भ. गी. ११.४० | १८,१९,२१,२४ |
| सलिल एको द्रष्टा | बृ. उ. ४.३.३२ | १३ |
| साक्षी चेता | श्वे. उ. ६.११ | २३ |
| साधनं चेदवश्यम् | श्लोकवार्त्तिकम् ? | ४१ |
| सितनीलादिभेदेन | भागवतम् ? | २० |
| सुपां सुलुक् | पा. ७.१.३९ | १७ |
| सेतुं दृष्ट्वा | — — | ३५ |
| सेयं देवतैक्षत | छां. उ. ६.३.२ | १० |
| सैषानन्दस्य मीमांसा | तै. उ. २.८ | ४८ |
| सोऽश्नुते सर्वान् | तै. उ. २.१.१ | १९,५० |
| सोऽस्माच्छरीरादुत्क्रम्य | ऐ. उ. ४.६ (?) | २७ |
| स्वप्नान्तं सोम्य | छां. उ. ६.८.१ | १४ |
| स्वर्गकामो यजेत | — — | ३१ |
| स्वाभाविकी ज्ञानबलक्रिया च | श्वे. उ. ६.८ | ७,२३ |
| हन्ताहमिमास्तिस्रो देवताः | छां. उ. ६.३.२ | ३२ |

## श्रुतिसिद्धान्तप्रकाशग्रन्थस्थोद्धृतवाक्यानामकारादिक्रमेण सूची



| उद्धृतवाक्यम् | मूलग्रन्थः स्थलनिर्देशश्च | पृष्ठाङ्कः |
|---|---|---|
| अक्षण्वन्तः कर्णवन्तः | ऋग्वेदसंहिता १०·७१·६ | १३५ |
| अग्नेर्वायोरादित्यस्य | .... ... | १३४ |
| अजक्षीरेण जुहोति | .... | ३३ |
| अजायमानो बहुधा | मां. उ. ( गौ. का. ) ३. २४ | ४३ |
| अजो ह्येको | श्वे. उ. ४·५ | १५,१६ |
| अणुर्ह्येव आत्मा | गौपवनश्रुतिः ५७७ | ३० |
| अणोरणीयान् | क. उ. २·२० | ४०,७० |
| अत एवोपमा | ब्र. सू. ३·२·१८ | २९ |
| अतीतानागताश्चैव | .... | १५ |
| अत्र सर्व एकीभवन्ति | बृ. उ. १·४·७ ? | ८२ |
| अत्रायं पुरुषः | बृ. उ. ४·३·९ | ५४,५६ |
| अथ कस्मादुच्यते | अथर्वशिरःश्रुतिः ५३३ | ५१ |
| अथ परा | मुं. उ. १·१·४ | १९ |
| अथ मर्त्योऽमृतो | बृ. उ. ४·४·७ | ८२ |
| अथ ये शतम् | तै. उ. २·८·१ | १३५ |
| अथ हैतत्पुरुषः | बृ. उ. २·१·१७ | ५७ |
| अथातो ब्रह्मजिज्ञासा | ब्र. सू. १·१·१. | १३१ |
| अथातोऽहंकारदेशः | छां. उ. ७·२५·१. | ५७ |
| अदितिर्द्यौः | .... | ७५ |
| अदुःखमसुखं समम् | ... | ८४ |
| अदृश्यत्वादिगुणको | ब्र. सू. १·२·२१ | १९,३६ |
| अधिकं तव विज्ञानम् | महाभारते मोक्षधर्म : | १३७ |
| अनश्नन्नन्यः | श्वे. उ. ४·६ | १९ |
| अनादिमायया सुप्तो | मां. उ. ( गौ. का. ) १·१६ | १३ |
| अनाहुतिर्वै जर्तिलाश्च | ... | ३३ |
| अनित्यत्वविकारित्व- | ... | ११० |
| अनिरुद्धो हि लोकेषु | ... | ५८ |
| अनेकमन्यपदार्थे | पा. २·२·२४ | ९९ |

| | | |
|---|---|---|
| अनेन जीवेन | छां. उ. ६·३·२ | २३ |
| अनेन ह्येतत्सर्वम् | .... | २०,२५ |
| अन्तरं विदित्वा लीना | श्वे. उ. १·७ | १३४ |
| अन्तर्याम्यधिदैवादिषु | ब्र. सू. १·२·१८ | ३६ |
| अन्तस्तद्धर्मोपदेशात् | ब्र. सू. १·१·२० | ३६ |
| अन्यमीशम् | श्वे. उ. ४·७ | १९ |
| अन्ये चांशकला | .... | २८ |
| अन्ये त्वेवमजानन्तः | भ. गी. १३·२५ | १३६ |
| अपक्रमणावधित्वे | कैयटः | ४३ |
| अप पुनर्मृत्युं जयति | श. ब्रा. १०·६·१·४ | १३४ |
| अपाणिपादो | श्वे. उ. ३·१९ | ३९ |
| अप्राप्य मनसा सह | तै. उ. २·९·१ | ५३ |
| अयमपि योगः | महाभाष्यम् | ४२ |
| अवचनेनैव प्रोवाच | नृ. उ. उ. ७ | १२४ |
| अवजानन्ति मां मूढाः | भ. गी. ९·११ | १३७ |
| अविद्यमानं जीवस्य | स्कन्दपुराणम् | ११० |
| अविद्यायामन्तरे | क. उ. २·५ | १३ |
| अविनाभावो व्याप्तिः | तत्त्वचिन्तामणिः | १०१ |
| अविनाशी वारेऽयमात्मा | बृ. उ. ४·५·१४ | १०३ |
| अव्यावृतानुगतम् | सुरेश्वरीयं वार्तिकम् | ५१ |
| अशरीरो वा तदा | .... | १३५ |
| असच्चेत् | .... | ११७ |
| असति प्रकृतिग्रहणे | न्यासः | ४२,११७ |
| असद्वा | तै. उ. २·७·१ | २०,३३,३४,८४ |
| असन्नेव स भवति | तै. उ. २·६·१ | ३४,३६ |
| असतश्च सतश्चैव | .... | १०९ |
| असत्यमप्रतिष्ठम् | भ. गी. १६·८ | ८२ |
| असिद्वितीयोऽनुसार | महाभाष्यम् | ९९ |
| असिद्वितीयोऽसिसहायः | महाभाष्यम् | ९९ |
| अस्तमित आदित्ये | बृ. उ. ४·३·२ | ५५ |

| | | |
|---|---|---|
| अस्त्यन्यो भूतात्मा | मै. उ. ३·२ ? | १६ |
| अस्थूलमनणु | बृ. उ. ३·८·८ | ११२ |
| अस्मादात्मनः सर्वे प्राणाः | बृ. उ. २·१·२० | ७० |
| अस्माच्छरीरात् | छां. उ. ८·३·४ | १६ |
| अस्य गोर्द्वितीयोऽन्वेष्टव्यः | महाभाष्यम् | ९९ |
| अस्यां पृथिव्याम् | .... | १०९ |
| अहमात्मा गुडाकेश | भ. गी. १०.२० | ५८,५९,१०१ |
| अहमुत्क्रान्ते | प्र. उ. ६.३ | ५९ |
| अहरहर्ब्रह्म गच्छन्ति | प्र. उ. ४.४ ? | ५७ |
| अहंकारश्चाहंकर्तव्यं च | प्र. उ. ४.८ | ५८ |
| अहं हरिः | .... | २५ |
| अंशो नानात्वव्यपदेशात् | ब्र. सू. २.३.४३ | २८ |
| आकाश इति होवाच | .... | ७३ |
| आकाशवत्सर्वगतश्च नित्यः | ... | ६९ |
| आचार्यवान् पुरुषो | छां. उ. ६. १४.२ | १४,१२७ |
| आत्मन आकाशः | तै. उ. २.१.१ | ४४,६९ |
| आत्मनि चैवम् | ब्र. सू. २·१·२८ | ४० |
| आत्मा वारे | बृ. उ. २.४·५ | १२४ |
| आत्मा वा इदमेक | ऐ. उ. १·१ | ९९ |
| आत्मेन्द्रियमनोयुक्तो | क. उ. ३·४ | ६१ |
| आत्मैवास्य ज्योतिः | बृ. उ. ४·३·६ | ५६ |
| आदित्यवर्णम् | श्वे. उ. ३·८ | ३९ |
| आदित्यो यूपः | ... | ७७,१०८ |
| आनन्दरूपममृतम् | मुं. उ. २·२·७ | ३९ |
| आनन्दं ब्रह्मणो | तै. उ.२·४·१ | ३५ |
| आनीदवातम् | ऋग्वेदसंहिता १०·१२९·२ | ११९ |
| आप्तकामस्य का स्पृहा | मां. उ. (गौ. का.) १·९ | ९६ |
| आप्रणखात् | छां. उ. १·६·६ ? | ३९ |
| आर्तो जिज्ञासुः | भ. गी. ७·१६ | २६ |
| आर्तं वाभिदीक्षन्ते | ताण्डयब्राह्मणम् ५·९·५ | २५ |


Indira Gandhi National Centre for the Arts

| | | |
|---|---|---|
| आश्रयत्वविषयत्व– | संक्षेपशारीरकम् १.३१९ | ९ |
| इक्षुक्षीरगुडादीनाम् | सुरेश्वरः | ९१ |
| इतिहासपुराणाभ्याम् | ... | १२६ |
| इदं ज्ञानमुपाश्रित्य | भ. गी. १४·२ | १३,१८,२८ |
| इदंत्वसत्त्वयोः | टीका (?) | ११९ |
| इदं सर्वमसृजत | तै. उ. २·६·१ | ४३ |
| इदं सर्वं यदयमात्मा | बृ. उ. २·४·६ | १०८,१०९ |
| इमाः सोम्य | छां. उ. ६·१०·१ | २४ |
| इवोपमायामल्पत्वे | कोशः (?) | १०३ |
| ईक्षतेर्नाशब्दम् | ब्र. सू. १·१.५ | ९६ |
| ईशानो भूतभव्यस्य | क.उ. ४.१२ | १०० |
| ईश्वरः सर्वभूतानाम् | भ. गी. १८.६१ | २६,१०१ |
| उतामृतत्वस्येशानः | ऋग्वेदसंहिता १०.९०.३ | १०९ |
| उत्तमः पुरुषः | भ. गी. १५·१७ | ९ |
| उदरमन्तरं कुरुते | तै. उ. २.७.१ | ५० |
| उपदेक्ष्यन्ति ते ज्ञानम् | भ. गी. ४·३४ | १४ |
| उपदेशभेदान्नेति | ब्र. सू. १·१·२७ | ३४ |
| ऊर्ध्वमेकः स्थितस्तेषाम् | मै. उ. ६.३० | १३३ |
| ऋतं सत्यम् | महानारायणोपनिषत् १२·१ | ३९ |
| एकधा बहुधा चैव | ब्रह्मबिन्दूपनिषत् १२ | ३० |
| एकधैवानुद्रष्टव्यम् | बृ. उ. ४·४·२० | ५० |
| एकमेवाद्वितीयम् | छां. उ. ६·२·१ | ५०,९८ |
| एकशब्दोऽयमन्यप्रधानासहाय- | कैयटः | ९९ |
| एकशब्दोऽयं बह्वर्थः | महाभाष्यम् | ९९ |
| एके मुख्यान्यकेवलाः | अमरः | ९९ |
| एको गोत्रे | पा. ४·१·९३ | ९९ |
| एको देवः | श्वे. उ. ६·१० | २६ |
| एको नारायण | महोपनिषत् १ ? | ३९ |
| एतदेव विदित्वा | बृ. उ. ४·४·२२ | २८ |
| एतमेव ब्रह्मेत्याचक्षते | – – | ५३ |

| | | |
|---|---|---|
| एतस्य वा अक्षरस्य | बृ. उ. ३·८·९ | २६ |
| एतस्यैवानन्दस्य | बृ. उ. ४·३·३२ | १८,१३६ |
| एतत्सर्वं मनः | — — | १०५ |
| एवं ज्ञातो भगवान् | — — | ९७ |
| एष आत्मान्तर्यामी | बृ. उ. ३·७·३ | २० |
| एष एवेदम् | — — | १९ |
| एष त आत्मा | बृ. उ. ३·७·३ | २०,२५ |
| एष प्रजापतिः | ऐ. उ. ५·३ | १०५ |
| एष सर्वेश्वरः | बृ. उ. ४·४·२२ | ३५ |
| ऐतदात्म्यमिदम् | छां. उ. ६·८·७ | २३ |
| ऐन्द्रवायवं गृह्णाति | मै. सं. ४·५·८, आप.श्रौ.सू.१२.१४.८ | ३४ |
| कर्ता शास्त्रार्थवत्त्वात् | ब्र. सू. २.३.३३ | ६०,६१ |
| कस्मिन्नु भगवो | मुं. उ. १.१.३ | १९ |
| कामा येऽस्य | बृ. उ. ४.४.७ | १०५ |
| कामः संकल्प्य | बृ. उ. १.५.३ | ६१ |
| किमात्मको भगवान् | — — | ३९ |
| कीदृक् तत् प्रत्यगिति चेत् | — — | ९० |
| कूर्मं सर्पं तम् | — — | ४० |
| को भवानिति | — — | १०७ |
| क्व च प्रत्यक्षतः | — — | ७३ |
| क्षीयन्ते चास्य कर्माणि | मुं. उ. २.२.८ | १३३ |
| क्षेत्रज्ञं चापि माम् | भ. गी. १३.२ | १६,२६ |
| क्षेत्राणि च शरीराणि | महाभारतम् | २६ |
| गगनं गगनाकारम् | — — | १९ |
| गच्छ गच्छसि चेत् | — — | ५२ |
| गुणवादस्तु | पूर्वमीमांसासूत्र १.२.१० | ७५ |
| गुणादविप्रतिषेधः | ,, १.२.४७ | ७५ |
| गौण्यसंभवात् | ब्र. सू. २.२.३,२.४.४ | ३४ |
| घटोऽयमित्यसा उक्तिः | — — | ९० |
| चतुर्थे द्रव्यार्जनोद्देशेन | — — | ९६ |

| | | |
|---|---|---|
| चन्द्रमस्यस्तमिते | बृ. उ. ४.३.४ | ५६ |
| चन्द्रे कलङ्कः | — — | ४६ |
| चितिमात्रेण तदात्मकत्वात् | ब्र. सू. ४.४.६ | १३५ |
| छागस्य वपायाः | आप. श्रौ. सू. ७.२१.१ | ४३ |
| जगद्व्यापारवर्जम् | ब्र. सू. ४.४.१७ | १८,१३४,१३५ |
| जनिकर्तुः प्रकृतिः | पा. १.४.३० | ४२,४३ |
| जन्माद्यस्य यतः | ब्र. सू. १.१.२ | ८७,९६ |
| जर्तिलयवाग्वा | — — | ३३ |
| जीवो ब्रह्म विशुद्धा | — — | १११ |
| जुष्टं यदा | श्वे. उ. ४.७ | १८ |
| ज्ञाज्ञौ | श्वे. उ. १.९ | १६ |
| ज्ञात्वा माम् | भ. गी. ५.२९ | ८२ |
| ज्ञानाग्निः सर्वकर्माणि | भ. गी. ४.३७ | १३३ |
| ज्यायान् पृथिव्या | छां. उ. ३.१४.३ | १०९ |
| ज्योतिरहं विरजा | महाना. उ. २०.१५ | ५९ |
| तच्चेत्त्वं याज्ञवल्क्य | बृ. उ. ३.७.१ | २० |
| तज्जलान् | छां. उ. ३.१४.१ | ४४ |
| ततस्तु तं पश्यते | मुं. उ. ३.१.८. | १३१ |
| ततस्त्रैगुण्यहीनास्ते | — — | ८२ |
| ततो मां तत्त्वतो | भ. गी. १८.५५ | ५९,८२ |
| ततोऽवबोधाय | विष्णुपुराणम् | ४० |
| तत्त्वब्रह्ममार्गे सम्यक्संपन्नः | जाबाल उ. ६ | १०७ |
| तत्त्वमसि | छां. उ. ६.८.७ | २०,२३,१२९ |
| तत्त्वं परात्मनि | — — | १०७ |
| तत्र प्रयाता | भ. गी. ८.२४ | ३१ |
| तत्र साधुः | पा. ४. ४.९८ | १२९ |
| तत्रैवं सति | भ. गी. १८.१६ | ६१ |
| तत्सत्यम् | छां. उ. ६.८.७ | ८३,८४ |
| तदभिध्यानाद् | श्वे. उ. १.१० | १२८ |
| तदात्मानमेवावेत् | बृ. उ. १.४.९ | ५५,५९ |

| | | |
|---|---|---|
| तदात्मानं स्वयमकुरुत | तै. उ. २.७.१ | ४४ |
| तदा विद्वान् | मुं. उ. ३.१.१ | १८ |
| तदेतदक्षरम् | बृ. उ. ३.८.८ | ५३ |
| तदेवानुप्राविशत् | तै. उ. २.६.१ | ३९ |
| तद्धावत् | — — | ७६ |
| तद्धास्य विजज्ञौ | छां. उ. ६.७.६ | १२९ |
| तद्भूतयोनिम् | मुं. उ. १.१.६ | ४४ |
| तद्यथा नः सुसमाहित | बृ. उ. ४.३.३५ | ३१ |
| तद्यथा पद्मपलाश | छां. उ. ४. १४.३ | १३३ |
| तद्यथा पेशस्करी | बृ. उ. ४.४.४ | १३७ |
| तद्यथा प्रियया स्त्रिया | बृ. उ. ४.३.२१ | १०५ |
| तद्यथेषीकातूलमग्नौ प्रोतम् | छां. उ. ५.२४.३ | १३३ |
| तद्योऽहम् | — — | ३५ |
| तद्वा अस्यैतदाप्तकाममात्मकाम- | बृ. उ. ४.३.२१ | १०४ |
| तद्विजिज्ञासस्व | तै. उ. ३.१ | ४ |
| तद्विज्ञानेन | मुं. उ. २.२.७ | ३५ |
| तद्विप्रासो विपन्यवो | ऋग्वेदसंहिता १.२२.६ | ४० |
| तद्विष्णोः परमं पदम् | ऋग्वेदसंहिता १.२२.५ | ४० |
| तद्व्यपदेशात् | ब्र. सू. ४.१.१३ | १३३ |
| तन्मनोऽकुरुत | बृ. उ. १.२.१ | ६१ |
| तम आसीत् | ऋग्वेदसंहिता १०.१२९.३ | ९९ |
| तमसः पारं दर्शयति | छां. उ. ७.२६.२ | १२९ |
| तमेव भान्तम् | क. उ. ५.१५ | ४ |
| तमेव विदित्वा | श्वे. उ. ३.८ | १०९ |
| तमेवैकमात्मानम् | मुं. उ. २.२.५ | १२५ |
| तमेवं विद्वान् | नृ. पू. उ. १.६ | ३९ |
| तयोरन्यः | श्वे. उ. ४.६ | १६,१९ |
| तस्मात् पश्येत् | — — | १२८ |
| तस्मादेकाकी न रमते | बृ. उ. १.४.३ | २६ |
| तस्मादेकाकी बिभेति | बृ. उ. १.४.२ | २६ |

| | | |
|---|---|---|
| तस्माद्धूम एव | | ७५ |
| तस्य तावदेव चिरम् | छां. उ. १.१४.२ | ८२,१३८ |
| तस्य प्रयोगान्तरे | टुप्टीका | ७६ |
| तस्य महिमानमेति | श्वे. उ.४.७ ? | १९ |
| तस्य सर्वेषु लोकेषु | छां. उ. ७.२५.२ | १८ |
| तस्य ह वा एतस्य | छां. उ. ८.३.४ | ११० |
| तस्याभिध्यानाद्योजनात् | श्वे. उ. १.१० | १३८ |
| तस्यैतदेव निरुक्तं हृदयम् | छां. उ. ८.३.३ | १०४ |
| तान्यहं वेद | भ. गी. ४.५ | ९,१४,९७ |
| ता वा अस्यैता हिता नाम | बृ. उ. २.१.१९ | १०४ |
| तासां मूर्धानमभिनिःसृतैका | क. उ. ६.१६ | १३३ |
| तुरीयं सर्वदृक् सदा | मां. उ. (गौ. का.) १.१२ | ३६,११३ |
| तेजोऽतस्तथा ह्याह | ब्र. सू. २.३.१० | ९६ |
| तेनेदं पूर्णम् | श्वे. उ. ३.९ | १०९ |
| तेन प्रद्योतेनैष | बृ. उ. ४.४.२ | ३१ |
| ते प्राप्नुवन्ति | भ. गी. १२.४ | ५९ |
| तेषां तमेतम् | बृ. उ. ४.४.२२ | ३५ |
| तैस्सार्धं रमते च सः | महाभारतम् | १३६ |
| तं त्वौपनिषदं पुरुषम् | बृ. उ. ३.९.२६ | १२९ |
| तं देवाः सर्वेऽर्पिताः | क. उ. ४.९ | १०० |
| त्रिविधा भवति श्रद्धा | भ. गी. १७.२ | १३७ |
| त्वमेव माता च | नारायणहृदयस्तोत्रम् १८ | २८ |
| त्वं स्त्री पुमानसि | श्वे. उ. ४.३ | २८ |
| दण्डी प्रैषानन्वाह | — — | ८७ |
| दम्भाहंकारः | भ. गी. १७.५ ? | ५८ |
| देवर्षिभूतात्मनृणाम् | भागवतम् | २५ |
| दृश्यते त्वग्र्यया | क. उ. ३.१२ | ६७,१२५ |
| दृष्ट्वैव तं मुच्यते | श्वे. उ.१.८ ? | ९८,१३८ |
| द्रष्टव्यः श्रोतव्यः | बृ. उ. २.४.५ | १३१ |
| द्वयोरेकस्य निर्धारणे | पा. ५.४.९२ | ५० |

| | | |
|---|---|---|
| द्वा सुपर्णा | श्वे. उ. ४.६ | १६,१९,१०१ |
| द्वितीयाद्वै भयम् | बृ. उ.१.४.२ | २६ |
| द्वे ब्रह्मणी | मै. उ. ६.२२ | २४,२५ |
| द्वे विद्ये | मुं. उ. १.१.४ | १९ |
| द्वे सत्त्वे | माध्यमिकशास्त्र-प्रसन्नपदा २४ | ८४ |
| धूमवति महानसादौ | दीधितिः | १०१ |
| ध्यायतीव लेलायतीव | बृ. उ. ४.३.७ | ६१ |
| ध्रुवमपाये | पा. १.४.२४ | ४२ |
| ध्रुवा द्यौर्ध्रुवा पृथिवी | ऋग्वेदसंहिता १०.१७३.४ | ११२ |
| न ऋते त्वत् क्रियते | ऋग्वेदसंहिता १०.११२.९ | १०८ |
| न जायते म्रियते वा विपश्चित् | क. उ. २.१८ | १३४,१३५ |
| न तदस्ति विना | भ. गी. १०.३९ | १०२ |
| न तत्र माया | भागवतम् ? | १८ |
| न तस्य प्राणा | बृ. उ. ४.४.६ | १३३ |
| न त्वेवाहम् | भ. गी. २.१२ | १७ |
| न तु द्वितीयमस्ति | बृ. उ. ४.३.२३ | १०५ |
| न देवा अपि | महाभारतम् | ४० |
| न प्रतीयेत | — — | ११७ |
| न विजानात्ययमहमस्मि | — — | ५७ |
| न विधौ परःशब्दार्थः | — — | ७६ |
| न वेति विभाषा | पा. १.१.४४ | १०६ |
| न स पुनरावर्तते | छां. उ. ८.१५.१ | १८ |
| न सन्नासदुच्यते | भ. गी. १३.१२ | ११९ |
| न हि द्रष्टुर्दृष्टेर्विपरिलोपो | बृ. उ. ४.३.२३ | १०५ |
| न हिंस्यात् सर्वा भूतानि | — — | ८३ |
| नान्योऽतोऽस्ति | बृ. उ. ३.७.२३ | २५ |
| नाना विष्णुं मोक्षदो | — — | १००,१०२ |
| नान्यः प्रतिबलो बली | — — | १०३ |
| नाभाव उपलब्धेः | ब्र. सू. २.२.२८ | ८२,८४ |
| नाभुक्तं क्षीयते कर्म | — — | १३३ |

| | | |
|---|---|---|
| नाभ्या आसीत् | ऋग्वेदसंहिता १०.९०.१४ | ३९ |
| नाम ब्रह्मोपासीत | — — | ३४ |
| नामरूपे व्याकरवाणि | छां. उ. ६.३.२ | ४१ |
| नायमात्मा | क. उ. २.२३ | ३ |
| नारं स्पृष्ट्वा | — — | ७३ |
| नासदासीन्नो सदासीत् | ऋग्वेदसंहिता १०.१२९.१ | ११९ |
| नासीद्रजो व्योम | ऋग्वेदसंहिता १०.१२९.१ | ११९ |
| नास्य जरयैतज्जीर्यते | छां उ. ८.१.५ | १०६ |
| नास्याब्रह्मवित् | मुं. उ. ३.२.९ | ३६ |
| नित्यो नित्यानाम् | क. उ. ५.१३ | १५,१६ |
| नित्यः सर्वगतः | भ. गी. २.२४ | ३० |
| निदिध्यासितव्यः | बृ. उ. २.४.५ | १२७ |
| निमित्तमात्रमेवासौ | — — | ४१ |
| निमित्तोपजननात् प्रागन्यथा | — — | ७६ |
| निरञ्जनः परमम् | मुं. उ. ३.१.३ | १३५ |
| निरनिष्टो निरवद्यः | — — | ११३ |
| निसर्गो ह्येष भवति | — — | १३७ |
| नृपाद्या शतधृत्यन्ता | — — | १३५ |
| नेह नानास्ति | बृ. उ. ४.४.१९ | ८३,८४,१००,१०५ |
| न्यग्रोधफलम् | छां. उ. ६.१२.१ | २४ |
| पञ्चविंशति तत्त्वानि | — — | १०७ |
| पत्न्यवेक्षितमाज्यम् | तै. ब्रा. ३.३.४.१ ? | १२७ |
| पदं मिथ्याकारं यतः | काशिकावृत्तिः ? | ११० |
| पदे जुहोति | — — | ७३ |
| परं ज्योतिरुपसंपद्य | छां. उ. ८.३.४ | १८,३१,६१,१३६ |
| परः पराणाम् | — — | ३३ |
| परमं ब्रह्म | मुं. उ. ३.२.९ | २० |
| परमं साम्यमुपैति | मुं. उ. ३.१.३ | १९ |
| परामृतात् परिमुच्यन्ति | मुं. उ. ३.२.६ | १३ |
| परेऽव्यये | मुं. उ. ३.२.७ | १९,२५ |

| | | |
|---|---|---|
| पवित्राणां पवित्रम् | विष्णुसहस्रनामस्तोत्रम् १० | ११० |
| पशुना यजेत | — — | ४३ |
| पश्यन्नेतन्न पश्यति | बृ. उ. ४.३.२३ | १०५ |
| पश्य मे पार्थ | भ. गी. ११.५ | ३९ |
| पादोऽस्य विश्वा | ऋग्वेदसंहिता १०.९०.३ | २८,१०९ |
| पितॄणामेव महिमानम् | महानारायणोपनिषत् २५.१ | १३४ |
| पुण्यपापे विधूय | मुं. उ. ३.१.३ | १९ |
| पुण्येन पुण्यलोकं नयति | प्रश्नोपनिषत् ३.७ | ९६ |
| पुत्रात् प्रमोदो | काशिकावृत्तिः ? | ४२ |
| पुरा कल्पापाये | भागवतम् ? | ३९ |
| पुरुषं एवेदं सर्वं व्याप्तम् | श्वे. उ. ३.१५ ? | १०९ |
| पुरुषं कृष्णं पिङ्गलम् | महानारायणोपनिषत् १२.१ | ३९ |
| पुरुषं सोम्य | छां. उ. ६.१५.१ | २४ |
| पुरुषान्न परं किंचित् | क. उ. ३.११ | १०९ |
| पूर्वमेवाहमिहासम् | स्मृतिः ? | ४० |
| पृथगात्मानम् | श्वे. उ. १.६ | १६,१८,३६,८४,१३४ |
| पृथगुपदेशात् | ब्र. सू. २.३.२८ | १९ |
| पृथग्विनान्तरेणर्ते | अमरः ? | १०१ |
| पृथिव्यप्सु प्रलीयते | सुबालोप.२.२ | ९६ |
| प्रकृतिं पुरुषम् | भ. गी. १३.१९ | ४० |
| प्रकृतेः क्रियमाणानि | भ. गी. ३.२७ | ६१ |
| प्रतियोगिनि दृष्टे च | श्लोकवार्तिकम् ? | ७८ |
| प्रमामात्रे नानुगतो गुणः | मणिः ? | ६८ |
| प्रयतपरिग्रहद्वितीयः | रघुवंशम् १.९५ | ९९ |
| प्राज्ञेनात्मना | बृ. उ. ४.३.३५ | १०५ |
| प्राणा वै सत्यम् | बृ. उ. २.१.२० | ११० |
| प्राबल्यमागमस्यैव | — — | ७२,७३ |
| प्रियो हि ज्ञानिनो | भ. गी. ७.१७ | ३ |
| फलवत्संनिधौ अफलं तदङ्गम् | शाबरभाष्यम् ४.४.१९ | ८४ |
| बन्धको भवपाशेन | — — | १३८ |

| | | |
|---|---|---|
| बह्वो ज्ञानतपसा | भ. गी. ४.१० | १३,१५ |
| बहु स्याम् | छां. उ. ६.२.३ | ४४ |
| बहूनां जातिपरिप्रश्ने | पा. ५.४.९३ | ५० |
| बालाग्रशतभागस्य | श्वे. उ. ५.९ | ३० |
| बुद्धेर्गुणेनात्मगुणेन | श्वे. उ. ५.८ | ३२ |
| बृहन्तो ह्यस्मिन् | — — | ३३ |
| ब्रह्म दाशा | आथर्वणिकब्रह्मसूक्तम् | २८ |
| ब्रह्म वा इदमग्र | बृ. उ. १.४.१० | २०,२४ |
| ब्रह्मविदाप्नोति | तै. उ. २.१ | ३९,५०,५१ |
| ब्रह्म सत्यम् | महाभारतम् ? | ८४ |
| ब्रह्म हैव ते | — — | १०५ |
| ब्रह्मेशानादिभिः | — — | ३३ |
| ब्रह्मैवेदं विश्वम् | मुं. उ. २.२.११ | १९ |
| ब्रह्मैवेदं सर्वम् | नृसिंहो. ७.५ | १०९ |
| ब्राह्मणो न हन्तव्यः | — — | ६३ |
| ब्राह्मणो वै सर्वा देवता | — — | १०८ |
| ब्राह्मणोऽस्य मुखम् | ऋग्वेदसंहिता १०.९०.१२ | २८,१०८ |
| भक्तिः सिद्धेर्गरीयसी | — — | १३६ |
| भगवद्विग्रहो न नित्यो | गौडाधमः ( मधुसूदनः ? ) | ४० |
| भगवन्नाहमात्मवित् | मै. उ. १.२ | १०७ |
| भिद्यते हृदयग्रन्थिः | मुं. उ. २.२.८ | ९७ |
| भूतग्रामः स एवायम् | भ. गी. ८.१९ | ४४ |
| भूमा नारायणाख्यः | — — | ५८ |
| भेदव्यपदेशात् | ब्र. सू. १.१.१७ | १९ |
| भेदव्यपदेशाच्चान्यः | ब्र. सू. १.१.२१ | १६,३६ |
| भेदाद्भिन्नतया | — — | ५ |
| भोक्तारं यज्ञतपसाम् | भ. गी. ५.२९ | ३६,५०,८४ |
| भोगमात्रसाम्यलिङ्गाच्च | ब्र. सू. ४.४.२१ | १८ |
| मतिर्यावदयुक्तता | स्मृतिः | १३१,१३२ |
| मत्तः परतरम् | भ. गी. ७.७ | ३३,५९,१०९ |


Indira Gandhi National Centre for the Arts

| | | |
|---|---|---|
| मत्तः सर्वम् | भ. गी. १०.८ | ५९ |
| मत्प्रसादादवाप्नोति | भ. गी. १८.५६ | ३,१३८ |
| मध्य आत्मनि तिष्ठति | क. उ. ४.१२ | १०० |
| मन उदक्रामन् | ऐ. आ. २.१.४ | ३१,६१ |
| मनसैवानुद्रष्टव्यम् | बृ. उ. ४.४.१९ | ६७,१२४,१२५,१२९ |
| मनः षष्ठानीन्द्रियाणि | भ. गी. १५.७ | १२९ |
| मनो ब्रह्म | तै. उ. ३.४.१ | १०७ |
| मन्तव्यश्चोपपत्तिभिः | — — | १३२ |
| मम चन त्वा युवतिः | ऋग्वेदसंहिता | ८३ |
| ममैवांशो जीवलोके | भ. गी. १५.७ | २८ |
| मयाध्यक्षेण प्रकृतिः | भ. गी. ९.१० | ४१ |
| मया प्रसन्नेन | भ. गी. ११.४७ | ४०,१२५ |
| महद्गुणत्वाद् | — — | ५१ |
| महाभूतान्यहंकारः | भ. गी. १३.६ | ५८ |
| महिषीं ससत्वाम् | — — | १६ |
| माममृतं कृधि | — — | ५९ |
| मामेकं शरणम् | भ. गी. १८.६६ | ५९ |
| मामेव ये | भ. गी. ७.१४ | ५९ |
| मायां तु | श्वे. उ. ४.३० | १०९,११३ |
| मिथ्यैष व्यवसायस्ते | भ. गी. १८.५९ | ११० |
| मिथ्योपपदात् | पा. १.३.७१ | ११० |
| मुक्तानामपि सिद्धानाम् | — — | १३५ |
| मुखं व्यादाय | वर्धमानः | ४३ |
| मृत्तिकेत्येव सत्यम् | छां उ. ६.१.४ | १०७ |
| मृत्योः स मृत्युमाप्नोति | क. उ. ४.१० | १०० |
| य आत्मनि तिष्ठन् | श. प. ५४.५.३० | १६,२८,१०१ |
| य आत्मनोऽन्तरः | — — | २५ |
| य आत्मा | — — | ३५ |
| य आत्मानमन्तरोपयमयति | बृ. उ. ३.७.११ | २५ |
| य एतस्मिन् | तै. उ.२.७ | २६ |

| | | |
|---|---|---|
| य एवं विद्वान् | नृ. पू. उ. १.६ | ५० |
| य एषोऽन्तरादित्ये | छां. उ. १.६.६ | ३९ |
| य एषोऽन्तर्हृदय | बृ. उ. २.१.१७ | १००,११२ |
| यश्चिकेत तन्न मोघम् | ऋग्वेदसंहिता | ८२ |
| यजमानः प्रस्तरः | — — | ७,७५,७७,१०८ |
| यतो वा | तै. उ. ३.१ | ४२,५३,८७,९६ |
| यतो वाचो | तै. उ. २.९ | ५३,१२९ |
| यत्तदद्रेश्यम् | मुं. उ. १.१.६ | ६६ |
| यत्तु कालान्तरेणापि | — — | १०९ |
| यत्र त्वस्य | बृ. उ. ४.५.१५ | २०,८२,१०२ |
| यत्र पूर्वे साध्याः | ऋग्वेदसंहिता १०.९०.१६ | ४० |
| यत्र हि द्वैतमिव भवति | बृ. उ. ४.५.१५ | १०३ |
| यत्राविचारपुरःसरमेव | विवरणम् | ७८ |
| यत्रैष एतत्सुप्तोऽभूत् | बृ. उ. २.१.१६ | ११२ |
| यत्साक्षादपरोक्षाद् | बृ. उ. ३.४.१ | ६७ |
| यथाक्रतुरस्मिँल्लोके | छां. उ. ३.१४.१ | १३४ |
| यथा च द्वौ प्रतिषेधौ | महाभाष्यम् | १०२ |
| यथाणुर्न चक्षुषः | — — | ३३ |
| यथाध्यानार्थेऽपि | ब्र. सू. शां भा. ३.३.३७ | ३५ |
| यथा नद्यः स्यन्दमानाः | मुं. उ. ३.२.८ | १०३ |
| यथा शकुनिः | छां. उ. ६.८.२ | २४ |
| यथा सोम्य पुरुषम् | छां. उ. ६.१४.१ | २४ |
| यथा सोम्य मधुकृतः | छां. उ. ६.९.१ | २४ |
| यथा सोम्य महतो | छां. उ. ६.११.१ | २४ |
| यथास्मिन्नाकाशे | बृ. उ. ४.३.१९ | १०५ |
| यथैषा पुरुषे छाया | प्र. उ. ३.३ | २९ |
| यथोदकं दुर्गे वृष्टम् | क. उ. ४.१४ | १०१ |
| यथोदकं शुद्धे शुद्धम् | क. उ. ४.१५ | १००,१०१ |
| यथोर्णनाभिः | मुं. उ. १.१.७ | ३९,४४ |
| यदक्षरं वेदविदो | भ. गी. ८.११ | ५३ |

| | | |
|---|---|---|
| यदन्यद्वायोः | – – | ११९ |
| यदात्मको भगवान् | – – | ३९ |
| यदा पश्यः पश्यते | मुं. उ. ३.१.३ | १६,३६,३९ |
| यदा पश्यत्यन्यमीशम् | श्वे. उ. ४.७ | १६ |
| यदाहवनीये जुहोति | तै. ब्रा. १.१.१२ | ७२ |
| यदि पितृलोककामो | छां. उ. ८.२.१ | १३४ |
| यदेकमव्यक्तम् | महानारायणोपनिषद् १.५ | ४२ |
| यदेव भगवान् वेद | बृ. उ. २.४.२ | १४ |
| यदेव विद्यया करोति | छां. उ. १.१.१० | १२८ |
| यदेवेह तदमुत्र | क. उ. ४.१० | १०० |
| यद्देवानामेव महिमानं गत्वा | महाना. उ. २५.१ | १३४ |
| यद्द्वैतं न पश्यति | बृ. उ. ४.३.२३ | १०४,१०५ |
| यद्यपि जीव एव ब्रह्म | भामती | ३ |
| यद्युद्गाता जघन्यः | – – | ७६ |
| यन्न पश्यति | – – | १०५ |
| यन्मदन्यन्नास्ति | बृ. उ. १.४.२ | २६ |
| यन्मनसा न मनुते | के. उ. १.५ | १२४,१२५,१२९ |
| यमात्मा न वेद | – – | २५ |
| यस्मात्परं नापरमस्ति | श्वे. उ. ३.९ | १०९ |
| यस्मिन् द्यौः पृथिवी | मुं. उ. २.२.५ | १०८ |
| यस्मिन् पञ्च पञ्चजना | बृ. उ. ४.४.१७ | १०० |
| यस्य ज्ञानमयं तपः | मुं. उ. १.१.९ | ३२ |
| यस्य पृथिवी शरीरम् | बृ. उ. ३.७.३ | २० |
| यस्य प्रसादात् | नारायणश्रुतिः | ३ |
| यस्य येनार्थसंबन्धो | वार्त्तिकम् ! | १०४ |
| यस्यात्मा शरीरम् | – – | २५ |
| यस्यामतं तस्य मतम् | के. उ. २.३ | १२४ |
| यः सर्वज्ञः | मुं. उ. १.१.९ | ३३,३४,३५ |
| याथातथ्यतोऽर्थान् | ई. उ. ८ | ८२,८३,१०९ |
| यावन्मोहम् | – – | २६ |

| | | |
|---|---|---|
| यावानर्थ उदपाने | भ. गी. २.४६ | १०८ |
| युञ्जानः प्रथमं मनस्तत्त्वाय | श्वे. उ. २.१ | १०७ |
| ये च मुक्ता | – – | १३,१३४ |
| येनाश्रुतं श्रुतम् | छां. उ. ६.१.३ | १०६,१०८ |
| योऽकामो निष्काम | बृ. उ. ४.४.६ | १३४ |
| योनिष्ट इन्द्र | – – | ४४ |
| योऽन्यत्रात्मनः सर्वम् | बृ. उ. २.४.६ | १०३ |
| योऽन्यां देवताम् | बृ. उ. १.४.१० | २५ |
| यो मामशेष- | – – | ३६ |
| यो यद्रूपः | – – | १३७ |
| योऽयं विज्ञानमयः | बृ. उ. ४.३.७ | ५० |
| यो यो देवानाम् | बृ. उ. १.४.१० | १५,२४ |
| यो वा अनन्तस्य | – – | ३३ |
| यो विज्ञानघनः | – – | ४५ |
| यो वेद निहितम् | तै. उ. २.१.१ | १८,५०,१३३ |
| योषितमग्निम् | – – | ३४ |
| रजनीं घोरसत्त्वनिषेविताम् | – – | १६ |
| रमणीयचरणाः | छां. उ. ५.१०.७ | १३ |
| राक्षसीमासुरीं चैव | भ. गी. ९.१२ | १३७ |
| राजा राष्ट्रम् | | १०८ |
| रुक्मवर्णं कर्तारमीशम् | मुं. उ. १.३ | ६१ |
| रूपं रूपं प्रतिरूपो बभूव | बृ. उ. २.५.१९ | ३०,१०९ |
| लवणमेतदुदके | छां. उ. ६.१३.१ | २४ |
| लोकवत्तु लीलाकैवल्यम् | ब्र. सू. २.१.३३ | ९६ |
| लोहितोष्णीषा ऋत्विजः | षड्विंशब्राह्मणम् ३.८ ? | ८७ |
| वाचारम्भणम् | छां. उ. ६.१.४ | १०५,१०७ |
| वाचैवायं ज्योतिषास्ते | बृ. उ. ४.३.५ | ५६ |
| वायोरग्निः | तै. उ. २.१ | ९६ |
| वासुदेवात्परं नास्ति | – – | १०९ |
| विकारशब्दान्नेति | ब्र. सू. १.१.१३ | ३४ |



Indira Gandhi National Centre for the Arts

| | | |
|---|---|---|
| विचित्रशक्तिः | – – | ४० |
| विज्ञानघन | बृ. उ. २.४.१२ | ६ |
| विज्ञानं ब्रह्म | बृ. उ. ३.९.३४ ? | ६१ |
| विज्ञानं यज्ञम् | तै. उ. २.५.१ | ६१ |
| विज्ञाय प्रज्ञाय | – – | १२८ |
| विदुषा कर्म कर्तव्यम् | – – | १२८ |
| विद्वान् नामरूपाद् | मुं॰ उ॰ ३॰२॰८ | ३१ |
| विधिना त्वेकवाक्यत्वात् | मी॰ सू॰ १॰२॰७ | ५२ |
| विनञ्भ्यां नानाञौ न सह | पा॰ ५॰२॰२७ | १०२ |
| विपर्ययेण तु क्रमोऽतः | ब्र॰ सू॰ २॰३॰१४ | ९६ |
| विप्रतिषेधाद्विकल्पः | – – | ७६ |
| विमुक्तश्च विमुच्यते | क॰ उ॰ ५॰१ | १११ |
| विवक्षितगुणोपपत्तेश्च | ब्र॰ सू. १॰२॰२ | ३६ |
| विश्वतश्चक्षुः | श्वे. उ॰ ६॰३ | ३९ |
| विश्वं सत्यम् | ऋग्वेदसंहिता | ८२, ११९ |
| विषं भुङ्क्ष्व | – – | ५२,५४ |
| विहारोपदेशात् | ब्र॰ सू॰ २॰३॰३४ | ६२ |
| वेत्थ नु त्वम् | बृ॰ उ॰ ३॰७॰१ | २० |
| वेदान्तविज्ञानसुनिश्चितार्थाः | मुं. उ. ३.२.६ | १३,१२९ |
| वेदे भूरिप्रयोगाच्च | गरुडपुराणम् | ३९ |
| वेदैश्च सर्वैरहमेव | भ. गी. १५.१५ | ३३ |
| वैधर्म्याच्च न | ब्र. सू. २.२.२९ | ८२ |
| वैषम्यनैर्घृण्ये | ब्र. सू. २.१.३४ | ९६ |
| व्यतिहारः | ब्र. सू. ३.३.३७ | ३५ |
| व्यभिचारादि– | – – | ११ |
| व्रीहीनवहन्ति | आप. श्रौ. सू. १.१९.११! | ९५,१२५ |
| शान्त उपासीत | छां. उ. ३.१४.१ | ४४ |
| शारीरश्चोभयेऽपि | ब्र. सू. १.२.२० | १६,२०,३६ |
| शास्त्रफलं प्रयोक्तरि | – – | ६० |
| शुक्तौ ज्ञातायाम् | वाचस्पतिः | १०६ |

| | | |
|---|---|---|
| शृण्वन्तः श्रोत्रेण | छां. उ. ५.१.८ | ६१ |
| श्रद्धामयोऽयं पुरुषो | भ. गी. १७.३ | १३७ |
| श्रोतव्यः | बृ. उ. २.४.५ | १२७ |
| श्रोत्रियस्य च | तै. उ. २.८.१ | १३६ |
| श्लोकं वैकुण्ठनामानम् | पाञ्चरात्रम् | ४० |
| ष्णान्ता षट् | पा. १.१.२४ | ९९ |
| स एतान् | छां. उ. ४.१५.५ | ३१ |
| स एवं विद्वान् | ऐ. उ. ४.६ | १३३ |
| स एवाधस्तात् | छां. उ. ७.२५.१ | ५७,११७ |
| स एवेदं सर्वम् | छां. उ. ७.२५.१ | ५७ |
| संकल्पादेव तच्छ्रुतेः | ब्र. सू. ४.४.८ | १८,६२,१३४ |
| संकल्पादेवास्य पितरः | छां.उ.८.२.१ | ६२ |
| संगतिग्रहणाभावात् | बौद्धाधिकारः | ११८ |
| सच्च त्यच्च | तै. उ. २.६.१ | ४३ |
| सज्जनः सज्जनो जातः | — | १११ |
| स तत्र पर्येति | छां. उ.८.१२.३ | १६,१८,३१,६१,६२ |
| | — — | १३३ |
| स तपोऽतप्यत | बृ. उ. १.२.६ | ४३ |
| सति संपद्य | छां. उ. ६.९.२ | १३ |
| सत्यकामः सत्यसंकल्पः | छां. उ. ८.१.५ | ३५ |
| सत्यं ज्ञानम् | तै. उ. २.१.१ | ६,४५,७२,११०,११५ |
| सत्यः सोऽस्य | — — | ३६ |
| सत्याद्भूतानि जातानि | — — | ११९ |
| सत्त्वादयो न सन्तीशे | विष्णुपुराणम् | ३९ |
| सत्त्वं स्वातन्त्र्यमुद्दिष्टम् | महाभारतम् | ११० |
| सदायतनाः सत्प्रतिष्ठाः | छां. उ. ६.८.४ | २३ |
| सदेव सोम्य | छां. उ. ६.२.१ | २३,२४,९९ |
| सद्भावे साधुभावे च | भ. गी. १७.२६ | ११० |
| सन्मूलाः सोम्य | छां. उ. ६.८.४ | २३ |
| स प्राणमसृजत | प्र. उ. ६.४ | ५९ |


Centre for the Arts

| | | |
|---|---|---|
| स भूमिं विश्वतो | ऋग्वेदसंहिता १०.९०.१ | १०९ |
| समानकर्तृकयोः | पा. ३.४.२१ | ४३ |
| समारोप्य स्वरूपेण | वाचस्पतिः | ५८ |
| समिधो यजति | तै. सं. २.६.१.१ | ७६ |
| समुद्रजलस्थानीया मुक्ता | | १०३ |
| स यथा दुन्दुभेर्हन्यमानस्य | बृ. उ. २.४.७ | १०३,१०४, १०९ |
| स यथार्द्रैन्धनाग्नेः | बृ. उ. २.४.१० | १०३ |
| स यथा सर्वासामपाम् | बृ. उ. २.४.११ | १०२ |
| स यथा सैन्धवखिल्य | बृ. उ. २.४.१२ | १०२ |
| स यो ह वै | मुं. उ. ३.२.९ | १९, २५ |
| सर्गेऽपि नोपजायन्ते | भ. गी. १४.२ | ९९ |
| सर्वतः पाणिपादम् | भ. गी. १३.१३ | ३९ |
| सर्वं कर्माखिलम् | भ. गी. ४.३३ | ९५ |
| सर्वं खल्विदम् | छां. उ. ३.१४.१ | ८, ४४, १०९ |
| सर्वं तं परादाद्यो | बृ. उ. २.४.६ | १०३, १०९ |
| सर्वभूतेषु चात्मानम् | ई. उ. ६ | १०९ |
| सर्वं समाप्नोषि | भ. गी. ११.४० | १९,४४,५७,१०९ |
| सर्वं ह वा एतत् | — — | १३५ |
| सर्वाणि भूतान्यात्मैव | ई. उ. ७ | १०९ |
| सर्वाणि रूपाणि | तै. आ. ३.१२.७ | २९ |
| सर्वादीनि सर्वनामानि | पा. १.१.२७ | ८७ |
| सर्वे वेदा | क. उ. २.१५ | २९ |
| सर्वेषु भूतेष्वेतम् | ऐत. २.३.४ | १०८ |
| सलिल एको द्रष्टा | बृ. उ. ४.३.३२ | ९८ |
| स वा एष आत्मा | छां. उ. ८.३.३ | १०५ |
| स वा एष महानज | बृ. उ. ४.४.२२ | ३० |
| स वै ब्रह्मवित् | बृ. उ. ३.७.१ | २० |
| सह शाखया | — — | १६ |
| सहस्रशीर्षा पुरुषः | ऋग्वेदसंहिता १०.९०.१ | ३९ |
| सहस्रस्थूणे वितते | — — | ४० |

| | | |
|---|---|---|
| स हि सर्वस्य कर्ता | बृ. उ. ४·४·१३ | १०८ |
| संहृत्य सर्वम् | — — | ३९ |
| साधनस्योत्तमत्वेन | ब्रह्मपुराणम् | १३७ |
| सायं गोष्ठे गावः | — — | २० |
| सुदुर्दर्शमिदम् | भ. गी. ११·५२ | ४० |
| सुपां सुलुक् | पा. ७·१·३९ | २३ |
| सुप्त्वा व्यादत्त | प्रेत्यभावपरीक्षा | ४३ |
| सेतुं दृष्ट्वा | — — | ९८ |
| सैषानन्दस्य मीमांसा | तै. उ. २·८ | १३५,१३६ |
| सोऽकामयत | बृ. उ. १·२·४ | ४३ |
| सोऽन्वेष्टव्यः | छां. उ. ८·७·१ | २८,३५ |
| सोमेन यजेत | तै. सं. ३·२·२.३ ? | ७५ |
| सोऽश्नुते सर्वान् कामान् | तै. उ. २·१·१ | १६,५०,१३३,१३६ |
| सोऽस्माच्छरीरात् | — — | ३१ |
| स्त्रियो वैश्यास्तथा | भ. गी.९·३२ | १३६ |
| स्वयंदासास्तपस्विनः | — — | ५५ |
| स्वर्गकामो यजेत | — — | १३ |
| स्वाध्यायोऽध्येतव्यः | शत. ब्रा. ११·५·७·२ | ५५ |
| स्वाभाविकी ज्ञानबलक्रिया | श्वे. उ. ६·८ | ४०,६१ |
| हलि सर्वेषाम् | पा. ८·३·२२ | ८७ |
| ह्रीर्धीर्भीः सर्वं मन एव | बृ. उ. १·५.३ | ६१ |
| हृदयं ब्रह्म | बृ. उ. ४·१·७ ? | १०४ |
| हृदयस्य भवति | — — | १०४ |
| हृदयमारुणय | — — | १०५ |


Indira Gandhi National Centre for the Arts

## द्वितीयं परिशिष्टम्

# श्रुतिसिद्धान्तप्रकाशस्थविषयाणामकारादिक्रमेण सूची।

( विषयनामनिर्देशानन्तरोऽङ्कः पृष्ठाङ्क इति बोद्धव्यम्।)


अंशत्वेनैक्यभङ्गः २८
अंशित्वहेतुभङ्गः ७०
अक्षस्य लिङ्गादिबाध्यत्वे बाधकम् ७७
अक्षस्यागमबाध्यत्वे बाधकम् ७५
अक्षस्यानुमानबाध्यत्वे बाधकम् ७१
अखण्डलक्षणभङ्गः ४५
अखण्डार्थभङ्गः ४६
अज्ञानाश्रयत्वभङ्गः ११३
अनिर्वाच्यत्वे प्रमाणभङ्गः ११५
अपच्छेदन्यायवैषम्यम् ७६
अवाच्यत्वभङ्गः ५३
असतः साधकत्वभङ्गः ८५
अहमर्थस्यात्मत्वम् ५६
आगमस्यैक्यपरत्वभङ्गः २३
आविद्यके रूप्योत्पत्तिभङ्गः १२०
'इदं सर्वं यदयमात्मा' इति श्रुत्यर्थः १०८
ईश्वरस्य नित्यविग्रहोपपत्तिः ३९
'एकमेव' इति श्रुत्यर्थः ९८
ऐक्यप्रामाण्यभङ्गः २१
ऐक्येऽनुमानभङ्गः २६
कर्तृत्वाध्यासभङ्गः ५९
चिदभिन्नसुखरूपतायाः पुमर्थत्वभङ्गः १४०
जगत्सत्यत्वानुमानानि ७९
जगदसत्त्वादिस्मृत्यर्थः ११०
जडत्वहेतुभङ्गः ६८
जिज्ञासासूत्रस्य मननविधिमूलत्वम् १३०
जीवस्य प्रतिबिम्बत्वेनैक्यभङ्गः २९
जीवाणुत्वोपपत्तिः ३०
जीवैक्यभङ्गः १३
ज्ञाननिवृत्त्यन्यथानुपपत्तिभङ्गः ९७
'तमेव' इत्यादिश्रुत्यर्थः १०९
देहात्मैक्यारोपभङ्गः ६२
दृग्दृश्ययोः संबन्धानुपपत्तिभङ्गः ८८
दृश्यत्वभङ्गः ६६
दृष्टिसृष्टिभङ्गः १११
निमित्तोपादानत्वभङ्गः ४१
निर्विशेषे प्रमाणभङ्गः ३८
'नेह नाना' इति श्रुत्यर्थः १००
परमते जीवन्मुक्तिभङ्गः १३५
परमते निमित्तत्वभङ्गः ४२
परमतेऽविद्यानिवृत्तिभङ्गः १३८
परमतेऽविद्यानिवर्तकत्वभङ्गः १३९
परमतेऽविद्याविषयत्वभङ्गः ११४
परमते श्रवणादिविधिभङ्गः १२६
पराभिमतैक्यभङ्गः २०
परिच्छिन्नत्वहेतुभङ्गः ६९

प्रतिकर्मव्यवस्थाभङ्गः ९१
' प्राणा वै ' इत्यादिश्रुत्यर्थः ११०
ब्रह्मणो विश्वोपादानत्वे प्रमाणभङ्गः ४२
भेदखण्डनोद्धारः ३
भेदेऽनुकूलतर्काः १०
भेदपञ्चके प्रत्यक्षम् ९
भेदश्रुतेरनुवादकत्वभङ्गः १६
भेदे षड्विधतात्पर्यलिङ्गम् १९
भ्रमस्य ख्यात्मकत्वभङ्गः १२१
मिथ्यात्वनिरुक्तिभङ्गः ६४
मिथ्यात्वभङ्गः ६६
मिथ्यात्वानुमाने प्रतिकूलतर्काः ९३
मुक्तानां तारतम्यसिद्धिः १३३
' यत्र त्वस्य ' इति श्रुत्यर्थः १०२
' यद्द्वैतं न पश्यति ' इति श्रुत्यर्थः १०४
' वाचारम्भणम् ' इति श्रुत्यर्थः १०५
विवरणोक्तनियमविधित्वभङ्गः १२४
शब्दापरोक्षत्वभङ्गः १२७
श्रुतेः पारमार्थिकभेदपरत्वम् १७
सत्तात्रैविध्यभङ्गः १२२
सत्त्वश्रुतेरनुवादकत्वभङ्गः ८२
सदनन्तगुणे ब्रह्मणि प्रमाणम् ३३
स्वाभिमतस्वप्रकाशत्वोपपत्तिः ५४

Indira Gandhi National Centre for the Arts

# शुद्धिपत्रम्

## श्रुतिसिद्धान्तदीपिका

| पृष्ठाङ्कः | पङ्क्तिसंख्या | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३ | १ | कण्ठस्थमणिलाभे न | कण्ठस्थमणिलाभो न |
| ३ | २ | प्राप्तिस्तत्रास्ति | प्राप्तिस्तन्नास्ति |
| ५ | ४ | पूर्णानन्तगुणाब्धेर्नान्यिथा परोक्षता | पूर्णानन्तगुणाब्धेर्नान्यथापरोक्षता |
| ६ | २३ | दीपस्तम्भ | दीपस्तम |
| १० | ७ | निरपेक्षचिदात्मना | निरपेक्षचिदात्मता |
| १२ | १० | विश्वमिषत्त्वं नैव | विश्वं मिषत्त्वेनैव |
| १३ | १२ | यो व्याकरणनिष्पाद्यो | योऽव्याकरणनिष्पाद्यो |
| १३ | २० | एव | इव |
| १४ | ९ | लोहशुक्तित्वबोधेन | लोहः शुक्तित्वबोधेन |
| ३० | १२ | तेरपि | श्रुतेरपि |

## श्रुतिसिद्धान्तप्रकाशः

| पृष्ठाङ्कः | पङ्क्तिसंख्या | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १८ | ११-१२ | भूमाविद्यायाः | भूमविद्यायाः |
| २२ | ८ | निर्विशेषणत्वम् | न विशेषणत्वम् |
| २२ | २८ | °मैक्यज्ञानप्रामाण्यं नापेक्षते | °मैक्यज्ञानप्रामाण्ये नापेक्ष्यते |
| २३ | ९ | °तत्तद्व्यक्तितत्त्वादिना भेदोऽपि | °तत्तद्व्यक्तित्वादिना भेदेऽपि |
| २६ | १३-१४ | विभेदजनके ज्ञाने | विभेदजनकेऽज्ञाने |
| २६ | १७ | देवादिधीजनके ज्ञाने | देवादिधीजनकेऽज्ञाने |
| ३१ | ४ | गच्छति | गच्छन्ति |
| ३६ | २५ | केवलान्वकेयिसत्त्वेन | केवलान्वयिसत्त्वेन |
| ३९ | ३ | आदित्यवर्णस्तमसः | आदित्यवर्णं तमसः |
| ४२ | २७ | °संज्ञासिद्धेरि सूत्रमनादं- | °संज्ञासिद्धेरिदं सूत्रमना- |
| ९० | २४ | तयोरमिथ्यात्वप्रकृतेऽपि | तयोरमिथ्यात्ववत् प्रकृतेऽपि |
| ११६ | ३१ | नापाद्यापादकयो रद | नापाद्यापादकयोरभेद |

समाप्तश्चायं ग्रन्थः ।

IGNCA RAR
ACC No-628
629

Indira Gandhi National
Centre for the Arts